प्रवेश सं० ८८५ विषय: धर्मशास्त्रम् क्रम सं० २

नाम प्रयोगचिन्तामणिः (रामकल्पद्रुमाख्य महानिबन्धः) ग्रन्थकार अनन्तभट्टः

पत्र सं० ~~१-१५६~~ १५९-१६०, १६०-१७१, १-३८, ३८-~~१५०~~ ११३, ११९-१२८, अपूर्ण

श्लोक सं०

अक्षर सं० (पंक्तौ) 62 पंक्ति सं० (पृष्ठे) १४

आकार: १०.२" x ४.३"

लिपि: दे.ना. आधार: का.

वि० विवरणम् पू० 13694 शक: १७००

पी० एस० यू० पी०—७७ एस० सी० ई०—१९५१—५०.०००

आ० ७३३५

Indira Gandhi National Centre for the Arts

१२ वैश्वदेव
१० स्वस्तिसंस्का १३२ विषवानां छिद्रास
ति छंति छसां यात्रा निर्णसागः ११३
१५२ लाजाहो
५ श्रेयसं पाघ नतस्य [illegible]
६ष्ठ ए अभ्या नी नदेता भ्रांसाए
माध्यान्हसंध्या १०० सायंभिक्षा
९६ अग्निहोत्र सावित्रिं ०९
विवाहहोम १४८
१०९ नांदी श्राद्ध माधव
६० अभिजित नक्षत्र
कुशकंडिका
१०२ देवता स्थापन
१४६ अग्निमंत्र
५१ [illegible] उपद
५५
१३९ कन्यादान त्रिवार
१३९ श्राद्ध भोजन

॥ प्रयोगचिंतामणि प्रारंभः ॥ ऽऽऽऽऽऽऽऽ ३ऽ ऽऽऽऽ ३ऽ ३ऽ ऽऽ

Indira Gandhi National Centre for the Arts

प्र॰ पो॰ १

श्रीगणेशाय नमः ॥ प्रणौमि विज्ञानदीनाभिमतं रं कमलाकरं । अंबा मरुं मतीश्रीकांलक्ष्मीं लक्षणशालिनीं ॥ १ ॥
जगत्पूरोः श्रीकमलाकरस्य हितां रविस्तोलानिबंधकीर्तेः । अनंतनाम्नाविबुधः सतोस्य श्रीरामकल्पद्रुममात
नोति । प्रयोगपारिजाताख्याः निबंधाः संति यद्यपि तेष्वस्त्वस्य विशेषो यः पंडितैः सोवधार्यतां । तत्र तावद्यौतस्म
र्तकर्मणां मध्ये श्रौतस्य प्रत्यक्षश्रुतिमूलत्वेन प्राधान्येपि तदनुष्ठानस्य गर्भाधानादिसंस्कारायत्तत्वात्प्रथम
तः संस्कारेषु किंचिदुच्यते । अंगिराः । चित्रकर्म यथानेकैरंगैरुन्मील्यते शनैः । ब्राह्मण्यमपि तद्वत्स्यात्संस्का
रैर्विधिपूर्वकैः । स्विस्विगृह्ये यथाप्रोक्तास्तथा संस्कृतयो खिलाः । कर्तव्या इति कामेन नान्यथा सिद्धिमृ
च्छति । तथा पंचविंशतिसंस्कारैः संस्कृता ये द्विजा यत्तेः । ते पवित्राश्च योग्याश्च श्राद्धादिषु सुयंत्रिताः । ते
च संस्कारा गर्भाधानापुंसवनानामुपनयनांता ज्ञाएवानिसाः । ननु सर्वे स्नानाद्यः तथा त्वेद्र्व स्वयो दैव प्रव्रजेदिसादिश्रुति
विरोधापत्तेरित्युक्तं प्रयोगपारिजाते । तेषु च संस्कारेषु । अन्येषु च कर्मसु गर्भाधानादिसंस्कर्तापि ताम्रं ब्रह
नः स्मृतः तत्त्वभावे कुलीनः स्याद्वांधवो वान्यगोत्रः इति वाक्यात्सिद्ध उपनयने सुत्रामिसादिवाक्यात्पित्रादेरधि
कारः । तस्यापि सपत्नीकस्यैव यत् तस्य युक्तो धुर्यो बस्ते तां दिदि ज्योतिरजरमारभेतां पाणिमहणादि सह
त्वं कर्मसु तथा पुण्यफलेषु चेति श्रुतिस्मृतिलिंगाद्यैः कामश्रुतिगतपुंस्त्वाविवक्षया चास्त्रिया अप्यधिका
रात् अत्राधिकारो नाम फलभोक्तृत्वमिति केचित् अन्ये तु फलभोक्तृत्वासाधारणाधिकरणकर्तृत्वमेवा
धिकारः । श्राद्धादेरपितुः फलभोगेपि तेनकर्तृत्वाभावाद्दृसिज्यां च कर्तृत्वेपि फलभोगाभावाद्दूषणं चू यं नचै

प्रवृत्तिप्रयोजिकायाः

तेषु च कर्मकर्तृमशक्यत्वेनैवाधिकारोनिसातिरिक्तः सर्वत्र श्राद्धादिषु तु कर्तृत्वमिति । ५
वजातेष्ट्यादौ पितुः फलभोगाभावेन कर्तृत्वाभावान्नाधिकारः स्यादिति वाच्यं । प्रवृत्तिप्रयोजक फले छासमानाधि
करण कर्तृत्वस्य विवक्षितत्वात् । जातेष्ट्यादौ च फलस्यानिष्टत्वेपि पुत्रस्य फलं स्यादितीच्छया प्रवृत्तिप्रयोजिका
याः फले च्छायाः । यजमाननिष्ठत्वादधिकाराविघातः । एवं श्राद्धादिस्थलेपि । तत्रापि पितुः फलं स्यादितीच्छासमानाधिक
रणकर्तृत्वादधिकारः स्यादिति वाच्यं ॥ दक्षिणाप्राप्तिर्मे भूयादितीच्छाया एव ऋत्विक्प्रवृत्तिजनकत्वेन यजमान
स्य फलं भूयादितीच्छायाः प्रवृत्तिप्रयोजकत्वाभावादित्याहुः । स चायमधिकारो न दंपत्योः संत्र व्यत्र सेकं । तत्र
हि यजेरन् नासीरन्निति कर्तृबहुत्वश्रवणात्तथा । अत्र तु कर्तृत्वस्य व्यासज्यवृत्तित्वाद्व्यासज्यस्यैवाधिकारद्व
तिषष्ठस्य वृं । अत्र च दंपत्योः कर्तृत्वं तत्साश्रयत्वरूपे । तथा चेतस्य प्रत्येकवृत्तित्वात् प्रत्येकमधिकारसत्तेः । किं
तु । तत्साश्रयत्वसमनियतमखंडोपाधिरूपमेव तदिति नव्याः । अयं चाधिकारो यत्र दंपत्योः सहत्वश्रुतं तत्रैव ।
यत्र तु महादानव्रतादौ पृथगधिकारस्तत्र पृथगेव कर्तृत्वमित्यन्यत्र विस्तरः । अथ सर्वकर्मसाधारणं । किंचिदु
च्यते । याज्ञ्यहे । सुस्नातः सम्यगाचांतः कृतसंध्यादिकक्रियः । जितेंद्रियः सत्यवादी सर्वकर्मसु शस्यते । तथा । अधौ
ते क्षालयो ताच परिदध्यान्नवाससी । अहतं तु यजीदध्यात्सर्वकर्मणि संयतः । कात्यायनः । ईषद्धौतं नवं श्वेतं स
दशं यन्न धारितं । अहतं तद्विजानीयात् सर्वकर्मसु पावनं । हेमाद्रौ रुद्रमनुः । स्वयंधौतेन कर्तव्या क्रियाधर्म्या
विपश्चिता । न तु नेजकधौतेन नोपभुक्तेन वा क्वचित् । अन्यत्र तु अहतं यंत्रनिर्मुक्तं वासः प्रोक्तं स्वयंभुवा । शस्तं
तन्मांगलिक्येषु तावत्कालं न सर्वदेत्युक्तं । व्रतहेमाद्रौ । प्रागग्रमुदगग्रं वा धौतं वासः प्रसारयेत् । पश्चिमाग्रं
तत्रापि सधवायाः भर्तृद्धारैव कर्म पुण्याहवाचनादिनांदीश्राद्धं भर्तृः पित्रोरेवोद्देशात् । विधवायास्तु स्वतंत्रेणाधिकारो महादानव्र
तादिषु । तत्र सत्पतिव्रतानां स्त्रीयानां वाईप्यत्वं । तथा चोक्तं । श्राद्धमयूखे । स्त्रीणामप्यधिकारः इति अधर्माणां चादीनां तु सुतसंस्का

इच्छायाः पुत्रनिष्ठत्वात् । नचैवं अंतेवधायामपि पुत्रमात
स्य फलं भूयादितीच्छा

= विण्मूत्रकालेऽप्येवं मैथुनेऽप्येवमिति =
= कात्यायनसंग्रहे । पूर्वेक्तिधौतं कार्पासं देवपित्र्योश्च कर्मणि । ग्राह्यं शुद्धं विजानीयात् तदप्रक्षाल्य नाशुचिः । तदप्यदिनत्रयात् पूर्वं धौतमिसर्थः =
= पट्टवस्त्रं कंबलं च धौतमथादित्राविधौ । शुद्धं तदप्यशुद्धं पुनः प्रक्षाल्य शुचिः । पट्टस्य त्र्योदश सेटः । कृ[illegible] त्तरं निविडमिति ।

प्र० वं० दक्षिणाग्रं पुनः प्रक्षालनाच्छुचिः । तत्रैव मार्कंडेयः । अन्यदेव भवेद्वासः शयनीये नराधिप । अन्यद्रथ्यासु दे- | पद्म० पवि०
वानामर्चायामेव चान्यदेव हि । अन्यच्च लोकयात्रायामन्यदीश्वर दर्शने । योगयात्रावल्क्यः । अप्रावेधौतव-
स्त्रस्य शाणक्षौमादिकानि च । कृतपंचयोगपट्टं वा द्विवासा येन सौ भवेत् । आत्रेयः । वस्त्रं तरीयात्तादेवं
गुलं यंगुलं चतुरंगुलं वा स्वत्रैः पूरीमंडलं कुर्यादिति । तथा । कुशोपरि निक्षिपेत्तथायलोपवीतिनौ । सर्वकर्म
प्रकर्तव्यमन्यथा विफलं भवेत् । अत्र समासो तगे तस्याप्याकृष्य पादपदस्य जानुनोर्जंघयोश्च प्रसेककत्वान्वयः ।
अथ गृह्यानुशासं केषांधकानामिति तथा दर्शनात् । स यथा अवमता अवसक्थिका अथादयः काशघर्षेत्
तीययेति समासः । स्थितिविशेषः साकृतं येन सवद्धपरिकर इति तुष्टीदत्तः । आपस्तंबः । आर्द्रवासास्तु यः कुर्या
जपहोमप्रतिग्रहान् । सर्वं तद्राक्षसं विंद्याद्बहिर्जानु च यत्कृतं । तथा पारिजाते । आसनेदेवतातीनाम[illegible]स्ना-
नकर्मणि । पंचगव्यप्रयोगे च द्विजः कूर्चत्रयोजयेत् । नवभिः सप्तभिर्दर्भैः पंचभिः क्रमशः कृतः । कूर्चः श्रेष्ठोमध्यम
श्च कनिष्ठश्च त्रिधामतः । तत्कूर्पिंडे गुला तेषां तदूर्ध्वे चतुरंगुलमिति । मुक्तकेशश्च वस्त्रेणस्थले वा आर्द्रवाससा । | वसिष्ठः ।
जपो होमस्तथा दानं तस्य वेनिः फलं भवेत् । विष्णुपुराणे । होमे देवार्चनाद्यासु क्रियास्वाचमने तथा । नैकव
स्त्रः प्रवर्तेत द्विजो वाचनके जपे । शातातपः । सव्यादंसात्परिभ्रष्टं कटिदेशाद्धृतं बहुः । एकवस्त्रं तु तं विद्या
द्दैवे पित्र्ये च वर्जयेत् । हेमाद्रौ शाट्यायनः । दानमाचमनं होमं भोजनं देवतार्चनं । प्रौढपादो न कुर्वीत स्वा
ध्यायं पितृतर्पणं । आसनारूढपादस्तु जान्वोर्वा जंघयोस्तथा । कृतावसक्थिको यस्तु प्रौढपादः स उच्यते हि | २
१०

= सुवर्णं धारयेद्विद्वान् दैवे कर्मणि यत्नतः । सकुशा रजतं पित्र्ये तत्रैव माषमात्रतः इति । = १

ष्टितः । जपे होमे तथा दाने स्वाध्याये पितृतर्पणे । अशून्यं तु करं कुर्यात् सुवर्णरजतैः कुशैः । प्रयोगपारिजाते मं-
त्रेण धारयेद्विप्रः पवित्रं सर्वकर्मसु । मंत्रं विना धृतं यत्तु पवित्रमफलं भवेत् । पवित्रं वेत्यस्यादिमं त्रच्छितयमस्य तु
तत्रैव । निमित्ते मिति केवापि कुर्वीपक्रमणे द्विजः । धृतं पवित्रं कर्मान्ते ग्रंथिं मुक्त्वा तु तत्त्यजेत् ॥ इति परिभाषा ॥
तत्र संकल्पात्पूर्वं कृतसमाहर्मार्कंडेयः । शिरःस्नातस्तु कुर्वीत दैवं पित्र्यमथापि च ॥ प्राङ्मुखोदङ्मुखो वापि
श्मश्रुकर्म च कारयेत् । तत्रादौ श्मश्रुकर्म । ततः शिरःस्नानं तच्च मंगलकृत्यादौ तिलामलकादिना अभ्यंगस्नानं चे-
ति शिष्टाः । निर्णयसिंधौ कात्यायनः । मांगल्यं विद्यते स्नानं वृद्धिपूर्वोत्सवेषु च । स्नेहमात्रसमायुक्तं मध्याह्ना-
त्प्राक् तदिष्यते । वह्निनारदीये । शिरोऽभ्यंगावशिष्टेन तैलेनांगं न लेपयेदिति । ततः । आचमनं कुर्यात् दैवादिना
दिकार्याणि ॥ तथा कुर्वीत सिद्धादनं । कुर्वीत सम्यगाचम्य प्रयतो विप्र द्विज इति मार्कंडेयवचनात् । ततः प्राणा-
गु याममं कुर्यात् । तथा च वृद्धमनुः । प्राणानायम्य कुर्वीत सर्वकर्माणि संयतः । प्राणायामैस्त्रिभिः पूतस्तत
ओंकारमर्हतीति वामनपुराणे । सर्वमंगलमांगल्यं वरेण्यं वरदं विष्णुं । नारायणं नमस्कृत्य सर्वकर्माणि कारयेत्
ततः संकल्पः । प्रयोगपारिजाते मार्कंडेयः । संकल्प्याचतथा कुर्यात्स्नानदानव्रतादिकं । अन्यथा पुण्यकर्माणि
निःफलानि भवंति चेति । संग्रहे । मासपक्षतिथीनां च निमित्तानां च सर्वशः । उल्लेखनमकुर्वाणो न तस्य फलभा-
ग्भवेत् । अत्र केचित् । ग्रहणादिनिमित्तस्य मासपक्षतिथीनां प्रयोगादेश्च देशविशेषमात्रस्योल्लेखः कार्योन
तु व्यापकत्वानामुत्तरायणमध्यदेशादीनामिति साहुः । पितामहचरणास्तु । पञ्चाङ्गयोगादिषु तीर्थेषु पुण्येष्वपि

Indira Gandhi National Centre for the Arts

तच्च प्रयोगांतर्गतमिति केचित् पृथक्कृतमिति बहवः। आद्यपक्षे कर्मप्रयोगसंकल्पं कृत्वा तत्कार्यं द्वितीये तु तत्कृत्वा कर्मसंकल्पः॥

प्र०चि० कार्या सुत्तराथर्णमध्यदेशादीनामित्याहुः। पितामहचरणास्तु॥ यथा प्रयागादिषु तीर्थेषु पुण्येष्वायतनेषु तिथि॥ सकृ०प्र०
२ माहात्म्यवाक्यात्प्रयागादितीर्थविशेषस्यांगत्वमेवं आर्यावर्तेः पुण्यभूमिर्मे मागपोरित्यादिवाक्येना विंध्य
यीवर्तादिसामान्यस्यांगत्वावगमान्निमित्तानां च सर्वेषां इति सर्वेषां। एतस्वारस्येन सर्वनिमित्तानामुल्ले
खः कार्यः। न च तेनैव सिद्धमित्यपक्षतिथीनामित्यर्थेन कर्मेति वाच्यं। विधिस्पष्टाको कार्तिकमासे दीक्षितो चा
ल्लेखो सिद्धान्तपितरस्तु साधारणमासाद्युल्लेखं प्रासर्थत्वात्। तेन मापकानां व्याख्यानां च सर्वेषामुल्लेखः का
र्य इत्याहुः। तत्र संकल्पे चांद्रस्यैव संवत्सरस्योल्लेखः कार्यो नान्येषां वत्सराणामिति लिखितं कालकांडे। तत्रक
रिष्यमाणामुककर्मांगत्वेन गणपतिपूजनादि करिष्य इत्येवं प्रयोगबहिर्भूतो गणपतिपूजनादीनां सं
कल्प इति केचित्। अन्ये तु वाजपेयसंकल्पोत्तरं बृहस्पतिसवसंकल्पवत्। प्रधानसंकल्पोत्तरमेवेषां सं
कल्प इत्याहुः। तत्रापि मार्गे तो हि गणाध्यक्षो यज्ञादौ यस्तु रोतमाः। तस्माद्विघ्नसमुत्पन्नं मत्क्रोधजमिदं तव
लिपमनुरागात्किं गान्निषु सीदगणपते न क्रते त्वक्रियते इति लिंगाच्च निर्विघ्नतासिद्ध्यर्थमादौ गणपतिः पूज्यः।
तच्च गणपतिपूजनं षोडशोपचारैः पंचोपचारैर्वा कार्यं ते च षोडशोपचाराः। विष्णुपुराणोक्ताः। एवमावाह
नं प्रोक्तमासनं तदनंतरं ततश्च पाद्यमर्घ्यं च ततस्त्वाचमनीयकं। स्नानं वस्त्रं चोपवीतं ततो गंधादिदीनं चंदनं।
पुष्पं धूपं च दीपं च नैवेद्यं तदनंतरं। नमो देयः प्रणामश्च ततो देया च दक्षिणा। विसर्जनं ततो देयात् उपचारा ३
स्तु षोडश॥ पंचोपचारपूजायां तु दक्षिणां गंधादिकान् नैवेद्यांतापूजायां चोपचारिके इतिवचनात्। षोडशोप

न

तच्च प्रयोगांतर्गतमिति केचित्। पृथक्कृतमिति बहवः। आद्यपक्षे कर्मप्रयोगसंकल्पं कृत्वा तत्कार्यं। द्वितीये तु तत्कृत्वा कर्मसंकल्पः

चारे पुनः स्नाने वस्त्रे च नैवेद्ये घ्राणे च मनं हरेदिति वचनात् एवमनंत्रयमंगत्वेन पुष्पात्। हरेरित्युपलक्ष
णं। क्वचित्तु विसर्जनमाग्निमारुता पूर्ध्वं मन्नूपाज्जेश्वरं तीति चतुर्थ्युच्यते। यथानवग्रहमखादौ तत्र विस
र्जनं। तेन सर्वत्र षोडशोपचारैव पूजा। पंचोपचारपूजा तु यत्र स्थापितदेवानां विसर्जनात् प्राकमध्ये पू
जोक्ता तद्विषयेति पितामहचरणाः। गणपतिपूजनोत्तरं च वृद्धिश्राद्धं। गर्भाधानादिसंस्कारेष्विष्टापूर्ते च ना
तुषपि। वृद्धिश्राद्धं पुराकार्यं कर्मादौ स्वस्तिवाचनमिति त्रिकांडीस्मरणादिति केचित्। वस्तुतस्तु पूर्वं वृ
द्धिश्राद्धं ततः स्वस्तिवाचनमित्यनेनैव सिद्धे वृद्धिश्राद्धसहितकर्मणः आदौ स्वस्तिवाचनप्रासर्थमिदं
तेनादौ स्वस्तिवाचनं ततो वृद्धिश्राद्धमिति शिष्टाः। गणपतिपूजनोत्तरं पुण्याहवाचनं तच्चैवं। यमः।
पुण्याहवाचनं सर्वं ब्राह्मणस्य विधीयते। तदेव निरोंकारं कुर्यात् क्षत्रियवैश्ययोः। हारीतः। गोमयेनो
पलिप्ते व्रीहिरंगवल्लीं कृत्वा विधेत्। तस्य धान्योपरि स्थाप्य पूर्णौ तु कलशद्वयं। दक्षिणोत्तरे चैव उत्तरे तु नि
धापयेत्। पात्रमक्षतपूर्णं तु फलपुष्पसमन्वितमिति। अत्र धान्यशब्देन सतुषद्रव्यमुच्यते तेन तस्य निधानं। पद्म
नि४ प्राग्य प्रसिधिं तु हि रेवानितं दुलेष्वपि धान्यशब्द प्रयोगात्तेषां निधानं। मिश्रं। उत्तरे तु निधापयेदिति वचनात्
उत्तरकलशस्य पूर्णपात्रनिधापनं तत्र वरुणपूजनं कुर्यादिति केचित्। अन्ये तु कलशद्वयस्थापितवरुणादे
वत्स्या त्यथाद्यार्थत्वापत्तेः कलशद्वयेपि पूर्णपात्रद्वयं संस्थाप्य तत्र वरुणपूजनं कुर्यादित्याहुः। तत्र कलश
लक्षणमुक्तं विष्णुधर्मे। हेमं वा राजतं वापि ताम्रं मृन्मयजं तु वा। अकालमव्रणं चैव सर्वलक्षणसंयुतं। पंचांगु

Indira Gandhi National Centre for the Arts

उ

प्र०वि० ४

लि ... ल्प मुख्ये पोडशांगुलं। पंचदशा: पंचदश। द्वादशांगुलकं मुखं स्वस्ममशांगुलंस्मृतमिति। हारीतोपि। सूत्रे
ण वेष्टितं कुंभ मपांपूर्णं सुभूषितं। मंत्रामारि मयं कृस्मो रत्नगर्भं समर्चितं। सितं तंडुल पूर्णेन पात्रेणापिहितानन
ममिति। तेनात्र सितं तंडुलम हतानां रेव पूर्णपात्र पूरणं। अन्यत्रशास्त्रादौ तु सौवर्णे राजते वापि ताम्रमृन्मयमेव
वा। श्रीह्यादिपूर्णं स्याद्ध्यात कुंभो परिपिधानकमिति संग्रहवचनाद्व्रीह्यादिभि: परिपूर्णमिति निष्कर्ष:। तथा
तीर्थोदकेन वा पूर्यं कलशं तु विचक्षण:। गजाश्वरथ्या वल्मीक संगमाद्ध्रदगोकुलात्। मृदमानीय विप्रेंद्र सर्वौष
धिसमान्वितं। यद्वा। अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात्॥ राजद्वाराच्च गोष्ठाच्च मृदमानीय निक्षि
पेत्। तथा। पंचरत्न समायुक्तं फलवस्त्र सुगान्वितं। पंचरत्नसमायुक्तं पूर्णपात्रयुतं तथा। पंचपल्लवा:॥
ते च। अश्वत्थोदुंबरौ जंबू चूतन्यग्रोधपल्लवा:। पंचभंगा इति प्रोक्ता: सर्वकर्मसु शोभना:। अस्मिंश्च कलशे ति
लप्य मपि प्रक्षेपसर्वं। अग्ने सुवर्णपूर्णकलशमिति दर्शनात्। सर्वौषधीनां सप्तमृदां च तत्र निक्षेपस्तेनाव्रग
धपुष्परत्न पंचपल्लव फलहिरण्यादि निधाय तंडुल पूर्णपात्र द्वये वरुणवाहनं कुर्यादिति शिष्टा:। महीद्यौरि
त्यादि मंत्राणां कलशाद्वये प्रावृत्ति:। तत:। दक्षिणस्य शिखेश्वे वदुत्तरस्य श्रवस्तथा। नचालयेद्दक्षिणस्य मुख
रक्षं तु चालयेत्। अन्यथा धर्महानि स्यादेष धर्म सनातन:। कलशस्य मुख इत्यादि मंत्रै: कलशप्रार्थनां ४
कुर्यात्। प्रयोगपारिजाते तु एवमेता: समावाह्य कलशे देवतास्तत:। एतन्मंत्रस्थितान्देवान्संपूज्य प्रा
र्थयेत्क्रमादित्युक्तं। तत: मातृदेवो भवेत्यादि वदेत्। प्रयोगपारिजाते तु। लक्ष्मीनारायणाभ्यां नम:। उमाम
येश्वराभ्यां वास्तु पुरुषाय मातृभ्यो नम:। पितृभ्यो। आचार्येभ्य:। इष्टदेवताभ्य: कुलदेवताभ्यो ग्रामदे
कलशस्य मुख इत्यादि मंत्रै: कलशप्रार्थनां कुर्यात्। २५

पुण्याहवा०

वताभ्य: सर्वेभ्यो ब्राह्मणेभ्यो नम इति प्रत्येकं नमेदित्युक्तं। तत: अवनिकृतजानुमंडल इत्यादिना पुण्याहवाचनं
कुर्यात्। पुण्याहवाचने विप्रा युग्मा वेदविद: शुभा:। यज्ञोपवीतिन: शस्ता: प्राङ्मुखास्सु: पवित्रिण:। गंधपुष्पाद्यु
र्चिताश्शुद्धा: सोत्तरीया: कुशादिपुष्पा इति। तत्र तिष्ठेयु: प्राङ्मुखा युग्मा वक्तारो दर्भपाणय:। उदङ्मुखो वाचयीतेति
क्षेत्रे प्यश्व दक्षिणे इति शौनक वचनात् ब्राह्मणा: प्राङ्मुखा: कर्ता उदङ्मुख इति केचित्। आश्वलायनस्तु प्राङ्मु
खान्विप्रान्गंधाद्यै: संपूज्य स्वयं प्राङ्मुखस्तानुदङ्मुखान्स्वस्ति वाचयेदित्याह। तत्तद्दीर्घा नागा नद्योगि
रय इत्यादि वदेत्। शांतिपुष्ट्यावि घ्नकार्या: शक्ता: पंचदशी नतु। अस्तु शब्दांत मुच्चरेन्नवाचयित्वा तत: पर
मित्यादि कारिकोक्ते: पंचदशौ वदेदिति। सांप्रदायिका:। यस्यापत्यप्रतिकृत मस्त्विस्याद्यपि वदेदिति केचित्।
कारिकायां। प्रस्तृत्य देवतायां तु होमं कुर्याद्विचक्षण:। तस्या नाम गृहीत्वाथ प्रीयतामिति निर्वाहस्याग्नि: पं
अधात: पुण्याहदेवतामाख्यास्याम: पुण्याहं वाचयिष्ये इन्द्राय गृह्णीयादसौ प्रीयतामिति विवाहस्याग्नि: पं
चमेहदुंबर:। स्थालीपाकस्याग्निर्गर्भाधानस्य वेधा: ब्रह्मा पुंसवनस्य प्रजापतिर्निष्क्रमणस्यान्नप्राशनस्य सवि
ता चौलस्य प्रजापतिरूपनयनस्येंद्र: श्रद्धा मेधे सवितासमावर्तनस्य श्रीरिंद्रो वास्तुलगवस्येशान: प्र
सवरोहणस्योपाकर्मणश्च सविता प्रजापतिरायुष्य होमस्य वास्तोष्पतिर्वास्तु होमस्याग्नि: शांति होमस्य ता:।
तडागादीनां वरुण: कूष्मांड होमस्याग्निरेषयश्चाग्रायणस्य सोमोग्न्याधेयेग्नि: सोमं चेंद्र: प्रीयतामित्येवम
न्येषां होमानां याज्यानुवाक्ययोर्देवता तस्या सौ प्रीयतामिति। अन्यत्रापि। प्रधानदेवताया तु स्याच्चिकी
तथा ऋग्यजु: सामाशीर्वचनमित्युक्ते वेदत्रयोक्तान् आ १

Indira Gandhi National Centre for the Arts

पुण्या

प्र०वि०
५

येति कर्मणः। असाविति तु तां ब्रूयात्संदेहे तु प्रजापतिमिति। कारिकायां। पुण्याहं स्वस्ति मृद्धिं च भवन्तो ब्रुवन्त्विति॥
त्यादि वदेदिति पक्षांतरं। तथा पुण्याहादे स्त्रिरभ्यासो मंद्रमध्योच्चनिस्वनां। आश्रयोरन्निमे सर्व पथागमेप
रंपरा। आगमशब्देन आगमज्ञा आचार्याः उच्यते। तथा। ॐमुक्तिपूर्वो पुण्याहे भवंत इति साधितात्। परं
ब्रूयुश्चते सर्वे ॐ पुण्याहमिति तीति च। तथा वक्तारश्च तुर्थ्यं तत्तं नामोक्तिपूर्वकं। स्वस्तीति च प्रति ब्रूयु
स्थ सर्वे पितद्विजाः। तेन नमः स्वस्तीत्यादिना स्वस्तियोगे चतुर्थी विधानाद मुक कर्मणे स्वस्ति भवंतो
ब्रुवंत्विति वदेत्। अन्यथा दात्पुपरस्य नेन लुक् स्यात्। एतेन स्वस्तीत्येव प्रयोगो न तु स्वस्ति मिति।
केचित्तु स्वस्तियोगे मद्य मितिय त्रैव च तुर्थ्युक्त्यानिराकांक्षत्वेन कर्मशब्दे च तुर्थ्युपपत्तो मानाभावात्।
तेन मद्य मित्यस्य कर्मण इत्यनेनान्वयेन कर्मणः [illegible] त्यर्थः। एवं च आयुष्मते मद्य
हं स्वस्ति भवंतो ब्रुवंतु। आयुष्मते स्वस्तीत्वित्यादि प्रतिवचनमप्युपपद्यते। नह्यत्र कर्मणः
प्रणवाद्यं त्रिरावश्यक दत्तीत्विनापरे। सवच्छद्विनेव पुण्याहब्रुवान्ति २८

सहकुर्बुविनेइत्येव ५

वताश्च सर्वेभ्यो ब्राह्मणेभ्यो नम इति प्रत्येकं नमस्कृत्युक्ते। ततः ॐ अवनिकृतजानुमंडला इत्यादिना पुण्याह वाचनं कु
र्वतां ॥: स्वस्ति भवंतो ब्रुवंत्वित्यर्थः। एवं च आयुष्मते मह्यं स्वस्ति भवंतो ब्रुवंतु। आयुष्म
पीत्। पुण्याह कर्मणः कर्त्रे मह्यं स्वस्ति भवंतो ब्रुवंत्वित्यर्थः। एवं च आयुष्मते मह्यं स्वस्ति भवंतो ब्रुवंतु। आयुष्म
ते स्वस्तीत्यादि प्रतिवचनमप्युपपद्येत न ह्यत्र कर्मणः। अयुराशास्ते। तर्के स्यश्री रत्यादेः स्वसंबंधि
त्वेनेष्यमाणत्वे न तत्राप्यपाटाच्च। प्रयोगरत्नेप्येवं तेन कर्मण इत्येवं प्रयोगमभिदधाना। पारिजातादयो बंधा
एव। वस्तुतस्तु मह्य मित्येवं प्रयोगाभाव एव तदाकांक्षायां कर्मण इत्येवं चतुर्थी प्रयोगः पारिजातोक्त इति न क
म्युपपत्तिः। तेनात्र पक्षद्वयं। तत्रापि स्वस्ति भवंतो ब्रुवंतु ॐ स्वस्तिरित्येवं पुल्लिंगः स्वस्तिशब्दः प्रयोज्यः। इष्टश्च स्या
स्वस्ति विधतः स्वस्तिरित्यादौ पुल्लिंगः स्वस्तिशब्द इति केचित्। तन्न। कारिकायां स्वस्तीति च प्रति ब्रूयुरिति अ
व्ययरूपस्यैव स्वस्तिशब्दस्य प्रयोगात्। कारिकायां। प्रयुक्तिविषये सर्वत्र स्त्रीपत्नीयेत्तरूपतामिति। तुर्यश्री रस्ति
ति ब्रूयादस्तु श्रीरिति वह्निजाः। ततः पुरं प्रयोगी राजनादि मंगलं कुर्युः। ब्राह्मणाश्चाभिषिंचेयुः। तत्र पत्नी वामस्था
गे। सर्वेषु धर्मकार्येषु पत्नी दक्षिणतः स्थिता। विप्रपादक्षालने तु अभिषेके तु वामत इति स्मृत्यंतरात्। इदमत्र
गृह्यं। अथ स्वस्त्ययनं वाचयेदिति। अथ तेषां भोजनानंतरं स्वस्त्ययनमस्त्विति वाचयेदिति केचित्। पुण्याहवाच
नोपलक्षणार्थमिति प्रयोगपारिजाते। कारिकायां। जलदूर्वाक्षितिः शांतिं ततः कुर्युः समाहिताः। स्वस्ति वाचनमि
त्येतत्सर्वेषामृद्धिमेणां। आदावंते प्रयोक्तव्यमिति गृह्यविदां मतं तेनांते पि पुण्याहं स्वस्ति मृद्धिमित्यादि वदेत्। अ
न्येतु वैदिके तांत्रिके वादौ ततः पुण्याह इष्यत इत्यादिवचनादादावेव पुण्याहवाचनमाहुः। तथा। यत्किंचिच्छ्राद्धि
कं स्तुकाप्रतिगृह्य च वा शुचिः। अब्राह्मणेश्च पुण्याहे नार्हः स्यादिति मे मतिः। इति पुण्याहवाचनं। ततो वृद्धिश्राद्धं
ण

५ द्वि
१ क

प्र॰चिं॰ ५५

तच्च कार्यमभ्युदयश्राद्धं श्रौतस्मार्तेषु कर्मणि। आश्वलायनवचनात्। अन्यथोपनयनादिष्वपि न च नाव सोमयागा मातृपूजन
दिश्रौतकर्मसु स्मार्तेषु चगर्भाधानादिसंस्कारेषु। वापीकूपाद्युत्सर्गेषु वृषोत्सर्गेऽपि सत्यत्र [illegible] तत्र मातृपूजापूर्व
कं कार्यं अकृत्वा मातृयागं तु पितृकृत्यं समाचरेत्। तस्य क्रोधसमाविष्टा हिंसामिच्छन्ति मातरः। इति शातातप
स्मरणात्। पुष्पैर्धूपैः सनैवेद्यैर्गन्धाद्यैर्भूषणैरपि। पूजयित्वा मातृगणं कुर्याच्छ्राद्धत्रयं बुधः। इति [illegible] मातरश्च गौ ग-
रीपद्मा इत्याद्याः षोडश [illegible] उक्ताः। तत्रापि प्रमातृत्वात्। कमातरः इति [illegible] तदा चतु पा
दशाप्यन्यथा षोडश। अत्र चब्राह्म्याद्यास्तथा। सप्त दुर्गा क्षेत्रगणाधिपानिति वचनाद्दुर्गादिपूजनं केषांचि
दाचारादिति पितामहचरणाः। अत्र केचित्। तिस्रः पूज्याः पितुः पक्षे तिस्रो मातामहे तथा। इत्येता मातरः प्रोक्ताः
पितृमातृस्वसाष्टमीति प्रयोगपारिजाते वचनान्मनुष्यमातॄणामपि पूजनमाहुः। एतासां च ब्राह्मीत्यादिनाम्
प्रत्येकं देवतात्वं पक्षे कांगत्वसमये न पदार्थानुसमयेन वा प्रत्येकं पूजा। मातृत्वेन देवतात्वे तु सैकैव पूजेति तत्रा
कुलादिपि दर्शितं संप्रदायिकाः। वस्तुतस्तु प्रत्येकदेवतात्वे पितृत्रयेणैव तांबूलादीति युक्तं। अत्र चाकृत्वा मातृयागं तु
पूजयित्वा। मातृगणमित्यादिवचनाच्च मातृपूजनं नान्दीश्राद्धस्य नित्यमिति सर्वेषां पूजेति वचनादि श्राद्धं। न
तिश्राद्धं ते च मातृविसर्जनमिति केचित्। अन्ये तु कर्मादिषु तु सर्वेषु मातरः सगणाधिपाः। पूजनीयाः प्रयत्नेन पू
जिताः पूजयंति ताः। इति मनुवचनैः साक्षात् कर्मांगत्वेनागताद्यास्तु मातृपूजायाः दर्शपूर्णमासस्थापितत्वात्
मेव पूजनेति च तत्र श्राद्धात्पूर्वकालत्वमात्रबोधनादंगत्वे मानाभावात्। सत्यपि चांगत्वे विसर्जनं तापादे वमा
तृपूजा पाकांगत्वोपपत्तेः एवं विसर्जनांता मातृपूजा कृत्वा प्रश्नात् श्राद्धमित्याहुः। एवमेव तु युक्तं। एतच्छेषोप ६

मातृत्वेनैकं वा तत्र प्रत्येकं देवतात्वपक्षे १ दानानंतरं क्लेशहरः २

तिथीशमातृपूजानंतरं कुड्यलग्नां वसोर्धारां सप्तवारान् घृतेन तु कारयेत् पंचवारं वा नातिनीचां नातिउच्छ्रितामिति व
चनं तु छंदोगादिपरं। अन्येषां तु नियतं। बहूनां यांसा घृतदानो कामिति वचनात्। कारिका लघ्वभ्युदयः। यच्चाग्न्यागारं स्व
शाखायां पारम्पर्यमविरोधि यत्। विद्वद्भिस्तदनुष्ठेयमग्निहोत्रसमो विधिरित्युक्तेः। मातृकाश्च। प्रतिमासु च शुद्धा
सु लिखिता वा पटादिषु। अपि वाक्षतपुंजेषु नैवेद्यैश्च पृथग्विधैरिति छंदोगपरिशिष्टात्। प्रतिमास्वक्षतपुंजे
षु वा पूज्याः। ततो वृद्धिश्राद्धं तत्र देवस्थाने मातृश्राद्धं च पूर्वं स्यात् पितॄणां तदनंतरं। ततो मातामहानां च श्राद्धं तान्मु
षु वा पूज्याः। ततो वृद्धिश्राद्धं तद्दैवं पूर्वं कर्मादिषु मातृकाश्राद्धं कर्मादिनिकृष्टपेत्कं
पाक्रमेदिति शातातपोक्तेः। अनेनक्रमोऽपि सिद्धः। तत्काल माहगार्ग्यः। पूर्वेद्युर्मातृकाश्राद्धं कर्मादिमात्रकाश्राद्धम
पु: उत्तरेद्युः प्रकुर्वीत मातामहगणस्य तु। तेन श्राद्धत्रयं दिनत्रये कार्यमित्येकः पक्षः। अथ पूर्वाह्णे मातृकाश्राद्धम
न स्यान्ने पेटकं तथा। ततो मातामहानां च [illegible] त्रयं पुंसं नामिति वृद्धशातातपोक्तेरेकस्मिन्नेव दिने कालभेदे
नश्राद्धत्रयं कार्यमित्यपरः। यद्वा। अलाभे भिन्नकालानां नांदीश्राद्धत्रयं बुधः। पूर्वेद्युर्वै प्रकुर्वीत पूर्वाह्णे मा
तृपूर्वकमिति वृद्धमनूक्तेः पृथग्दिनेष्वशक्तश्चेदेकस्मिन्पूर्ववासरे। श्राद्धत्रयं प्रकुर्वीत वैश्वदेवं तु तांत्रिकमि
ति वचनाच्च पूर्वेद्युः श्राद्धमित्यपरः। तत्रापि महत्सु पूर्वेद्युस्तदहरल्पेष्विति बह्वृचपरिशिष्टाद्व्यवस्था। पत्नुआ
युष्याणि च यत्स्यर्थं यत्र समाहितः। षड्भिः पितृभ्यः स्तदनु श्राद्धदानमुपक्रमेदिति छंदोगपरिशिष्टे तद्विशि
ष्यानामेव। तेषां तत्रैव पार्वणाद्धयाम्नातत्वात्। पार्वणं चापराह्णे तु प्रातर्वृद्धिनिमित्तकमिति शातातपव
चनात्। अत्र प्रातःशब्दः सार्धप्रहरपरः। प्रहरोऽर्धसंयुक्तः प्रातरित्यभिधीयत इति वचनात्। आधानांगं तु परा
-आयुष्याणि आयुष्यं वर्चस्यं। न तद्रक्षांसि। दीर्घमायुः। यथासंख्यमायुष्याणि आनोभद्रा इति सूक्तं। अयं चायुष्यमंत्रजपः मातृ
वसोर्धारापूजानंतरं

नांदीश्रा०

प्र०वि० ७ एव। नांदीमुखश्राद्धं प्रातरग्निके त्वपराह्णे तु इति वचनात्। पुत्रजन्मादिष्वनियतनिमित्तेषु तदनंतरमेव कर्तव्यं। यथाह
लौगाक्षिः। अनियतेषु निमित्तेषु प्राप्तं वृद्धिनिमित्तकं। तेषामनियतत्वेन तु तदानं तद्विष्यत इति। यद्यपि निषेककाले
सोमंते च सीमंतोन्नयने तथा। ज्ञेयं पुंसवने श्राद्धं कर्मांगं वृद्धिवत्कृतमिति चंद्रिकायां पारस्करवचने गर्भाधाना
दीनां स्वेन कर्मांगत्वं श्राद्धं विहितं तदपि प्रागेव। वृद्धिवदित्यनेन कालादिधर्मातिदेशात्। तेन गर्भाधानादिषु क
र्मांगत्वं श्राद्धं करिष्य इति संकल्पः। गर्भाधानेष्यन्तिके श्राद्धं करिष्य इति संकल्पः स्यादिति याच्यं। तत्र पार्वणं चा
पराह्णे तु वृद्धिश्राद्धं तथाग्निकमिति गालववचने। वृद्धिश्राद्धपदप्रयोगेणाग्निकश्राद्धस्य तद्विशेषणात्। तेन
तत्र वृद्धिश्राद्धं करिष्य इति संकल्पः। अत्र च सत्यवसुसंज्ञौ विश्वेदेवौ। नांदीमुखे सत्यवसू संकीर्त्यौ वैश्वदे
विकर्मे। निशंखवचनात्। वृद्धिश्राद्धे क्रतुदक्षौ सत्या नांदीमुखे वसू नैमित्तिके कामकालौ काम्ये च धुरिलोच
नाविति वचनांतराच्च। अथ हेमाद्रिग्रंथः। वृद्धिश्राद्धशब्दोऽत्र कर्मांगश्राद्धं गृह्यते। तथा चाधानसोमया
गनिषेकादिसंस्कारादि फलमपि श्राद्धं कथ्यते। कर्मांगं च श्राद्धं श्राद्धभेदप्रकरणे वक्ष्यते। निषेककाले सो
मंते च सीमंतोन्नयने तथा। ज्ञेयं पुंसवने चैव कर्मांगं वृद्धिवत्कृतमिति। अत्र कर्मांगमिति परि[illegible] भाष्य
ते। वृद्धिवदिति नांदीमुखदेवतत्वस्वाहाध्याद्यप्रयोगदधिबदरादिमिश्रपिंडत्वादयो वृद्धिश्राद्धधर्मा अतिदि
श्यंते। वृद्धिश्राद्धं च वृद्धवसिष्ठादिभिर्दर्शितं। पुत्रजन्मविवाहादौ वृद्धिश्राद्धमुदाहृतमिति। आदिशब्देन गर्भा

धानपुंसवनसीमंतोन्नयनव्यतिरिक्तान्नामान्नप्राशनचूडाकरणादिसंस्कारकर्मणां ग्रहणं। गर्भाधा
८ नादिसंस्कारत्रयस्य [illegible] गभूतस्य कर्मांगश्राद्धस्याभिधानात्। एतच्च वृद्धिश्राद्धाद्भिन्नं कर्मांगं। वृद्धिव
दिति पारस्करवाक्यातिदेशदर्शनात्। अतिदेशातिदेशेनैव सति। श्राद्धभेदेऽदृष्टभेदाभिधानाच्चेति॥ तथा आदि
त्यपुराणे। विश्वेदेवौ क्रतुदक्षः सर्वास्विष्टिषु कीर्तितौ। नित्ये नांदीमुखे श्राद्धे वसुसत्यौ च पैतृके। नवान्नलाभे
देवौ कालकामौ सदैव हीति। सर्वास्विष्टिषु सर्वेषु कर्मांगश्राद्धमिति हेमाद्रिः। तथा हेमाद्रिमते वृद्धिश्राद्धशब्दे
न कर्मांगश्राद्धाभिधानात् तस्य च वृद्धिश्राद्धस्थानापन्नत्वेन तेनेतरस्य बाधात् कर्मांगे दक्षक्रतुसंज्ञकौ विश्वे
देवौ संकल्पश्च गर्भाधानादौ कर्मांगश्राद्धं करिष्य इति। वस्तुतस्तु अत्र प्रादेशेन च सीमंते पुत्रोत्पत्तिनिमित्तके।
पुंसवने च निषेके च नववेश्मप्रवेशने। देवव्रतजलादीनां प्रतिष्ठायां तथैव च। तीर्थयात्रा वृषोत्सर्गे वृद्धिश्राद्धं
५ प्रकीर्तितमिति महानिबंधे गर्भाधानादिसंस्कारत्रयेपि वृद्धिश्राद्धस्यैवाभिधानात् कर्मांग
वृद्धिश्राद्धयोर्विकल्प एव युक्तः। सोपि व्यवस्थितः स्यात् वक्ष्यते। ततश्च संस्कारत्रये वृद्धिश्राद्धं करिष्य इ
ति संकल्पपक्षेपि संनांदीमुखे श्राद्धे इति पूर्वोक्तवचनात् सत्यवसुसंज्ञकौ विश्वेदेवौ। कालादर्शेपि। वेव
सीमंतव्रतचौलान्नामकरणान्नप्राशनोपायन। स्नानाधानविवाहयज्ञतनयोत्पत्तिप्रतिष्ठासु च। पुंसत्वा
वसथप्रवेशने सुतावास्यावलोकस्त्रमखीकार[illegible]पाणिषेकदपितामौ च नांदीमुखं मिस्याद्दिना
नांदीमुखापरनामधेयं वृद्धिश्राद्धमेव गर्भाधानाद्यंगत्वेनोक्तं न तु कर्मांगं। तथा बह्वृचकारिकायाम

Indira Gandhi National Centre for the Arts

नां दीश्रा०

प्र०चि० पि स्यादाभ्युदयिकं श्राद्धं वृद्धिपूर्तेषु कर्मसु। स्यात्तु सवनसीमंतचौलोपनयननयनेष्विह विवाहे वानलाधे
८ प प्रभृतिश्रौतकर्मसु। इदं श्राद्धं प्रकृतीनां वृद्धिजो वृद्धिनिमित्तकं। अन्यैः षोडश संस्कारश्रावण्यादि
ब पीष्यन इत्यादिना गर्भाधानादिषोडशसंस्कारसाधारण्येन इदं श्राद्धमितीदं शाद्वेन वृद्धिश्राद्धमेव गर्भाधा
नादिषोडशसंस्काराणां त्वेनोक्तमनुकर्मांगे। तथा। युग्मान्वृद्धिपूर्तेषु युग्मानितरेष्विति सूत्रव्याख्या
र्थे हरिति ग्रंथे पुंसवनसीमंतोन्नयनचौलकर्मोपनयनविवाहा इति पंच। आन्याधेयादीनि च श्रौता
नि वृद्धिश्राद्धस्य विषयः। अन्ये षोडश संस्काराः। वृद्धिश्राद्धस्य विषय इत्यादिना वृद्धिश्राद्धमेव पुंसवना
गं पंगत्वेनोक्तं न तु कर्मांगत्वेन वृत्ति। बह्वृच कारिकाकालादर्शीमास्यादिविरोधाद् गर्भाधानादयुक्तकर्मा
गं श्राद्धं बह्वृचानिरिक्तानामेवेति युक्तमुत्पश्यामः। कल्पतरु इष्टिश्राद्धं। श्राद्धं प्रतिरुचिश्चैवेति वचनेनो
क्तमिच्छानिमित्तमित्याह। अन्ये तु आधानांगभूतं श्राद्धमिष्टिश्राद्धं। तस्यैवेष्टिरन्याह वन्नीयादि प्रयो
ज्यत्वेनेष्टिश्राद्धत्वं। पारिभाषिकं तु कर्मांगे इष्टिश्राद्धं शाद्वस्य प्रवृत्तिनिमित्ताभावाच्च पालिका
याश्च रूढेर्बाधकाभावेन रूढिर्योगमपहरतीत्यस्य न्यायस्य प्रकृते अभावादिष्टिप्रयो
जमभिष्टिनिमित्तकं वा चातुर्मास्यराजसूयाद्यंगभूतं तदित्याहुरिति दिक्॥ अत्र नांदीमुखत्वं वि
श्वेदेवानां पितॄणां च विशेषणं। यत्तु विश्वेदेवविहीनं तु केचिदिच्छंति मानवा इति मार्कंडेयपुराणीयं ←

= नांदीमुखेभ्यो देवेभ्यः प्रदक्षिणकुशासनं। पितृभ्यस्तन्मुखेभ्यश्च प्रदक्षिणमिति निरितिपराशरवचना = २

पि वचनं तद्भिन्नप्रयोगमात्रं श्राद्धमिन्नश्राद्धद्वये वैश्वदेवविकल्पार्थं प्रयोगैक्ये तु वैश्वदेवनियम इति
हेमाद्रिः। यत्तु नांदीमुखविवाहे च प्रपितामहपूर्वकं। नाम संकीर्तयेद्विद्वान् अन्यत्र पितृपूर्वकमिति स्मृत्य
मप्रति पादकं वृद्धवसिष्ठवचनं। यच्च वृद्धगार्ग्यः पितरो वृद्धिश्राद्धं भुंजत इति पित्रादिषु वृद्धशब्दप्र
योगप्रतिपादकं वचनं तदाचारांतरविषयं। कात्यायनेन सूत्रे तथा पितृभ्यः पितामहेभ्यः प्रपितामहेभ्य इति
बह्वृचपरिशिष्टे चानुलोम्यस्य वृद्धपदरहितस्य च प्रयोगस्य दर्शनात्। अन्यथा अतस्मद्वृद्धशब्दानां
महत्पाणाम गोत्रिणां अनान्ना मतिलाद्येश्च नांदीश्राद्धं तु समवदितिसंप्रदायविरोधस्यात्।
नचनिषेधादेवविधिः कल्पयितिवाच्यं। प्रोष्ठपदीश्राद्धे वृद्धपित्रादिनां देवतात्वान्नांदीश्राद्धत्वलाभास्ये
निहाप्यप्रसक्तेनिषेधाहित्व वचनाः। तेनात्र बाध्यांतरानुरोधेन मात्रादित्रयपित्रादित्रयमातामहादिदेवतात्वे
सिद्धे तेषामिदं व्यक्तादिरूपं नांदीमुखत्वं। अत एवात्र वचनं। ऊर्ध्ववृक्त्रास्तु ये तत्र ते नांदीमुख
संज्ञिता इति। यत्तु मत्स्यः पितामहात्पूर्वे ते तु नांदीमुखाः स्मृता इति मार्कंडेयपुराणीयं वचनं तज्जी
वत्पित्रादिनैमित्तिककर्तृक वृद्धिश्राद्धविषयं। यद्दपि पिपितामहपितामहश्चैव तथैव प्रपितामहः त्रयो
ह्यश्रुमुखाह्येते पितरः परिकीर्तिताः। तेभ्यः पूर्वतरा ये च प्रजावंतः सुखेधिताः। ते तु नांदीमुखानां
नांदीसमृद्धिरिति कथ्यत इति ब्रह्मपुराणीयं वचनं तत्प्रोष्ठपदीश्राद्धपरं। एवं च प्रोष्ठपदीश्राद्धे पित्रादि

Indira Gandhi National Centre for the Arts

प्र॰ चि॰ त्रयोर्थो नां प्रसन्नमुखत्वरूपं वैश्वदेवस्यावृत्तं नांदीमुखत्वं परिभाषितं। तदुक्तं तत्रैव प्रसन्नमुख नांदीश्रा॰
संज्ञास्तु मंगली साथ तस्तु ते इति॥ न च तत्र नाम्नां नांदीश्राद्धधर्मातिदेशात् तत्र च विश्वेदेवा नां नांदीमुखा
त्वंप्राप्तिरित्याशंकनीयं वैरूप्यादिशब्दवद् देवतापरस्य नांदीमुखशब्दस्य कर्मनाम त्वासंभवात्। तेन
नांदीमुखानां प्रसन्नकन्या तथा गतेर वैविध्यानासन्निमित्ता वपि कन्यागतेत्सूर्ये कान्ये च पुरिलौव
पौर्णमास्यां प्रकर्तव्यं वाराहवचनं यथेति मार्कंडेयेन तस्य कन्यागतिश्राद्धतेर गौ= नादिति पुरिलौ च त्रौ तत्र
वैश्वदेवा विस्मयत्राविस्तरः। अत्र केचित् अन्यतोऽपि षिसतुः स्वांगाश्चोपसर्जनादसंयोगोपधादि
ति सूत्रेनु वृत्तस्य ऽभिषोनखमुखात्संज्ञायामिति सूत्रेण भूर्पनखा इत्यादो संज्ञायां ऽभिषो निषेधान्मा
तः नांदीमुखेमात्रादयो नांदीमुखा इत्येवं प्रयोगमाहुः। अन्ये तु नांदीति संज्ञामुखेष्येषामिस्य बवव मु
त्स्या नांदीत्येव संज्ञा ते नाविशिष्टस्य संज्ञात्वासावत्र ऽभिषो निषेध इति नांदीमुख्य इत्येव प्रयोगः॥
एवं च नांदीपितृपितामहप्रपितामहा इति प्रयोगपारिजातादिलेखोपि संगच्छत इत्याहुः। यदा तु पिता
कुमारसंस्कारात् तदर्थं मह्नमत्वादिकं करोति तदा पुत्रविवाहपर्यंतं स्वान् पितॄन् यजेत यदा तु पित्र्यसा वे
त्रातापितृव्यः मातुलादिर्वा तत्संस्कारादि करोति तदा संस्कार्यपितॄन् यजेत। तदाह कात्यायनः। स्वपितृ न२
भ्यः पिता दद्यात्। सुतसंस्कारकर्मसु पिंडानोद्वहनात्तेषां तस्याभावे तु तत्क्रमादिति। पिंडशब्दो वृद्धिश्रा

भ्यः। सुतसंस्कारेषु गर्भाधानादिषु कर्मसु मह्नमत्वादिविसर्थः। तस्यापि तु त्वभावे तत्क्रमात् संस्कार्यपितृक्रमात् तु
स्वपितृक्रमादित्यर्थः। कालादर्शेऽपि अनग्निकोऽपि कुर्वीत जन्मादौ वृद्धिकर्मणि। येभ्य एव पिता दद्यात्तेभ्यो दद्यात्
पौरोहितं स्मार्ताः। वस्तु तस्तु पितामहादेः कन्यादानादिकर्तृत्वे सः स्वपितृभ्य एव दद्यात्। स्वपितृभ्य इत्यस्य तस्या
भावे तु तत्क्रमादित्यत्रापि अनुषंगात्। तथा चायमर्थः तस्यापि तु त्वभावे पित्राय स्याः स्वपित्रादिभ्यो दत्तमासीत्तेनैव म
क्रमेणापि पितामहोऽपि स्वपितृभ्यो दद्यादित्यर्थः। आउद्वाहान्तादि वाहपर्यंतमित्यर्थः। विवाहश्च प्रथमः। नांदीश्रा
द्धं पिता कुर्यादाद्ये पाणिग्रहे पुनः। अत ऊर्ध्वं प्रकुर्वीत स्वयमे[illegible]मिति स्मृतेः। समावर्तने तु पितैव नांदीश्रा
द्धं कुर्यात्। तस्य विवाहप्राचीनसुतसंस्कारत्वात्। तदभावे स्वयमेव कु[illegible]त्। उपनयनेन कर्माधिकारस्य जा
तत्वात्॥ तदभावे स्वयमेव कुर्यात्। उपनयनेन कर्माधिकारस्य जातत्वात्॥ एवं माघविवाहे पीतिपितृचरणाः।
अपरार्कस्तु पितारो जंनकस्येमाः। पावद्भुतमनाहित॥ समाहित ब्रह्म पश्चात् स्वान् यजेतपितामहानितिय
म वचनाद्ब्रह्मचारी समावर्तने पितुः पित्रादिभ्यो दद्यात्॥ तथा श्रूयते ब्रह्मचारी समावर्तने स्वस्यैव पितुः
पित्रादिभ्यो दद्यात्॥ समावर्तमान इत्यधिकारविशेषणादिति निबंधकारः। पितामहानिति पदं येभ्य एव पिता
दद्यादित्यस्योपलक्षणार्थं। आधायि वाहे तु तस्यापि तु रधिकार इत्याह। एवं स्तत्रिपोपनयने सांगे पुरोहितस्या
धिकारात्स एव संस्कार्यपितृजीवत्पितृपित्रादिभ्यो दद्यात्। तेन स्वपितृभ्यः पिता दद्यादित्येतद्वृषणपं

Indira Gandhi National Centre for the Arts

प्र०प्रि जीवत्पितृकस्य। वृद्धे तीर्थे च सन्यस्ते ताते च पतिते सति येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुत इति प्रतिताता जिवत्पिता ०
१० पवचनात्। पितुः पित्रादिभ्यो दद्यात्। सन्यस्ते जीवतीत्यर्थः। अयं च सन्यस्तपित्रादेरविशेषात्सर्वश्राद्धेष्वधि
कार इति पितृचरणाः। मैथिलास्तु तद्दाय्येव पेयं। मैथिलपरेभ्य एवेति गौडाः। अत्र च वृद्धे तीर्थे च सन्नेन कृतिनिमि
त्तसमावेशो वाक्यभेदार्थमत एवेति वृद्धिजीर्णादिपदे जीवत्पित्रधिकारिकं श्राद्धमात्रं लक्षयित्वा तत्रै
तादृशता। उच्यते। तेन जीवत्पितृकस्य पितृनिरूपितयोरेव मातृमातामहपार्वणयोः प्राप्तिर्न तु स्वनिरू
पितयोरिति निष्कर्षः। जीवत्पितृपितामहकस्तु तत्पित्रादिभ्यः पितरि जीवति येषां पिता कुर्यात्तेषां कुर्यात्।
पितरि पितामहे च जीवति येषां पितामहः कुर्यात्तेषामिति विष्णूक्तेः। जीवत्पित्रादित्रिकस्तु ततः परेभ्यो दद्या
दित्युक्तं। यत्तु त्रिषु जीवत्सु न कुर्यादिति विष्णुवचनं तज्जीवत्पितृकर्तृकतीर्थादिश्राद्धविषयमिति पितामह
चरणाः। अत्र केचित् येभ्य इत्यस्य यद्येभ्य इत्यर्थः। तेन मातृत्वादिना रूपेण स्वमात्रादिभ्यो दद्यादित्या
हुस्तन्न लक्षणापातात्। तेन येभ्य इत्यनेन अविशेषात्। वक्ष्यते उच्यते। आश्वलायनानां तु पत्नीसं
स्कारेषु विशेष उक्तः। आश्वलायनगृह्यपरिशिष्टे। जीवत्पितासुतसंस्कारेषु स्वमातृमातामहयोः कु
र्यात्। तस्यां जीवत्यां मातामहस्यैव कुर्यादिति। अत्र च सुतसंस्कारग्रहणादाश्वलायनानां सुतसंस्कारा
तिरिक्ते एष्य एवं स्वयमेव पक्षः। प्रयोगरत्ने तु येभ्य एवेत्ययमेव पक्ष आश्रितः। केचित्तु पितृवर्गे मातृवर्गे १०
मातामहवर्गे मातृस्य वा। जीवे तु परिवर्गाद्यं तं वर्गं तु परित्यजेदिति संग्रहवचनाद्वृद्धिश्राद्धे यद्वर्गाद्यस्तु जी
जिवत्पितृकमृतमाताः कौस्तुभे। २ तामर मातामहस्य चापि तु पितृपार्वणं स्वस्य मातुः पार्वणं मातामहपार्वणं च कुर्यादित्यप्युक्तं प्रयोगरत्ने तन्ने पुक्तं

-गोणेस इत्यत्रैव मेतस्य पुनराग लस्य प्राप्तं सर्वकर्मणि नांदीश्राद्धं संस्कृतं।
वतं तद्वर्गस्य लोप इत्याहुः। मृतपितृकस्य जीवन्मातृमातामहकस्य तत्पार्वणद्वयलोपापत्तेरिदं पितृवर्गाद्यमिति
८ तुदर्शश्राद्धयमिति पितामहचरणाः। वयं तु। यत्र पितृमातृमातामहवर्गक्रमेण श्राद्धं विहितं यथा अन्वष्टका
सुनवमीः पिंडैः श्राद्धमुत्तरं तं पित्रादिमातृमध्यं च ततो मातामहानां क्रममिति तद्विषयमिदं वचनं। तादृशक्र तेषांकुर्या
मानुगुण्यात्। वृद्धे तीर्थे वेत्यादिवदत्र वृद्धिपदाभावाच्च। अन्यथा पितरि जीवति येषां पिता कुर्यात्पितरि पितामहे त
च जीवति येषां पितामह इत्यादिविष्णुवचो विरोधः स्यात्। अत एवात्र जीवत्पितृकस्य मातृश्राद्धं। तत्र तस्य मा
तामहश्राद्धप्राप्तिः मातुः श्राद्धं सुतः कुर्यादिति मातृपार्वणमात्रविधानेन नतद्वाधा इति प्रतीमः। यत्तु स्मृतितत्
त्वादिगौडग्रंथेषु जीवन्मातृकः पितामह्यादिभ्यो वृद्धौ दद्यात्। जीवंतमतिदद्याद्वा प्रेताया नो दके द्विजइति
कात्यायनवचनादित्युक्तं। तत्पूर्वोक्तवचनस्य सपिंडीकरणादिविषयत्वात्। यदपि न जीवत्पितृकः कुर्यात्तथा
द्धमग्निमत्ते द्विजः। येभ्य एव पिता दद्यात्तेभ्यः कुर्वीत साग्निक इति सुमंतुवचनात् जीवत्पितुः साग्नेरेव वृद्धिश्रा
द्धेऽधिकार इति केचिदुक्तं। तदप्युक्तं। सुमंतुवचनस्यापिंडपितृयज्ञपरत्वात्। अन्यथा। अनग्निकोऽपि कुर्या
तजन्मादौ वृद्धिकर्मणि। येभ्य एव पिता दद्यात्तानेवोद्दिश्य तर्पयेदिति शातातपवचो विरोधः स्यादिति पृथ्वी
चंद्रः। एतेन येभ्य एव पिता दद्यादित्येतत्साग्निकविषयमिति परास्तं तथा चौलादावायोगपद्येन क्रमेण श्राद्धं। तदुक्तं
छंदोगपरिशिष्टे। गणशः क्रियमाणेषु मातृभ्यः पूजनं सकृत्। सकृदेव भवेच्छ्राद्धमादौ न पृथगादिषु। मातृभ्य इ
ति षष्ठ्यर्थे चतुर्थी। एवमनेकापत्यानां युगपत्संस्कारणेऽप्येकमेव श्राद्धं देशकालकर्त्रैक्ये क्याप्येवंयमयोः संस्कारे
पि कश्चिन्तु योगास्त्वपि करणन्यायेन कृत्या सामग्न्यात्क्रमेण कार्यमन्यत्र। एवं च संस्कार्यनिष्ठानामुपनयनवि
गणशः क्रियमाणानामेकं स्यान्मातृपूजनं। नांदीश्राद्धं भवेदेकं होममंत्राः पृथक् पृथगिति बोपदेवः॥२

त्र
धाः गणास्तरसौम्तस्य तु नरागतस्य प्राप्तसर्वकर्मणि नांदीश्राद्धं सकृत्॥२

प्र॰चि॰ नादिजन्यापूर्वाणां साग्न्यार्थं पृथगेव नांदीश्राद्धमिसाह। तत्तु छौं नस्यंगमिसेवा वर्तनीयं। तथा ले प्रयाजीदीना नांदीश्रा
११ मपिप्रतिप्र ॰न मातृस्याप न्ते: अगृह्यमाणविशेषत्वात् तत्र त्वंतु तद्देवात्राप्यविशिष्टमिति यत्किंचिदेतत्।
तथा। विवाहादि: कर्मगणो यत्र्क्तो गर्भाधानं शुश्रूषा मो पसांतो। विवाहादावेकमेवात्र कुर्यात् श्राद्धं नांदीकर्मण: क
र्मण: स्यात्। तथा। उत्सवानंदसंताने यज्ञोद्वाहादि मंगले। मातर: प्रथमं पूज्या: पितरस्तदनंतरं ततो मातामह
पुजा विश्वे देवास्तथैव चेति मात्स्य वाक्य उत्सवानंदश द्वोपात्ते पुत्रजन्मादिषु सांगे बधिकारा—त्रीनसि
त्रकस्य नांदीश्राद्धं तत्र भवस्येवेति पितामहचरणा:। अथात्रोपयुक्तं किंचिदुच्यते। संग्रहे शुभार्थी प्रथमं तेन च
द्धौ संकल्पमाचरेत्। न षष्ठ्या परिवा कुर्यान्मा हा नद्दो भासिजायते। कार्यं कार्यं। प्राङ्मुखो वोपवीतिस्यादुपचार:
प्रदक्षिणं। तिल: कार्या यवै: कुर्याद्युग्मान् प्राश्नमंत्रयेत्। ऋजून्दर्भान्न मूलांस्तु दत्वेषामासने बुध:। प्राक् संस्थे
षु आसिद्य पूर्वं च ह्यानुमंत्रिता:। तथा। नांदीमुखास्त पितर: प्रीयंतामिति मंत्रत: संबंधनामरूपाणि वर्जये
त्र कर्मणि। पित्रर्थमुपविष्टेभ्य: सकृद्दर्भानिवेदयेत्। दत्वार्घ्ये स्येकदेश: स्यादर्घ्यदानं प्रतिद्विजं प्रतिद्विजं
पृथक् कुर्यान्निवी सर्पानुमंत्रणं द्विद्विं गंधादि तोत्यपाणि होमोत्र वेदिह। अग्नये कव्यवाहाय मंत्रेण प्रथ
मा हुति: सोमाये ति द्वितीया स्यात् यथा त्येषा च पाणिषु। स्वधा नम: पदस्थाने स्वाहाकारोत्र वेदिह। मधुवाता
दृ चस्थाने उपास्मै गायता नर:। पंचर्च: श्रावयित्वाक्षन्निति च श्रावयेद्द्वं। संपन्न वचनादिस्यात् तत्रैव बुद्धि
जन्म सु। संपन्नमिति तत्रास्थाप्रश्नस्थाने विधीयते। ओं स्वधोच्यतामिति स्पस्थाने ओं संपन्नमिति श्रूया ११
दिति प्रयोगपारिजात:। नचाश्नस्तु जपे त्र कदाचित् पितृसूक्तं तथा। पठेछकुनि सूक्तं तु स्वस्तिसूक्तं पुरुसं

तथा। नांदीमुखान्त पितृन् सकुशा सांजलिश्च समाह्वयेत्। तथा। द्विजपुत्रशयं सम्यग्गोमये नोपलेपयेत्। तेना
त्र सोजनांतरमेवोच्छिष्टे घासनंन तु श्राद्धांते। तथा। अत्र प्राग्रकान्दर्भान् स्तृणाति वत तत: परां च यद
ज्यं चकुर्वीत दध्या नयति सर्पिषा। पृथक् ज्येन पिंड द्रव्यमेकी कुर्यादि सर्पे:। वसिष्ठ:। तृसि प्रश्ने तु संपन्नं दे
वेष्वचितमिस्यपि। दधिकर्कंधु संमिश्रा पिंडा कार्या यथाश्रमं। कर्कंधुर्बदरं। प्राङ्मुखा देवतीर्थेन प्राकुलेषु च। कुलेषु
दर्कं नाम्ना परंतू स्त्रीं दद्यात् पिंडं पृथक् पृथक्। अन्यत्र तु। शाल्यन्नं दधिमधवक्कं बदराणि यवास्तथा। मिश्रीक
त्वा तु वै पिंडान् दद्यात् श्रीफलसंमितान्। द्राक्षामलकमूलानि यवांश्च विनियोजयेत्। तान्येव दक्षिणां तु द ण॥
द्यात् विप्रेषु सर्वेश्चसुक्तं। तथा। निपातो नहि सभ्यस्य जानुनो विद्यते क्वचित्। तथा। भविष्यपुराणे। मधुरं भोजनं
दद्यान्न चाम्लं परिवेषयेत्। रक्तपुष्पं तिलाश्चैव अपसव्यं च वर्जयेत्। निर्णयसिंधौ रूपराशर:। मालस्याश
तपत्रा वा मल्लिका कुब्जलोरपि। केतक्या: पाटलो टया वा देया माला न लोहिता:। श्राद्धे माला निषेधस्यायमंबाद:
तथा सुवेषस्सवणो स्तत्र सालंकारैस्तथा नरै:। कुंकुमाद्यनुलिप्तांगे स्त्रोंग्यं तत्र ब्रा से रिह। स्त्रियोपि सुस्तथा
भृता: गीतन्त्रसादि हर्षिता:। तथा हेमाद्रौ। कुशस्थाने च दूर्वा स्युर्मंगलस्याभिवृद्धये। तेन पूर्णो सकुशो विकल्प:।
अत्र च पिंडनिर्वाप: पाक्षिक इत्युक्तं गृह्य परिशिष्टे। तथा च भविष्य पुराणेपि पिंडनिर्वपणं कुर्यान्न कुर्याद्वावि
चक्षण:। वृद्धि श्राद्धं मता बाहो कुलधर्मानवेक्ष्य तु। इदं च श्राद्धं सपाक्ता वामे न हेम्ना वा कार्यं पुत्रजन्मनि हे
म्नैव। पुत्रजन्मनि कुर्वीत श्राद्धं हेम्नैव बुद्धिमान्। न पक्वेन न चामेन कल्याणान्यभिकामयनिसुक्तेः। आ

Indira Gandhi National
Centre for the Arts

द्विविधशास्त्रदर्शनात्सर्वत्रविकल्प इत्याहुः। कालानुरोधेन प्रधानलोपस्य अन्याय्यत्वान्नांदीश्राद्धांते वैश्वदेवविधानं गौणकालामिश्रापमितिग्रंथांतरे पूण्या
प्र०चि० महेमश्राद्धाभावे सांकल्पिकं श्राद्धं कार्यं तत्र हस्तं वर्तः। समग्रंयस्तु शक्नोति कुर्वन्नैवेहि पार्वणं। अपि संकल्पविधिं
१२ नाकाले तस्य विधीयत इति। सांकल्पे त्वेतावान्विशेषः। सांकल्पं तु यत्कुर्यान्न कुर्यात्पात्रपूरणं। आवाहना ये
नौकरणं पिंडांश्चैव न पातयेत्। तथा। सम्युवाजिनमिति विप्रांश्चैव विसर्जयेत्। अन्यश्राद्धविशेषप्रयोग
पात्रिजाते द्रष्टव्यः। इदं चश्राद्धमावश्यकं। यद्धीनतर्पितायवैपितरो गृहमेधिसिः। तद्धीनमफलं ज्ञेयमासुरोवि
धिरेवस इति शातातपोक्तेः। अत्र साग्निरनग्निर्वा आदौ वैश्वदेवं कुर्यात्। इत्युक्तं। शांखायनपरिशिष्टे आदौ
वृद्धौ क्षये चांते दर्शे मध्ये महालये। एकोद्दिष्टेति निर्वृत्ते वैश्वदेवो विधीयत इति। यत्तु हेमाद्रौ। शेषमन्न वि
मनुज्ञाप्य वैश्वदेवक्रियां द्विजः। श्राद्धान्हिश्राद्धशेषेण वैश्वदेवो विधीयत इति। चतुर्विंशतिमतान्नांदीश्राद्धे
पीतेवे - श्वदेवउक्तः। सपाकश्राद्धपरः। शेषमन्नमनुज्ञाप्येत्युक्तेः। तदभावेन्वा महेमश्राद्धे वाहावेव वैश्व
देव इति दिक्॥ इत्यनंतभट्टविरचिते श्रीरामकल्पद्रुमांतर्गते संस्कारकांडे वृद्धिश्राद्धं॥१॥ अथास्मत्कु
लदेवता इति दिक्॥ इत्यनंतभट्टविरचिते श्रीरामकल्पद्रुमांतर्गते संस्कारकांडे वृद्धिश्राद्धं ॥ कर्ता चम्य प्राणानायम्य इष्टदेवताभ्यो नमः। कुलदेवताभ्यो नमः। सर्वेभ्यो ब्रा
तःस्वस्तिवाचननांदीश्राद्धप्रयोगः॥ कर्ता चम्य प्राणानायम्य इष्टदेवताभ्यो नमः। कुलदेवताभ्यो नमः। सर्वेभ्यो ब्रा
ह्मणेभ्यो नम इति नत्वा। सुमुखश्चैकदंतश्चेत्यादि देशकालौ संकीर्त्य मुकं कर्म करिष्ये। तदंगत्वेन गणपति
पूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं च करिष्य इति संकल्प्य गणानां त्वेति गणपतिं संपूज्य दक्षिणा
तस्यो महीद्यौरिति मंत्राभ्यां भूमिं स्पृष्ट्वा ओषधयः संवदंत इति यवान्कलशे क्षिप्त्वा कुंभे संस्थाप्य मंमे गंगे इति १२
ति जलं गंधद्वारामिति गंधं हिरण्यरूप इति हिरण्यं क्षिप्त्वा पूर्णादर्वीत्युपयत्रपूर्णपात्रं निधाय तत्त्वायामीति वरुणं
अस्मिन्कलशे कल्प्य पाद्यं कल्पितं गंधपुष्पाद्युपचारान्कल्पयित्वा भोजनपर्याप्तमन्नं तन्निष्क्रयं वा संकल्पपूर्वकं कुर्यात्। तदुक्तं कात्यायनेन।
मासिके वोदकुंभे च वृद्धिश्राद्धं यथाविधि। कुर्यात्कालमतिक्रांते देयं द्विजातय इति। ब्राह्मणालोपवेशनपूर्वकं सपिंडमश्राद्धविशेषो नि

संपूज्यः कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः। मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः। कुक्षौ तु सा
गराः सर्वे सप्तद्वीपा वसुंधरा। ऋग्वेदोथ यजुर्वेदः सामवेदो ह्यथर्वणः। अंगैश्च सहिताः सर्वे कलशं तु स
माश्रिताः। अत्र गायत्री सावित्री शांतिः पुष्टिकरी तथा। आयांतु मम शांत्यर्थं दुरितक्षयकारकाः। सर्वे समुद्राः
सरितस्तीर्थानि जलदा नदाः। आयांतु मम शांत्यर्थं दुरितक्षयकारका इति संप्रार्थ्य। मातृदेवो भव। पितृदेवो०
आचार्यदे० अतिथिदे० आशिषः प्रार्थयंते एताः सत्या आशिषः संतु। अवनिकृतजानुमंडलः कमलमुकुलसदृ
शमंजलिं शिरस्याधाय दक्षिणेन पाणिना सवर्णपूर्णं कलशं धारयित्वा। सकुटुंबो नत्वा जलं स्त्रावयेत्। दीर्घा
नागानद्यो गिरयः त्रीणि विष्णुपदानि च। तेनायुःप्रमाणेन पुण्याहं दीर्घमायुरस्तु चतुर्षु विप्रेषु शिवं आपः
संतु। सौमनस्यमस्तु। अक्षतं चारिष्टं चास्तु। गंधाः पांतु सुमंगल्यं चास्तु अक्षताः पांतु। आयुष्यमस्तु पुष्पा
णि पांतु सौश्रियमस्तु तांबूलानि पांतु। ऐश्वर्यमस्तु। दक्षिणाः पांतु। बहुदेयं चास्तु। यं कृत्वा सर्ववेदयज्ञ
क्रियाकरणकर्मारंभाः शुभाः शोभनाः प्रवर्तंते तमहमोंकारमादिं कृत्वा ऋग्यजुः सामाशीर्वचनं बहु
विसंमतं संविज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये वाच्यतामिति तैरुक्ते भद्रं कर्णेभिः। द्रविणो
दा द्रविणसः। सविता पश्चातात्। नवो नवः। आपउंदंतु जीवसे। दीर्घायुत्वायेति। अमिपत्नी प्रजा मा पुत्रेण चामि
नः समाधीयतां। समाहितमनसस्मः प्रसीदंतु भवंतः प्रसन्नाः स्मः। शांतिरस्तु। पुष्टिर० तुष्टि० वृद्धि० अवि शास्त्रसं०
घ्नमस्तु० आयुष्यमस्तु। आरोग्य० शिवं कर्मास्तु। कर्मसमृद्धिरस्तु। वेदसमृद्धि० पुत्रसम० धनधान्यस० इष्ट
संपदस्तु। अरिष्टनिरसनमस्तु० यत्पापं तत्प्रतिहतमस्तु। यच्छ्रेयस्तदस्तु। उत्तरे कर्मण्यविघ्नम० उत्तरोत्तरमहर

Indira Gandhi National Centre for the Arts

प्र॰प्रति॰ हरस्मि वृद्धिरस्तु॰ उत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यंतां। तिथिकरणमुहूर्त्तनक्षत्रसंपदस्तु। तिथिकरणेषु पुण्या॰
मुहूर्त्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयंतां। तिथिकरणे मुहूर्त्तनक्षत्रे सग्रहे सदैवते प्रीयेतां। दुर्गापांचा
१२ ल्यौ प्रीयेतां। अग्निपुरोगा विश्वेदेवाः प्रीयंतां। इंद्रपुरोगा मरुद्गणाः प्रीयंतां। ब्रह्मपुरोगाः सर्वे वेदाः प्री॰
ऋषयश्छंदांस्याचार्या वेदा यज्ञाश्च प्रीयं॰ वसिष्ठपुरोगा ऋषिगणाः प्री॰ अरुंधतीपुरोगा एकपत्न्यः प्री॰
ब्रह्म च ब्राह्मणाश्च प्री॰ श्रीसरस्वत्यौ प्री॰ श्रद्धामेधे प्री॰ भगवती कात्यायनी प्री॰ भग॰ माहेश्वरी॰ भग॰ पु
ष्टिकरी प्री॰ भग॰ तुष्टिकरी॰ भग॰ वृद्धिकरी॰ भग॰ ऋद्धिकरी॰ भगवतौ विघ्नविनायकौ प्रीयेतां। प्रीयतां
भगवान् स्वामी महासेनः सपत्नीकः ससुतः सपार्षदः सर्वस्थानगतः प्री॰ हरिहरहिरण्यगर्भाः प्री॰
सर्वा ग्रामदेवताः॰ सर्वाः कुलदेवताः प्री॰ सर्वा इष्टदेवताः॰ हता ब्रह्मद्विषः। हताः परिपंथिनः। हता
अस्य कर्मणो विघ्नकर्तारः। शत्रवः पराभवं यांतु। शाम्यंतु घोराणि॰ शाम्यंतु पापानि॰ शाम्यंत्वीतयः।
शुभानि वर्धंतां। शिवा आपः संतु। शिवा ऋतवः संतु॰ शिवा अग्नयः संतु॰ शिवा ओषध्यः॰ शिवा वनस्प
तयः संतु॰ शिवा अतिथयः संतु। अहोरात्रे शिवे स्यातां निकामे निकामे नः पर्जन्यो वर्षतु। फलवत्यो न ओ
षधयः पच्यंतां। योगक्षेमो नः कल्पतां। शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता
आदित्यपुरोगाः सर्वे ग्रहाः प्रीयंतां। प्रीयतां भगवान्नारायणः। प्रीयतां भगवान् पर्जन्यः। प्रीयतां भगवान् स्वामी
महासेनः पुण्याहकालान् वाचयिष्ये॰ वाच्यतां। उद्गातेव॰ याज्यया यजति॰ पुण्यां लक्ष्मीं संस्कुरुते। यस्तु १२

ल्यं नक्षत्रं तद्दूकुर्वीतोपव्युषं। यदा वै सूर्य उदेति अथ नक्षत्रं नैति। यावति तत्र सूर्यो गच्छेद्यत्र जघन्यं पश्येत्ता
वत्कुर्वीत यत्कारी स्यात्पुण्याहमेव कुरुते। तानि वा एतानि यमनक्षत्राणि या। न्येव देवनक्षत्राणि तेषु कुर्वीत
यत्कारी स्यात्पुण्याहमेव कुरुते। तानि वा एतानि यमनक्षत्राणि या। न्येव देवनक्षत्राणि तेषु कुर्वीत यत्कारी स्या
त्पुण्याहमेव कुरुते मह्यं सहकुटुंबिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय अस्यामुकक
र्मणः पुण्याहं भवंतो ब्रुवंतु। त्रिः। ॐ पुण्याहमिति विप्राः। स्वस्तये वायुमुपब्रवामहै। आदित्स उदय। नैधः प
थ्यायै रेवतः स्वस्त्या त्रयंति पथ्यां स्वस्तिमभ्युद्यंति स्वस्त्येतेतः प्रयंति स्वस्त्युद्यंति। स्वस्ति न
इंद्रो वृद्धश्रवाः। अश्वे देवा वसवः सोम्यासः चतस्रो देवीरजराः श्रविष्ठाः। ते यज्ञं पांतु रजसः परस्ता
त्संवत्सरीणममृतं स्वस्ति। मह्यमित्यादि। कर्मणः स्वस्ति भवंतो ब्रुवंतु। त्रिः। आयुष्मते स्वस्तीति वि
प्राः। ऋध्याम स्तोमं सनुयाम॰ सर्वामृद्धिमृध्नुयामिति तं वै तेजसैव पुरस्तात्सर्पस्व व[illegible]राभिर्धृतो
क्षरैरुपरिष्टाद्गायत्र्या सर्वतो धात्र्या हि परिष्टुप सर्वामृद्धिमार्ध्नोत्सर्वामृद्धिमृध्नोति य एवं वेद। ऋध्या
स्म हव्यैर्नमसोपसद्य। मित्रं देवं मित्रधेयं नो अस्तु। अनूराधान् हविषा वर्धयंतः शतं जीवेम शरदः सवी
राः। त्रीणि त्रीणि वै देवानामृद्धानि त्रीणि छंदांसि त्रीणि सवनानि त्रय इमे लोकाः। ऋध्यामेव तद्वीर्य एषु लो
केषु प्रतितिष्ठति। मह्यमित्यादि। कर्मणः ऋद्धिं भवंतो॰ त्रिः। ऋध्यतामिति विप्राः। श्रिये जातः। इति मीरंज

Indira Gandhi National Centre for the Arts

प्र०चिं० नं। श्रियएवैनं तच्छ्रियामादधाति संततमृचा वषट्कृत्यं संतत्यै संधीयते प्रजया पशुभिर्य एवं वेद। यस्मिन्त्र
१८ साप्यजयत्सर्वमेतदमुं च लोकमिदमुच सर्वं। तन्नो नक्षत्रमभिजिद्विजित्साश्रियं दधात्वहृणीयमानो अहेर्बुध्निय
मंत्रं मे गोपाय। यमृषयस्त्रयीविदाविदुः। ऋचः सामानि यजूंषि। साहि श्रीरमृता सतां। मयममिसादिकर्मणः श्री
रस्त्विति भवंतो ब्रुवंतु। त्रिः। अस्तु श्रीरिति विप्राः। कुंभाज्जलं पातयेत्। वर्षशतं पूर्णं स्तोमैः शिवं शिवमस्तु।।
रस्त्विति भवंतो ब्रुवंतु। त्रिः। अस्तु श्रीरिति विप्राः। कुंभाज्जलं पातयेत्। नद्यषष्ठो कोशिगीतो मरुतः परिवेष्टारो मरुत्तस्या
गो त्रामि वृद्धिरस्तु। प्रजापतिः प्रीयतां। शुक्रे भिरंगेः। तद्यषष्ठो कोशिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे। आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति। ततः। कलशद्वयस्य धारां पातयेत्। वास्तो
वसन् गृहे। आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति। ततः। कलशद्वयस्य धारां पातयेत्। वास्तो
ष्पते प्रतिजानीह्यस्मानिति च तस्त्वपि। शिवं शिवमिति वदेत्। ततोभिषेकः। तत्र पत्नी वामे। समुद्रज्येष्ठाः
आप इद्वा इति द्वे। इमा आप इति तिस्रः। देवस्य त्वा० हस्ताभ्यामग्नेस्तेजसा सूर्यस्य वर्चसेंद्रस्येंद्रियेणाभि
षिंचामि बलाय श्रियै यशसे न्नाद्याय भूर्भुवः स्वः। इंद्रियं वा इति ब्राह्मणं। सुरास्त्वेति च। अंते अमृता
भिषेकोस्तु। ततः पीठे चतुर्विंशति पुंजेषु। गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्व
धा स्वाहा मातरो लोकमातरः। धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता। गणेशाद्याः गौर्यादि षोडशमा
तरः ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही च तथेंद्राणी चामुंडाः सप्तमातरः। ब्राह्म्यादि सप्त १८
मातः दुर्गा क्षेत्रपाल गणाधिपांश्चावाह्य षोडशोपचारैः संपूज्य आवाहनं न जानामि० मंत्रहीनमिति संप्रार्थ्य

वृद्धिश्राद्धं कुर्यात्। सत्यवसुसंज्ञका विश्वेदेवाः नांदीमुखा इदं वः पाद्यं इति साक्षतं जलं क्षिपेत्। मातृपितामहीप्रपितामह्यः नांदीमुख्यः इदं वः पाद्यं। पितृपितामहप्रपितामहाः नांदीमुखाः सपत्नीकाः भूर्भुवः स्वः इदं वः पा
द्यं। मातामह मातुः पितामह मातुः प्रपितामहाः सपत्नीकाः नांदीमुखाः। इदं वः पाद्यं पुनः सत्यवसु इत्या
दि। इदं वः आसनं गंधाद्युपचार कल्पनं स्वाहा नम इयं च वृद्धिः। एवं मात्रादौ पित्रादौ मातामहादौ च। पुनः स
त्यवस्वित्यादि वः दास्यमानं युग्मम ब्राह्मणाप्तोजनपर्याप्तमन्नं तन्निष्क्रयभूतं द्रव्यं वा स्वाहा न मम इयं च
वृद्धिः। एवं मात्रादौ पित्रादौ मातामहादौ च ततः। उपास्मै गायता नरः इति पंचः अक्षन्नमीमदंतेति पठित्वा ब्रा
ह्मणान् वाचयित्वा। कृतस्य नांदीश्राद्धस्य स्वकर्मणः। यथावत् फलप्राप्त्यर्थं द्राक्षामलकनिष्क्रयभूतं यथाशक्ति द्र
व्यं दक्षिणात्वेन संप्रददे स्वाहा। प्रजापते न त्वत्०। अनेन नांदीमुखाः देवताः प्रीयंतां वृद्धिः। मातापितामहीं श्राद्धं नांदी
चैव तथैव प्रपितामही। पिता पितामहश्चैव तथैव प्रपितामहः। मातामहः तत्पिता च प्रमातामहतादयः।
एते भवंतु सुप्रीताः प्रयच्छंतु च मंगलं। इडामग्ने० इति पात्रेषु शाद्धं कृत्वा० उत्तिष्ठ ब्रह्मणस्पते। अस्यां इति
एते भवंतु सुप्रीता प्रयच्छंतु च मंगलं। इडामग्ने० इति पात्रे... ... वाजे वाजे इति मातृ विसर्जनं। इति स्वस्ति वाचन नांदीश्राद्धयोः प्रयोगः।। अथेदानीं मंडपविधान
पांके पूज्यमहांश्चैव विधानतः। कर्मणां फलमाप्नोति श्रियं चाप्नोत्यनुत्तमामिति पाराशरवचनेन कर्मा
दौ ग्रहयज्ञो विहितः स च तस्योक्तत्वात्तदुपयिकं किंचिदुच्यते। तत्रादौ आचार्यादिवरणं। तत्र यद्यपि मातृपूजा
चार्यवरणे कालविशेषो नोक्तस्तथापि संकल्पादि वृद्धिश्राद्धांतानां क्रमत्वात्तदुपरि द्रष्टव्यं। यद्यपि च मा
नु

Indira Gandhi National
Centre for the Arts

स्कांदे। एतेनाक्षरेण सो दासो नरसांसेन योजितः। राहुणा पीडितो राजा नलो भ्रांतो महीतले। अंगारकविरोधेन रामो राष्ट्राद्विवासितः।
असमेन शशांकेन हिरण्यकशिपुर्हतः। रविणा सप्तमस्थेन रावणो विनिपातितः। गुरुणा जन्म संस्थेन हतो राजा सुयोधनः। पांडवा
बुधपीडायां विकर्मविनियोजिताः। षष्ठेनोशनसा युद्धे हिरण्याक्षो निपातितः। एते चान्ये च बहवो ग्रहदोषैश्च पीडिताः। देवत्वं न ग
जंती पक्षरासंसक्तिनराः। पीड्यंते ग्रहपीडाभिः किंतु नष्टविमानगाः। इत्यादि। सचनित्यादिभेदेन त्रिधा। अयनादि तु मिताः संस्कारेषु

१५ स्येनाचार्यवरणं नोक्तं तथापि तद्व्याने आचार्यत्वाभावात्ताः कृतायाः जपेयुरिति निषेधाच्च तत्सिद्धिरिति पितामह
चरणाः। माध्याः। अथर्त्विजो वेदविदश्च कार्याः। सुरूपवेषाश्च यशीलयुक्ताः। गुरुश्च वेदार्थविदार्यदेशसमुद्भवः।
शीलगुणाधिकतमः। तत्र गुरुर्वेद्विगुणं दद्यादिसाचार्ये पि गुरुशब्दप्रयोगाद्वाचार्य एव गुरुः। क्षत्रियादीनां तु
रोहित एव आचार्यत्वादिकं वरणाभरणादि जन्यमित्यन्यत्र विस्तरः। तत्राचार्यवरणं प्रथमं। केचित्तु ब्रह्मव
रणं प्रथममित्याहुः। प्रतिष्ठाकांडे हेमाद्रौ त्वादौ सदस्यवरणमुक्तं। मंत्रस्तु। त्वं नो गुरुः पिता माता त्वं प्रभुस्त्वं परा
यणं त्वत्प्रसादाच्च विप्रर्षे सर्वं मे स्यान्मनोगतं। आपदि मोक्षणार्थाय कुरुष्व तमतंद्रितः। ऋत्विग्भिः सहितः
१२ शुक्लैः। संपन्नैः सुसमाहितैः। आचार्यत्वं संयुक्तः कुरु कर्म यथोदितमिति। सांप्रदायिकास्तु। सदस्यस्यादौ वरणं प्र
वरणास्तृतीयादिविषये। तेन सर्वत्राचार्यवरणमेव प्रथममित्याहुः। आचार्यवरणो वाचार्यस्तु यथा स्वर्गे इति
मंत्रः। केचित्तु यथा शक्रस्य वाग्मी। आचार्यः सर्वकर्मसु। तथा मया त्वमाचार्यो वृतोस्मिन्नपयज्ञकर्मणीति
मंत्रमाहुः। ततो ब्रह्मवरणं। तद्वरणे च यथा चतुर्मुखो ब्रह्मेति मंत्रः। ततः ऋत्विग्वरणं। तथा नवग्रहमखे
कुर्याद्धर्त्विजः चतुरः शुभानिति वचनाद्त्र चत्वार ऋत्विजः। अन्यत्र तु भृगुशास्त्रत्रावेष्टहोतारो द्वारपालास्त १५
योऽपि वेदस्यादिवचनादष्टाविसन्ये। हेमाद्रौ भविष्योत्तरे तु। यथा कालस्थितैर्विप्रैस्तान्तिशीलैर्विचक्षणैः
= आचार्यवरणं कुर्यान्नारिकेलफलादिना। कुशैः श्रोते तु कर्तव्यं वरणं दंपतीसहेति - ५

स्यानियमश्चात्र ब्राह्मणानां नरोत्तम। न कालनियमश्चैव स्वित्ययाप्यत उच्यते इति हेमाद्रिरप्रकरणेक्यचनाद
त्र ऋत्विजामनियम इत्युक्तं। प्रयोगदीपिकायामप्येवं। ततः साचार्यऋत्विजां मधुपर्कः। ऋत्विजो वृत्वा मधु
पर्कमाहरेदिति आश्वलायनवचनात्। संपूज्य मधुपर्केण ऋत्विजः कर्म कारयेत्। अपूज्य कारयन्कर्म
किल्बिषेणो वयुज्यत इति विश्वामित्रवचनाच्च तत्र च वृतानां भिन्नशास्त्रत्वात्तस्यापि संभवाद्वा तस्याचार्या
देर्याः शाखा तया मधुपर्को न तु यजमानशाखाया। तदुक्तं गृह्यभाष्यकारैः। अर्थशाखया मधुपर्क इति। मधुप
कीर्तिधिश्चेपि। अर्ह्यस्य यात्र वेद्यशाखा न च्छाखा गृह्यचोदितः। मधुपर्कः प्रदातव्यो अन्यथा स्वापि दातरीति। अर्थ्यो
कर्मा स्य योऽवीयं कर्मतच्छाखया मधुपर्क इति केचित्। तत्र। मधुपर्केषु स्नातकराजमातुलादिषु कर्माभावेनैत
स्या संभवात् क्वचिद्धीयमानशाखायाः क्वचिच्च कर्मसंबंधिन्याः न ह्यो वैरूप्यापत्तेः तेन सत्रे करूप्येणापीष्टं
यमानशाखयैव मधुपर्क इति पितामहचरणाः। तत्र मधुपर्कपूजायां। कांडानुसमयः पदार्थानुसमयो वा। तत्रा
पि विष्टरः पाद्यमर्घ्यमाचमनीयं मधुपर्को गौरित्येतेषां षण्णां पदार्थानां त्रिस्त्रिर्निवेदनं। त्रिस्त्रिरेकैकं वेद्यं
तृते इति। सूत्रात्। एतेषामितिग्रहणात्तेषामेव त्रिर्निवेदनेन त्वन्येषां भोजनादीनामिति वृत्तिकृत्। अर्हेव
र्णेयत्ने नोत्तरागे विष्टरे उपविशेत्। पद्यमाक्रमेद्वा। अनयोर्विकल्पः। विष्टरस्तु पंचाशतावद्धस्तानद
र्भैस्तु विष्टरस्तु लक्षणः। सोत्रे। अहं वर्ष्मेति विष्टरोपवेशने मंत्रे कृष्णादिस्मरणं नेति केचित्। तं
च। विष्टरं वा मा वा तेन कुर्यादित्युक्तं प्रयोगरत्ने। परिशिष्टेपि। दक्षिणावर्तको ब्रह्मा वामयत्नस्तु विष्टर इति ॥

प्र॰चि॰ यद्वा पंचविंशति दर्भाणां वेण्यग्रे ग्रंथिभूषिता। विष्टरः सर्वयज्ञेषु मुनिभिः परिकीर्तित इति। अत्र च पाद्या मधुपर्क
१६ र्घमध्यार्घमाचमनीयार्थं स्नुद्धाचाचमनीयार्थं च पात्रचतुष्टयं संपादयेदिति भट्टाः। पादप्रक्षालने च
दक्षिणं पादं ब्राह्मणाय प्रयच्छेत् सव्यं शूद्राय क्षत्रियवैश्ययोस्त्वनियतमिति वृत्तिः। पाद्यानंतरं चाच
मनं। कारिकायां। गंधादिषु क्रमध्यें च प्रतिगृह्य निवेदयेत्। ततस्त्रिर्निवेदितस्याचमनीयस्यैकदेशमा
दाय पीत्वा ततः आचमनं कुर्यात्। अथाचमनीयेनाचमनीति सूत्रे अथशब्दार्घ्यानंतरमाचमनीय
मेव। तेन गंधमाल्यादीनि परिसमाप्ते कर्मणि दातव्यानीति वृत्तिः। अत्र च। दधिमधुयुतः कांस्येनापिहि
तो मधुपर्कः। दध्यलाभे पयो जलं वा प्रतिनिधिरित्युक्तं प्रयोगरत्ने। सर्पिर्वा मध्वलाभे। मध्वलाभे अ
यमेव प्रतिनिधिर्न तु मध्वलाभे गुडो देय इत्यादि इति वृत्त्याशयः। अत्र केचित्। आचमनीयप्राशनानं
तरं वारत्रयं मधुपर्कप्राशने च शौचार्थमाचमनं न कर्तव्यं। मधुपर्के च सोमे च अप्सु प्राणाहुतीषु चानो
च्छिष्टो भवतीति। वचनात्। उत्तरत्र आचांतोदकाय गामिति दर्शनाच्चेत्याहुः। तत्र। अनुच्छिष्टविधानेपि यत्रा
चमनं न प्रतिषेधति सूत्रकारः। तत्र शौचार्थमाचमनं भवत्येव। सोमे त्वनुच्छिष्टविधानेपि दूनायवा
दिग्रहभक्षणे। नत्वाचामेदिति वचनान्नाचमनमिति वृत्तिः। कारिकायां। अंतरेण शौचार्थं सर्वमाचम
नं विह। आनीयमानमीक्षेत मित्रस्य त्वेति मंत्रतः। मधुपर्कमथानीतं पूर्ववच्च निवेदितं देवस्य त्वेति मं १६
त्रेण गृह्णात्यंजलिना ततः। अंजलिग्रहणात्तेनैव ग्रहणं। मधुवाता इत्यनेन मधुपर्कमवेक्षेत। अंजलि

स्थमेनावेक्षेतेत्यर्थः। यद्यपि सूत्रे देवस्य त्वेति अंजलिना प्रतिगृह्य सव्ये पाणौ कृत्वेति अंजलिप्रतिग्रहणोत्त
रमेव सव्ये पाणौ करणमुक्तं। तथापि सूत्रोक्तक्रियाचतुष्टयमध्ये क्रियाद्वयस्य द्वयस्य यथासंख्यन्यायेनान्व
यादंजलिना प्रतिगृह्य मन्त्रेणावेक्ष्य सव्ये पाणौ कृत्वा अंगुष्ठानामिकाभ्यां त्रिः प्रदक्षिणमालोड्येत्येवमन्वय इ
ति वृत्तिकाराशयः। केचित्तु सव्ये पाणौ कृत्वेति क्षिप्तमाहुः। कृष्णभट्टीकारस्तु वृत्त्यनुसारात् अंजलिना प्रति
गृह्य मन्त्रेणावेक्ष्य सव्ये पाणौ कृत्वेति पाठमाह। सर्वथा अंजलिस्थावेक्षणं सिद्धं। कारिकायां। निधाय तत्स
पात्रं सव्ये पाणावतः परं। अंगुष्ठोपकनिष्ठाभ्यामालोड्य त्रिः प्रदक्षिणं। वसवस्त्वादिभिर्मंत्रैर्दिक्षु पूर्वा
दिषु क्रमात्। निमृज्यांगुलिलेपं तु भूतेभ्यस्त्वेति मंत्रतः। तेन अंगुलिलेपस्यैव दिक्षु निमार्जनं। न तु तद्
र्थं भिन्नतया ग्रहणं। त्रिरुद्धृत्य त्रिरुत्क्षिप्य प्रभ्मो पात्रं निधाय च। उद्धृत्य पात्रत्रये निष्क्रम्य मंत्रत्रयेणाप्रा
शनं कुर्यादिति वृत्तौ पक्षांतरमुक्तं॥ ततो विराजो दोहोसि विराजो दोहमशीय मयि दोहः पद्यायै विराज इति प्रा
श्नीयात्। प्रतिप्राशनमाचमनविनियोगं च कुर्वीत शिष्टस्यास्योक्तमार्गतः। न तृप्तिमधिगच्छेत्। ब्राह्मणा
योच्छिष्टं प्रयच्छेत्। लोकविच्छिष्टं वाप्यप्सु क्षिपेत्। कारिकायां। आचम्याथामृतापीति पिबेदाचमनीय
कं। आचाम्याचमनीयं तु पिबेत्सत्यं यशः श्रीरिति। आचांतः पुनराचामेद्धृष्यां त्रिर्निवेदयेत्। तेनांते द्विरा
चमनं। पाद्ये चाचमनीये चोपस्तरणे प्राशनत्रये पिधाने शेषपाने द्विरेवमष्टकृत्व आचमेत्। तत्रैकं शुद्ध्यर्थं॥
अन्यत्तु करिष्यमाणकर्मांगमिति वृत्तिः। तेनाचांतग्रहणं शौचार्थमाचमनं कृत्वा कर्मांगमप्या। चमनं कु

Indira Gandhi National Centre for the Arts

= वरणसामग्री। भाजनं भोजनार्थं पात्रोपलक्षणं कमण्डलुः। आसनं वसनं मुद्राकर्णभूषोपवीतकं। एतद्रव्यविधं ते
= वरणार्थं हि द्विजे। पदाभावे त्रयं देयं पात्रं वस्त्रं गुलीयकं। तदभावे यतो मूलं दक्षिणां च प्रकल्पयेत्॥३= न-मधुपर्के
धार्यमेव चमनीयानि इत्यर्थ। तेन स्नानीयं च
प्र॰चि॰ प्रोदिसेवमर्थ। तेनाचमने उदकांतरं भवतीति इति॥ अत्र चोदकं च मा चमनीयमिति इत्यर्थः। ततः ओं मुखमज्जति
१६ मनेषु आचमनीयमिति इति दिशि इतिः। फारिकायां। ततो वरो जपेन्मातारुद्राणां दुहितेत्यृचं। ततः ओं मुख्यमज्जति
मनेषु आचमनीयमिति इतिरिति इति:। कारिकायां। ततो वरोजपेन्मातारुद्राणां दुहितेत्यृचं। ततः तृणावलोकनं भोजनं देयं। कृताव
लोकनस्य प्रत्यस्य गवा उत्सर्गं कुर्यात्। ततः नामांसो मधुपर्को भवतीति वाक्यात् अत्र वेध्यं भोजनं देयं। पत्तु पुस्तकास मधुपर्के लक्ष्मीमिति
वचनेन प्रकारेण भोजनमुपदिष्टं भवतीत्यादि नाग्रे पे नात्र भोजनमुक्तं। पत्तु पुस्तकास मधुपर्के लक्ष्मीमिति
म तद्वैधभोजनस्यैवानुवादकमित्यलं विस्तरेण मधुपर्कप्रयोगस्तु विवाहप्रकरणे वक्ष्यते। मधुपर्कपूजानंतरं
८ च वस्त्रादिनमुक्तं लैंगे। वस्त्रयुग्मं तथा पुष्पं केयूरं कर्णभूषणं। अंगुलीभूषणं चैव मणिबंधस्य भूषणं।
कंठाभरणयुक्तानि प्रारंभे सर्वकर्मणि। पुरोहिताय दत्वाथ ऋत्विग्भ्यश्चापि दापयेत् इति। अलंकृतं जल
पात्रं॥ पुरोहितश्चात्राचार्यः। तस्मै च द्विगुणं गुरवे देयाद्भूषणाच्छादनादिकमिति मात्स्य वा काद्विगुणं देयं॥
द्विगुणं च वस्त्रयुग्मं गुरोरपीति वाक्याद्वस्त्रादेः संख्याकृतं भूषणादेस्तु सुवर्णादिगुण्यादिकृतं न तु सं
ख्याकृतमिति पितामहचरणाः। ततः प्रार्थना। लैंगे॥ पूर्यं वै ब्राह्मणास्तद्वाभित्र त्वेनानुपालिता सोरथेनैव
हव्यवतां भवेस्कृतो नरः स्वयं। भवतां प्रीतियोगेन स्वयं प्रीतः पितामह इति। यद्वा॥ ब्राह्मणाः संतु मे शरा
शास्ता: पापासांतु समाहिताः। वेदानां चैव दातारस्त्रातारः सर्वदेहिनां॥१॥ जपे यज्ञे तथा होमे दाने श्च १६
विविधैः पुनः। देवानां च पितॄणां च तस्य धर्मयाजकाः कृता:॥२॥ येषां देहे स्थिता वेदाः पावयंति जग

त्रयं। तेषां रक्षंतु सततं जपयज्ञे व्यवस्थिताः॥ ब्राह्मणाः संतु मे शस्ता इत्यादिभिर्मंत्रैः प्रार्थनं कुर्यात्। त
त आचार्यः अमुककर्मणि वृतोऽहमाचार्यकर्म करिष्य इति संकल्पं कुर्यात्। ततः सिद्धार्थविकिरणं। सं
ग्रहे। समंततश्च सिद्धार्थान् किरेद्रक्षोघ्नमंत्रतः। भूत संघानविघ्न संघानुत्सारयतु मा इत्यादि
ति। रक्षोघ्नमंत्राः। रक्षोहणमित्यादीनि सूक्तानि। तानि च यदत्र संस्थितमित्यादिपौराणमंत्रैः स्वमुखी
यैते। ततः पंचगव्येन प्रोक्षणं। सर्वतः पंचगव्येन प्रोक्षयेद्यागमंडपं। आपोहिष्ठात्र्चेनैव ततः स्वस्त्ययनं
जपेदिति प्रतिष्ठासारे तत्तेः स्वस्त्ययनं स्वस्त्ययनं तार्क्ष्यमिति ऋग्रूपमिति शिष्टाः। ततः कुंडमंडपा एव
प्यावश्यकत्वं नान्यत्र कृतेष्वपुनः। तदुक्तं मात्स्ये। तिर्यग्मिति कृत्वा सर्वमन्यत्समंडपं। कुंडमंडपप
क्षे मंडपं कुंडं च हस्तमात्रं विधाय कुंडेशानभागे वितस्त्युच्छ्राय संमितामिति वचनात् वितस्त्युच्छ्रायां च प्र
द्वयेन सह हस्तमात्रविस्तृतां ग्रहवेदीं कुर्यात्। लक्षहोमे तु तस्यचोत्तरपूर्वेणावितस्तित्रयसंमितां॥ प्रागु
दक्प्रवणं तद्वच्चतुरस्रं समंततः। विष्कंभार्धोच्छ्रितं प्रोक्तं स्थंडिलं विश्वकर्मणेति वचनात्। षट्त्रिंशदंगु
लोऽथ द्वादशांगुलोच्चां वा ग्रहवेदीं कुर्यात्। महारुद्रातिरुद्रादावपि इयमेव षट्त्रिंशदंगुला वेदिरिति केचित्॥
तन्न महारुद्रादेर्ग्रहमखविकृतित्वेन हस्तमात्रविस्तृतायाः ग्रहमखवेदेरेव तत्र प्राप्तेः। महारुद्रादिल
क्षहोमविकृतिः स्वाभावात्। अत एव ग्रहमखे प्रकरणे तस्य चोत्तरपूर्वेण स्थंडिलं हस्तमात्रकं॥ द्विवप्र
वतु रस्रं च वितस्त्युच्छ्रायसंमितेति हस्तमात्रविस्तृतैव ग्रहवेदिरुक्ता। सा च मंडपे शानन वमभागमध्ये कार्या। कुंडासंभवे
तमि

Indira Gandhi National Centre for the Arts

प्र०चिं० स्थंडिलं वा कार्यं तदुक्तं शारदातिलके। नित्यं नैमित्तिकं होमं स्थंडिले वा समाचरेदिति। नित्यनैमित्तिकयोरेव ग्रहः स्थंडिलक॰
१८ णात् काम्ये न स्थंडिलं। तस्य मानं तत्रैव। हस्तमात्रेण तत्र कुर्याद्वालुकाभिः सुशोभनं। अंगुलोत्सेधसंयुक्तं च
तुरस्रं समंततः इति। होमवाहुल्ये तु स्थंडिलं महत्कार्यं। अर्थात्सपरिमाणमिति कात्यायनोक्तेः। अंगुलोत्सेधमि
त्यंगुलोच्चमिति केचित्। अंगुष्ठं हि त्वापानि चतुरंगुलानि तावदुच्चमित्यन्ये। सूत्रे तु इषुमात्रावरं सर्वतः स्थं
डिलमित्युक्तं। इषुस्तु अरत्निरिषुरुक्त इत्युक्तलक्षणः। अरत्निस्तु कलाशरहितो हस्तः तस्मिन् पक्षे एकैकस्यां दिश्य
षिशा किंचिन्न्यूनानि सप्तदशांगुलानि। पदास्त्वाप स्वं च मतांचतुर्विंशत्यंगुलो रत्निस्तदा एकैकस्यां दिश्य
शाह्यंगुलमनेन च तस्य चापि दिक्षु इषुप्रमाणमिति वृत्तिः। अत्र केचित्। कुंडमेवं विधं न स्यात्स्थंडि
डिले वा समाश्रयेदिति क्रियासारे तथा समंपवकुर्यादिह वैश्वानरीं द्विज इति वदन्नादौ विधानात्स्था
नापसास्थंडिलेपि मेखलायोन्यादि कार्यमित्याहुः। तन्न। स्थंडिलस्य कुंडस्थानापन्नत्वेपि परिधिवत्
स्वस्वरूपाविरोधिधर्मग्राहकत्वात्। किंच। क्लृप्तं प्रकार्यत्वे स्थानापत्तिर्युक्ता। कुंडस्य क्लृप्तंका
र्यं। अथाग्निकार्यं वक्ष्यामि कुंडे वा स्थंडिलेपि वेत्यादि वायवीयसंहितावचनैः कुंडस्थंडिलयोर्युगपद्विधा
नात्। न चैवं तर्हि द्वयोः सामानविध्येनैव मेखलादिप्राप्तिरिति वाच्यं। प्रातिस्विकधर्मविधात्र न समानविधि
त्वाभावात्। अन्यथा खननादीनामपि प्राप्त्यापत्तेः। तेन कुंडमेवं विधं न स्यादिति क्रियासारोक्तवाक्ये सधर्मककुं
डाशक्तावेव स्थंडिलविधानात्। न स्थंडिले मेखलाद्यापत्तिरिति पितामहचरणाः। तत्र वाजपेय्यां॥

पंचाशत्प्रमिते शतादशगुणे स्यात्कोटिहोमे क्रमात्कुंडे रत्निररत्निहस्तवितति द्व्यंगनागैः करैः। आहुर्लक्ष्य
कुतेः च हस्तमितमय्येकेकहस्तेपनं। यावत्संहितव लक्षकच्छित इदं कौटोलुपंत्या करेऽगुत्तरार्द्धपत्तपुष्पादि परं।
अत्र च विंशति सहस्राद्यनुक्तकुंडे होमे न्यूनसंख्यामिहितमेव कुंडं नाधिकसंख्योक्तं। प्रापकाभावात्।
न्यूनसंख्योक्तस्य तु महासंख्यायामवांतरसंख्यायाः सत्त्वात्। सति निमित्ते नैमित्तिकप्राप्ते र्बाधकाभावा
देव प्राप्तिः कुंडरत्नाकरेपि। न्यूनसंख्योदितेकुंडे अधिको होमो विधीयते। अनुक्तकुंडे न्यूनस्तु नाधिकेऽशस्यते
क्वचित्तत्। न्यूनसंख्येपि स्थलद्व्याद्यावधिकसंख्योक्तमपि कुंडं भवत्येव। अर्थात्सपरिमाणमिति कात्यायनोक्ते
रिति पितृचरणाः। एवं कुंडमंडपं च विधाय मंडपप्रवेशं कुर्यात्। मंडपकरणापक्षे मंडपप्रवेशानंतरं सर्षपाविकि दि
रणं मंडपप्रवेशे च विशेषो मात्स्ये दर्शितः। अत्र मंडपकुंडप्रकारः अस्मत्कृते दानकांडे द्रष्टव्यः। ततो मंगलश
ब्देन सवेदिघोषं निस्वनेन च। मंगलस्सूक्तानामानोपद्राद्या दीनो स्वनद्रसर्पैः। शुक्लमाल्याम्बरधरः शुक्ला
ग्ध्यानुलेपनः। यजमानः सपत्नीकः पुत्रपौत्रसमन्वितः। पश्चिमद्वारमाश्रित्य प्रविशेद्यागमंडपं। अत्र सपत्नी
कत्वोक्तिः पुत्रपौत्रसमन्वित ... मा। श्रित्य प्रविशेद्यागमंडपं। अत्र सपत्नी ... क्तिः पुत्रपौ...
पूर्ण इतिवत्। पत्नीसमन्विषया। दर्शपूर्णमासादिवदत्र सपत्नीकस्याधिकाराभावात्। तेनात्रापत्नीकस्याप्यधिकारः। तथा
तत्रैव। आनुष्ठ्यांधरौ वा मंडपं प्रविशेत्ततः। द्वारेण पश्चिमेनैव प्रविशेत्तोरणेन तु होमद्रव्यं तु पूर्वेणाद्यनार्थं दक्षि
णेन तु। प्रतिष्ठा पौष्य संपाराद्युत्तरेण प्रवेशयेदिति। प्रतिष्ठेसुपलक्षणं। तत्र प्रवेशानंतरं कार्याणामाचार्या
णीग२

Indira Gandhi National
Centre for the Arts

प्र०चि०
१८

धीरत्वात्स्वेशो आचार्यो दिशाहि समपि बोध्यं। प्रवेशसमये च मंडपालंकरणमुक्तं सिद्धांतशेखरे। पताकाध्वजसं मंडपकुं०
युक्तं पुष्पमालाविराजितं। चूतपल्लवशोभाढ्यं वितानैरुपशोभितं। विचित्रवस्त्रसंछन्नं तुल्यस्तंभविभूषि
तं। सफलैः कदलीस्तंभैः क्रमुकैर्नालिकेरकैः फलैर्नानाविधैर्दृश्यैर्दर्पणैश्चामरैरपि। भूषितं मंडपं कुर्याद्
त्पुष्पस्रगुज्ज्वलमिति। इदं च पताकादिशोभार्थं वक्ष्यमाणपताकाभ्यो न्यदिति केचित्। अन्ये तु सर्वासामेव पताका
नामादौ बंधनमात्रं कृत्वा तस्मिन् समये निवेदनमात्रं कुर्यादित्याहुः। ततो रक्षोहणमिति सूत्रेन त्रिसूत्र्या वस्त्रे ते
णवा मंडपवेष्टनं कुर्यादिति केचित्। हेमाद्रौ भविष्योत्तरे तु। ततस्तु सहितैर्विप्रैः सूत्रयेन्मंडपं शुभमि
त्युक्तं। तदनंतरं तु वास्तुपूजनं कार्यं। अंगसंकोचपक्षे तु ततः प्रविशेद् दक्षिणांघ्रिणा। नैर्ऋत्यां दिशि वास्तोष्पतेश्च
लक्षणांश्च समर्चयेदिति। धाराशाकलिकात्। हेमाद्रौ तु वक्ष्यमाणतोरणादिपूजानंतरमुक्तं। मंडपं संप्रविश्याथ तोरणा
दिप्रपूज्य च। वास्तुयागं ... ततः कुर्यात् प्रासादे मंडपेथ वेति मंडपे मंडपमात्रे इत्यर्थः। इदं तु वास्तुपूजनमाव
श्यकं। यतोत्सवादौ च यत्किंचित्तत्वाहारो भविष्यति। वास्तुपूजाम कुर्वाणस्तवाहारो भविष्यतीति मात्स्येभिधाना
सु त्। अत्र मंडपं प्रविश्यर्त्विक्सप्रत्ययेन समानकर्तृकत्वावगतेर्यजमान एव सिद्धार्थविकिरणादि वास्तुपूजां त
कर्तेति शिष्टाः। तदुत्तरत्राविन्यां मंडपप्रतिष्ठायां तु आचार्यः प्रक्षिपेद् भूमौ बलिं मंत्रैर्विचक्षण इति मात्स्यवाक्या
दाचार्य एव कर्तेति केचित्। ममाध्वरं पाहि। सर्वैर्ममाध्वरे रक्षामिति मंत्रलिंगाद् यजमानयुक्तस्य गुरोः कर्तृत्व
मित्यन्ये। ममेति षष्ठ्याः ममाग्ने वर्च इति वत् यजमानव्यतिरेकेणाप्युपपत्तेराचार्य एव कर्तेति सांप्रदायिकाः।
ततस्तोरणानि निधेयानि। तदुक्तं मूलागमे। मंडपे धात्रि मीळे इति विन्यसेत् पूर्वतोरणं रवे त्वोर्जे इति मंत्रेण १८

दक्षिणस्य निवेशनं। अग्न आयाहि मंत्रेण पश्चिमस्य निवेशनं। शन्नो देवीति मंत्रेण दद्यादुत्तरतोरणमिति। तानि च। सुदृढंच
सुदृढंच क्रमादुदुंबरपिप्पलानां पलाशवृक्षस्य च तोरणानी सुक्तानि। तत्रैस्तुसर्दं च सुकर्म च सुहोत्रमिति। क्रमेणाद
वलावालं नाम मंत्रेण कुर्यात्। नाममंत्रे च प्रणवपूर्वकता हेमाद्रावुक्ता। प्रणवादिनमोंतं च चतुर्थ्यंतं च सर्वदेवता
याः स्वकं नाम मूलमंत्रः प्रकीर्तित इति। तोरणध्वजमूलेषु सरत्नान् वस्त्रवेष्टितान्। अकालमूलकलशा
न् विन्यसेत् सुसमाहितः। ध्रुवं धरां वा कूपतिं च विघ्नेशं तत्र पूजयेदिति। एवं तोरणपूजां कृत्वा द्वारपूजां कुर्यात्।
तत्र द्वारेषु कुंभद्वयं कोणेषु चैकैकः कुंभः स्थाप्यः। तदुक्तं मात्स्ये। द्वारेषु कुंभद्वयमात्रकार्यं स्रग्गंधधूपांबररत्न
पु युक्तमिति। तथा। मंडपस्य तु कोणेषु कलशेषु क्रमादिमिति। अग्ने तीर्थो दुर्जयश्चैव सिद्धार्थो गजलस्तथा। पूर्वादि
रस्य कुंभेषु शक्राद्यास्तन्मनूक्तमैरिति मूलागमादिते क्रमेण पूज्याः। तेन षोडश कलशाः। यत्तु कोटिहोमे विन्य
सेत्। कलशांस्तत्र जलपूर्णांश्चतुर्दशेत्युक्तं। तत्तोरणकलशानां मंडपसंबंधित्वाभावाद्वास्तुगृहकलशाभा
दायत्ते यामिति पितामहचरणाः। कलशलक्षणानु स्वस्तिवाचनप्रकरणे उक्तं। तथा कुंभेषु जलगंधपल्लवस
कं र्वौषधिपंचरत्नाक्षतारेयाः। तदुक्तं मात्स्ये। विन्यसेत् कलशांस्तत्र जलपूर्णान् विचक्षणः। अश्वत्थपुष्पचूताद्यैः
पल्लवैरुपशोभितानिति। तथा मानवसंहितायामपि। गोमयालेपिते देशे धान्यस्योपरि पल्लवैरुपशोभिते। व्रीहींस्तत्र विनि
क्षिप्य स्थापयेत्तत्र कुंभकं। आकलशेष्विति सनया कलशस्थापनं मतं। इमं मे गंगे मंत्रेण पूरयेत्तीर्थवारिणा। गंध
द्वारामिति सनया गंधं चैव विनिक्षिपेत्। उद्धता सीतिमंत्रेण तस्मिन् कुंभे मृदः क्षिपेत्। या ओषधीरिति सनया सर्वौष

Indira Gandhi National
Centre for the Arts

प्र० चि० ध्यो विनिक्षिपेत्। पंचरत्नानि चादित्यपुराणे। सुवर्णं रजतं मुक्ता राजावर्तं प्रवालकं। रत्नपंचकमाख्यातं सर्वकर्मसु शो- कुंडमंडप०
भनं। अन्यत्र तु। कनकं कुलिशं नीलं पद्मरागं च मौक्तिकमिति पंचरत्नान्युक्तानि। अभावे पंचरत्नानां हेमं सर्वत्र
२० योजयेत्। सर्वौषध्यस्तु। सुरामांसी वचा कुष्ठं शैलेयं रजनीद्वयं। सटी चंपकमुस्ता च सर्वौषधिगणः स्मृत इ-
ति मत्स्यपुराणे उक्ताः। पंचपल्लवास्तु अश्वत्थोदुंबरो जंबू चूतन्यग्रोधपल्लवाः। पंचभंगा इति प्रोक्ताः समस्तसुरवल्ल-
भा इति मात्स्ये उक्ताः। कुंभोपरि पूर्णपात्रं च निदध्यात्। सौवर्णं राजतं वापि ताम्रं मृन्मयमेव वा। व्रीह्यादिपूर्णं नि- निता
दध्यात्। कुंभोपरि पिधानकमिति संग्रहोक्तेः। ततः एह्येहीत्यादिमंत्रैरिंद्रादीन् आवाह्य त्रातारमिंद्रमित्याद्यैर्वैदिकैर्मं-
त्रैर्लोकपालानावाहयेत्। मात्स्ये। संहितायां तु ये मंत्रास्तत्तद्दैवत्याः श्रुतौ स्मृताः। तैः पूज्या लोकपालानां कर्तव्यं तु समंततः
स इति। ततः ध्वजारोहणं कार्यं मंडपस्य समंततः। ध्वजांश्च लोकपालानां सर्वदिक्षु निवेशयेदिति वचनात् ध्वजपताकाश्चो-
च्छ्रित्य पूजयेत्। ध्वजपताकावर्णास्तु पीतो रक्तः कृष्णो नीलो श्वेतो धूम्रश्च पीतकः। रक्तश्च मेघवर्णश्च श्वे-
श्वेति ध्वजाः स्मृताः इति संग्रहे उक्ताः। ध्वजपताकाप्रमाणमुक्तं मात्स्ये। पंचहस्ताः ध्वजाः कार्या वैपुल्येन द्विह-
स्तकाः। सप्तहस्ताः पताकास्तु विधा सांगुलविस्तृताः। दशहस्ताः पताकानां दंडाः पंचांशवेष्टिता इति। हेमाद्रौ प्रति-
ष्ठाकांडे तु पंचहस्तास्तु दीर्घाश्च ध्वजाः कार्याः सुविस्तृताः। हस्तोच्छ्रितदशकादंडा ध्वजानां पंचहस्तका इत्युक्तं। म-
ध्यपताकायास्तद्दंडस्य च परिमाणमुक्तं प्रतिष्ठासारे। पताका दशहस्ता स्यात् मध्ये पंचांशविस्तृता। शोभना
जलदाकारा मध्ये स्यान्मंडपस्य तु। मध्यध्वजस्य दंडस्तु करैः षोडशभिर्मित इति। ततः ईशानपूर्वयोर्मध्ये अ- २०

नंतं पश्चिमनिर्ऋतिमध्ये ब्रह्माणं स्थापयेदिति हेमाद्रिः। रूपनारायणमते तु विपरीतं। अनयोः पताके
पि सवतः लोकेशवर्णोपरितः पताका इत्युक्तेरिति केचित्। अन्ये तु ऊर्ध्वं तु ब्राह्मणे देयः। अधस्ताच्छेषवा-
सुके इति मात्स्यवाक्ये न लोकपालपूजोर्ध्वमनंतयोर्ब्रह्मादिपूजोक्तेर्न ध्वजादिकमित्याहुः। लोकपा-
लेभ्यश्च बलिमपि दद्यात्। तदुक्तं मात्स्ये। बलिं च लोकपालेभ्यः स्वमंत्रेण निवेदयेत्। ऊर्ध्वं च ब्राह्मणे
इंद्रः देयः। अधस्ताच्छेषवासुकेरिति। तथा सुरपतिः श्रेष्ठ इत्यादि बलिमंत्रानुपक्रम्य। ॐकारपूर्वकाद्यैस्तेभ्य-
से बलिनिवेदने। मंत्रास्तु सर्वकार्याणां ऋद्धिपुत्रफलप्रदा इति वचनात्। सर्वे बलिदानमंत्राः।
प्रणवपूर्वमुच्चार्याः। कलशस्थापनं अनंतब्रह्मणोर्नेति प्रतिष्ठासारे। यद्यप्येह्येहीत्यादीनां मंत्राणां
प्रकरणात् कलशांगत्वं। तथापि मंडपावांतरप्रकरणद्वारा तेषां तदंगत्वान्मंडपस्यान्य[illegible] प्राप्तौ तेषामप्य- त्र
त्र प्राप्तिः स्यादेवेत्यन्यत्र विस्तरः। तथा। द्वारपूजासमये द्वारपालवरणं च ऋग्वेदपद्मपत्राक्ष इत्यादि
मंत्रैः कुर्यात्। हेमाद्रौ तु ऋत्विग्वरणकाल एवैषां वरणमुक्तं। शिष्टास्तु यदेव यस्योपयोगस्तदैव तस्य
वरणं तेन दर्शे ब्रह्महोत्रादिवरणवत् यस्मिन् तस्मिन् काले एव तत् पूर्णं कुर्यादित्याहुः। अन्ये तु पूर्वं
व वरणेपि ऋत्विजां वरणं दृष्टार्थं द्वितीयवरणमित्याहुः। ते च पूर्वेण ऋग्वेदविदौ वेतां यजुर्वेदौ
दक्षिणतश्च कार्यौ स्थाप्यौ द्विजौ सामविदौ च पश्चादाथर्वणौ उत्तरतश्च कार्यौ इति मात्स्ये उक्ताः। ततः पूर्व

Indira Gandhi National Centre for the Arts

प्र०चिं०

२१

स्यामीशान्यां वा भूमिमुपलिप्य तत्र लोकोपयानि भूतानीत्यादि मंत्र वर्णिकी देवता आवाह्य संपूज्य मंड कुं० मं०
पस्तंभेषु देवान् महाध्वजे च ब्रह्माणं संपूजयेत्। तत आचार्यः। कुंडेषु संस्कारादिकं कृत्वा मेखला
सु देवता आवाहयेत्। ताश्च। प्रथमा सात्विकी द्वितीया राजसी मता। तृतीया तामसी तासु
देवा ब्रह्मा-च्युतेश्वरा इति कामी कोक्ता:। अनेनैव क्रमेण देवतावाहनमिति केचित्। अत्रोपरि मेखलातः
प्राथम्यमिति शिष्टाः। इदं त्रिमेखलपक्षे। एकद्विपंचमेखलपक्षे तु आसामेव न्यूनता आवृत्तिर्वा ज्ञेया तत्
था। प्राच्यां शिरः समास्यातं बाहू दक्षिणसौम्ययोः। उदरं कुंडमित्युक्तं योनिः पादौ तु पश्चिमे॥ अथात्रैव प्रसंगात्
सकलकर्मसाधारणम् अग्निमुखम् अभिधीयते। तत्रादावग्निस्थापनं। तच्चाचार्यशाखयेति केचित् तन्नाप
जमानं प्रति स्वशाखाश्रयमुक्त्वा परशाखाश्रयं तु यः। कर्तुमिच्छति दुर्मेधा मोघं तत्तस्य चेष्टितमिति हेमाद्रि
धृतवचने स्वशाखीयमंत्रयुक्तस्यैव कर्मणो विधेः प्रवृत्तत्वेन परशाखीयमंत्राणामंगत्वेमानाभावात्।
अन्यथा कात्यायनादेरप्यापस्तंबशाखागतमंत्रानुष्ठानेन सांगत्वापत्तेः। यत्तु वचनं यथा तुलायां पूर्वेण
ऋग्वेदविदो भवेतामित्यादि तत्र द्वारपालानामेव कर्तृत्वमित्यलमत्र विस्तरः। यदा तु गृह्यपरिशिष्टोक्तप्रकारेण न
वग्रहमखः क्रियते तदा ग्रहस्थापनानंतरमग्निस्थापनादि कार्यं। यदा तु पौराणो ग्रहमखस्तदा पुण्याहं विप्रक ऋ३
थितेकृत्वा ब्राह्मणवाचनं। अग्निप्रणयनं कृत्वा वेधामावाहयेन्मुरानिति मात्स्यवाक्यादग्निस्थापनोत्तरं ग्र २१
हस्थापनमिति निष्कर्षः। तत्राग्निस्थापनं कुंडे प्रागुक्ते स्थंडिले वा कार्यं। तदुक्तं गृह्ये। अथ खलु यत्र क्वचहो

ग्र१

४ = तेष्वेव प्राप्तिरुक्ता। तथापि तेषामातमसंस्कारत्वात् तद्द्वारा नवग्रहमखादौ प्राप्तिरनिवार्यैव। अथ शब्दोधिकारार्थः। यान्यतः परं वक्ष्यते तेषामेवा = ...
= पंक्तिः। एवं च वैश्वदेवस्य सत्र कालेण ... हितत्वात् प्राप्यमाणोपि ... प्राप्यमाणो होमप्रमोन ... ... =

धन्वन्तर्यादिषु मात्रावरं सर्वतः स्थंडिलमुपलिप्योल्लिख्य षड्रेखा उदगायतां प्रश्चात् प्रागायतेना नां तयोस्ति
स्रो मध्ये तदग्नुद्धृत्याग्निं प्रतिष्ठाप्याभाधाय परिसमुह्य परिस्तीर्य पुरस्ताद्दक्षिणतः पश्चादुत्तरत इत्यु
दकसंस्थं कुर्यात् पर्युक्षणमिति। यद्यप्यत्रसौत्राथ शब्दस्य गृह्योक्तकर्माधिकारार्थत्वं तत्स्थंडि
कादिधर्मा पौर्णमासादिगृह्यं परिचरेदिति सायंप्रातर्होमे प्राप्यर्थं च वग्रहणं ... मात्रे व मात्राप
स्यतत्। चतस्ष्वपि दिक्षु इषुप्रमाणं। किंचिन्न्यून सप्तदशांगुलं पक्षा। अष्टादशांगुलं। तेन हि सप्त
संगुलः परिधिरित्युक्तं प्रा...क। इदं हो मात्रानुसारेण। तादृशं स्थंडिलं प्रदक्षिणं गोमयेनोपलिप्य षड्रेखा
उल्लिखेत्। तत्रैका प्रादेशमात्रा उदगायता। प्रागायते दक्षिणोत्तरयोः असंस्पृष्टे मध्ये तिस्रः। षड्रेखाग्रहणं
... ... स्थंडिले खास्वग्नेः प्रतिष्ठापनं यथा स्यादित्येवमर्थं। तो ज्वलेखा ... ... अंगुलानि उदी
च्यां द्वे प्रतीच्यामर्धांगुलं स्वच्छा कुर्यादिति ...। अत्रांगुलं स्थंडिलव्यास चतुर्विंशोंशः। एवं लेखाः कृत्वा
तत्र शकलमुदगग्रं निधायाभ्युक्ष्याग्नेय्यां निरस्याप उपस्पृश्य वाग्यतो भवेत्। तदुक्तं। निधाय शकले
तस्मिन् अभ्युक्ष्य स्थंडिलं जलैः। निरस्य शकलं प्राच्यां पाणिं प्रक्षाल्य वाग्यत इति। स्मृत्यंतरेपि। स्नानस्य
तावरुणः कांतिं तु कल्पेऽग्निः श्रियं हरेत्। पुंजतो मृत्युरायुष्यं तस्मान्मौनं त्रिषु स्मृतमिति। कारिकायां
प्राणानायम्य संकल्प्य परितः स्थंडिलं शुचि। अधिकं वेदमात्रं वा गोमयेनोपलिप्य च। पात्रियं शकलं किं

वैश्वदेवरिमानां तत्परिसमत्यास्तथांडिल
प्र०चिं० ४

Indira Gandhi National Centre for the Arts

चिदादद्दीत ततः परं तेनोत्तरः शकलेन नेवषल्लेखा उल्लिखेत्ततः। अग्निस्थापनदेशस्य पश्चात्प्रादेशसं 
मितां उल्लिखेदुदगायामां तस्या उभयतोपरे। पूर्वोपक्रते उदक्संस्थे असंस्पृष्टे च पूर्वया। मध्ये तिस्र
२२ उदक्संस्थाः पूर्वायामा असंस्पृताः॥ लिखितायेन शकलं यस्ति यं तं निधाय च। अद्भिरभ्युक्ष्य शकलं नि
रस्याप उपस्पृश्य चोत्॥ अभ्युक्षणं तु मुष्टया सिंचति यत्तोयमभ्युक्षणमुदाहृतमिति। तेषां। अथाग्निनिर्ण
यः। तत्र यद्यपि स्मार्त होमोपासनं कुर्यादिति वाक्यात्। सर्वगृह्यहोमादि गृह्याग्नौ प्रतीयते। तथाप्युक्ता
न्येव तानि कानि गृह्याणि वक्ष्याम इति सूत्रस्थानि वक्ष्याम इत्यान्येव गृह्योणी त्वर्थे न स्व गृह्योक्ताना
मेव गृह्याग्निनियमात्। स्मार्त पौराणं वा गृहयज्ञादि लौकिके कार्य। यथा ह्याधाने नो स्मार्तानां श्रोतानीत्यम्
हवनीये जुहोति गार्हपत्ये हवींषि श्रपयति दक्षिणाग्नावन्वाहार्यं पचती त्यादिवाक्यैः स्वस्व कर्मसु विनियो
गात् अन्यत्र पचन प्रकाशनादौ विनियोग इति द्वादशे उक्तं। तथा गृह्याग्नेरपि गृह्यस्था लीपाकान्तो
कर्मगृह्याणि वक्ष्याम इति गृह्यं कर्म यथाविधीति कल्पसूत्रमन्वाधेयो पासनस्य गृह्य कर्मसु विनि
योगात् अन्यत्र लक्षहोमादौ न प्राप्तिः संभवतीति तत्र लौकिक एव। अत एव विनायक शान्त्यादौ लौ
किकाग्निरेव हेमाद्र्यादिभिरुक्तः। स्व स्वार्थत्वादपि। गार्ह्योपासने कुर्यात्सर्वाधानी तु लौ २२
किके कुर्यान्छ्रौतं वैतानिकाग्निष्विति। अत एव गृह्याग्निं विनापि होमेषु धर्मप्राप्तिरुक्ता आश्वलाय

स्मार्त चलौकिके—२

नसूत्रे। अथ खलु यत्र क्व च होष्यन्स्यादिति। कात्यायने सूत्रेपि एष एव विधिर्यत्र क्वचिद्धोम इति॥
यत्र क्वचिद्धोमः शान्तिकपौष्टिकादिः। अत्र कश्चिदाह। गृह्याग्निव्यतिरेकेणापि यथायं विधिः स्यात्त
दर्थमिदमुक्तं कर्कोपाध्यायैः। अत एव यत्र लौकिकाग्निस्थापनं तत्र श्रोत्रियं ब्राह्मणं वा दीक्षिते गृहमुपसमाहृ 
त्य तीति तन्त्रे चोक्तं महारुद्रप्रकरणे परशुरामेणापि। तस्मिन्कुंडे तु गृह्योक्ताकर्त व्यां कुशकण्डिकां।
लौकिकाग्निं समानीय कुंडमध्ये ततो न्यसेदिति। तत्रापि सोत्रोग्निर्द्विविधः। गृह्यः पौरुषश्च य
स्मिन्नविवाहादीनि कर्माणि क्रियन्ते स गृह्यः। जातकर्मचौलोपनयनार्थमाहृतो द्वितीय इत्यन्यत्र
विस्तरः। कारिकायां॥ प्रतिष्ठाप्यार्थलिख्यासु होमायालं हविर्भुजं। एतदं तं प्रकुर्वीत होष्यन्संस्थापिते नलो
इति। अलंपर्याप्तं॥ प्रदीप्त निर्धूमबहुलांगाररूपं सिद्धान्तशेखरे। उत्तमो रणिजन्योग्निरुत्तमः सूर्यकान्तजः।
उत्तमः श्रोत्रियागारान्मध्यमः स्वगृहादिजः स्मृतिः। नादृशाश्वाग्निः सौवर्णादाजततात्म्रादिपात्रेण प्रणेयः।
तदुक्तं प्रयोगपारिजाते। पात्रांतरेणापि हिते ताम्रपात्रादि केष्विह। अग्निप्रणयने कुर्यांच्छरावेता दृशोपि वा।
तथाश्मप्रंपात्रं तु कांस्यं स्यात्ते नाग्निं प्रणयेद्बुधः। तस्याभावे शरावेण नवेनाति दृढेन वा। यत्तु
शरावे भिन्नपात्रे वा कपाले चोल्मुकेपि वा। नाग्निप्रणयनं कुर्याद्व्याधिहानिभयावहमिति शरावनि
षेधकं वचनं। तन्मुख्यपात्रासंभवविषयमिति प्रयोगपारिजाते। ततः समानीतमग्निं स्थंडिलादाग्ने

Indira Gandhi National
Centre for the Arts

३१

भूर्भुवः स्वरित्यग्निं प्रतिष्ठापयेदित्याश्वलायनः भूर्भुवः स्वरोमित्यालेखनः ॥ भूर्भुवः स्वरित्येतस्य बृहती छंदः प्रयोगपारिजाते ॥ भूर्भुवः स्वरोमित्याप स्तंभः ॥

भूर्भुवः स्वरोमित्यस्य अग्निस्थापने आपस्तंबीयानि विनियोग ... बृहती छंदः ... मंत्रस्य दर्शनाभावात् ॥

प्र०कि० स्थानिधाय । तृष्णीं मन्त्रेण हृद्यग्नेरिति मंत्राभ्यामावाह्य । घृतादनं दूरीकृत्याभ्यामभ्याहृतिभिः प्रतिष्ठा- अग्निस्थाप०

२३ पयेत् । उभाभ्यां पाणिभ्यां स्थापयेदिति जयंतः । प्रयोगपारिजाते । वस्त्रेण वाप्यपर्णेन पाणिशूर्पास्य

दारुभिः । न कुर्यादग्निधमनं न कुर्याद्व्यजनादिनेति । संग्रहे । पर्णेन वृत्तवेद्यापि शूर्पेण धननाशनं । प्राणिनां

म्त्यु मा प्नोति आयुः क्षीणं मुखे धमने । धमनीं मंतरं कृत्वा तृणं वा काष्ठमेव वा । मुखेनाग्निं समिंधीत मुखादग्नि

रजायत । वेणोरग्निप्रसूतित्वात् वेणुरग्निश्च पावनः । तस्माद्वेणुधमन्येव धमेदग्निं विचक्षण इति । अस्य

ते चात्र । वेणुना करोति तेजो वै वेणुः तेजः प्रवर्यस्तेजसैव तेजः समर्द्धयतीति देवलः । अम्भो न प्रक्षिपेदग्नि

माद्भिर्न शमयेन्न दीतिं । ततो नाप्रोक्षितमिंधनमाद्ध्यादि सापस्तंबवचनात्प्रोक्षितेरिंधनैरग्निं प्रबोधयेत् ।

आचार्यः होष्यमाणैर्विजानीयात् स्वरूपं श्रुतिचोदितं । अज्ञानता कृतं कर्म तद्वृथा फलमिष्यते । श्रुति

चोदितं च त्वारिंशं गोसादिसंग्रहे । पावकोलौकिको ह्यग्निः प्रथमः परिकीर्तितः । अग्निस्तु मरुतो नाम

गर्भाधाने विधीयते । पुंसवने चंद्रमाश्च शुंगः कर्मणि शोभने । सीमंते मंगलो नाम प्रगल्भो जातकर्मणि ।

नाम्नि स्यात्पार्थिवो ह्यग्निः प्राशने च शुचिस्तथा । सत्यनामाथ चूडायां व्रतादेशे समुद्भवः । व्रतादेशः

उपनयनं । गोदाने सूर्यनामा च केशांते ह्यग्निरुच्यते । वैश्वानरो विसर्गे तु विवाहे योजकः स्मृतः । २३

चतुर्थ्यां तु शिखी नाम धृतिरग्निस्तथापरे । आवसथ्यो द्विजो ज्ञेयो वैश्वदेवे तु पावकः । देवानां ह

व्यवाहश्च पितॄणां कव्यवाहनः । ते च पिंडपितृयज्ञादौ कव्यवाहनः । शांतिके वरदः प्रोक्तः पौष्टिके ब

लवर्धनः । पूर्णाहुत्यां मृडो नाम क्रोधाग्निश्चाभिचारके इति । देवीपुराणे तु शुभसोग्रहविधौ ह्यग्निर्लक्षहोमे

पराजितः । कुष्माण्डे तु जठरो नामकव्यादो मृतदाहने । प्रायश्चित्ते विधुश्चैव पाकयज्ञे तु साहसः । लक्षहोमे च वह्नि

म स्यात् कोटिहोमे हुताशनः । कोटिहोमेषि वा वह्निः सर्वकाप्रदायकः इत्युक्तं । अथाग्निध्यानं । सप्तहस्तश्चतुःशृंगः सप्तजिह्वो द्विशी

र्षो होष्यन्नरक्तो गो वृषरूपिणं । चिंततोवर्णितं मध्ये चलत्कर्णं सुलोचनं । चतुःशृंगः सप्तपादस्त्रिशी

र्षः सप्तहस्तकं । द्विपुच्छं च त्रिधा बद्धं च तुर्नेत्रं त्रयीमयमिति । अन्यत्र तु सप्तहस्तश्चतुःशृंगः सप्तजिह्वो

द्विशीर्षकः ... युक्तं ॥ एतस्य च चत्वारिंशे गोसनेन समुच्चयः । आश्वलायनः । ध्यानं च त्वारिंशं गोतिकुं

योद्भवे यथाविधि । निर्मोतिषेस्यनेनैव मंत्रेणाग्निं समिंधयेत् । ध्यात्वा रूपं ततो वन्हेर्दर्शयेदेषलक्षणे

ति । एषा हि देवेत्यादिकं तु प्रयोगपारिजातादिभिर्न लिखितं । ततो नवग्रहमखे दो अग्निस्थापनानं

तरं ग्रहस्थापनं । मात्स्ये ॥ अग्निप्रणयनं कृत्वा वेद्यामावाहयेत्सुरान् । देवतास्तत्र संस्थाप्य विंशति द्वार

दि शाधिकाः । यत्र तु नवग्रहस्थापनं तत्राग्निस्थापनानंतरमतिदेशप्राप्तमन्वाधानं कुर्यात् । बह्वृच

परिशिष्टे नवग्रहमखे तु ग्रहस्थापनोत्तरमग्निस्थापनमित्युक्तं प्राक् । ततो वेद्यां सलिलं संप्रवेसर्वतो लक्ष्

कुर्यात् । सं उक्तं सर्वतो भद्रमेतत् साधारणं स्मृतमिति शारदातिलकात् । ततः स्वरूपं ... प्राग्

अत्राग्निषत्समानयोरंतराग छतः प्रायश्चित्तं पराशरप्रायश्चित्तकांडे । होमविप्रो ब्राह्मणाग्नी वा दंपती गोद्विजो तथा अंतरेपा=

त स्यद्यागच्छेत् कृच्छ्रं सांतपनं चरेत् । एतदेककर्मकाले । कर्मकाले तु विप्रो वस्तत्रेवा होमे ... तथा दोहे स्वाध्याये दारसंग्रहे अंतरे=

=पा यदा गच्छेद्द्विजश्चांद्रायणं चरेत् ॥

Indira Gandhi National Centre for the Arts

प्र॰ वि॰ गुडीत्यांगतारेखाः कुर्याद्देकोनविंशतिः। खंडेंदुस्त्रिपदैः कोणेष्वंगबलापंचभिः पदैः। एकादशपदा वल्लीसंख्यातुनव नवग्रह॰
२४ भिः पदैः। चतुर्विंशत्सदा वापी परिधिर्विंशतिः पदैः। मध्ये षोडशभिः कोष्ठैः पद्ममष्टदलं स्मृतं। श्वेतं दुःखंडं रक्तं
कृष्णा वल्लीं नीलेन पूरयेत्। भद्रा रक्ता सिता वापी परिधिः पीतवर्णकः। बाह्ये तरक्तं लभ्ये ता कर्णिका पीतवर्णिका।
परिध्यावेष्टितं पद्मं बाह्ये सत्वं रजस्तमः। तन्मध्ये स्थापयेद्देवान् ब्रह्मेंद्राद्यांस्त्वसुरासुरान्। प्रयोगपारिजा
ते ब्रह्मयामले। वितानं कारयेत्तत्र फलपुष्पांकितं शुभं। ग्रहवर्णपताकाद्यैस्तोरणाद्यैर्विराजितमिति। अथ न
हमंडलानि। तानि वस्त्रादौ वर्णाद्यैः कार्याणि तानि च स्कांदे। सान्ते तु मंडलाकारं चतुरस्रं तु सोमकं अंगारकं त्रि
कोणं च बुधं बाणाकृतिं तथा। दीर्घं तु चतुरस्रं यत्तदाकारं गुरुं तथा। पंचास्रं भार्गवं विद्यात् धनुस्तुल्यं शनिं त
था। राहुं शूर्पाकृतिं विद्यात् केतवो ध्वजरूपिणः। अथ प्रतिमाः। याज्ञवल्क्यः। ताम्रकात्स्फटिकाद्रक्तचंदनात्
स्वर्णकावुभौ रजतादयसः सीसात्कांस्यात् कार्या यथाक्रममिति। ब्रह्मयामले तु अन्यथोक्तं। ताम्रेण कारये
द्भानुं रजतेन निशाकरं। कुजं [illegible] रूपाणि सुवर्णेन तु कारयेत्। रजतेन ततः शुक्रं कृष्णलौहेन सूर्यजं। सी
सेन कारयेद्राहुं केतुं कांस्येन कारयेत्। अथवा चूर्णकैः कार्याः कार्याः स्वर्णादिधातुभिः। अत्र यद्यपि केतवो ध्व
जरूपिणः केतवो जैमिनीया स्मृतिर्वा केषु [illegible] नामेव केतूनां देवतात्वमवगम्यते। तथापि केतुं कृण्वन्त्रि
केतो नीति जैमिनिगवा [illegible] रविसोममहीसुतेत्यादि मंत्रैश्च केवचनां तस्येव केतोर्देवतात्वावगमात् २४

यस्तु तस्तु केतुं कांस्येन कारयेदिति विधिवाक्ये एकवचनांतः केतुशब्दोऽस्येवेति न कश्चिद्विरोधः। [illegible]
ग देवतापेक्षया मंत्रोक्तदेवतायाः प्राबल्याच्चैकवचनांतस्येव देवतात्वं। अत एव सवनीयहविष्षु इंद्राय हरिवते धा
नाः इंद्राय पूषण्वते करंभः सरस्वत्यै परिवाप इत्यादिविधिवाक्येनानादेवताकीर्तनेपि इंद्राय पुरोडाशा
नाः [illegible] इति तद्धितनाम्ने देव
द नामिति मंत्रवर्णाद्[illegible] देवतात्वं सुस्थं [illegible]
ता त्वेपि देवो अग्निः स्विष्टकृदिति मंत्रवर्णेनाग्नेः स्विष्टकृतो देवतात्वमिति सुस्थं दशमे। अत एव च विधित्र अ २१
मात्मंत्रक्रमो बलवानिति सुस्थं पंचमे। यस्तु केषुचिद्ग्रंथेषु बहुवचनांतः केतुशब्दः सोऽधिष्ठानाभिप्रायो विरोधः परस्य५
तेनैकस्येव केतोर्देवतात्वं स्मार्ह। जन्मभूः गोत्रमग्निश्च वर्णस्थानमुखानि च यो ना जानाति तस्य तत्
स्ते नावमानिता इति। तथा तत्रैव उत्पन्नोऽर्कः कलिंगेषु यमुनायां तु चंद्रमाः। अंगारकस्त्ववंत्यां
मागध्यां हिमांशुजः। सैंधवेषु गुरुर्जातः शुक्रो भोजकटे तथा। शनैश्चरस्तु सौराष्ट्रे राहुर्वै राठिनापु
रे। अंतर्वेद्यां तथा केतुरित्येता ग्रहभूमयः। शौनकः। शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरुसौम्यावुदङ्मुखौ। प्रत्य
ङ्मुखः शनिः सोमः शेषा दक्षिणतो मुखाः। तथा आदित्यः काश्यपेगोत्रे आत्रेयः चंद्रमाः स्मृतः। भारद्वाजो
भवेद्भौमस्तथा त्रेयश्च सोमजः। गुरुः पुण्योंगिरोगोत्रः शुक्रो वै भार्गवस्तथा। शनिः काश्यपगोत्रे च राहुः
पैठीनसी तथा। केतवो जैमिनीयाश्च ग्रहा शांतिसदनं तरं। आदित्ये कपिलो नाम पिंगलः सोमउच्यते। धूमकेतुस्त
धाभौमे जठराग्निर्बुधे स्मृतः। गुरौ च वै शिखी नाम शुक्रे भवति हाटकः। शनैश्चरे महातेजा राहुकेत्वोर्हुत
शन इति। ततो नवग्रहपूजानंतरमेतान् अग्नीनभ्यर्च्य पश्चान्नवग्रहहोमं कुर्यादित्युक्तं

प्र०चिं० वासिष्ठं। तथाग्रहाणां वर्णानुक्ता गोभिलपरिशिष्टे। आरक्तगौराणि वो चार्यो क्षत्रियावर्कलोहितौ वैश्यो सोम ग्रहस्थाप
२५ बुधौ तेयौ शेषान्कृष्णान्विनिर्दिशेदिति। तथा। संस्मरेद्रक्तमादित्यं मंगारकसमन्वितं। सोमशुक्रौ
तथाश्वेतौ बुधजीवौ तु पिंगलौ। मंदराहू तथा कृष्णौ धूम्रं केतुगणं विदुरिति। शौनकीये तु पीतौ बुधो गुरू
श्चैव शेषाः कृष्णा ग्रहा मता इत्युक्तं। नवग्रहस्थापने च व्याहृतयोप्यावश्यकाः। वर्णरूपाद्यपि युक्ता
न व्याहृत्या वाहयेत्तु तानिति स्कांदे। एवं च उक्तदेवतमार्षं च विनियोगं तथैव च। एवं मंत्रस्वरू
पं तु ज्ञात्वा कर्म समाचरेत्। अविदित्वा तु यः कुर्याद्याजनाध्यापनं जपं होममंत्रं जलादीनि तस्य चाल्पफ शो
लं स्यादिति स्मृत्या तत्र स्य च नार्षिदैवतस्मरणपूर्वकं मंत्रं पठित्वा व्याहृतिभिश्चोक्तकालिंगदैव
त्यादिवर्णस्थानान्युक्त्वाग्रहावाहनं कुर्यात्। वस्तुतस्तु छंदो देवतार्षिपविनियोगादीनां ज्ञानमेवाक तत
र्मकालोपात्तमप्यं गमिति न तेषां प्रयोगमध्ये उच्चारणे मानमस्ति। तेन छंदो देवतादिप्रकाशेण ज्ञात्वा
कर्मकाले मंत्रमात्रमुच्चारणीयं। अत एव याज्ञिकानां छंदआद्यनुच्चारणमिति संप्रदायिकाः।
तथा। सन्निसंभवे पद्मासनः पद्मकरादृसापुरू लक्षणाः प्रतिमाः कृत्वा मद्भा। ताम्रका स्फटिकाद्र
क्तचंदनात्स्वर्णकावुभौ। रजसा दयसः सीसाःकांस्यात्कार्या यथाक्रमाभिसुक्ताः प्रतिमाः कृत्वा तत्र २५
महावाहनं तदसंभवे तंडुलपुंजेषु गाततः कुर्यात्। तथा। अधिदेवा दक्षिणतो वामे प्रत्यधिदेवताःस्था
पनीयाः प्रयत्नेन व्याहृतिभिः पथकृत्पृथक् तथा। शुक्रा केंप्राग्नरवौ दो पोगुरुसोम्यावुदस्नुरवौ। प्र

सञ्जुरवः शनिः सोमः शेषा दक्षिणतोमुखाः। यदा तु आदिसाभिमुखाः सर्वे साधिप्रत्यधिदेवताः स्था
न पनीयाः प्रयत्नेन मतरेणापराड्मुखा इति पक्षास्तदा अधिदेवादयस्तथैव स्थाप्याः। तथा। भास्करस्ये
श्वरं विद्यादुमां च शशिनस्तथा। स्कंदमंगारकस्यापि बुधस्य च तथा हरिं॥ ब्रह्माणं च गुरोर्विद्यात्शु
क्रस्यापि शचीपतिः। शनैश्चरस्य तु यमं राहोः कालं तथैव च। केतूनां चित्रगुप्तं तु सर्वेषामधिदेवताः। अ
ग्निरापः क्षितिर्विष्णुरिंद्र ऐंद्री प्रजापतिः। प्रजापतिश्च सर्पाश्च ब्रह्मा प्रत्यधिदेवताः। विनायकादयः
पंचस्थाप्या इ ग्रहोत्तरतश्चतिस्रो प्रत्यधिकाः। दक्षिणे पश्चिमे वामायामुत्तरे प्राग्यथाक्रमं। विनायकादयः पंचस्थाप्या इ
दुर्गा वायुश्च तद्वद्केशवेश्च पश्चि
सपरे जगुः। संग्रहे। राहुमंदद्विनेशानामुत्तरास्यायथाक्रमं। गणेशदुर्गौ वायुश्च तद्वदेवौ सपरे। विनायकं तथा दुर्गां वायुमा
मे। आकाशमश्विनौ चेति पंचैतान्स्थापयेद्बुधः इति रूपनारायणः। विनायकं तथा दुर्गां वायुमा
काशमेव च। आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारको देवानां तत्र संस्थाप्या विंशतिर्द्विदशाधिका॥
परिगणनं स्मृसंतरोक्तानां क्षेत्रपाललोकपालादीनामनावश्यकत्वार्थमिति पितामहचरणाः॥
ब्रह्मयामले तु। लोकपालानां स्थापनमुक्तं। एवं शौनकेन क्षेत्रस्य पतिनाक्षेत्रपालं। भजोत्तरे मसीदिति
भौमोत्तरे क्षेत्रपाला वाहनमुक्तं भूजोभौमः। एवं शौनकेन गणेशदुर्गाक्षेत्रं च वास्तुं वै मरुतस्तथा॥
मानि देवानत्र स्थाप्याः प्रतिष्ठायां विचक्षणैरिति। वचनात्। वास्तोष्पतिमश्विन्यादिनक्षत्राणि वा बीह्ये

प्र०वि० दिसूक्तं।मिताक्षरायां वषिदेवाद्योनोक्ताः।तेनतन्मतेग्रहणामेवकेवलानांस्थापनंपूजनंचरुश्चाचरुणाअर्कःप
लाशः खदिरइत्यादिसमिद्भिश्चहोमः धेनुः शंखइत्यादिदक्षिणादानंचेसोमावदेवस्वतीसुक्तं।नहमंत्रानाहया
२६ नवल्कयः।आकृष्णेनइत्यंदेवाअग्निर्मूर्धादिवःककुत्।उद्बुध्यस्वेतिचऋचोयथासंख्यंप्रकीर्तिताः।बृहस्प
ते।अतियद्र्यस्तथैवान्नात्सरिश्रुतः।शंनोदेवीस्तथाकांडात्केतुंकृण्वन्निमास्तथा।स्कांदेतुकयानश्चित्र
तोस्त्वेसूक्तं।मात्स्येलभ्येमंत्राउक्ताः।अग्निंदूतंवृणीमहेशायसोमापाम्अग्न इत्यपि।स्योनापृथिविभवामयद्
देविद्युमधायच।इंद्रआशाभ्युरेत्मायशुक्रज्योतिःसितायच।प्रजापतेतिसोरापआयंगौरितिराहवे।।
केतवेब्रह्मजज्ञानांस्वैःस्वैर्मंत्रैःप्रतिष्ठिताः।अन्यार्थानामपिमंत्राणांवचनाद्यथार्थमेप्रीत्यादिति
न्यायेनाग्निनियोगइतिपित्रवरणाः।अत्रजऋग्गामस्येकादश११सावित्रंनवमीजगत्याद्यालिंगोक्तदेवत
पादानवमीआद्याचेत्यनुषंगः।अस्मिन्सूक्तेआकृष्णेनेतियद्वितीयाऋक्।त्रिष्टुप्।अत्रत्वमग्नेद्युभिर्हिर
ण्यस्तूपइत्सतः।हिरण्यस्तूपस्यानुवृत्तिः।सावित्रमिसूक्तेः।सवितादेवतातेनाकृष्णेनाहिरण्यःस्तूपःस
विताविष्टुप्।इमंदेवाइतीयंमाध्यंदिनीयानांतेनतत्रस्थानेआप्यायस्वेतीयंसोमस्यअत्रचप्रसोमा
सोगोतमसूक्ते।षड्भेस्मिन्सूक्तेचतुर्थीआप्यायस्वेति।तेन।आप्यायस्वगोतमःसोमोगाय
त्री।पावमानेमंडलंतेनपवमानसोमोत्रदेवतेसन्येनस्तुतस्तुअप्स्वग्नइत्यमाश्वलायनानांमुक्तः।। २६

एवंसमिधाग्निंत्रिंशत्।३०।अत्रअग्निर्मूर्धेतीयंशोडशी।यद्यप्यत्रइमेत्रयस्त्रिंशदादिरूपआंगीरसआग्नेयंपंत्विस्यनुद
नेर्विरूपऋषिः।अग्निश्चदेवता।तथाप्यंगारकेवचनाद्विनियोगइतिध्येयं।तेनअग्निर्मूर्धाविरूपोंगारकोगायत्री।
उद्बुध्यध्वंबुधःसौम्यऋत्विकस्क्कालिवीनवम्यंतेजगत्यौपंचमीबृहतीगायत्र्योमेध्येइंचन१२र्चसूक्तं।बृहस्पतेद्वाद बुधं
शार्षिषेणइत्सनुवृत्तेः।अत्रसौम्योबुधऋषिः।अत्रसोमस्येवदेवतातां।पितरिदेवताचेपुत्रःशत्रदितिन्यायात्।
वा५ विश्वेषांदेवानांदेवतासमिसूक्तंसर्वानुक्रमसाधौबुधस्यदेवतात्वंतुरेश्रीन्यायेनविनियोगाद्रष्टव्यं।।ते
नउद्बुध्यध्वंबुधःसौम्योबुधस्त्रिष्टुप्।उद्बुध्यस्वाग्नेतीयंमाध्यंदिनीयानां।४।गणानामेकोनाब्राह्मणस्पते।
बार्हस्पत्यास्त्वदृश्यलिंगाः।पंचइत्यंतेत्रिष्टुभौ।अत्रबृहस्पतेइतीयंपंचदशीऋक्।अत्रत्वमग्नेगृत्समदइतिमं
बार्हस्पत्यास्त्वदृश्यलिंगाः।पंचइत्यंतेत्रिष्टुभौ।अत्रबृहस्पतेइतीयंपंचदशीऋक्।अत्रत्वमग्नेगृत्समदइतिमं
डलीयोगृत्समदऋषिः।बार्हस्पत्यास्तुदृश्यलिंगाइत्सुक्तेर्बृहस्पतिर्देवतात्रिष्टुप्।६८।५।चित्रंभक्तः।अत्र
वद्धेपंचोनामाकूतंत्रिष्टुवंतंपरमाग्नेयमैत्रासख्यादृशपराशरःशक्त्योहैपदंतदित्यतःसूक्तंसंख्यायाः
अग्निर्देवतायाःपराशरस्याद्विपद्याश्चानुवृत्तेः।शुक्रःपराशरोग्निर्विराट्।शुक्रस्यदेवतात्वंतुलिंगं।
चेतिध्येयं।अत्रपराशरःशुक्रोऋषिः।शुक्रेतइत्सञ्जुशुक्रंचतुर्थंद्वितीयाजगती।तथापिशुक्रंतइत्स
त्रभरद्वाजऋषिः।इंद्रापूषणोदेवतेसूक्तंसूक्तंप्रतीके।तथापिक्वचिद्विनियोगाच्छुक्रस्यदेवतात्वंतैयं।
अत्रासरित्कृतःशुक्रज्योतिश्चेतिमंत्रद्वयंमाध्यंदिनीयानां।तथा।इदंहविधिकादिस्यमोहिहमस

Indira Gandhi National
Centre for the Arts

२ इत्यतः ऋषेरनुरक्तिः। इंद्रमित्सुक्ते इंद्रो देवता। तथापि केतोर्देवतात्ववचनात्। तेन केतुर्मे पुष्यदा:।=
न्यश्चिम्यां परानिलसूर्याग्निलानां। अस्मिन् इदं हेतिसूक्ते उत सादेव्ये त्रीयमश्म्याश्चिदेवस्या। तदुक्तं ग्रहम
प्र०नि० नवमीशमग्निरिति। अत्र परानिलसूर्यानिलानामिसुक्ते तग्निर्देवता। प्रसंग्राजद्वादशारिरिं [illegible]
२८ हि[illegible]रित्यतः ऋषेरनुरक्तिः शनैश्चरस्य देवता ब्रह्मा विनियोगादिति द्रष्टव्यं। तेन शमग्निरिरिमि
ति: शनिरुच्छिक। शंन्नोदेवीरित्यस्य तु आपो हिष्ठा इंद्रोपां बरीषो वायंगा मंत्रं अनुष्टुबंतं पंचभीर
द्भिमाना सप्तमी प्रतिष्ठे सुक्ते न वचो हिमिनसूक्ते चतुर्थ्यो: शन्नो देवीत्यस्या: आपो देवता। शनैश्चर
स्य देवतात्ववचनात्। ७। कयापिचीनाभीषुपार्णिन [illegible]। सुरूपकृत्नुं इत्योद्मातु कुंजे। स्यात्
हे स्येताः षण्मारूपः। अत्र केतुं कृण्वन्निति यसुजानित्र [illegible] परपस्य तृतीयात्रं कृत्वाअग्निंन
वमधुघंदो केतुर्गायत्री त्याज्ञवल्क्यः। ग्रहवर्णानि देयानि वासांसि कुसुमानि वा गंधाश्च ब
लयश्चैव धूपो देयो त्र गुग्गुलुरिति। अत्रग्रहवर्णवाससामलाभे वा सौमात्रं देयं॥ गुग्गुलु
दोपेन प्रधानसागायोगात्। तत्रगंधे विशेषः स्कांदे उक्तः स्मसंतो:। दिवाकरकुजाभ्यां हि
तापये रक्तचंदनं। चंद्रे च भार्गवे चैव श्वेतचंदनं प्रदापयेत्। कुंकुमेन तु संयुक्तं चंदनं जीवसौम्ययो: अगु
रुं चंदनं दद्याद्राहुकेतु कैलेषु वेति। पातन ब्रह्मोक्त तुं गंधाश्च नरूपश्चैवेति पूर्वोक्त वाक्यात् ग्रह
वर्णा एव गंधा इत्युक्तं। एवं पुष्पेषु स [illegible] तरेसौरस्यां रक्तेति पत्यपमेपत्र वर्णादेव कुरव्य: तस्या गै २८

३५ ग्रहव्यतिरिक्तः पूजांतरेसाव काशत्वादिति पितामहचरणा: शौनकीये। रक्ताशोक रवीरं च नक्ष्छेतंत्र
गहव्यतिरिक्तपूजांतरे। वकुलं। चंपकं शतपत्रं च जातीपुष्पं शमीतथा। पुष्पं चागस्त्यकं प्रोक्तं। विचित्राणि यथाक्रममिति। एवं रक्तः
कुसुमकं। चंपकं शतपत्रं च जातीपुष्पं शमीतथा। पुष्पं चागस्त्यकं प्रोक्तं। विचित्राणि यथाक्रममिति। एवं रवे:
कुंदुरुकं धूपं शशिनस्तु घृतंसितं। शौने सर्जरसं चैव अगुरुश्च बुधेस्मृतः। सितं कुंकुरवे दद्यात् शुक्रे बिल्व
गहूतथा। गुग्गुलं मंद वारे तु लाक्षा राहोश्च केतु वेतिस्कांदे धूपविशेषाक्त:। पूर्वोक्तं गुग्गुलुरेव दमावेद्र
धूप:। स च धूपग्रहवर्णाति पुष्पाणि गायन्त्याधूपमाद्रहेति वचनाद्धायश्चैव देय:। एवं उदीच्य स्वतिमं
त्रेण दीपं दद्यात् दतं द्विरत्नलिंदीपमेत्र विशेषोक्तं स्तेन्द्रेदीपनिवेदनं। तथा स्कांदे गुडोदरवे दद्याद्धोमाय नं
पायसं। मस्तु तं श्च कुजे दद्यात् क्षीरान्नं सोमसूनवे। दध्योदनं तु जीवाय घृतक्षायलघृतोद
नं। शनैश्चराय कृसरं मांजमांसं च राहवे। चित्रोदनं च केतुभ्यः सर्वाण्सक्ष्येरथापयेदिति। अत्रपा
क्षाण्ये वनैवेद्यस्थाने। गुडोदनादिकं तु बलिस्थाने इति सांप्रदायिका:। अन्ये तु गुडोदनादिकमेव नैवे
द्यार्थे वदुः भक्ष्याणि तु समंततो निवेदयेदित्यर्थमाहु:। मितासरायां। गुडोदनं पायसं च संयावं क्षीरषा
ष्टिकं। दध्योदनं हविश्चूर्णं मांसं चित्रान्नमेव च। दद्यात् ग्रहक्रमादेतद्द्विजेभ्यो भोजनं बुधः। शक्तितो वाय
था लाभं सत्कृत्य विधिपूर्वकमित्यादिना आदित्यायुद्देशेन गुडोदनादिना ब्राह्मणभोजनं कुर्यादित्युक्तं। फ
लेषु च गोभिले नोक्तः। द्राक्षेषु पूगनारंगं जंबीरं बीजपूरकं। उत्तनीनालिकेरं च दाडिमं च यथाक्रममिति॥
अधिदेवानां तु क्रमु त्पलपादिमंडले। सर्वेषां लोकपालानां चंदने च विलेपनं॥ शतपत्राणि पुष्पाणि दद्यात् [illegible]

अन्वाधाने

कल्पयंकदीपं गोघृतसंयुक्तं नैवेद्यं च घृतौदनमिति। अन्यच्च पूजायां वक्ष्ये विशेषः। पितृकृते शांति
प्र॰चि॰ रत्नैरपूर्वः। मात्स्ये। प्रागुत्तरेण तस्माच्च दध्यक्षतविभूषितं। चूतपल्लवसंयुक्तं पंचसंगदलान्वितं। स्था
२८ पयेद्व्रणं कुंभं वरुणं तत्र विन्यसेत्। गजाश्वरथ्यावल्मीकसंगमाह्रदगोकुलात्। मृदमानीय विप्रें
द्र सर्वौषधिगणान्विते। स्नानार्थं विन्यसेत्तत्र यजमानस्य धर्मवित्। अत्र च नवग्रहमखे स्थाली
पाकातिदेशादग्निस्थापनादि चक्षुष्यंतं कुर्यात्। कारिकायां। प्रातरौपासनं हुत्वा समिधौ हुत्वा निधा
य च। अथवा तिस्र आदध्यात्क्रतुसंकल्पपूर्वकं। अन्यत्रापि। आद्यं च कर्मांगं तथा अन्वादध्यात्।
समिद्द्वयं वा त्रयं वा संकल्प्य अमुं यक्ष्य इति ब्रुवन्। अनेन यक्ष्यमाणयागदेवताद्याः परिग्रहः। अ
न्वाधानमिदं कार्यं मग्न्याधानादनंतरमिति। अस्मिंश्चान्वाधाने अस्मिन्नन्वाहितेग्नाविति वाक्यं।
अन्वाधानात्प्रागग्नेरन्वाहितत्वाभावात्। तेनास्मिन्नग्नौ जातवेदः समिधेवं वा स्यमिति केचि
त्तन्न अन्वाहितत्वा[illegible]स्यानु समीपे आहित इत्येवमर्थात्। तदेव समीपे आधानमन्वाधानमिदं का
र्यमग्न्याधानादनंतरमिति कारिकाकारिकावचनेनोक्तमिति पक्षिं चिदुक्तं। तेनान्वाहितता सि
ध्यर्थं पूर्वं काश्चित्समिधोऽध्याधाय पश्चादन्वाहितेग्नाविति वेवा स्यमिति सपि परास्तं समिद्धोमेत्प्र २८
कार उक्तः। प्रयोगपारिजातसंग्रहे। मूलतः कर्मनाशः स्यान्मध्यतः पुत्रनाशनं। अग्रेणामुंच

तो मध्ये रेकपाणेर्धनक्षयः। मूलमध्यमनमध्येन समिद्धोमस्य लक्षणमिति। अत्रैकपाणिनिषेधेन इध्मबर्हिः
सव्येनान्वारंभो गम्यते। इत्यन्वाधानं। ततः इध्माबर्हिषोः सन्नहनं। तदुक्तं गृह्ये। इध्माबर्हिषोः
सन्नहनमिति। अत्र वृत्तिः। इध्माबर्हिषोः संनहनं ताभ्यां दर्शपूर्णमासाभ्यां व्याख्यातं। अत्र दर्श
पूर्णमासाभ्यां व्याख्यातमिति[illegible]दापस्तंबोक्तिसंग्रहः तथा च इध्माबर्हिषोः संनहनं
मिति सूत्रे इध्मसन्नहनस्य पूर्वं निर्दिष्टत्वेपि दर्शपूर्णमासातिदेशमहिम्ना बर्हिः सन्नहनस्ये
व सर्वं प्राप्तेः पूर्वं बर्हिः सन्नहनं ततः इध्मसन्नहनमिति तेषु। तेन आदि सेरास्ना लित्रिधातु
पंचधातु वा शुल्वं करोति॥ अपुपितायोनिः प्रतिदधाति। आदि सेरास्नासि उग्रगंधिलत्य। सु
संभृता वा संभराभि तस्मिन्नि धनानि संसरति। अनुमितायोनिः॥ उक्तमेनिधने प्रस्तरमसा
चा पर्द्दृढा प्येसंनहनं सन्नद्यति पूषा ते ग्रंथिं बध्नातु ग्रंथिं करोति। स ते मास्थात् प्र संचं ग्रथिं प्र
हतीसेनमंतं करोति। एवं कृत्वा शुल्वं इदमा अदितेरास्नासि इदग्नं बिलस्य पक्षको रूपमिति पंच
क दशदा हंसि ध्वं कृत्वोस्याखरेरात्रे वपुरश्चर संध्यासं त्वेति संनह्यति। अनयो निदधाति यथा प्राक् उपसा
दयेदिस्येवमतं दार्शपौर्णमासिकं तत्रं कृतमिति इत्याशयः। कारिकायामपि। इति बहुधनं कान
मंत्रस्यात्रो हरिष्यते। तत्स्नामेकविंशति धेस त्र पंचदशधे से वमूह इस्यर्थः। जयंतमतेतु ना

Indira Gandhi National
Centre for the Arts

प्र॰चि॰ त्र प्राशौर्णमासिकीति कर्तव्यताकिंतु यौदुक्तैव अतएव गृह्यकर्मणि मंत्रान्विहायेति कर्तव्यतामात्रमेव ग्राह्यमित्या इध्मसमि॰
२९ श्वयुजीकर्मप्रकरणे प्रयोगपारिजातादिषिसिद्धम्। कारिकायां। अथरज्जुं प्रकुर्वीत त्रिसंधिंत्रिवृतां कुशैः। स्याद्रज्जुक
रणे एवं सम: पाणिरिहोत्तरः। पश्चाद्दक्षिणहस्ताहुजर्यतः स्वनिबंधने। निदध्याद्दुदगग्रांतांरज्जुमग्रतआम
न: कुशमुष्टिं छिन्नस्य स्यां प्रागग्रं तं निधाय च। तया बर्हिस्त्रिरावेष्ट्य रज्जुमूलं च वेष्टयेत्। एवं यावेष्टितातस्या
अधस्तात्तां नयेद्रथ। निधायोपरि चास्यांश्च परिस्तरसादिसिद्धये। प्रयोगरत्ने सव्यहस्तस्त्रिभिस्त्रिभिः कुशदलैः सव्यं ग
पाणिमधो दक्षिणं चोपरि कुर्वन् त्रिसंधिद्विगुणां रज्जुं कृत्वा पुनर्दक्षिणमधः सव्यं चोपरि कुर्वन् रज्जुं कृत्वाऽन्ते
प्रदक्षिणं ग्रंथिं दद्यादित्यादुः। शोनकोपि अथेध्मस्य संनहनं बर्हिषश्च विधीयते। बर्हिरज्ज्वा द्विरावेष्ट्य तदग्रे
णप्रदक्षिणं। तदग्रशेषं रज्ज्वाधो द्वावप्युपरिधापयेदिति। दूधोरुपरिनिधानं च देवंगा ममसीत्यनेन मंत्रेणापत
नास्पश्चाद्भागे कुर्यादित्युक्तं प्रयोगपारिजाते। युक्तं तु स्रुची उपरिनिधाने चश्रुतिः। उपरिनिदधाति। उपरिहिवैसु
वर्गोलोकः। सुवर्गस्य लोकस्य समष्ट्या इति। तत्रादौ प्रादेशोध्मवेदिध्मस्त्रविंशति दारुक इति कारिकावचना
त्परिधय:। द्वे आघारसमिधौ अनूयाजसमिदेकेत्येवमेकविंशतिदारुरिध्मः कारिकाकारमते। वृत्तिकृन्म
तेतु अरत्न्यायाम इध्मः स्यात् स पंचदशदारुक इति वचनात् पंचदशैव समिध इति न तन्मते परिधीना
मत्र विस्तरः। मरीचिः। समित्पवित्रं वेदश्च त्रयः प्रादेशसंमिताः। इध्मस्तु द्विगुणः कार्यस्त्रिगुणः परिधिः स्मृतः। २८
स्मार्ते प्रादेश इध्मो वा द्विगुणः परिधिः स्मृत इति। सार्द्धद्वाविंशत्यंगुलो रत्निः तदर्धं प्रादेशः। तेनस्मार्ते प्रादेश

मात्रोपीध्मः। वृत्तेतु प्रादेशमात्रोत्नोक्तः। हान हेमाद्रौ बौधायनः। पलाशाश्वत्थखदिररोहितकौदुंबराणामिध्मास्स्युरन्ये परिसमूह॰
सर्वेवनस्पतीनामिति। इतिबर्हिरादेः संनहनं। ततः पत्नी अन्वायतनालंकरणं कुर्यादितिसद्धाः। अथ परिसमू
हनादि। कारिकायां। पाणिना सोदकेनाग्नेः समंतात्सरिमार्जनं। पर्यूहपरिषे। कौस्तु: सर्वत्रत्रिस्त्रिरंससागृह्य
परिशिष्टे। अथसोदकेन पाणिना प्रागुदीच्यामारभ्य प्रदक्षिणमग्निं त्रिः परिसमूहेति। शांखायनसूत्रे। प्रद
क्षिणमग्नेः समंतात् पाणिना त्रिः प्रमार्ष्टि तत्समूहनमित्याचक्षते स हृदयस्यपित्र्ये इति। तेनपिंडपितृ
यज्ञे सकृदप्रदक्षिणं परिसमूहनं सूत्रेपि। परिसमुह्य परिस्तीर्य पुरस्ताद्दक्षिणतः पश्चादुत्तरतः इत्यु
दकसंस्थं तूष्णीं पर्युक्षणमिति। दक्षिणोत्तरयोः प्रागग्रतया परिस्तरणादुदक्संस्थत्वाभावेपि [illegible]
[illegible] इत्युदकसंस्थमित्यनेनैतादृशमेवोदकसंस्थं विधीयत इति वृत्तिकारः। अत्र परिसमू
हनं पर्युक्षणं चाग्निहोत्रवत्पुनः पुनरुदकमादाय आदावंते च कर्तव्यमित्युक्तं वृत्तौ। अग्निहोत्रे परिसमू
हनानंतरं पर्युक्षणविधानान्मध्ये परिस्तरणविधानार्थं परिसमुह्येत्यादि सूत्रं। तेनापराजितां दिशमा
स्थाय त्रिः समूहनादि कार्यं। आश्वलायनसूत्रे तु। अनुलेपमुदकसंस्थं कुर्यादाग्नेयकोणतः पर्युक्षणेपु
दकसंस्थं पाणिनैशानकोणतः इत्युक्तं। वस्तुतस्तु कारिकागृह्यपरिशिष्टशांखायनसूत्रविरोधादनु
लेपमुदकसंस्थमित्येतच्चिंत्यं। कारिकायां। अग्नेः षोडशभिर्दर्भैः पूर्वादिषु परिस्तृतिः। कोंश्चि उत्तरतोदर्भाना
स्तीर्य परिषिंचति। एकैकस्यां दिशि चत्वारः। एवं षोडश। अनियतैर्दर्भैः परिस्तरणमिति प्रयोगरत्ने पक्षांतर

Indira Gandhi National
Centre for the Arts

प्र०चि०
३०

मुक्तं। अन्यत्रापि। ऋत्विक् ब्रह्मा द्वतश्चैरस्यादनेर्दक्षिणतः स्तृणे। ततासनार्थं प्राक्कूलैस्तृणानां मुष्टिसं परिस्तरण
मितैः। प्रणीतासादनार्थं च पात्राणां सादनाय च। संस्तीर्योत्तरतो वन्हेः पर्युक्षेत्तं हुताशनं। ते नाग्निं प श्वा
रिस्तीर्य ब्रह्मासनार्थं कुशमुष्टिं पात्रासादनार्थं च दक्षोत्तरे संस्तीर्य पश्चात् पर्युक्षणं कुर्यात्। यदा तु दीर्घैर्द
र्भैस्तरणं करोति तदा चतुर्भिः तत् कुर्यात्। तदुक्तं शौनकेन। चतुर्दिक्ष्वथवा दीर्घैः पूर्वपश्चिमयोर्दिशोः। उदग
ग्रैरितरयोः प्रागग्रैर्यज्ञियैस्तृणैरिति। शांखायनसूत्रे। नाज्याहुतिषु नित्यं परिस्तरणं नित्याहुतिषु चेति मांडूके
य इति। तेन वैश्वदेवादौ प्रातर्होमेपि न नियतं परिस्तरणमिति केचित्। पर्युक्षणस्वरूपमपि तेनैवोक्तं पाणिनो
दकमादाय प्रागुदक् त्रिः प्रदक्षिणं। आरभ्योक्षति यस्तूष्णीमाहुः पर्युक्षणं बुधा इति। परिसमूहन पर्युक्षणादेर्दे
शनियममाह प्रयोगपारिजाते कश्यपः। अष्टांगुलिमिते देशे परिषेचनमाचरेत्। नवांगुलिप्रमाणे तु विधिनाप
रिधिं न्यसेत्। दशांगुलप्रमाणे तु परिस्तीर्य कुशान् क्रमात्। एकादशांगुले देशे गंधपुष्पाक्षतादिभिरिति। अर्च
येदिति शेषः। इदं तु स्थंडिल एव। कुंडे तु मध्यमेखलायामेव परिस्तरणादीन्य अविस्तरः। यत्र च होमे केवल
माज्यमेव द्रव्यमाज्यपदं च श्रूयते यथा तेषां पुरस्तात् चतस्र आज्याहुतीर्जुहुयादिति। तत्र परिस्तरणं कृताकृ
तं। तदुक्तं सूत्रे। कृताकृतमाज्यहोमेषु परिस्तरणमिति। यत्र त्वाज्यद्रव्यकेपि होमे आज्यपदं न श्रूयते तत्रनि
त्यं परिस्तरणमिति। इत्तोस्पष्टं। इति परिसमूहन परिस्तरणादि। अत्र पात्रासादनं। तानि च पात्राणि उत्तरत ३०
स्तीर्णेषु बर्हिषु दक्षिणसव्यपाणिभ्यां स्थालीं चरोः प्रोक्षण्याज्य नं च दर्भं स्रुवौ सादयेद् दर्विहोमे पात्रं प्रणी

ताथैमथाज्यपात्रमिध्मं क्रमेण क्रमविरकुशांश्च। सूर्प कृष्णाजिनौ द्व्यद्यर्थे प्राप्तं च सादयेदिति कारिकावचना पात्रप्रमाणं तुलना
द्वे द्वे पात्रे न्युब्जे द्वयेव मासादनीयानि। अन्यदुलूखलमुसलादि गृह्यपरिशिष्टे। अथ तेषु दर्भेषु पात्राणि न्यग्विलानि
द्वंद्वान्युदगपवर्गाणि प्रयुनक्तीति। एवं च इध्माबर्हिषोः सन्नहनमिति सूत्रे इध्मस्य पूर्वं निर्देशः सन्नहने नुप
युक्तः सन्नासादने फलति। यदा तु व्रीहीणामवघातश्च तंडुलेषु कृताकृतः। द्रवीभूतस्तस्यापि विलापनविधिस्त
थेति प्रयोगपारिजाते वचनात्पक्षेन तंडुलेष्ववघातादि तदा नोलूखलमुसलयोरासादनं। द्वारलोपादिति केचित्
अन्ये तु अवहतांस्त्रिः फलीकृतानिति सूत्रात् त्रिः फलीकृतानिति सूत्रात् त्रिः फलीकृतान् त्रिः शुक्लीकृतानिति
द्वित्तिगंधाच्च तंडुलेषु पक्षे अवघातासावेन तदर्थमासनं नोद्दिष्टा वेपि फलीकरणार्थमा
[illegible]। सादनं त्ववश्ये वेत्याहुः। प्रोक्षणपात्रमथ स्रुवयुक्तं पात्रमपां प्रणये न विशिष्टं। साजनमाज्यहविर्ग्रहणा
र्थं स्थितमथो परिसादयदर्भान्। आज्यहोमे तु प्रोक्षणीस्रुवमासाद्य चमसं चाज्यभाजनं। इध्मा बर्हिरित्येवं ष
ट्पात्राण्यासादनीयानि। अथात्रोपयुक्तानां पात्राणां लक्षणान्युच्यंते। तत्र मन्मयानि च पात्राणि तैजसान्यश्म
मयानि वेति संग्रहोक्तेः। चरुस्थाली ताम्रादिमयी मन्मयी वा छंदोगपरिशिष्टे। तिर्यगूर्ध्वं समिन्मात्रा दृढानां
ति बृहन्मुखी। मन्मयोदुंबरी वापि चरुस्थाली प्रशस्यते। मात्स्ये। नेमिस्तस्याप्यता कार्या चतुरंगुलमुच्छ्रिता। एवं
प्रोक्षणीपात्रमपि तैजसं मन्मयं वा। एवमाज्यस्थाल्यपि। आश्वलायनस्मृतौ। अष्टांगुलमिता स्थाली प्रोक्ष
णी चतुरंगुला। चमसं चाज्यपात्रं च षडंगुलमिति स्मृतं। छंदोगपरिशिष्टे। आज्यस्थाली प्रकर्तमाने जसद्रव्य

Indira Gandhi National
Centre for the Arts

प्र॰चि॰
३१

संभवना। मारुयी वापि कर्तव्या सर्वा स्वाभ्या तु तीक्ष्णा। आज्यस्थाल्याः प्रमाणं तु यथाकामं तु कारयेत्। स्रुवप्रमाण
सुदृढामव्रणां स्प्रदा माज्यस्थालीं प्रचक्षते। मेक्षणं दर्वी चोक्ता तत्रैव। इध्म जातीयमिध्मार्धप्रमा
णं मेक्षणं भवेत्। खादिरं पालाशं वा प्रादेशमात्रमिति सर्थः। वृत्तं चांगुष्ठपर्वाग्रमवदानक्रियाक्षमं। एषैव द
र्वीयस्तत्र विशेषस्तु मरुं ब्रुवे दर्वी द्व्यंगुष्ठपर्वाग्रा तुरीयो नं च मेक्षणं। तथा। खादिरेण स्रुवः कार्यः पा
लाशेन जुहूर्भवेत्। वक्रप्रदेशाबिले स्यातामश्वैवीयस्तिये द्रुमैः। तत्पलाशे पलाशस्य पर्णाभ्यां हू
यते हविः। पलाशपर्णाभावे तु पर्णे वी पिप्पिलोद्भवैः। पलाशपर्णं च मध्यमं ग्राह्यं। मध्यमेन पर्णेन
जुहोतीति प्रयोगपारिजाते एतदुक्तेः। अन्यत्रापि। स्रुवस्रुचोः प्रमाणं तु लक्षणं सम्यगुच्यते। अरत्नि
मात्र आयामस्तयोर्मध्ये स्रुवस्य तु। बिलमंगुष्ठमानेन अंतर्द्व्यंगुलिमानतः। मूले द्व्यंगुलिमात्रे तु द्वि
रेखे बिलिखेत्ततः। चतुरंगुलमानेन ग्रीवां कुर्यात्ततः परं। पंचांगुलप्रमाणेन बिलं कुर्यात्तु सर्वतः।
बिलाच्च पूर्वभागेन पुष्करः सप्तांगुलो भवेत्। स्रुतिर्यत्र पुष्करभागे कारयेद्घृतमानतः। आपस्तंबसूत्रे
तु। बाहुमात्र्योऽरत्निमात्र्यो वा ग्रीवा मात्र स्वक्तो बिलः। हंसमुख्यः स्रुव इति सूत्रे आश्वलायनः। स्रुक्स्रुवौ
हस्तमात्रौ तु स्यातां तौ यज्ञकर्मणि। छिः प्रादेशोऽत्र विदिध्मो बर्हिः प्रादेशासंमितं रज्जुग्रंथिमधः कृत्वा
प्रागग्रं स्थापयेदिति। तथा। चमसं या प्रणीतार्थाः कांस्यपात्रमथापि वेति वचनात्। प्रणीतार्थं कांस्यपात्रं च ३१
मसं वा स्थापयेत्। आपस्तंबसूत्रे तु॥ अथ पात्रशुद्धिः। आश्वलायनः। दारवादिषु शुद्धेषु यद्यासंस्पर्शना

दिभिः। शुद्धिर्भवति तोयेन मृन्मयानां तथाग्निना। आम्लेन शुद्धिस्ताम्रस्य कांस्यानां भस्मना भवेत्। अश्वसंस्प
र्शनाच्छुद्धिरायसानां च क्षालनात्। २। स्त्रीभिः स्रुक्स्रुवपात्राणि कांस्यादीन्यपि वर्जयेत्। सौवर्णराजतादीनि
दाहात्प्रक्षालनाच्छुचिः। ३। विज्ञानेश्वरीयेऽपि। सौवर्णराजतताम्रशंखशुक्तिदृषदाद्युलूखलमुसलचमसप्रोक्ष
णपात्रप्रस्तीनां दारुमयानां चर्मरूपाजिनादीनां च विनालेपमुच्छिष्टस्पर्शे वारिप्रक्षालनाच्छुद्धिः। स्थालीप्रस्ती
दि नां सस्नेहद्रव्यपात्राणां विनालेपमुच्छिष्टस्पर्शे उष्णोदकेन प्रक्षालनाच्छुद्धिः। तथा। स्रुक्स्रुवादीनामलेपेवा
रिभिः। प्रक्षाल्य यथाविधि पुनः संमार्जनाच्छुद्धिः। एतेषां काकश्वभ्रकुनिमुखावमर्शे बिलेखनाच्छुद्धिः।
मार्जारव्यतिरिक्तश्वापदमुखावमर्शे परित्यागः। सलेपानां तु तैजसमृण्मयमयानां सर्वेषामपि भस्मना
मृदा वा संघृष्य जलैः प्रक्षालनाच्छुद्धिरिति। पारिजातः। कांस्येन ब्रह्मवर्चसकामस्य मृन्मयेन प्रतिष्ठा
कामस्येत्युक्तं॥ एवं खादिरो मुसलः कार्यः पालाशः स्यादुलूखलः इति वचनात् खादिरं मुसलं द्वादशांगुलं पालाशं चो
लूखलं कुर्यात्। याज्ञिकास्तु अरुणो मार्थानिवारणानि कुर्यादित्याहुः। इध्माबर्हिषोस्तु लक्षणं प्रागुक्तं। इति पात्रासादनं।
ततः कुशौ समावप्रच्छिन्नाग्रौ अंतर्गर्भौ कुशौ छिनत्ति। पवित्रकृतिः। पवित्रे स्थ इत्यनेनाध्वर्युः कुशौ करणभूते कुशौ छिनत्ति।
मूलच्छेदनेन प्रादेशमात्रौ करोति॥ कुशशब्देन कृत्स्नमुच्यते। न तु ससक्षारवः। तेन कुशाविति द्वे तृणे इत्यर्थः। कौ समौ।
मूलादारभ्याग्रपर्यंतं तुल्यप्रमाणौ। पुनः कौ अप्रच्छिन्नाग्रौ। अक्षारिताग्रौ अग्रवंतौ। तथानंतर्गर्भौ। न विद्यते तर्मध्ये
गर्भौ ययोस्तावनंतर्गर्भौ। गर्भे हि सति संख्यांतरं स्यात्। तथा चापस्तंबः। समावप्रच्छिन्नाग्रौ प्रादेशमात्रौ पवि

Indira Gandhi National
Centre for the Arts

प्र०वि०
३२

पवित्रदर्भ

त्रे कुरुते तृणं काष्ठं वा तयोर्यच्छिनत्ति न नखेनेति। तैत्तिरीयसूत्रेपि बर्हिषः पवित्रे कुरुते। प्रादेशमात्रे समे अप्रच्छिन्नाग्रे अ
त्रे कुरुते तृणं काष्ठं वा तयोर्यच्छिनत्ति न नखेनेति। तैत्तिरीयसूत्रेपि बर्हिषः पवित्रे कुरुते प्रादेशमात्रे समे प्रच्छिन्नप्रांते इति। अत्र पवित्रयोरेव समन्तो लेच्छेद
नखच्छेदितेति। मानवेच बर्हिषः पवित्रे कुरुते प्रादेशमात्रे समे प्रच्छिन्नप्रांते इति। छिन्नप्रणाववपि छिन्नवासमो कार्यो विततासर्वं।
नेन पवित्रे एवमेव कार्ये न तु सस्यप्रमाणौ कुशौ छिन्त्वे सत्राग्रहः। छिन्नप्रणावपि... अयं चानूदितस्य पवित्रत्रयपक्षेपि प्रव
र्तीन्वा। अथवा त्रीन्कुशान्कुशौ छिनत्ति पवित्रे स्थ इति। अनेनैव मंत्रेण। अयं चानूदितस्य पवित्रत्रयपक्षेपि प्रव
र्तते इति कर्कः। द्व्योरुच्चरितार्थत्वादनभिधानप्रवर्तत इति त्रिस्मृतिः। अत्रापि विशेषणत्रयमुद्यं। पवित्रे करोतीप्रक्ष
सते। यद्येव तोथोपि। त्रीणिस्युरिति॥ उभयस्यश्च वणतुल्यविकल्पोयं॥ इतिदेवजानीये पवित्रकरणनिर्णयः। अथानंत
सते। यद्येव तोथोपि। त्रीणिस्युरिति॥ उभयस्यश्च वणतुल्यविकल्पोयं॥ इतिदेवजानीये पवित्रकरणनिर्णयः। अथानंत
प्राच्ये। कुशौ समावप्रशीर्णाग्रावनंतर्गर्भौ कुशौ छिनत्ति पवित्रे स्थ इति। कुशशब्दोयं तृणशलाकाविषयः। यद्यपि कुश
शब्दः शलाकासमूहार्थस्तथापि कुशस्तंबमिति स्तंबग्रहणदर्शनाच्छलाकैव प्रतीयते। कौशं हि दलमेव चेति स्मृतेर्हि दलना
शब्दः शलाकासमूहार्थस्तथापि कुशस्तंबमिति स्तंबग्रहणदर्शनाच्छलाकैव प्रतीयते। कोशं हि दलमेव चेति स्मृतिर्हि दलना
शब्दः शलाकासमूहार्थस्तथापि कुशाग्रशब्दादेव समूलास्तु कुशास्मृता इति व्यपदेशात्। ततश्च स्तंबे या
त्रैकशलाकायां। संभवति तस्माद्धि शलाके समूले च कुशशब्दादेव समूलास्तु कुशास्मृता इति व्यपदेशात्। ततश्च स्तंबेया
वच्छलाका मूलं संभाव्यते तावत्सर्वं ग्राह्यं। मूलाद्यपेक्षया प्रतीयमानप्रथमावयव एव मुख्यः शब्दार्थतया प्रती
यते। कुशत्वमपदेशात्तु श्वायमेवः। तौ चाप्रशीर्णाग्रौ समौ च प्रमाणतः। ततश्चाशेषग्रहणेनाल्लाभतायावयोः समौ तौ
छिन्नत्तिगर्भविहीनौ चांतः स्यातां तथा॥ त्रीन्वा। कुशानेवं लक्षणान्छिनत्ति। पवित्रे स्थ इति द्विवचनान्निष्यान्मंत्रस्यासम
वायिलमार्थस्यगुणत्वाद्द्विवचनपरित्यागेपि प्रातिपदिकार्थप्राधान्यात्समवेतत्वसंभवादितिन्यायकोत्सविष्यतीति त्रि
त्वेपि मंत्रप्रयोगोभविष्यति। विकल्पोत्र न पुनः स्तुश्रुतिद्वयं यतो न हि। संभवात्तु तृतीयस्याद्वयोः समुच्चये विकल्पनं। नद्वैधेद्धि ३२

ना:
पवित्रल०

त्वमस्यास्तु सिद्धं त्रित्वं तथानया। अपोऽपीयते प्यघतृतीयार्थपरं यतः। द्वित्वे चसवतोनेन विकल्पो बाध्यते पुं
द्वितीयवचनाद्यत्रापि शनैः क्रियते यदि। निषिध्यते तृतीयेन तदेवं विकल्पनं। क्रियते यदि पूर्वस्य प्रामाण्यं पुले
केसंभवेत्। द्वयोर्थं दृश्यते यत्र श्रुतेस्तत्र विकल्पनं। न कुर्यो कामः मे वैतन्त्रायणीये यथाद्वयं। कथं चेद्रुवतो
पिस्याद्वितीयस्याः प्रमाणताः। द्वित्वमभिमतं कृत्वा त्रित्वमुक्तापि तत्पुनः। शाखांतरे विधानात्तत्का चायेक
कर्मतः। प्राप्यतीति च बाधोत्र तृतीयवचनात्कृतः। नियतं द्वित्वमस्मात्कुसूत्रं शाखांतरानुगं। पवित्रे कुर्या
त्। ते च समे अप्रच्छिन्नाग्रे कुशपत्रे। तदुक्तं गृह्ये। अप्रच्छिन्नाग्रावनंतर्गर्भौ प्रादेशमात्रौ कुशाविति। अत्र
ना कुशशब्दः पत्रमात्रपरः। सीमंते त्रिभिश्च कुशपिंजूलैरित्यत्र वृत्तिकृता कुशपिंजूलैः कुशतरु
ति। कुशभिन्नलक्षणा नामेवोक्तेः। नहि तत्र कुशानां तरूपो रितिसंभवति। तथा त्वेनिषादस्थपतिमितिवत्
षष्ठ्यर्थे संबंधेलक्षणापत्तेः। समानाधिकरणसमासस्य बलवत्वाच्च। एवं चोक्ते एकविंशं कुशपिं ति
जूलान्यादाय सत्रापि कुशशब्दः पत्रे प्रसिद्ध एव तथा च तत्र कारिका कारेणा निदध्या दोषधेत्रास्य
स्वेन भिसस्य दक्षिणो। कुशपक्षे कुमारस्य हृद्यगंतत्कुशत्रयम्। पिंजूलेषु धुरं न्यस्य स्वधितेमेन
लिखेथ। अवपीडयती सर्धः क्षुरस्ताम्रमयो भवेत्। येनावपदिति छिंद्यात् छिन्नान् प्रागग्रकान्कु
शान्। एकीकृत्य शमीपर्णैः स्नात्वमात्रे प्रयच्छतीति स्पष्टमेव पत्रेषु कुशशब्दः प्रयुक्तः। तथा कुशोज

Indira Gandhi National
Centre for the Arts

६ न तु अछिद्राणि पत्राणि यस्मिन्निति

पवित्रलक्ष

प्र॰ वि॰ तयोर्गृहीत्वेत्युक्तेः पत्रद्वयमेव। अन्यथा अंतानां बहुत्वात् तेषि सापत्तिः। अत एव कुशौ समावप्रशीर्णा
३३ ग्रावनंतर्गर्भौ कुशौ छिनत्ति। पवित्रे स्थ इति कातीयसूत्रव्याख्यायां हरिहरभाष्ये पवित्रे साग्रे अनंतर्ग
र्भे हि कुशतरुणा इति तरुणशब्दवाच्य पत्रद्वयापि प्रायत्वेन कुशाविति सौत्रं द्विवचनं व्याख्यातं। एवं च जातिमात्रे
पि द्विवचनं व्याख्यातं। कुशतरुणा इति तरुणशब्दवाच्य पत्रद्वयापि प्रायत्वेन कुशाविति सौत्रं द्विवचनं
मवेर्भः साग्रमूलः कुशाः स्मृताः समस्तत्र स्कुकुतपछिन्नाग्रस्तृणमुच्यत इति साग्रमूलस्यैकपत्रस्यापि कुश
त्वमविरुद्धं। शांखायनसूत्रेपि। कुशतरुणौ अविषमे अविछिन्नाग्रे प्रादेशेन मापयित्वा कुशेन छिनत्तीति। यास्ति
केरप्युदितिरस्यछिद्रपत्राआज्यस्थालीमादायेत्यत्र अछिद्रेण त्रेयस्याभिसेवं यत्र द्वयमेवोक्तं यो पि अनंतस्त
रुणौ यो तु कुशौ प्रादेशसंमितौ अनखछिदितौ साग्रौ तौ पवित्राभिधाय काविति कारिकावचने कुशशब्दः सो
पि पत्रपर एव। एतेन यत्र केश्चिदुक्तं। अनंतर्गर्भिणं साग्रं कौशं द्विदलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं य
त्र कुत्रचिदिति स्मृत्याप त्रद्वयात्मकस्यैकपवित्रत्वात् सवित्रेकुत्वेस्याहैताहशायोर्द्वयोर्ग्रहणमिति। तस्त
त्र कुत्रचिदिति स्मृत्यापत्रद्वयात्मकस्यैकपवित्रकमिति वद्धारणार्थं पवित्रपरत्वात्। अत एव।
त। अस्य पवित्रस्य चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्य पवित्रकमिति वद्धारणार्थं पवित्रपरत्वात्। अत एव।
त। अस्य पवित्रस्य चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणस्य पवित्रकमिति वाक्यशेषः। वस्तुतस्तु अग्नीषोम
अनंतर्गर्भिणमित्यस्याग्रे कौशं तु विस्पृष्टयात्रिसं पवित्रं दक्षिणे करे इति वाक्यशेषः।
योर्द्विवताल वद्धा सज्य दृसैकपवित्रत्वाभिप्रायः। द्वचि सवित्रशब्दः। यथादेवो वः सवितोत्पुनात्वछिद्र ३३
णपवित्रेणेत्यादौ यथा वासवितुश्छाउत्पुनाम्यछिद्रेण [illegible] पवित्रेणेत्यादौ प्रादेशमात्रं पवित्रं इत्यादौ

च। कुचित्वधिष्ठानाभिप्रायः। यथा पवित्रे स्थो वैष्णवी यथा वा प्रादेशमात्रौ कुशाविति न कश्चिद्विरोधः। किंच। वृत्तिक
ता प्रागुत्पुनातीत्येतत्सूत्रस्थं प्राग्ग्रहणं पुनराहारनिरर्थं उत्सवनमात्रं तत्र विधीयते॰ एवं च पूर्वस्य पवित्रा
भ्यामाज्यस्योत्सवनमित्यस्य सूत्रस्य वैयर्थ्यं पूर्वयोगः किमर्थ इत्यनेन ग्रंथेनाशंक्य पूर्वेणामंत्रकमुत्सवनं वि
धीयते। उत्तरेण तु समंत्रकं। तत्राद्यं वैतानिके अग्निहोत्राद्यं गम्भूत प्रायश्चित्तहोमांगे आज्ये। गृह्यकर्मणि
तु समंत्रकमित्युक्तं। तेन वृत्तिकारमते उत्तरवाक्यस्य मंत्रविशिष्टोत्सवनविधायित्वात् सो सूर्यस्य रश्मिभिरिति।
इति प्रागुत्पुनातीति करणविनियुक्तस्य मंत्रस्येंद्र उर्ध्वोध्वर इत्याधारमाधारयतीत्यादिवत्। स्वार्थसमवायक
ल्पकत्वान्मंत्रगतलिंगस्य बलवत्वाच्च मंत्रप्रकाश्यैकपवित्रस्य क्रियांगत्वेव गते पवित्राभ्यां प्रादेशमात्रौ कु
शावित्यादि द्विवचनमधिष्ठानाभिप्रायमेव एतदेव मंत्रविशिष्टोत्सवनविधीनस्य फलं यदुत्सवने पत्रद्वयं एत
दभिप्रायकमेव दलद्वयात्मकैकपवित्रस्य यत्र कुत्रचिदिति वीप्सया वाक्यीय धारणार्थत्व वाधेन सर्वकर्मा
गत्वेन विनियोगः। अत एव व्रतहेमाद्रौ प्रादेशमात्रं विज्ञेयमित्यस्याग्रे आज्यस्योत्सवनार्थं यत्तदप्येताव
देवलिति वचनेन दलद्वयात्मकस्यैकस्यैव पवित्रस्योत्सवने साधनत्वमुक्तं। पत्रचतुष्टयरूपपवित्रद्वयस्य
कर्मांगत्वं वादिमते तु दलद्वयात्मकैकपवित्रस्य कुत्राप्यंगत्वाभावात् यत्र कुत्रचिदिति वीप्सा बाधितैव स्यात्। ए
तेनैकस्य पवित्रस्य साधनत्वाश्रुतेः कथं द्विवचनमधिष्ठानाभिप्रायमिति स्मर्तव्यशंकापरास्ता। किंचाभिचारिकेक
र्मणि पत्रचतुष्टयमुक्तं। तथा च मदनपारिजाते कात्यायनः। त्रिभिर्दर्भैः शांतिकर्मे पंचभिः पौष्टिकं तथा
Indira Gandhi National
Centre for the Arts

पात्रासाद

प्र०चि०

३४

चतुर्भिश्चाभिचाराख्यं कुर्वन्न कुर्यात्सपवित्रकमिति। शौनकोपि। उत्पुनीयात्सवित्राभ्यां अपस्तूष्णीं त्रिरेव तु। अं
गुष्ठानामिकाभ्यां तु पाण्योरुत्तानयोः पृथक्। गृहीतमूलकूलाभ्यामित्युत्पवनमुक्तमिति तुलशब्दवाच्य
त्वणद्वये नैवोत्पवनमाह। तेन सर्वत्र यत्र द्वयाग्रकेण पवित्रे। तेन पात्रासादनानंतरं उक्तलक्षणे पवित्रे
कृत्वा प्रोक्षणीपात्रमुत्तानं कृत्वा तत्र पवित्रे निधायाद्भिः पूरयित्वा अंगुष्ठानामिकाभ्यां उदगग्रे असंहते प
वित्रे धृत्वा तूष्णीमुत्पूय पात्राण्युत्तानानि कृत्वा इध्मं च विस्रस्य सर्वाणि त्रिः प्रोक्षयेत्। ता आपः का
श्चित् कमंडलौ क्षिपेदिति भट्टाः। शौनकः। कृत्वोत्तानानि पात्राणि इध्मं विस्रस्य बंधनात्। अद्भिस्ताभिः
सह प्रोक्षेत्त्रिरेवं यत्नसाधनैः त्रिरद्भिः प्रोक्ष्य पात्राणि तृणैः प्रच्छादयातिके रिति। अथ ब्रह्मवरणं। तत्र
शानदिग्वस्थितं ब्राह्मणमस्मिन्कर्मणि ब्राह्मणं त्वामहं वृणे इति तत्साणिं पाणिनागृह्य वृणुयात्। तथा
च शौनकः। अथर्त्विजं वरणीयं कुलीनं ब्राह्मणोत्तमं। तत्साणिं पाणिना गृह्य ब्राह्मणं वृणुयात्सुधीः।
द्वितीयया विभक्त्या तन्नामानिर्दिश्य वृणे इति। मरुन्मे वोच इति च तन्नाम वक्तु इत्यमुं जपित्वा प्रतिज्ञा
नीयाच्चंद्रमास्त इति स्वयं। स्वाग्नेो ब्रह्मा इमामग्न इत्यृचं। जुहुयात्पृथक्। आहिताग्निर्दक्षिणानावेत
नागन इति त्वचा। गृहीतमधुपर्कः सन्नग्रेणाग्निं परीत्य च। तस्मिन्नुदङ्मुखः स्थित्वा दक्षिणे वासने तृणं।
अंगुष्ठानामिकाभ्यां तु समादायनिरस्य च। निरस्त इत्यनेनैव तत्प्रत्यक् दक्षिणादिशि। अपः स्पृष्ट्वा महीं २४
विस्तुपविश्य तृणेषु च। समस्तपाण्यंगुष्ठो दक्षिणोपर्यवस्थितः। तेनोपवेशनानंतरं समस्तपाण्यंगुष्ठत्वं शौनक

यं मते। जयं तमते तु पूर्वमिति प्रयोगपारिजातः। अवस्थानं च वामोरूपर्यवस्थित दक्षिणपादस्येसेवं तेयं।
शिष्टास्तु मरुन्मेचं द्रमास्त इति न पठंति। वस्तोतु अथ ब्रह्मास्तिचेत् सप्राक् प्रणीतापात्रप्रणयनात् सम
स्तपाण्यंगुष्ठ महत्वाग्रेणाग्निं परित्योपविशेदित्युक्तं गृह्यपरिशिष्टेपि। अथ ब्रह्मास्तिचेत्। सप्राक्प्रणीताप्रणयू
नात् समस्तपाण्यंगुष्ठाग्रेणाग्निं परीत्यैत्याद्युक्तं उपवेशनानंतरं च ब्रह्मणो गंधाक्षतादिभिः पूजनं कुर्या
त्। ततो ब्रह्मा बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्यते बृहस्पते यज्ञं गोपाय सयज्ञं पाहि सयज्ञपतिं पाहि समां
पाही ति जपेत्। सर्वदा च यज्ञमान वेदुदङ्मुखश्चनिरसनोपवेशने ब्रह्मजपः सर्वप्रायश्चित्तानि संस्था
जपश्चेति ब्रह्मणः पंच कर्माणि भवंतीति प्रयोगपारिजाते नारायणः। वस्तुतस्तु बृहस्पतिर्ब्रह्मा ब्रह्मसदन आ
शिष्यते बृहस्पते यज्ञं गोपायेत्युपविश्य जपेदेष ब्रह्मजपः सर्वयज्ञतंत्रेषु साग्नेोपत्रोपवेशनमिति
श्रौतसूत्रे गोपायेत्यंतं मंत्रस्यैवाम्नानात् सयज्ञं पाहीत्यस्य च बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्टबृह
स्पते यज्ञमजू एपः सयज्ञं पाहीत्यादिना अग्रेतनमंत्रशेषत्वाच्च गोपायेत्यंतं एवमंत्रः। अत एव स
वैयज्ञतंत्रेष्वित्यत्र तंत्रग्रहणं पाकयज्ञेष्वपि प्राप्त्यर्थमित्युक्तं श्रौतवृत्तौ। बहुचपरिशिष्टं तु निर्मू
लमित्यनुसंधेयं। अथ प्रणीताप्रणयनं। कारिकायां। विस्रस्येध्मं च बर्हिः सपवित्रमथाग्रतः। पूरयित्वा
तं जलेन त्रगंधपुष्पाक्षताद्यावपेत्। ब्रह्मजपः प्रणीताभिः साह ब्रह्मार्पयदपश्चेत्। नीत्वा तं नासिकादघ्नमु
दगग्रे निधाय च। दर्भैः प्रच्छादयेत्पात्रं पूर्णपात्रं तदुन्नतं इति। विस्रस्येध्ममिति पूर्वेण संबंधः। ते

नि

प

Indira Gandhi National Centre for the Arts

तेन ब्रह्मवरणानंतरं तदुपवेशनानंतरं च प्रणीतापात्रमग्नेः पश्चान्निधायोत्तराभिरद्भिः पूरयित्वा गंधादि प्रक्षिप्य
प्र॰ वि॰ मुखसमुद्धत्याग्नेरुत्तरतो दर्भेषु निधाय पवित्रे गृहीत्वान्ये दर्भै राच्छादयेदिति सिद्धाः। शौनकोपि। प्रणीतापा
३५ त्रमादाय पश्चादग्नेस्तृणेषु तु। अंतर्धाय पवित्रे तेसं पूर्या तूष्णीं वारिणोलिनेनोत्तरस्यैव जलस्यात्र प्रक्षेपोन
तूष्णीं। सूत्रकारस्य तु मते शास्त्रांतरोक्तमपि पूर्णपात्रपूर्णं नियतं कार्यं। अन्यस्य तु शास्त्रांतरोक्तस्य करणे सुप
यो नाकरणे प्रत्यवाय इति वृत्तिः। उत्तरत्र बर्हिषि पूर्णपात्रं निनयेदिति निरसनिनयन दर्शनादिति वृत्त्याशयः।
अपां प्रणयने च श्रुतिः। अपः प्रणयति आपो वै रक्षोघ्नीः रक्षसामपहत्या इति। पितृचरणास्तु प्रणीतापात्रप्रणाय
नात्पूर्वं समस्तपाण्यंगुष्ठ इति वृत्तिकारोक्तेर्विस्रस्य ध्वंसर्वाणि पात्राणि त्रिः प्रोक्षति ततः प्रत्यगग्नेर्निधाय स
ग्रंथ इति ग्रंथे ततः शब्देन क्रमोक्तेर्विस्रस्य अंबुचमसं सपवित्रमथाग्रतः पूरयित्वा जलैस्तत्रेति कारिकावच
ने। अथ शब्देन पूर्णपात्रपूरणस्य इध्मविस्रंसनपूर्वकपात्रप्रोक्षणानंतर्योक्तेः पात्रप्रोक्षणानंतरं पूर्ण
पात्रं परिपूर्य गंधपुष्पाणि च प्रक्षिप्य पश्चाद्ब्रह्मवरणं कुर्यात्। ततस्तस्मिन् ब्रह्मणि समस्तपाण्यंगुष्ठत्वादि
ना उपविष्टे ततो ब्रह्मजपः प्रणोष्या मीसुक्ते सति प्रणीतापात्रप्रणयनं कुर्यादित्याहुः। अत एवाश्वलायनस्मृ चेति २
तौ निरध्याच्चमसे च तौ। पवित्रपूरये द्वारि गंधपुष्पाणि चावपेत्। ब्रह्माणं वरयेदस्मिन् कर्मणि त्वं भवेति पात्र ३५
पूरणानंतरं गंधादिप्रक्षेपोत्तरं च ब्रह्मवरणमुक्तं। न तु पात्रपूरणात्सर्वं ब्रह्मणोभावे प्राक्पूर्णपात्रनिधानादी
ति ज्ञयंतः। यजमानोपि निरसनोपवेशनं कुर्यात्। तथा चाश्वलायनः। निरस्त इति मंत्रेण नैरृत्यां तृणम

अपां प्रणयने कारणं कुर्यात्। अपः प्रणयति
स्य च। कर्त्रोत्तुरे दिमं त्रेमं मुपविश्य कुशासने इति। इति पूरण पात्र पूरणं पवित्रे अंत
आपो वै रक्षोघ्नीः रक्षसामपहत्या इति अथ निर्वापः। सूत्रे। तस्यै तस्यै देवतायै चतुरश्चतुरो मुष्टीन्निर्वपति पवित्रे अंतर्धाय अमुष्मै त्वा जुष्टं प्रोक्षामीति। तेन प्रणीता प्रणयनोत्त
जुष्टं निर्वपामीति यथा निरूपममुष्मै त्वा जुष्टं प्रोक्षामीति। तेन प्रणीता प्रणयनोन्त
रं प्रत्यगग्नेः कुशेषु शूर्पं निधाय तत्र प्रागग्रे पवित्रे निधाय चतुर्थ्या विभक्त्या देवतां निर्दिश्य व्रीहीन् यवान् तंडुलान्
वा चतुरः चतुरो मुष्टीन्निर्वपेदिति सिद्धाः। चतुरश्चतुर इति वचनं एकैकस्यै देवतायै चतुर्मुष्टिप्राप्त्यर्थमिति वृत्तिः
सर्वत्र नाममंत्रेण होमेषु मंत्रको निर्वापः। मंत्रेण होमे तु तूष्णीमिति वृत्तिकारादयः। तस्यायमाशयः। नामापि
होमे साक्षात्तद्देवताप्रकाशकस्य अमुष्मै त्वा जुष्टमिति मंत्रस्य शीघ्रोपस्थितिः। ऋग्भिर्होमे तु साक्षान्नामा
भावादृक्लिंगेनाम्नामनुमानेनोपस्थितेर्विलंबितोपस्थिति कत्वमिति तत्र तूष्णीमेव निर्वापः कारिकायामपि।
पवित्रांतर्हिते शूर्पे व्रीहीन्मुष्टींश्चतुरः स्वयं॥ निर्वपेदग्नये त्वादिमंत्रेणावर्तयेत्तत इति। ततः पवित्रे व्रीहीणामुप
रि निधाय यासमंत्रकेषु निर्वापेषु समंत्रकाण्यमंत्रकेष्वमंत्रकाणि एवं तस्यै तस्यै देवतायै निर्वापसंख्यया
उत्तराभिरद्भिः प्रोक्षणानि कुर्यादिति वृत्त्याशयः। एतानिति वचनं संस्कृतनेव प्रोक्षेत। न विभज्य यं समर्थं
निर्वापप्रोक्षणे एकस्मिन् पात्रे भवतः। विभज्य तंडुलान् अग्निमत्शोदिसु तन्न विभागविधानादिति वृत्तिः।
कारिकायामपि। पवित्रांतर्हितान् व्रीहीन् प्रोक्षेन्निर्वापसंख्यया इति। तेनानेकदेवत्योत्तरत्र निर्वापप्रोक्ष
णादि संपूर्णं गुणकांडं कृत्वा नापरस्य कर्तव्यं। तथा वसाहितस्य गाथा पत्ने। किं तु सर्वेषां निर्वापं कृत्वा पश्चात्

Indira Gandhi National Centre for the Arts

प्रोक्षणमित्येवं पदार्थानुसमयएवयुक्तः। अन्यथा प्राजापत्यचरुं वरुणमिर्व्यवधानेन प्रत्यासत्त्यनु वह्निप्रपण
प्र॰चि॰ ग्रहबाधापत्तेरिति पंचमेस्पष्टं। प्रोक्षणावोक्षणादीनां लक्षणमुक्तं प्रयोगपारिजाते संग्रहे। उत्तानेन तु
३६ हस्तेन कर्तव्यं प्रोक्षणं भवेत्। अर्वाचीनेन हस्तेन कर्तव्यं वोक्षणं मुष्टीकरोतिय त्तोय मभ्युक्षणमिति त्रिधे स्या
ति। तच्च ग्रहमखे तु मंत्रैरेव होमात् तूष्णीमेव न व्यग्रहाधिदेवतादिभ्यो निर्वापः प्रोक्षणं च। ततः प्रसव्यग्रीवस्त्व
गागूर्ध्वलोम कृष्णाजिनं ततः। तस्मिन्नुलूखलं कृत्वा तत्र व्रीहींस्तथा वपेत्। व्रीहीन्प्रत्यवहत्य तान्त्रिः शु
क्लीकृततंडुलान्त्रिः प्रक्षाल्य पचेदाज्यमासिच्य सपवित्रके इति कारिकोक्तेरवहतांस्त्रिः फलीकृतान्त्रा
न्नाश्रपयेदिति सूत्रकारोक्तेश्चैषां पात्राणामुत्तरतः प्रसव्यग्रीवमूर्ध्वलोम कृष्णाजिनमास्तीर्य कृष्णाजिने
वहननेकारणंश्रूयते। यद्देवा वै देवेभ्यो निलायत। कृष्णोरूपं कृत्वाय त्कृष्णाजिने हविरध्यवहंतीति यदादे तत्तु घ
लं प्रयुक्तइति तत्रोलूखलं निधाय तत्र व्रीह्यादिनिक्षिप्य मुसलेन पत्न्या अवघाते कृते तान्शुक्लीकृतान्त्रिः प्र
क्षाल्य पचेत्। यदा तु तंडुलानां निर्वापस्तदा व्रीहीणामवघातश्च तंडुलेषु कृता कृत इति वचनात् तंडुलानां
पाक्षिकोवघातस्तस्मिन्नपि पक्षे त्रिः फलीकरणं भवत्येव। तदुक्तं अवहतांस्त्रिः फलीकृतानिति। फलीकरणं शु
क्लीकरणं पिंडपितृयज्ञे सकृत्प्रक्षाल्येति ग्रहणात्त्रिः प्रक्षालनमिति वृत्तिः। नवग्रहैः प्रकरणे मंत्रयंतश्च शुल्व २ ३६
कर्तव्याः श्चरवः प्रतिदैवतमिति वचनाद्ग्रहाणां न च अधिदैवानां नैकेति दर्शमुख्या। लिंगैक त्रैव वा चरू
नश्रपयेत्।

न्नश्रपेदितिपितामहचरणाः। सूत्रेपि। नाना श्रपयेत् समोप्यवायदिना नाश्रपयेद्धि सज्य तंडुलानसिम
रोहिदममुष्मा इदममुष्मा इति। अमुष्मै शब्दः पूर्ववद्देवतापाश्चतुर्थ्यंत निर्देशार्थः। पचनानियमं च
ह बोधायनः। नाध्वर्तं न विदग्धं वाप्यबहिर्गीतं कुंचिकमिति। कुंचिकमुपरितनो मंडः। अथानिर्वापो नैः प
श्विमतः। अवघातादिकं तु पात्रासादनादुत्तरत इति। इष्टेः प्राप्यते। इति निर्वापादि। अथाज्यसंस्कार
दि। कारिकायां। आज्यमासिच्य सपवित्रके। अपोह्योत्तरतोंगारान् तेष्वधिश्रित्य नद्धुतां। अधि
श्रित मवज्वल्य दर्भाग्रद्वयमस्यति। तेनैव ज्वलताज्यं च त्रिः पर्यग्निकरोत्यथ। कर्षन्निवोदगुद्वास्य चांगारानतिसृज्य च॥
अंगुष्ठोपकनिष्ठाभ्यां पवित्रे द्वे असंहते। गृहीत्वोत्तानपाणिभ्यां त्रिः प्रागुत्पूय तत्पुनः। सवितुष्ट्वेति मंत्रेण सकृत्तूष्णीं
द्विरिष्यते। कृताज्योत्सवनेप्रोक्ष्य पवित्रे प्रास्य चानले। अनलात्प्रसमास्तीर्णे बर्हिष्याज्यं निधाय च। प्रताप्य सकुशौ द
स्य वींस्रुवोदर्वीनिधाय च। स्रुवं बिलमग्रे स्रुचः पृष्ठमप्यामग्रतः। आरभ्य पृष्ठतो यावदुपरिष्टाद्बिलं स्पृशेत्। कुशानां
मूलतो दंडमेकेकं त्रिर्मृजीत वै। प्रोक्ष्य प्रताप्य वासाद्य बर्हिषुत्तरतो घृतात्। प्रयोगपारिजाते। प्रयोगनिक नं
करणे चैव मार्ष्या। पंचशालाके कोः। स्रुक्स्रुवौ तु चतुर्भिस्तु प्रतितप्याथ संमृजेदिति। दत्त्वा वपि पूर्णपात्रं निधानादि।
रं तत्रापि पवित्रे गृहीत्वा आज्यस्थाल्यां निधायेत्यादि। प्रयोगपारिजाते तु अपरेणाग्निं पवित्रांतर्हितायामाज्यस्थाल्या
माज्यं निरूप्येत्यापस्तंबोक्ते रग्नेः पश्चिमतः आज्यस्थाल्यामाज्यनिर्वाप इत्युक्तं। सत्यमप्येवं। वस्तुतस्तु कारिकायां
वद्योच आज्यस्थाल्यां पवित्रे निधापयेत्यादिना यथावस्थितायामेवाज्यस्थाल्यामाज्यनिर्वापोक्तेः। पूर्वोक्तवच

प्रयो॰

नस्य चापस्तंबादिपरत्वादुत्तरत एवाज्यनिर्वापः। अत एवाश्वलायनसूत्रे त्रिः प्रक्षाल्य पञ्चेदग्ने रुदक्पुर्वेवाज्य
प्र॰चि॰ भाजने सपवित्रे निषिच्याज्यं ततोंगारानपोह्य च। तत्राज्यमाजनस्थाज्यं संस्कुर्यादुल्मुकेन चेत्यादिनाउत्तर
३८ तएवाज्यनिर्वाप उक्तः। त्रिः प्रक्षाल्य पचेदिति पूर्वेण संबंधः। शांखायनसूत्रे। सर्वत्र मासंस्कृतेनजुहुयात्
तेन प्रायश्चित्तार्थं होमेप्याज्यसंस्कार इति याज्ञिकाः। शौनकः। निरूढः स्यादिध्मक्लोग्निर्यः परिस्तरणा
द्बहिः अनिरूढः स्वैवग्निर्यः परिस्तृतिमध्यग इति। संगृहे। पर्यग्निकरणायाग्निमनिरूढाद्ग्रहरेत्।
बहिर्निरस्य तच्छेषं निरूढाघदिसो जयेदिति। बहिर्निष्काशितान्निरूढाघ वज्वलनं करोति तदा तानिज्वलत
नानितत्रैव यो जयेदित्यर्थः। आपस्तंबश्रुतिरपि। रुद्रो वा एष यदग्निः पत्नीस्थाली यन्मध्येग्नेरधिश्रयेत् रुद्रा आज्य॰
यपत्नीमपिदध्यात्। प्रमायुका स्यात्। उदीचोंगारान्निरूह्याधिश्रयति। पत्निये गोपीथाये ति। अंगारा नितिब —
हुत्वं विवक्षितं। शौनके नतु उदगग्नेर्निरूढेषु त्वंगारेषु स्रपयस्विसुक्तं। तथा ओदनादि हविर्विस्तेः संलिवे
दितरे रपीति तेने वोक्तेः सर्वेषां हविषां पर्यग्निकरणं सूत्रेपि। अप्रच्छिन्नाग्रावनंतर्गर्भौ प्रादेशमात्रौ कुशौ
नानां तयोर्ग्रहीत्वा पुष्पोप कनिष्ठिकाभ्यामुत्तानाभ्यां पाणिभ्यां प्रागुत्पुनाति सकृन्मंत्रेण द्विस्तूष्णीमिति। पवि
त्रे व्याख्याते। प्रशब्दः सूक्ष्मछिन्नामयोरनिवृत्त्यर्थः। अत्र प्राकृप्रहरणं पुनराहारमाज्यं त्रिरुत्पुनातीत्यापस्त
बोक्तपुनराहारनिवृत्त्यर्थं तेन शाखांतरदृष्टानामिध्मात्र क्रियेति वृत्तिः। केचित्तु प्रागयहरणस्य पुनराहारमात्र
निवृत्त्यर्थं त्वेविशेषनिषेधः शेषाभ्यनुज्ञार्थ इति न्यायेन शाखांतरोक्तानां करणे नियमेन वप्रा... नीतिरु ३८प्रो
सुक्तमिध्मातः करणं चिंसमित्याहुः। वस्तुतस्तु श्रीहीणामवघातश्च तंडुलेषु कृताकृतः। द्रवीभूतयत

२८

स्यापि विलापनविधिस्तथेतिप्रयोगपारिजाते वचनादुत्सवनमात्रपक्षो विलीनाज्यपरः। दर्शाग्रह्य पंचां
स्यापि विलापनविधिस्तथेति प्रयोगपारिजाते। पर्यग्निकरणं च पुनर्ज्वलद्भिरेतैस्त्रिस्त्रणैः परिहरेत्स
गुष्पर्यमात्रं प्रक्षाल्याज्ये क्षिपेदिति प्रयोगपारिजाते। पर्यग्निकरणं च पुनर्ज्वलद्गुरेतैस्तृणैः परिहरेतसहृ
ओदनादिहविर्विस्तेः संलिवे दितरे रपीति। शौनकोक्तेस्त्रिः कुर्यात्। गृह्यपरिशिष्टेतु। होम्येपक्वमुल्मुकेनाव काकपत्र
ज्वल्य प्रोक्ष्यते नैव त्रिः पर्यग्नि कृत्वाउल्मुकं निरस्येत्युक्तं। तेन वैश्वदेवार्थान्नेपि वज्वलनमिति शिष्टाः। प्रकृतिर
पि। त्रिः पर्यग्नि करोति रक्षसामपहत्या इति। आज्यस्योदगुद्वासनेपि तैत्तिरीयश्रुतिः। प्रसकुशौ दर्वीति कारि
कावचनात्। कुशयोरपि प्रतितपनमित्याहुः। प्रयोगपारिजाते तु कृताकृतं प्रलवणं। प्रला वाज्यस्य संस्कृ
तिः स्रुवसंमार्गः स्रुवदर्व्योश्च आज्यभागौ परिस्तृतिरिति वचनात्संमार्गः कृताकृतः। एवं पात्रासादनमि
ध्माद आज्याधिश्रयणादि चेति वचनात्पात्रासादनमपि कृताकृतमित्युक्तं। आपस्तंबः। नसंमृष्टास्यसंम
क्षेः स्पर्शयतीति। कारिकायां। संमृज्यते कुशौ दर्वीमासाद्योत्तरतः स्रुयात्। तान् कुशान् कृतसंमार्गान्प्रो
क्ष्याग्नौ प्रहरेद्ध्य। अभिघार्यं चरुं चोदगुद्वास्य च ततः परं। अंतरेणाग्निमाज्यं च नीत्वा प्यासाद्य बर्हिषि। आज्या
दक्षिणतो देशे जयं तवचनं यथा। केचित्सविघार्येति सूत्रमन्यत्पठीयते। सहश्रपणपक्षे तु पृथगुद्धरणा
पर्वे। निदध्यात्पात्रमितरन्मध्ये चर्वाज्ययोस्ततः। नानाश्रपणपक्षे तु। नपृथगुद्धरणपात्रं। नजाएकदेवत्ये
प्राजापत्यस्य स्थालीपाकस्य ... स्यादौ। सूत्रेपि। यद्युवै समोप्य मुद्धारं जुहुयादिति। जुहुयादिति वचनं होम
कालएव मुद्धरेदित्येव मर्थं। तेन चरुं स्रुचि सद्य वदानदेशात्। पृथक्कृत्से दम मुष्मा इदममुष्मा इत्यभिम
र्शेदिति। तेने दंमुद्धरणपूर्वकमभिमर्शनमाज्यभागहोमोत्तरं कार्यमिति प्रयोगदीपिकायां। वस्तुतस्तु। स्थालीपा

Indira Gandhi National Centre for the Arts

प्र०चि० केनाममंत्रेण होमादस्तु सुद्धरणपात्रं। नवग्रहमखादौ तु मंत्रोक्तदेवतानां तु तूष्णीमेवाथ निर्वपेत्। चतुरश्र
३८ तुरो मुष्टीन् प्रोक्षणं च तथा स्ववेत्। सर्वेव अपये तत्र नास्ति सुद्धरणं तथेति कारिकाकारेण मंत्रवद्धोमे अनेक
देवत्ये सुद्धरणं त्रिधेव वचनात्तत्र न सुद्धरणं। तेन नवग्रहमखेपि सरुअर्पणपक्षे उद्धृत्याभिमर्शनं चिंत्यं। त
तः परिधिनिधानमिति जपंतः। तत्रैके कौंग्रे: पश्चिमतः। दक्षिणोत्तरयोश्च द्वौ। अथाधानं। शौनकः। अग्निं
परिसमुह्याथ गंधपुष्पैरलंकृतं। आत्मानं चाप्यलंकृत्य इध्ममादाय पाणिना तेन तन्मते अत्रापि परिसम
हनं। केचित्तु पूर्वं स्येव सम्हनस्यात्रानुवाद इत्याहुः। गंधपुष्पादिभि: पूजनं च एकादशांगुलिभिः ते दशो
कुर्यादित्युक्तं प्राक्। आश्वलायनः। विश्वानीस इति पादैः पूर्वतो दिक्षु चाष्टसु। अर्चयेद्गंधपुष्पाद्यै रग्निं स्त
पादध्वांसया। शौनकः। इध्मसन्नहनीं रज्जुमनूयाजे निधाय तां। आदायाज्यं स्रुवेणैव त्रिरिध्ममभिघा
रयेत्। अयंत इतिमंत्रेण वाग्नावेध्मं निधापयेदिति। अस्य मंत्रस्य वामदेव ऋषिः। जातवेदा अग्निर्देवता
त्रिष्टुप्छंदः। ऋग्विधाने शौनकः। विश्वानि नेति वै द्वाभ्यामभ्यायो वह्निमर्चेति। सततरसा पदः सर्वा यथा
प्राप्नोति चाक्षयमिति। मार्कंडेयपुराणेपि। संपूजयेत्ततो वह्निं दद्यात्तस्मा आहुती: क्रमादिति। यस्मिन् होमे योव
न्हिस्तं पूजयेदित्यर्थः नवग्रहमखे तु आदित्ये पिंगलो नाम इत्यादीनां नवानां ग्रहाग्नीनां पूजनं कुर्यादित्युक्तं
वासिष्ठ्यां। अथाघारहोमः। सूत्रे। तूष्णीमाघारावाघारयेति। तूष्णीं ग्रहणं मंत्रवर्जमन्येषां धर्माणामुत्तरपरिक्षि ३८
मामारभ्य दक्षिणपूर्वा दक्षिणपश्चिमामारभ्योत्तरपूर्वा प्रत्यवच्छिन्ना धारां हरेदित्यादीनां प्राप्त्यर्थमिति वृत्तिः। अ
स्मादेव तूष्णींग्रहणात्। तूष्णीं वै प्राजापत्यमिति वचनात् प्रजापतिरेवोत्तराघारदेवता। नत्विंद्रः आघार

यत्र प्राचीनमुद्वासयेत् यजमानमुच्चार्पयेत् त्स दक्षिणापि दैवसंस्स्यात्। यत्र कपालीषु चार्पयेत्। उदीची
स्य
नमुद्वासयतीति। तथा ब्राह्मणे करोति यत्तस्य संतत्यादिति। तत्राज्यं ऋषिभियोदगुद्वास्यांगारानां प्रसस्थापः
स्पृष्ट्वा तत्रस्थमेवाज्यं सवितुष्ट्वेति मंत्रेण उत्कृष्य सोच्चारिते नैव कैरप्रागुत्पूयपवित्रे प्रोक्ष्य तूष्णीं स्वाहे
तिमंत्रेण वाग्नौ क्षिपेदिति सद्वृत्तिः। कुशाग्रे प्रक्षिपेदग्नौ स्कंदाय सुच्चरन्निथे त्याश्वलायनवचना
त्स्कंदाय स्वाहेति मंत्रेण क्षिपेदिति। ततो बर्हिः स्तरणं। तथा च श्रुतिः। बर्हिस्तृणाति। प्रजा वै बर्हिः पृथि
वी वेदिः प्रजा एव पृथिव्यां प्रतिष्ठापयतीति तेनाग्नेः पश्चादुत्तरतो वा प्रोक्ष्य तत्र बर्हिः सन्नहनीं र
ज्जुमुदगग्रां प्रसार्य तस्यां बर्हिः प्रागग्रं उदगग्रं वा आस्तीर्य तत्राज्यपात्रं निधाय स्रुवादि संमार्गं कुर्यादिति
भट्टाः। वस्तुतस्तु प्रागुदंचि वा कर्माणीति कात्यायनेन विशेषोक्त्यापस्तंब सूत्रे तस्यानिसाः प्रांच
श्चेण रस्रुक्तस्या प्रागग्रमेव बर्हिः। शौनकः। बर्हिः सन्नहनीं रज्जुमुदगग्रां निधाय तां। तस्यां बर्हिषि
संस्तीर्य प्रागग्रैर्निर्हितं पवेत्। अथादाय स्रुवं दर्भैर्दक्षिणेन करेण वै। सव्येन दर्भैरभ्याहृत्य य
संप्रोक्ष्याग्नौ प्रतापयेदिति। सव्येन दर्भाना दाय संप्रोक्ष्य स्रुकस्रुवावग्नौ प्रतापयेदित्यर्थः।
केचित्तु प्रता। अङ्गुतिसांप्रवां वृतील शोध्यपत्रपांच वे पंक्तिचें

Indira Gandhi National Centre for the Arts

क्रि.
३८

[illegible]

Blank

अहोमेवसाधनांतरानुपदेशात् स्रुवएव साधनमिति वृत्तिः। कारिकायां। स्रुवेणाज्यं गृहीत्वाग्नेः प्रसमुत्तरेद्
शतः। आरभ्याद्दिशमाग्नेयीमाज्यधारामजुहुरेत्। अत्रविशेषश्रुतिः। आघारमाघारयतीति तिर्यञ्चमिव वै सुवर्गो लो
कः सुवर्गमेवास्मै लोकं प्ररोचयत्यृजुमाघारयत्यृजुरिव हि प्राणः संततमाघारयति प्राणानामन्नाद्यस्य संत
त्या। अथो रक्षसामपहत्या इति। नैर्ऋतीं दिशमारभ्य ऐशानीं पूर्ववद्धरेत्। उभयत्र चतुर्थ्यंतं प्रजापतिपदं स्मरे
त् सूत्रे। आज्यभागौ जुहोत्यग्नये स्वाहा सोमाय स्वाहेत्युत्तरमाग्नेयं दक्षिणं सौम्यं विज्ञायते चक्षुषी वा एते
यज्ञस्य यदाज्यभागौ तस्मात्पुरुषस्य प्रत्यङ्मुखस्यासीनस्य दक्षिणमक्ष्युत्तरं भवत्युत्तरं दक्षिणमिति।
तेनात्र दक्षिणसंस्थतैव। नत्वुदक्संस्थतेति वृत्तिः। कारिकायां। जुहुयादग्नये स्वाहेत्युदग्भागे स्रुवेणाहु
तेनैव जुहुयादाज्यं सोमायेति तु दक्षिणे। ततः पूर्वनिहितपात्रे चरुमुद्धृत्य इदममुष्मा इदममुष्मा इत्यभिम
६क र्शनं कुर्यात्। इत्यनंतरं पद्धतौ श्रीगुरुमौल्यनुक्रमे अग्निमुखं।। तत आचार्येण वग्रहमखदो द्वारपाला
नां पचध्वमित्यादिप्रैषं ब्रूयात्। तदुक्तं माल्यैर्गंधपुष्पैरलंकृत्य द्वारपालान् समंततः। पचध्वमिति तान्
ब्रूयादाचार्यो स्वस्तिपूजयन्। यजध्वमिति तान् ब्रूयाद्धोतृकान् पुनरेव तु। उत्कृष्टमंत्रजाप्येन
तिष्ठध्वमिति जापकान्। तथा होमं समारभेत सर्पिर्यवव्रीहितिलादिभिः। मंत्रवंतश्च कर्तव्याः स्वः
प्रतिदैवतं। अर्कः पलाशः खदिरः अपामार्गोऽथ पिप्पलः। उदुंबरः शमी दूर्वा कुशाश्च समिधः क्रमात्।।
एकैकस्या दशशतमष्टाविंशतिरेव वा। होतव्या मधुसर्पिभ्यां दध्ना चैव समन्विताः। अनेनाजनेत्रयाणां

Indira Gandhi National Centre for the Arts

समुच्चयः। दध्नाक्षीरेण वेत्यनेन विकल्पः प्राप्तस्तत्रायं निर्णयः प्रथमस्य पुराणत्वाद्द्वितीयस्य याज्ञवल्क्यस्मृति होमप्र॰
प्र॰चि॰ त्वात्तयो रुत्तरतमस्य प्राबल्या आविवक्ष्यवस्य यार्थेकत्वान्नविरोधः रसर्णवः। दध्नाक्षीरेण वायुताहुति हेमाद्रौ पाद्म
३९ अस्मिन्नपक्षे मधुपय्यो दधिदुग्धयोश्च विकल्पः। प्रादेशमात्राः। सशिखा अशिखा अपलाशिनीः। आशिखाः।
आयांतरशाखा रहिताः। अपलाशनीः पर्णरहिताः। समिधः कल्पयेत्। प्रातः सर्वस्कर्मसु सर्वदा देवानामपि
सर्वेषामुपांशु परमार्थवत्। समिदाज्यचरूणां च होमं कुर्यात्तद्विताः। उदङ्मुखः प्राङ्मुखो वा कुर्याद्ब्राह्मणपुंग
गु वाः। शौनकः। आज्ये पक्वं समच्छेदं तर्जन्यालिवर्तुलं। इदृशीं होममये प्राप्तः प्राप्नोति विपुलां श्रियं। तथा हेमाद्रौ
त्रे वेदर्यशेषं हुत्वा तु होममंत्रादनंतरं। नैवेद्यशेष होमः केषांचिदिति पितृचरणाः। तथा तत्रैव। ततो वदानध
र्मेणास्कनैव तु कुर्यात्स्वरं। तथा। चरूणा च समिद्भिश्च सर्पिषा च तिलैः। क्रमात्। तत्तन्मंत्रैश्च होतव्याः क्रमात्
दधिदेवताः। इदं च प्रत्यधिदेवतादीनामुपलक्षणं। तेन सर्वत्र चरोः प्रस्याहुत्स वदानधर्मान्न तु हस्तेन होमः॥
यत्र तु नस्तु मास्ति यथा सायंप्रातर्होमे तत्र पक्षे चरुणा होमे हस्तेनैव चरुहोम इति सायंहोमप्रकरणे जयंतः। ए
कृ व मनेकृत्स्नसाध्ये चरुहोमेपि हस्तेनैव होमः इत्यन्ये। सूत्रे। मध्यात्पूर्वार्धाच्च हविषोवद्यतिमध्या
त्पूर्वार्धात्पश्चार्धाद्वितिपंचावर्तिनामितिपश्चार्धाच्चेत्येतावतैव सिद्धे पुनर्मध्यपूर्वार्धग्रहणं प्रसक्तस्य
स्थतासिध्यर्थमिति वृत्तिः अवदानधर्मश्च सूत्रकृता विवाहप्रकरणे दर्शितः। बर्होजलाबुप स्तीर्यमध्या ३९
त्पूर्वार्धाद्वितिपंचावर्तिनामितिवृत्तिः अवदानधर्मश्च सूत्रकृता विवाहप्रकरणे दर्शितः। शौनकोपि
नाम्नात्पस्थानोवाद्विर्ला जानावपतित्रिजामदग्न्यानां प्रसक्षिधार्य हविरवत्तं चैषोवदानधर्म इति। शौनकोपि

द्रव्यप्रमा॰
जुहूस्त्वग्येसमादाय पश्चार्धाद्दिरवद्यति। मध्यात्तद्वद्विषोवद्येत् पूर्वार्धाच्चापि पाणिना। जुह्वां विलेनिनिषि
च्य हविः प्रत्यभिघारयेदिति। पंचावत्तिनस्तु। जामदग्न्या वत्सविदा वार्षिषेणास्तथैव च। भार्गवश्च्यावना
और्वाः पंचावर्तिन ईरिताः। अन्ये चतुरवर्तिन इति ज्ञेयाः। तथा सर्वत्र होम्य द्रव्यस्य परिमाणमुक्तं। प्रयोगपा
रिजाते सिद्धांतशेखरे। कर्षप्रमाणमाज्यं स्यात् मधुक्षीरं च तत्समं। तंडुलानां शुक्तिमात्रं पायसं प्रसृतेः समं।
त्रा कर्षमात्राणि भक्ष्याणि लाजामुष्टिमिता मताः। अन्नं ग्रासस्समं स्याद्धं शाकं ग्रासार्धमात्रकं। मंत्राणां तु त्रिभागं अ द्
स्यात्। कंदानामष्टमांशकः। इक्षुः पर्वप्रमाणं स्यादंगुलीद्वितयं लता। प्रादेशमात्राः समिधः सशिखा अप
लाशनीः। तिलसक्तुकणादीनां मृगीमुद्राप्रमाणतः। मृगीमुद्रा वक्ष्यते। पत्रपुष्पफलानां तु स्वमाना
कृतिरिष्यते। अन्यत्र तु। व्रीह्यादीनां चतुःषष्टिस्तिलादीनां शतं भवेत्। अंगुलीत्रयपर्वैस्तु जपयाप्या
कृतिर्भवेत्। इति युक्तं। शौनकीये तु मध्वाज्य क्षीर संयुक्तान् सयवान् जुहुयात् तिलान्। पर्वप्रमाणया
कुर्यात् पंचांगुलिप्रहीतये सुकं। चंद्रश्रीखंडकस्तूरीकुंकुमागरुकर्दमाः। हरिमेधसमा प्रोक्ता गुग्गुलुर्बद
रीसमः। तथा। अग्निपुराणस्य जिह्वास्थाने होतव्यं। तदुक्तं प्रयोगपारिजाते संग्रहे। यत्र काष्ठं तत्र क
र्णी हुनेत् व्याधिमान्भवेत्। भस्मस्थाने शिरः प्रोक्तं मनो दुःखं प्रवेदिह। यत्राल्पज्वलनं नेत्रं यजमान
स्य नाशनं। भस्मस्थाने तथा कृशस्थाने नाशो धनक्षयः। अंगारे नासिका विद्यात् मनो दुःखं विदु
र्बुधाः। यत्र प्रज्वलं तत्र जिह्वा चैव प्रकीर्तिता। तथा तत्रैव सुवर्णरक्तकारकाकृष्णा बेच तु सुप्रभा। बहु

Indira Gandhi National Centre for the Arts

प्र॰चि॰ ४० पाति रक्ता च सप्तजिह्वाः प्रकीर्तिताः। जिह्वानां दिङ्नियमोपि तत्रैव सुवर्णा वारुणीजिह्वा मध्यमा कनका जिह्वा॰
स्मृता। रक्ताचैरोत्तरा जिह्वा कृष्णा याम्यदिशि स्थिता। सुप्रभा पूर्वदिक् जिह्वा ह्यतिरिक्ता नि मोचरे। लेलिहाने वरूण
पाचाग्निजिह्वास्थानान्यनुक्रमादिति। तथा। हिरण्ये वारुणी जिह्वा मध्यमा सर्व कर्मसु। उत्तराच्चोपनयने रक्ता
ज्ञापितकर्मसु। प्राचीनस्वर्बे कानेषु आग्नेयी शांतिकर्मसु। ऐशानी चोग्रकार्येषु घ्नेतद्धोमस्य लक्षणं।
मिति। स्रस्यर्थसारे तु बहुश्रुष्कं धनेचाग्नौ सुसमिद्धे विधूमके। जैगारे लेलिहाने च होतव्यं नान्यथा बुधि
दिसुक्तं। कात्यायनः। योनर्चिषि जुहोत्यग्नौ व्यंगारिणि च मानवः। मंदाग्निरामयावी च दरिद्रश्च स जायते तथा
ते। तस्मात् समिद्धे होतव्यं नासमिद्धे कदाचन। आरोग्यमिच्छतायुश्च श्रियमात्यंतिकीं तथा। अग्निः प्रदक्षि
णावर्तः कर्मसु स्याच्छुभावहः इति। अत्र केचिदंगप्रधानदेवता उद्दिश्य तत्तत्प्रमाणितत्तत्संख्यया उद्दिश्य नममे
तिस्यागं यजमानः कुर्यात्। तदर्थमहरनादीति महार्णवे चक्षुषुत्तरं सहस्रमन्यत्र। अनेककर्तृके होमे प्रत्याहुति
त्यागस्य कर्तुमशक्यत्वात्। अंगभूतहोमानुरोधेन प्रधानत्यागावृत्तेरन्याय्यत्वाच्चेत्याहुः। अन्ये तु सकृत्या
गस्य प्राधान्यं तत्रास्तु सकृत्त्यागः। अयुतहोमादिस्थले तु संख्यानयेन होमस्य प्राधान्यात् कुण्डभूतत्यागा
६ वृत्तिर्युक्तैव। तेन तादृशस्थले यदा त्र्यादिर्त्विजां होमकर्तृत्वं तदा तंत्रेण त्यागः। अन्यथा त्वावृत्तिरित्याहुः। पितृच
रणास्तु। जुहोति शब्दे यजनाधिकः स्यादिजेर्भिन्नसूत्रात् समाख्याबलाच्च होमस्य प्राधान्ये त्यागस्यांगत्वात् स्वबा ४०


च सकृत्तंत्रेणैव त्यागो युक्तः। तेनानेककर्तृके होमे प्रत्याहुति त्यागस्य कर्तुमशक्यत्वादिति दृष्टोक्तिरपि हेत्वा आहुतिस्था॰
भास एव। न ह्यंगमिति वा ते नीयं। तथा त्वे प्रजादीनामपि प्रतिप्रधानमावृत्त्यापत्तेः। तेन दृष्टत्वात् सकृदनुष्ठित
स्यापि तंत्रेणैवांगत्वोपपत्तेः सकृदेव त्याग इत्याहुः। स च त्यागः। इंद्रायेदं न मम इत्येवं रूप इति बहवः। अस्म
त्पितृचरणास्तु। इंद्रायेति चतुर्थ्याः। इदमिति द्रव्यस्य। नेति निषेधस्य। ममेति षष्ठ्याश्च न क्रियापदं न विना
प्रयोगः संभवति। सुप्तिङंतचयो वाक्यमिति कोशात्। भावने च सर्ववाक्यार्थे स्वकारकविशेषिते वार्तिका
च। तेनाख्यातं विना क्रियाभावात्। स्वाधीनेशब्दप्रयोगे किमित्यवाचकं प्रयोक्ष्याम इति शाबरभाष्याच्च
तेदृशस्य प्रयोगः। न च तत्र क्रियापदाध्याहारः। विनाप्यध्याहारेण इंद्रायेदं त्यजामीति रूपादिभाष्याद्युविला
दिप्रामाणिकलिखितत्यागेनानुपपत्तेः। तेनेंद्रायेदं न जामीत्येवमेव त्याग इत्याहुः। अत एवायं यागो
नमानस्तो व्यापारः तस्य तादृशोच्चारणं विनापि सिद्धः। किं तु यमात्मधर्मो यत्नात्स्यदुच्चारणरूपो व्यापारः
त्वाने छाय त्नानामात्मगुणत्वात् सिद्धिरिति दिक्। ततो होमारंभे द्विराचमनं कुर्यात्। तथा च षष्ठिपदे स्येंदुपुरा
णे। होमे भोजनकाले च संध्ययोरुभयोरपि। आचांतः पुनराचामेदन्यत्र तु सकृत् सकृदिति। ततः उपकल्पि
तद्रव्याणां प्रथमं गणपतये पुष्पकलाहुतिर्देया। तथा च हेमाद्रौ देवीपुराणे। गणाधिपतये देया प्रथमानुमराहु
तिः अन्यथा विघ्नलं विप्र भवती हृत संशय इति। ततः स्थापनोक्तमंत्रेरा कृष्णेनेत्यादिभिरोंकारस्वाहाकारै
हणानधिदेवतादीनां चान्वाधानोक्तसंख्यया होमं कुर्यात्। तथा च हेमाद्रौ भविष्ये। प्रणवादिभिश्चैतानि

Indira Gandhi National
Centre for the Arts

त्र॰चि॰ ७१ गेः स्वाहाकारांतयोजितैः जुहुयात् सर्वदेवानां येषांयेचोपकल्पिताः। यस्तुनोंकुर्याद्धोमः मंत्राणांपथ्यगादिषुकु होमद्रव्य
त्रचित्। अन्येषांचापिकृष्णानांकालेनाचमनादिनेत्यग्नौ करणप्रकरणेछंदोगपरिशिष्टीयंवचनंतद्विंशस्या
ज्ञतिमंत्रेषुरुद्रहोमः। दोचत्रतिमंत्रमोंकारोनकार्यइत्येवमर्थं। अन्येषांचजपाद्यर्थानांअविकृष्णानांम
न्निकृष्णानांपथ्यगादिषुओंकारंनकुर्यात्। कालेनमवधानेआचमनादिना च मवधानेनोंकारंकुर्यादि
त्याशार्कः। तथाहेमाद्रौभविष्ये। मंत्रेणोंकारपूतेनस्वाहांतेनविचक्षणः। स्वाहावसानेजुहुयात् ध्याय
न्वैमंत्रदेवतां। एतेगपरिशिष्टे। अविज्ञातस्वरामंत्राःप्रयोक्तव्याः प्रयोगिभिः। तैरेषुसेवहोमेषुविज्ञा नै
ताश्चविकल्पिताः तेनतानोयत कर्मणीत्येव अविज्ञातस्वरमंत्रविषयं। अतएवशिष्टानांमंत्रास्वरादर इति
च दिकृ। तत्रहेमाद्रिमतेचरूणांसमित्पूर्वाज्यांतिलान्त्यइतिक्रमः समिदाज्यचरुतिलाइत्यपरेतिनाक्रमः। स
मिद्भिश्चसर्पिषाचतिलैःक्रमादितिवचनाच्च। तुर्भिरेवद्रव्यैर्ग्रहादिहोमः केचित्तुगुडौदनंपायसान्नंसंयावंक्षीर
साष्टिकं। दध्योदनंघृतान्नंचकृसरंमांसचित्रकं। इत्येतानिहवींषीत्युः समित्संख्याहुतिस्तथेतिवचनात्ते
षामपिद्रव्याणांहोममाहुः। अन्येतुहोतमंचवघृताद्यत्रचरुसक्ष्वादिकंबुधइति। अत्रलविरादीनाममध्यस्पर्शो
पहतौविवेकः माहात्मार्याः। व्रीहितंदुलयवान्यानिसर्वाण्यमानितैरिह। स्पृष्टान्यपिविशुध्यंतिनतान्यंबवरा ७१
णिच।१। तैस्त्राडलादिभिः। पक्वान्नानिचयान्यत्रलाजाश्चपृथुकास्तथा। अपूपादीनिभक्ष्याणिस्पृष्टान्ये

तानिवर्जयेत्।२। आपस्त्वेतानिपक्वानिभक्षकाकादिरपिद्विजः। संस्पृष्टान्येकदेशेतुतन्मात्रंपरिवर्जयेत्।३।
तद्देषमग्नौप्रक्षिप्यकिंचित्संप्रोक्ष्यवारिणा। विप्रास्तद्यातुगृह्णीयाच्छूद्रीनांतुराशितं।४। अन्नंतुसंस्पृष्टं
षक्वान्नाद्यंविचक्षणः। रसाकृष्णामाष्णुद्धिर्वैचरुस्यादिनाभिह।५। वांजलायधर्मेस्पृष्टानदधिक्षीरघृतादिकान्।व
र्जयेन्मतिमान्विप्रः। शूद्राद्यैरपिवाजलं।६। सरित्सरोजलंशुद्धं सर्वैस्पृष्टमपिह्यम्युत। वर्जयेच्चतडागादिं कूपंचंडालजा
तिमिरिति।७। यजमानप्रियंयत्रकुलीद्राक्षादिहोतमभिसारुः। हेमाद्रौदेवीपुराणे। होमोग्रहादिपूजायां
शतमष्टोत्तरंभवेत्। अष्टाविंशतिरष्टौवायथाप्राप्तिविधीयते। होमेचोदङ्मुखः प्राङ्मुखोवाकुर्याद्ब्राह्मणपुंग
वाइतिवचनादुदङ्मुखः प्राङ्मुखोवाविप्राः। होमेचविशेषोगोभिलपरिशिष्टेउक्तः। नमुक्तकेशोजुहुयात् नानिपा
तितजानुकः। अग्निपातितजानोस्तुराक्षसेह्रीयतेहविः। उत्तानेनैवहस्तेनअंगुष्ठाग्रेणपीडितं। संहतांगुलिपाणि नै
स्तुवाग्यतोजुहुयाद्वितिशांखायनसूत्रे। अनूर्ध्वेतुमूर्ध्नजानुजुहुयात्सर्वदाहविः। नहिबाह्यहुतंदेवाः
प्रतिगृह्णंतिकर्हिचिदिति। अन्यत्रतुतिलकादीनांमृगीमुद्रयाहंसीमुद्रयावाहोमइत्युक्तं। तदुक्तंसंग्रहेहोमेमुद्रात्र हे
यंप्रोक्तं मृगीहंसीचसूकरी। मुद्राहीनस्तुयोहोमस्तस्सर्वनिःफलंभवेत्। सर्वांगुलैःसूकरीस्याद्धंसीमुक्तकनिष्ठिका।
आभिचारिकहोमेचसूकरीकथ्यतेबुधैः। यत्नेशांतिककल्याणेमृगीहंसीचकीर्तिता। स्यात्रिमुखमृगीमुद्रास्ते
मिसर्वफलप्रदेति। चतीर्थवदानेचाविशेषउक्तोगृहे। मध्यासर्वार्द्धांश्चहविषावद्यति। अयंचदेशनियमः।
तनमध्यात्स्रुवार्द्धांगुष्ठमात्रंतिरश्चीनमवद्यतीत्यर्थः। तथा। मध्यात्सर्वाधीसप्तार्द्धादितिपंचावत्तिनामिति।

Indira Gandhi National
Centre for the Arts

पश्चार्द्धे चेत्येतावत्तैवसिद्धे मध्यात्स्रुवोदिति पुनर्वचनं प्रत्यक्संस्थतासिध्यर्थमिति वृत्तिः। होमदेशानि यमोपि । द्वारपाल
प्र०चि० तत्रैव। मध्ये हवींषि प्रसक्तत्तरे वप्राक्संस्थान्युदक्संस्थानि वेति। अन्यभागयो मध्येह वींषीह तयानि।
४२ प्रसक्तूत्तरे पश्चिमदेशे वाइति देशद्वयं। प्राक्संस्थान्युदक्संस्थानि वेति संस्थाद्वयमिति वृत्तिः। होमसमये द्वा
रपालानां जपउक्तो मात्स्ये। श्रीसूक्तं पावमानं च सोमसूक्तं सुमंगले। शांत्यध्यायं चेंद्रसूक्तं। रक्षोघ्नं चेति
बह्वृचो। पावमानं स्वादिष्ठयेत्यादि। सोमसूक्तमिति तस्यैव विशेषणं। इंद्रसूक्तं। योजातएवेति शेषं प्रसिद्धं। द
क्षिणे द्वारपालौ तु रुद्रं पुरुषसूक्तं। शोकाध्यायं शुक्रियं पंचमंडलाध्यायमेव च। दक्षिणौ द्वारपालौ तु पठतां यजु
र्वेदतथा। शोकाध्यायो देवसविता रीति। शुक्रियं करवं वा चमितिमंडलाध्यायोपदेतन्मंडलमित्यादि। तैत्तिरियाणां
यं वादित्योवाएषमंडलमित्यादि। तथा वामदेव्यं बृहत्साम ज्येष्ठसाम रथंतरं। तथा पुरुषसूक्तं च रुद्रसूक्तम
तःपरं। आज्यदोहानि सामानि शांतिभारुंडकानि च। पश्चिमे द्वारपालौ तु पठेतां सामगौ तथा। आज्यदो
हानि देवव्रतानीत्यादि शांतिकमकोध्यगिनिरित्यादि। भारुंडानि इमं स्तोममर्हते इत्यादिकं कुमीतानि। तथा।
अथर्वांगिरसं नीलं रुद्रदेव्यपराजिता। मध्यसूक्तं रौद्रसंज्ञं शांतिकाध्यायमेव च। अथर्वाणौ द्वारपालौ
पठेतामुत्तराश्रितावितितः प्रधानहोमानंतरं स्विष्टकृद्यागुपरीतन्नेतंत्रं कुर्यात्। सूत्रेउत्तरार्धात्
सौविष्टकृतमिति। सर्वेषां हविषामुत्तरार्धात् सकृत्सकृत् स्विष्टकृदर्थमवदानं। पंचावत्तीतु एवं सकृ ४२
दुहीत्वा पुनरपि पूर्वावदानदेशास्य पुरस्तात् सकृदवद्येत्। ततो द्विरुपरिष्टादभिघारयति। पंचावत्तीच

तुरवत्ती चेति वृत्तिः। सूत्रे। नात्र हवींषि प्रत्यभिघारयति सौविष्टकृतं द्विरभिघारयतीति। अत्र ग्रहणाद
त्रैव नाभिघारयति प्रधानावदाने तु हविः प्रत्यभिघारयेत्येवेति वृत्तिः। नचैवं यत्र स्थालीपाकादौ प्रधानद्वयं तत्र स
कृदुपस्तरणं हविर्द्वयस्य चोत्तरार्द्धात् सकृत्सकृदवदानमित्यवदानद्वयं द्विः प्रत्यभिघारणमिति चतुरवत्तिनः पंचा ४२
वत्तनायतिः। पंचावत्तिनश्च हविर्द्वयस्य प्रत्येकं द्विरवदाने सप्तावत्तता स्यात्। एवं बहुषु षडवत्तता स्यादिति वाच्यं।
स्विष्टकृत्यनेकेषामुत्तरार्द्धद्रव्याणां संप्रतिपन्नदेवताकत्वेन प्रजापत्यवद्यागभेदेन तद्वदेवोपस्तरणाभिघारण
योस्तंत्रत्वेन सत्येकैकस्य स्विष्टकृद्यागस्य चतुरवत्तादि साधनकत्वापत्तेः। एवं च स्विष्टकृति द्रव्यप्राधान्ये
पि तत्तदनुरोधेनोपस्तरणाभिघारणयोरावृत्तिः। तयोस्तंत्रेणेव संभवात् यदि त्वेक एव स्विष्टकृद्यागइत्याग
हत्तदा चतुरवत्तत्वादिसिध्यर्थं पृथक्पृथगवदानसहैव द्रव्यनिक्षेपान्नकाचिदनुपपत्तिः। तथा। होमस्थानम
पि। तत्रैवोक्तमुत्तरपुरस्तात् सौविष्टकृतमिति। उत्तरपूर्वदेशेवैश्वानरे स्विष्टकृतं जुहोतीत्यर्थः। यदस्येति।
स्विष्टकृद्धोममंत्रे हिरण्यगर्भऋषिः। अग्निः स्विष्टकृद्देवता अतिधृतीछंदः। हे कश्यु स्वा वायमंत्रउच्चार्य इ
तिप्रद्याः। यदा तु दिनचतुष्टयादिसाध्यो ग्रहहोमादिस्तत्र प्रथमदिने कृतस्य चरोरंत एव स्विष्टकृत्। तदर्थं
वह्निप्रक्षेपादिरूपाय आत्मेय इति केचित्। अस्मत्सित्त्वचरणास्तु। स्विष्टकृद्यागो माऽस्तु शेषस्य तत्स्थापन
स्य च प्रयोजकः परप्रयुक्तद्रव्योपजीवित्वात्। शेषस्तु तस्य प्रयोजकत्वसंस्कार्यत्वात्। अन्यथा पशुपुरोडा
शेपि नपृथक् स्विष्टकृद्दिदं डस्यात्। तेन एक बर्हिरिध्माज्यस्विष्टकृतस्तु तुल्यकाला इति सूत्रोक्ते दिनत्र

Indira Gandhi National Centre for the Arts

प्रा॰चि॰ रु ४२

पकाले स्विष्टकृत् । कालस्ते देनुनाना । तथा च प्रथममग्निश्चरोः स्विष्टकृत् । अस्येनुतिलादेरिति स्विष्ट स्विष्टकृत॰
कृद्भागद्वयं कार्यं पितृतंत्रे प्रसहं चरुहोमस्तत्र प्रसहं स्विष्टकृदित्याहुः । कृपि कार्या । यदस्येत्यादिना हुत्वा प्रागु
दक्षु हविर्भुजः । ता अभिमर्शपत्नीं स्त्रीं विसृजस्य प्रास्यवान् ले । अयाश्चेत्यादिभिर्मंत्रैर्हुत्वा व्याहृतिसप्तकमि
ति । ऐंद्र पक्षे ये च रुद्रः पशुपतिर्देवतेत्यन्ये । रुद्र एवेति पारिजातादयः । तथा चाश्वलायनः । यदस्य समनया हुत्वा
प्रागुदक् तु हविर्भुजि । रुद्राय जुहुयाद्रुद्रं विसृजस्येभ्मनिर्वपनीमिति । रुद्रदैवत्सत्वादपामुपस्पर्शनं च । शांख्ला
यनसूत्रे । रौद्रं तु राक्षसं पित्र्यं मासुरं चाभिचारिकं । हुत्वा मंत्रं स्पृशेदप आलभ्यात्मानमेव चेति । अयाश्चेति
मंत्रे विमद ऋषिः । अयाग्निर्देवता । पंक्तिश्छंदः । अतो देवा इदं विष्णुरिति द्वयोः मेधातिथिरृषिः आद्यायाः देवा
देवता द्वितीयायाः विष्णुर्गायत्री छंदः । आहुतित्रयानंतरं व्याहृतिहोमः । तासां च व्यस्तसमस्तव्याहृतीनां विश्वा
मित्रजमदग्निभरद्वाजप्रजापतयो ऋषयः । अग्निवायुसूर्यप्रजापतयो देवताः । गायत्र्युष्णिगनुष्टुब्बृहत्यः
छंदांसीति सप्तदाः तेन व्याहृतिचतुष्टयं मिलित्वा सप्ताहुतयः । ततो ब्रह्मा कर्तारं परीत्य प्रत्य प्रागुदीच्यामव
स्थितो यजुषा जुहुयादिति । गृह्यपरिशिष्टोक्तेः । कर्तारं परीत्याग्नेर्वायव्यदेशे तिष्ठन्नेव स ब्राह्मणी जुहुयात्
ततस्तत्रैव तिष्ठन् । ब्रह्मा कर्तो वा मंत्रविपर्यासादिनिमित्तनिमित्तेषु यद्वो देवेति जुहुयात् । तदुक्तं कारिकायां ।
व्युत्क्रमे देवतानां तु संकल्पादोषसंभवे यदि । द्रव्याणां व्युत्क्रमः स्याच्चेत्तथा निर्वपणादिषु । मध्यात्स्रुवार्धेतश्चेति
व्युत्क्रमो वा भवेद्यदि । यद्वो देवा ऋचा ब्रह्मा जुहुयाच्च स्रुवाहुतिमिति । केचित्तु अनाज्ञातमिति तिसृणां ४२

६

यां । व्युत्क्रमो देवतानां तु संकल्पादोषसंभवे यदि । द्रव्याणां व्युत्क्रमः स्याच्चेत्तथा निर्वपणादिषु । मध्यात्स्रुवार्धेतश्चेति व्युत्क्रमो
वा भवेद्यदि । यद्वो देवा ऋचा ब्रह्मा जुहुयाच्च स्रुवाहुतिमिति । केचित्तु । अनाज्ञातमिति तिसृणां ज्ञाते जुहुयात् पक्षे वा
केऽनाज्ञातत्रयस्य यद्वो देवा इत्यस्य च विकल्पमाहुः । अन्ये त्वदृष्टार्थत्वात्समुच्चयमाहुः । तत्र यद्वो देवेत्यस्य अभि
तपा ऋषिः । मरुतो देवता त्रिष्टुप्छंदः । अनाज्ञातमिति मंत्रद्वयस्य हिरण्यगर्भ ऋषिः । अग्निर्देवता अनुष्टु
प्छंदः । यत्पाकत्रेत्यस्य [illegible] ऋषिः । अग्निर्देवता त्रिष्टुप्छंदः । वस्तुतस्तु अयाश्चेत्यादिभिर्मंत्रैर्हुत्वा व्या
५ हृतिसप्तकमिति कारिकाकारेण सप्ताहुतीनां सप्ताहुतीनामेव नित्यप्रायश्चित्तत्वोक्तेः । व्युत्क्रमो देवतानां तु
संकल्पादोषसंभवे यदीत्यादेश्च यदि शब्देन नैमित्तिकत्वोक्तेः यद्वो देवा अनाज्ञाताद्दीनां नित्यवत्करणमन्वाधाने चो
ल्लेखश्चिंत्य एवेति न देवताविपर्यासादिनिमित्तं प्रायश्चित्तं तन्निमित्तोत्तरमेव नत्वंत इति ज्ञेयं । ब्रह्मणो वाचय
मनियमाने एवोक्तप्रायश्चित्तहोमं कृत्वा अन्यस्मै वरं दद्यादिति प्रयोगरत्ने । इत्येतन्नित्यं प्रायश्चित्तं । ततः । पूर्णा
हुतिः । यद्यपि नवग्रहमखे पूर्णाहुतिं च मूर्धानं दिव इत्यस्मिन् पातयेदिति प्रधानहोमानंतरं पूर्णाहुतिरुक्ता तथा
पि स्विष्टकृदादिप्रायश्चित्तहोमांते सा कार्या । तदुक्तं भगवता । अयाश्चेत्यादिभिर्हुत्वा समुद्रादूर्मिसूक्ततः ।
संततामाज्यधारां तां पूर्णाहुतिमथाचरेत् । अत्रायाश्चेत्यादि प्रायश्चित्तविधानं स्वशाखास्थ प्रायश्चित्तोपलक्षणार्थं
तेन स्वशाखास्थजपादिहोमानुत्तरतंत्रं प्रणीताविमोकात् प्राक्तनं कृत्वा पूर्णाहुतिं कुर्यात् । पारिजातसंग्रहे । गृ
हीत्वा स्रुक्स्रुवौ मंत्री स्रुवाग्रन्यस्तलोचनः । ऋजुकायः प्रसन्नात्मा समपादः समुत्थितः । स्थिरधीर्जुहुयात्तो

(सूक्त इत्येतदन्यत्र ३)

Indira Gandhi National Centre for the Arts

प्र०वि० ११ यवत्राभित धारयापूर्णाहुतिर्यियंत्रो त्मासर्वकर्मप्रपूरिणीति। अग्निपुराणे। मूर्धानं दिवि मंत्रेण संस्त्रावेणानुधारया। ध्या पूर्णपात्र

यवत्राभित धारयापूर्णाहुतिरियंत्रोक्तासर्वकर्मप्रपूरिणीति। अग्निपुराणे। मूर्धानं दिवि मंत्रेण संस्रावेणानुधारया। ध्या

दूमायवैपूर्णानोपविश्य कृताचनेति। महार्णवे तु मूर्धानं दिवः पुनस्त्वादित्यापूर्णा दर्वीसप्तते अग्न इति मंत्रचतुष्टयमु

११ क्तं। तेनेदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः सप्तवते अग्नये अप्सुमते स्वाहा इति त्यागः। ततो वसोर्धारा। ६

शांतिहोमाद्यो घृतधारां ततः सम्यगग्नेरूपरि पातयेत्। श्रावयेत्सूक्तमाग्नेयं वैष्णवं रौद्रमैन्दवं। महावैश्वानरं साम ज्येष्ठसा

मचपाठयेत्। आग्नेयं अग्निमीळे इति नवर्चं सूक्तं। वैष्णवं विष्णोर्नुकमिति। रौद्रं आ ते पितरिति। ऐंद्रं स्वादिष्ठयेति

अग्न्यादिभ्य इदमिति त्यागः। ततः तुषान्कणान्सम्मुच्छिष्टान्संप्रोक्ष्याग्नेः प्रहरेत्स चेति शौनकोक्तेस्तुषर्ना

रसनं कुर्यादिति केचित्। प्रयोगरत्ने तु विज्ञो तिषे स्यनेन पूर्णाहुतिशेषं तु वाग्नय इदमिति त्यागं कृत्वावि

श्वेभ्यो देवेभ्यः स्वाहेति संस्रावं कृत्वा तंडुलकणान्समिद्दर्भशकलांश्च प्रोक्ष्याग्नौ प्रहरेदित्युक्तादं कुशैरन

कुर्वीतेत्युक्तं। आश्वलायनः। तथा। न्यां क्षीनिचपात्राणि नीवार्दुद्धिधाय च। चमसं पुरतः स्थाप्य निधाय पाथ्

च बर्हिषीति। शौनकः। आधायपूर्णपात्रं तद्दक्षिण्यां पायपाणिना स्पृश्य दक्षिणहस्तेन तत्पूर्णं मसि मंत्रतः। प्रा

च्यां दिश्यादिभिर्मंत्रैः कुशैः प्रागादिषु क्रमात्। उदकं तु प्रतिदिशं प्रोक्ष्याधस्तान्निधायतत्। आपो स्मान्निसन

पा इमाप इति त्वथा। सुमित्रियान इति च मंत्रांते मार्जयेत्ततः। दुर्मित्रिया इति मंत्रेण प्रसकृद्दक्षिणदेशके। तद

न्नीसेव मंतेन कुशाग्रैः प्रक्षिपेद्यथेति। प्रयोगपारिजाते आचार्यः। गंगाद्याः सरितः सर्वाः पूर्णपात्रे च संस्थिताः। ११

ताभिरभ्युक्षितो यस्तु संपुनीतो स्य वेद्यथेति। तथा। न्युब्जं कुर्यात्ततः पात्रं पश्चिमासिमुखं द्विजः। ताः स्नात्वा विश

प्रथम्

मानास्तु समुद्रं प्रतिपावनीः। आत्मानं प्रोक्षयेद्देवं वार्भिस्ताभिः शुभास्त्वय इति। कारिकायां। निनयेत्पूर्णपात्रं तन्निहतं

तथ बर्हिषि। वामभागेत्वासीनां पत्नीं हविर्भुजः। आसिञ्च्य पात्रीतत्तोयं मा हं प्रजां परासिचं। स्व वामभागे अ

सीनाभिति प्रद्धः। वस्तुतस्तु प्रत्यक्पश्चिमदिशि हविर्भुजो वामभागे आसीनाभिति यथा वास्थिता याप वासीना

भिसनेनानुवादाद्ती तिसांप्रदायिकाः। अन्यथा दक्षिणासंस्थतापत्तेः। अत एव स्वस्यवामे जलोपन्यासा

सीनाया निषिंचयेदित्याश्वलायनस्तोत्रस्व वामभागे पवासीनायानिषेचनमुक्तं। तथा। आपोस्मा

नयंमंत्र इदमापइतीतरः। सुमित्रियान इति चर्णभिर्मार्जनमाचरेत्। कार्यं पुंसवनादौ तु पत्न्या अपि तु मा

र्जनं। केचिन्निनीतिमेवाहुरुपस्थाय्यो चमेश्वरः। सूत्रेपि। एषो वषट्पाकयज्ञानामेतत्तंत्रं हविरु

४ च्छिष्टं दक्षिणेति। ओंस्थवचनं तद्धर्मप्राप्त्यर्थं तेन काले स्युस्तर्पणं च भवति। कालः सर्वप्रायश्चित्तेभ्य

ऊर्ध्वं प्राक्संस्थाजपात्। अनेनैवाभ्युपायेन संस्थाजपः सर्वप्रायश्चित्तानि च कार्याणीत्युक्तं भवति

तत्रेयं क्रमः। पूर्वं कर्तासर्वप्रायश्चित्तानि जुहोति। पश्चाद्ब्रह्मा। ततः कर्ता पूर्णपात्रं निनयति। ततः कर्तासं

स्थाजपेनोपतिष्ठते। ततो ब्रह्मोपतिष्ठेत। ततः कर्तुः परिसमूहनादीति वृत्तिः। अत्र च यजमानसंस्थाजपेद

क्षिणतः ब्रह्मणः अपेक्षितत्वाद्ब्रह्मणः पश्चात्संस्थाजप इति वस्त्वाशयः। तेन कारिकाहनिकाणादिमते

पूर्णपात्रनिनयनानंतरं संस्थाजपः। ततः परिसमूहनादि। आश्वलायनस्तोत्रं तु पर्युक्ष्य परिषिच्याथ

गंधपुष्पादिकं तथा। तिष्ठन्नग्नेरुपस्थानं कुर्यादोंचमइत्यथेत्युक्तं। पितृचरणा अप्येवं। मात्स्ये। अथापि

Indira Gandhi National Centre for the Arts

प्र०च० षेकमंत्रेण वाद्यमंगलगीतकैः। पूर्णकुंभेन तेनैव होमांते प्रागुदङ्मुखैः। यजमानस्य कर्तव्यं चतुर्भिः स्नप अभिषेक०
४८ नाद्विजैः। तेनैव गगरहकलशेनैव। तद्वारकलशैरित्यर्थः। अभिषेके च स्वस्ति न इन्द्रो वा वासिष्ठीये। स्वस्तिकं क
ल्पयेत्पश्चात् कुंडस्येशानदेशतः। यजमानाभिषेकार्थं तत्राभद्रासनं न्यसेत्। कुंडस्येशानदेशतः ५८
पश्चात्तद्वायव्ये इत्यर्थः। अस्मादेव नच नातिदूरं नायकुशांतो। वायव्ये भद्रासनं मात्स्ये। अथाभिषेकमंत्रेण वा
द्यमंगलगीतकैः। पूर्णकुंभेन तेनैव ईशानस्थेनैव होमांते प्रागुदङ्मुखैः। न च दक्षिणसंस्था। वायव्यकरणे प्रा
कसंस्थतायाः सत्वेन दक्षिणसंस्थत्वाभावात्। तत्र च तत्रोत्तरे भद्रासनं। प्रागुदङ्मुखैरिति स्नपनकर्तृविशेषणं
८ख अयमभिप्रायः। यदि यजमानः प्राङ्मुखस्तर्हि ऋत्विज उदङ्मुखाः। ईशानमुखो वा। अथ यजमान उदङ्मुखस्त
दा ऋत्विजः प्राङ्मुखा ईशानाभिमुखा वेति। दिक्क्रमस्यापि मांगलिकत्वादित्यर्णवः। तथा। अभिषेकं ततः कुर्यादा
चार्यो ब्राह्मणैः सह। वक्ष्यमाणैः स्वमंत्रैश्च अग्नि गोर्दे द्रुपदादेवैर्वै दमंत्रकैरिति। अभिगोः समुद्रज्येष्ठा आपो हिष्ठे
त्यादिभिर्वैदिकैः। सुरास्त्वेत्यादिभिश्च पौराणैर्मंत्रैः। मात्स्ये ततः शुक्लांबरधरः शुक्लगंधानुलेपनः। सर्वौ
षधैः सर्वगंधैः स्नापितो द्विजपुंगवैः। सर्वौषधयः पूर्वमुक्ताः। सर्वगंधाश्च गारुडे। कर्पूरं चंदनं दर्पः कुंकु
मं च समांशकं। सर्वगंधमिति प्रोक्तं समस्तसुखलंभमिति। तथा। आज्यं निरीक्ष्य दत्वा च ब्राह्मणान्भोज ४५
येत्ततः इति प्रयोगपारिजातवचनादभिषेकोत्तरमाज्यं निरीक्ष्य सहिरण्यं विप्राय दद्यात्। हेमाद्रौ आयुष्यमथ
वर्चस्यं सौभाग्यं शत्रुतापनं। दुस्वप्ननाशनं धर्म्यं घृतावेक्षणमुच्यते। आमंत्रणः सर्वदृश्माज्यं पापह

रं मतं। आज्येन देवास्तृप्यंति आज्ये देवाः प्रतिष्ठिताः॥ भौमांतरिक्षं दिव्यं च यन्मे कल्मषमागतं। सर्वं तदाज्यसंस्पर्शात्प्रणा
शमुपगच्छतु इति दानमंत्रः। ततो दक्षिणा। प्रयोगपारिजाते। यजमानः सपत्नीको ऋत्विजस्तु समाहितः दक्षिणाभिः प्रयत्ने
न पूजयेद्धृतविस्मय इति। दक्षिणाश्च श्रेयः संपादनोत्तरं देयेत्यन्ये। तच्च प्रयोगपारिजाते। वामनेनाचार्य प्रस्थति
भ्यश्च ग्रहार्चनफलं ततः समिदाज्यचरूणां च तिलहोमफलं तथा। ब्रह्मत्वे कुंभपूजायां चार्चनस्य फलं ततः। लोकपा
लानेशताय स्तत्र्या अंगदेवताः। तासां जपफलं तद्वत् कीर्तयेत्तत्फलकमिति। तेनैतस्यानिर्मित्तं कृत्वं वदंतो वंद्या
त्व। यत्तु वासिष्ठां ततस्तस्याभिषेकार्थं रक्षार्थं बलिमुत्क्षिपेत्। दिग्विदिक्षु विचित्रान्नैर्दीपैर्नीराजयेत्ततदभिषे
कानंतरं बलिदानमुक्तं तस्यागकरणे तत्परमिति सांप्रदायिकाः। दक्षिणादानं चोक्तं मात्स्ये। ततस्तेभ्यो यथाशक्ति
दातव्या दक्षिणा ततः। आचार्याय जापकेभ्यो ब्राह्मणेभ्यश्च मुख्ये सदस्यं चैव संतोष्य। ऋत्विजश्चेतरानपीति गु
रुराचार्यः। तुलादौ दर्शनात्। इतरानपीसत्वेनभूरि दक्षिणोक्ता। तथा। धेनुः शंखस्तथा नड्वान्हेमवासो हयः
क्रमात्। कृष्णागौ रायसं छाग एता वै दक्षिणाः स्मृताः। सुवर्णेन समाः कार्याः यजमानेन दक्षिणाः। सर्वेषामथवा गावो
दातव्या हेमभूषिताः। स्वस्वमंत्रेण दातव्याः सर्वाः सर्वत्र दक्षिणाः। एवं संपूजयेद्भक्त्या वित्तशाठ्यविवर्जित इति मं
त्राः प्रयोगे ज्ञेयाः। सुवर्णेन समा इति कपिलाच्छागादीनां विषममूल्यत्वात् सुवर्णदानेन मूल्यसाम्यं विधेयमित्यर्थः।
वित्तशाठ्यविवर्जित इति शक्तौ सत्यां। तथा च मनुः। प्रभुः प्रथमकल्पस्य योनुकल्पेन वर्तते। स नाप्नोति फलं तस्य परत्रेह
चानिश्चितमिति। शांखायनसूत्रे। ब्राह्मणेभ्यः किंचिद्देयात् सर्वत्र स्थालीपाकादिषु कर्मस्विति। तथा तत्रैव। गोब्रा

Indira Gandhi National
Centre for the Arts

प्र॰वि॰
४६

ह्मणवरो ग्रामो राजन्यस्याश्वो वैश्यस्येति। दक्षिणा च ब्रह्मतीर्थेन ग्राह्या। हस्तमध्ये ब्रह्मतीर्थं दक्षिणाग्रहणे तु ती-
तिच्छागलेय वचनात्। तथा दद्यात्पूर्वमुखो दत्तं नाकर्षि पादुत्तरामुखः। आयुर्विवर्धते दातुर्ग्रहीतुः क्षीयते न त व
त्। नामगोत्रसमुच्चार्य संप्रदानस्य चात्मनः। संप्र। दायं प्रयच्छंति कन्यादानेषु तु त्रयं। तेन कन्यादाने एव पु-
रुषत्रयोच्चारणं नान्यत्र। तथा प्रतिगृह्णीतां सावित्रं सर्वत्रैवानुकीर्तयेत्। सावित्रं देवस्य त्वेत्यादि। समापयेत्त
तः। पश्चात्कामस्तु सा प्रतिग्रहं। तदंते कीर्तयेत्स्वस्ति प्रतिग्रहविधिस्त्वयमिति। ततः कोदात्कस्मा अदा-
दिति यथाशास्त्रं कामस्तुतिं पठेदिति हेमाद्रिः। पारिजाते शौनकः। यद्यस्ति कुनशिष्टं तु देयं विप्राय तच्छु-
चिः। प्रक्षाल्य यत्तपात्राणि नक्षीयाद्दुह्यशः क्रमादिति ततो ग्रहाणामुत्तरपूजां कृत्वा माहूतिभिर्गेहानुद्वा
ण सयेत्। प्रयोगपारिजाते वामनः। प्रधं वा दितः कृत्वा पूर्णुवस्वस्ततः परं। चतुर्थ्यां नाम संयुक्तं नमस्कारांत
योजितं। एष मंत्रः समाख्यातो ग्रहपूजाविधायकः। अनेनावाहनं कुर्यात् अनेन च विसर्जनमिति। ततस्ताः
प्रतिमाः आचार्याय दद्यात्। तत्र ब्राह्मणस्य प्रतिग्रहे धायां प्रतिमा नांक्ष्मागविक्रयादोन दोषः। तदुक्तं हे
माद्रौ ब्रह्मवैवर्ते। देवानां प्रतिमां विप्र गृहीत्वा ब्राह्मणः स्वयं। आत्मोपयोगं कुरुते क्रीत्वा वा प्रक्षिसज्य वा। लिलघेन्वा
द्यश्चैव कथंस ज्ञा विजानते तिसुबाहु प्रश्नोत्तरं विश्वामित्रः। दानकाले तु देवत्वं प्रतिमा नोप्रकीर्तितं धेनूनामपि ४६
चेत्तु त्वं श्रुसुक्तं दानयोगतः। दातुर्वैदानकाले तु धेनवः परिकीर्तिताः। विप्रस्याग्रकाले तु दृश्यंता इति निश्च
य इति। ततः परिसमूहनपर्युक्षणपूर्वकं विश्वानिन इति रुद्रेणाग्निपूजनं कुर्यात्। तदुक्तमाश्वलायन

नस्मृतौ। पर्युक्ष्य परिषिच्याथ गंधपुष्पादिकं तथा। धूपं दीपं च नैवेद्यं दत्वा तांबूलदक्षिणे तिष्ठन्नग्ने रुपस्था-
नं कुर्यादाचमनस्य योनिः। ततो विभूतिधारणं कुर्यात्। तच्चैशान्यां ग्राह्यं तथा च प्रयोगदीपिकायां वसिष्ठः।
ऐशान्यामाहरेद्भस्म स्रुवा वाथ स्रुवेण वा। वंदनं कारयेत्तेन शिरः कंठांसकेषु वा। कश्यपस्येति मंत्रेण यथानुक्रम
योगत इति। शांखायनसूत्रे। त्र्यायुषं पंचभिर्मंत्रैः प्रतिमंत्र ललाटे हृदये दक्षिणस्कंधे वामे पृष्ठे च सुमना। के४
त्रिपुंड्रं करोतीति। ततो निर्विसर्ज्य मंडपाद्याचार्याय दत्वा ब्राह्मणान्भोजयेत्। शांखायनसूत्रे कर्मा
पवर्गे ब्राह्मणभोजनमिति। आचार्यः। एकमेवाहुतेर्विप्रं होमे लक्ष्ये न भोजयेत् असाध्यो मध्यमश्चापि
५८ विप्रमेकं शताहुतेः। सहस्रस्याहुते वैकं जघन्यो विप्रभोजयेत्। अन्यथा दहति क्षिप्रं तद्रष्टुं नात्र संशय
इति। अथात्रैव प्रसंगात्। सर्वत्र ब्राह्मणभोजनसंख्योच्यते हेमाद्रौ यत्नपार्श्वः। गर्भाधानादि संस्कारे
ब्राह्मणान्भोजयेद्दश। शतं विवाहसंस्कारे पंचाशन्मेखलाविधौ आवसथ्ये त्रयोविंशद्धोत्राधाने शतंप
रं। अष्टकं भोजयेत्क्रीत्वा ततसंस्कारसिद्धये इति। अत्र चनैकस्य ब्राह्मणस्यावश्यभोजनं। शतादिसं
ख्याया ब्राह्मणान्वितत्वेन भोजनान्वितत्वाभावादिसन्यत्र विस्तरः। ततो यजमानस्य से सादिपूर्वकं परमे
श्वरार्पणं कुर्यात्। यस्य ते कोद्दोबहवो वाग्रहा विरूद्धास्ते न तेषां विशिष्यपूजनं कार्यं। तदुक्तं मात्स्ये। य
स्तु पीडाकरो संतत मत्यविन्नस्य वाग्रहः। तं तु यत्नेन संपूज्य शेषानप्यर्च येन्नतः। ग्रहागावो नरेंद्राश्च ब्रा
ह्मणाश्च विशेषतः। पूजिताः पूजयंत्येते निर्दहंत्यमानिताः। यद्यपि हेमाद्रिणा सर्वे वायुतहोमोयं

Indira Gandhi National
Centre for the Arts

प्र०चि० नवग्रहमखः स्मार्त इत्यपुत्र होमगुणयुक्तस्यैव नवग्रहमखत्वमुक्तं ॥ तथाप्येवं विनायकपूज्यग्रहांश्चैव विधानतः ॥ संस्काराः
तथा ॥ विवाहोत्सवयज्ञेषु प्रतिष्ठादिषु कर्मसु स्वस्त्यादिवाक्ये स्युरिति होमगुणरहितस्यापि सर्वकर्माङ्गत्वं यात्तवल्क्यादि
९६ भिरुक्तमिति न कश्चिद्विरोधः । यस्तु बह्वृचपरिशिष्टोक्तो ग्रहयज्ञः स बह्वृचानां नियतः । एवमन्यैः स्वशाखोक्त
श्चेत् । स एव कार्यः । अन्यथा शाखांतरस्थः स्मार्तो वेत्यलं विस्तरः । इति श्री रामकृष्णभट्टसूरिसूनु कमला
करभट्टात्मजानंतकृते श्रीरामकल्पद्रुमे नवग्रहमखः । अथ संस्काराः । संस्क्रियते एभिः पुरुष इति संस्काराः ।
मनुः ॥ संस्कारैः संस्कृतः पूर्वैरुत्तरैरपि संस्कृतः । नित्यमष्टगुणैर्युक्तो ब्राह्मणो ब्राह्मलौकिकः ॥१॥ ब्राह्म्यं पद
स्मा वाप्नोति यस्मान्न च्यवते पुनरिति गर्भाधानादयः पूर्वे संस्काराः । उत्तरे पाकयज्ञादयः । तथा च हारीतः । द्विविधो
हि संस्कारो ब्राह्मो दैवश्च । गर्भाधानादिः स्मार्तो ब्राह्मो । पाकयज्ञहविर्यज्ञाः सौम्यश्च दैवः ॥ ब्राह्मेण संस्कृतो ऋ
षीणां समानतां सायुज्यं च गच्छति । दैवेनोत्तरेण संस्कृतो देवानां समानतां सायुज्यं च गच्छति । प्रागुक्तानां च
संस्काराणां । नैमित्तिकवार्षिकमासिकं नित्य भेदेन चातुर्विध्यमाहाश्वलायनः । नैमित्तिकाः षोडशोक्ताः स
मुद्वाहावसानकाः । सप्तैवाग्रयणाद्याश्च संस्कारा वार्षिका मताः । मासिकं पार्वणं प्रोक्तमहन्याश्च वार्षिकं । महा
यज्ञाश्च नित्यास्युः संध्यावच्चाग्निहोत्रवत् ॥ विशेषः ॥ गर्भाधानाद्युपनयनपर्यंता एव नित्याः । नैतु स्नानादयः ।
अन्यथा ब्रह्मचर्यादेव प्रव्रजेदित्यादि विरुध्येत ॥ ते च गर्भाधानपुंसवनानवलोभनसीमंतविष्णुबलिजातकर्म
नामनिष्क्रमणान्नप्राशनचौलोपनयनोपनिषद्व्रतमहानाम्नीमहाव्रतगोदानस्नानैर्विवाहाख्याः षोडशोक्ता ९६
दिभिरुक्ताः ॥ अन्ये च पंच महायज्ञाः । स्थूलगवः अष्टकापार्वणश्राद्धं श्रवणाकर्माश्वयुजी आग्रयणमिति हे

च शूद्रोपि वै

त्रं दर्शपौर्णमासौ चातुर्मास्यानि आग्रयणं पशुः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः अग्निष्टोमो त्यग्निष्टोम इ
त्यादयः सप्त सोमसंस्थाः । दयाक्षांतिरनसूया शौचमनायासो मांगल्यमकार्पण्यमस्पृहेत्येवं द्वात्रिंशत्संस्का
रा उक्ताः । सर्वैः सह अष्टाचत्वारिंशत् । [redacted] तदुक्तं । यस्यैते अष्टाचत्वारिंशत्सं
स्काराः स ब्रह्मणः सायुज्यं गच्छतीति । हेमाद्रौ पि वैविध्यः कार्यो विना मंत्रेण संस्कृतः । न केनचित्समसृजत्र छं
दसा तं प्रजापतिः । तथा । नवैताः कर्णवेधांता मंत्रवर्जं क्रियाः स्त्रियाः ॥ विवाहो मंत्रतस्तस्याः शूद्रस्यामंत्रतो
दशेति । तत्रादौ गर्भाधानं । आचार्यः । अनृतुमत्यां भार्यायां न कार्यं गर्भलंभनं ऋतुमत्यां तु तस्यां वै तत्का
र्यं ब्रह्मचारिणेति । ब्रह्मचार्यत्र स्वदारनिरतः । तथा । प्राग्रजोदर्शनात्सा लीनेया हत्वा पतेत्स धः । व्यर्थीकारेण शु
क्रस्य ब्रह्महत्यामवाप्नुयात् । रजो मामा । इंद्रे त्वाष्ट्रस्य । पितो वृत्र हत्या तृतीयोंशः । तत्रादौ भागः ईरिणा
स्वरूपः पृथिव्यां निक्षिप्तः । तदुक्तं । तत्सा पाप्मीरिणं भूमा वन्नवत्सत्व वृतं रजः । इरिणं तस्य शोतस्माद् ब्रह्म
हत्या सवर्णकमिति । द्वितीयो वृक्षेषु लोहितनिर्यासरूपः । तदुक्तं । लोम वृक्षनिर्यासो ब्रह्महत्यास
वर्णकः । तस्माल्लोहितनिर्यासं नत्स्यश्चौनवरवादयेदिति । तृतीयस्त्रीषु । तथा च श्रुतिः । ता अब्रुवन् वरं
वृणीमहे ऋत्वियात् प्रजां विंदामहै काममा विजनितोः संभवामेति । आविजनितोः अपत्यजननपर्यंतं संभो
गक्षमाः स्यामेत्यर्थः प्रयोगपारिजाते । नाभिमूले स्थितं पुष्पं चतुर्दलसमन्वितं तस्मिन् सर्वार्थदं तेग
र्भसंभवकारणं ॥ अधोमुखं स्थितं स्त्रीणां तद्बाल्ये मुकुलीकृतं ॥ बाल्यात् परं वयः प्राप्ति मुकुलं विकस

Indira Gandhi National
Centre for the Arts

प्र०चि० ४८

भवेत्। उत्फुल्लकुसुमं स्त्रीणां स्वभावेन स्रवेद्रजः। तदा प्रभृति सर्वासां मासि मासि ऋतुर्भवेदिति। तत्र प्रथम ऋतूत्सोद०
रजोदर्शने दुष्टमास तिथि नक्षत्रादिफलं पितृकृते निर्णयसिंधौ ज्ञेयं। तद्यथा। प्रथमे रजसि चैत्रज्येष्ठाआषाढ
भाद्रपदकार्तिकपौष अशुभाः। आश्विनो मध्यमः। शेषाः शुभाः। क्वचिद्वैशाखफाल्गुनयोरप्यधमत्वमुक्तं। तिथि
षु प्रतिपच्चतुर्थीषष्ठ्यष्टमीद्वादशीचतुर्दशीपौर्णमास्यामावास्या अशुभाः। शेषाः शुभाः। केचित्सप्तम्येकादशी
अशुभे। अष्टमीद्वादश्यौ शुभे इत्युक्तं। वारेषु रविभौममंदवारा अशुभाः। अन्ये शुभाः। केचित्सोमोप्यशुभ उक्तः।
नक्षत्रेषु। भरण्याद्रापुष्याश्लेषापूर्वाज्येष्ठामूलपूर्वाषाढापूर्वाभाद्रपदा रेवत्यो अशुभाः। चित्राविशाखाश्र
वण अश्विनीमघास्वातयो मध्यमाः। अन्यानि शुभानि। केचित्तु कृत्तिकापुनर्वसूनुराधारेवत्योप्यशुभा उक्ताः।।
एवं च तासां मध्यमं। एवमन्यत्रापि योगेषु। व्याघातस्य नव नाड्यो गंडातिगंडयोः। षट्शूलस्य पंच परिघपूर्वार्धं
वैधृतिव्यतीपातरेवत्यो अशुभाः। वज्रं मध्यमं। अन्ये शुभाः। करणानि विष्टिं विनान्यानि शुभानि अहोरात्रे विभक्ते
आद्यो भाग उत्तमः। मध्यमो मध्यमः। तृतीयो दुष्टः। एवं रात्रौ। सूर्योदयास्तमययोरप्यशुभौ। रविसंक्रमाद्यो नाडी
चतुष्टयपूर्वं वा सशुभं। संक्रांत्यादि दग्धदिने प्यशुभं। रविचंद्रोपरागयोरप्यशुभं। संध्यापर्वदशा वा शौचे शुभमतु
रासनाश्व तुर्थाष्टमद्वादशस्थचंद्रे जीर्णरक्तमलिनखंडवस्त्रेषु परिहितेषु नशुभं। संमार्जनी कंठगमस्तृणानि धृ
पे तु षशुष्काक्षतलोहपाषाणशस्त्रधारिण्याएते पुंसके देशे वाशुभं। देहली द्वार रथ्यादि पितृमातृगेहेष्वशुभं। कु
र्वस्थितायाभिद्रितायाश्चाशुभं शय्यादेष्वशुभं। पित्रादि सहविष्वस्थतसिद्धिश्वमशुभं। नद्यैः शुभामि स्यादिते
या। प्रथमेतां वृद्धाशनंनिषं। द्वितीये शुभं मितिकेचित्। प्रथमे दुष्टे द्वितीयं पश्यतत्राप्यशुभे विस्तरेण शांतिः का ४८

३

पौ इति केचित्। प्रथम एव यथा शक्ति कुर्यादित्यपरे। एकस्मिन्नप्यशुभे वक्ष्यमाण शांतिः कार्येति ज्ञात्वा उदके प
ते वक्ष्यमाणा कृति संरंभाविर्दृश्या कार्या एवं कृते रिष्टशांतिर्भवति। अथ रजस्वला स्नानं।। प्रयोग पारिजाते
दृष्टे वाह्निन वोदकुंभसलिलैः सन्मंत्रितैरौषधैः। स्नानं पापनुदं सपंचकिसलयैः कार्यं सभर्तु जलैः। ईशा
नतो। ईशानतो गोमयभैक्षेचपरिस्तृतेग्नो जुहुयात् स हूर्वा। पुग्मा घृताक्तां च समित् प्रमाणं गायत्रिया
चाष्टसहस्र संख्यां शतप्रमाणमथवाप्यशक्तः। शुभा नयवैर्व्याहृतिभिस्तिलांश्च। ततः सुरान् स्व
मिस्तरां त्रिषु भूषसंतर्पयेद् लसुवर्ण वस्त्रैरिति तथा। तत्कालेव दनं यस्य पश्यस्य यत्तथाविधं साप्रस्
ते सुतैरामशुभं वाथ शुभं।। पूजनं वासुदेवस्य सा कृत्वा लभनए वच। पश्येत्तद्वजातिमां वासुदेवस्वरू
पिणो। अथ काराम भ्रतीरं नान्यं कंचन सस्वरा। अत्र तिथि वार नक्षत्रादो दुष्टे शांतिकर्मोक्तं प्रयोग पारिजाते शौ
नकः। सार्तवानां कुमारीणां शांतिं वक्ष्यामि शौनकः।। पंचमेन्हि चतुर्थे वा महातिथ्यपुरःसरं। गृहादीशा
नदिग्भागे देवता पूजनीय च। द्रोणप्रमाणधान्येन व्रीहिराशित्रयं भवेत्। कुंभत्रयं न्यसेद्दर्भौ तंतु वस्त्रादिवे
ष्टितं। सूक्तेनाथन वचैन प्रसुव आपइत्यथा।। त्र्यंबकायाः प्रवतस्तवद्वयं च ततः क्रमात्।। नाच न्याम
त्रि
प्यकुंभे सप्तधान्यौषधीः क्षिपेद् क्रमेण न्वयः। प्रसुव आप इत्यस्य सूक्तस्य प्रियमेधपुत्रः सिंधुः क्षित ऋषिः
नद्योदेवता जगतीछंदः तदुक्तं सर्वानुक्रमे। प्रसुवं विसिंधुक्षित प्रैयमेधो नदीस्तुतिर्जागतमिति। याः प्रव
तमिति यं आमामिति ७ सूक्तस्यास्या अस्याः वसिष्ठ ऋषिः नद्योदेवता अतिजगती शक्वरी वा छंदः।

Indira Gandhi National
Centre for the Arts

तदुक्तं सर्वानुक्रमे। आ मां मैत्रावरुण्याग्नेयी वैश्वदेवी नदीस्तुतिर्जागतमंस्यातिजगती शाकरी वे
ति। मध्यकुंभे क्षिपेद्धान्यमोषधानि च हेम च रत्नं पंचगव्यं च गंधपुष्पाक्षतादिकान्। औषधान्याह। उ
दुंबरः कुशा दूर्वा राजीवं वटबिल्वकाः। विष्णुक्रांता च तुलसी बर्हिषी खेंशपुष्पिका। शतावर्यश्वगंधा
चाग्निगुंडी सर्षपद्वयं। अपामार्गः पलाशाश्च पन्नसो जौवकस्तथा। प्रियंगवश्च गोधूमा व्रीहयोश्वत्थ एव च।
क्षीरं दधि च सर्पिश्च पद्मपत्रं तथोत्पलं। कुरंटकत्रयं गुंजा बलासह कमुस्तकाः। द्वात्रिंशदोषधानीत्य
थासंभवमाहरेत्। गजाश्वरथवल्मीकसंगमाध्रदगोकुलात्। राजद्वारप्रदेशाश्च मृदमानीय निक्षिपे
त्। तेनात्र मृदः। मस्तिकाश्चौषधादीनि तन्मंत्रेण क्षिपेत्क्रमात्। कुंभोपरि न्यसेत्पात्रं कांस्यं मृद्वेणुताम्रजं।
पात्रोपरि न्यसेद्धैमं प्रतिमां भुवनेश्वरीं तन्मूल्यं वा न्यसेत्तत्रेंद्राणीं च पुरंदरं॥ भुवनेश्वरीं न्यसेत्तत्रेंद्रा
णीं च पुरंदरं तु। अनेन विधिनाचार्यः पूजयेद्देवतात्रयं। आवाहनादिसकलैरुपचारैः पृथक्पृथक्। इंद्राणीं पूज
येद्देवीमिंद्राणीमासु नारिषु। क्रमेण पूजयेदिंद्रं त्वा वृषभं वयं। आचार्यः पूजयेद्देवीमंगावरणानि च।
अंगग्रहविनायकादि तस्य सर्वकर्मांगत्वात्॥ महालक्ष्म्यपुरस्सरमिसूक्तेश्च। तेन अंगं च आवरणदेवता पूजं
चेत्येवं बहुवचनं। तत्र भुवनेश्वर्यावरणदेवतानां मंत्रपूजनमिति कस्यचिदुक्तिः परीत्तन्। अन्यो वा पूजनं
कुर्याद्गायत्र्या मंत्रसारया। अस्याश्च विहित्र्यधिके द्रो वृषाकपिरिंद्राणी दृष्टा समुपिरेपांक्ते। तेनेंद्राणी वृषाक
पिरिंद्राणी पंक्तिः। इंद्रस्य शची सपत्नी पुत्रो वृषाकपिरिंद्राणी दृष्टात्रयः संवादस्तत्वं तदर्थः। एवं मंद्र ४९

---

त्वा गायत्री हीसुक्ते रिंद्र त्वा विश्वामित्र इंद्रो गायत्री जपेद्गायत्रीमाहोमाद्वी सूक्तं च जपेत्ततः। स्वराज्ञे वै
दक्षिणं कुंभं ऋत्विगेको जपेत्पृथ। चत्वारि रुद्रसूक्तानि बहुमंत्रोत्तराणि च। संस्पृशंस्तु तत्कुंभं श्रीसूक्तं रु
द्रसंख्यया। शान्न इंद्राग्नीसूक्तं च तथैवं संस्पृशन् जपेत्। कुंभं च पश्चिमे देशे शांतिहोमं समाचरेत्। दू
र्वाभिस्तिलगोधूमैः पायसेन घृतेन वा। पायसं श्रपयेत्तत्र सावित्रं च हविश्च तत्। सावित्र्या हूयमाने
त्वाद्धविः सावित्रं। न त्वत्र सवितुर्देवतात्वं। भुवनेश्वर्यास्तत्वात्। निस्पृश्चे च दूर्वाभिरेके कुर्वाहुति
र्भवेत्। अग्निमंत्रप्रभृत्याभिर्गायत्र्या जुहुयात्क्रमात्। तेनात्र सेकं सर्वासां वा दूर्वाणां तावतासंख्य
यासकृद्गायत्र्याभिमंत्रणं कृत्वा गायत्र्या होमं कुर्यात्। अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा। गायत्र्ये
व तु होतव्यं हविरत्र चतुष्टयं। एवकारादितरनिवृत्तिः। तेनेंद्राणीप्रबोधं ध्यानान्नाम्नैव होम इति के
चित्। सिद्धे रूपितयोः प्रथमेन होमस्त्युक्तं तयोर्नामादिद्रव्यत्वात् ध्येन होम इति युक्तं। तयोश्चरुद्रव्ये होमेऽनु
नफलं॥ ततः स्विष्टकृतं हुत्वा समुद्रादूर्मिसूक्ततः। संततामाज्यधारां तां पूर्णाहुतिमथाचरेत्। समुद्र
दूर्मिरित्येकादशर्चेन सूक्तेन वसोर्धारापूर्वकं धामंत इत्यनेन पूर्णाहुतिं जुहुयादित्यर्थः। अद्भ्य इदमिति सागः।
अथाभिषेकं कुर्वीत प्रतिकुंभस्थितोदकैः। आपोहिष्ठेति नवभिः सूक्तेन च ततः परं। इंद्रोगात्ये चैनैव पावमानैः
क्रमेणानु। अत्र। इंद्रो अंगामहद्भयमिति ऋक्त्रयं ज्ञेयं। तेन। य एक इद्धिदयते इत्यस्याभिषेके विनियोगः प्रयो
गर्तानोऽरूचिंत्यः। उरुव्यचसा च न स्वस्तिदा विशस्पत्कृपायैयं बकेन मंत्रेण जातवेदसे कृपया। समुद्र

Indira Gandhi National Centre for the Arts

गर्भाधान

प्र०चि०
३५०

ज्येष्ठ इत्यादि त्रयं तां च त्रिभिः क्रमात्। इमा आप इत्येतेन देवस्य त्वेति मंत्रतः मंत्रेणाथ तमीशानं त्वमग्ने रुद्र
इत्यथ। नमुष्टु हीति मंत्रेण भुवनस्पतिरं तथा। पाते रुद्रेति मंत्रेण शिवसंकल्पमंत्रतः। इदं त्वा वृषभं च मंत्रैश्चैव
वामिषेचयेत्। धेनुं पयस्विनीं दद्यात् आचार्याय च भूषणैः सदक्षिणमनड्वाहं प्रदद्यात् तस्याधिके। महाशांतिं प्र
जप्याथ ब्राह्मणान् भोजयेत्ततः। ब्राह्मणान् भोजयित्वा तु देवज्ञं भोजयेत्ततः
जप्याथ ब्राह्मणान् भोजयेत्तत इति। प्रयोगपारिजातस्मृतिः। ब्राह्मणान् भोजयित्वा तु ... । अतो गमनमाह याज्ञ
एवं यः कुरुते शांतिं शौनकोक्तप्रकारतः। तदरिष्टं तु सकलं सद्य एव विनश्यति। अतो गमनमाह याज्ञ
वल्क्यः। षोडशर्तुर्निशा अत्र निशाग्रहणाद्दिवसप्रतिषेधः। युग्मास्विति बहुवचनाद्द्वितीयपरता न प्रतीय
द्यात् सुसर्वासु युग्मा रात्रिषु गच्छेत्। ब्रह्मचार्येवेति यत्र ब्रह्मचर्यं श्राद्धादौ विहितं तत्र गच्छतोपि न दोष इति विज्ञा
नेश्वरः। अन्ये तु श्राद्धादावित्यत्र ग्रहणं बहुव्रीहि(णं)एकादश्यादेर्वोक्तं। अन्यथा ऋतुकाले नियुक्तो वा नैव ग
छेत्स्त्रियं क्वचित्। तत्र गच्छन् समाप्नोति ह्यनिष्टं फलमेव चेति श्राद्धे हेमाद्रिलिखितं वचनमनुवचनविरोधा
त्। तथा च सर्वविधिनिषेधयोः ... श्राद्धदिनादिनिषिद्धमिति च तो गं तमभिसृथा तत्रागमने दोष
त्। तथा च सर्वविधिनिषेधयेकवाक्यता। श्राद्धदिनादिनिषिद्धमिनर्तौ गं तमपि स्मृत्याह। पर्वाणि पंच तु दृश्याष्टमी च
र्वणं। अत्र एव च षोडशी स्यादपि पर्वणि श्राद्धदिने च प्रवासागतेन नैव गंतव्यमित्याह। पर्वाणि पंचतु दृश्याष्टमी च
वर्णं। अत एव च षोडशी पर्वणि श्राद्धदिने च प्रवासागतेन नैव गंतव्यमित्याह। हेमाद्रौ। यमः। प
ति। ऋतुस्नातां तु यो नारी भर्तारं नोपगच्छति। तां ग्राममध्ये विख्याप्य भ्रूणघ्नीं तु विवासयेत्। हेमाद्रौ। यमः। प
ति। ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति। घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः। योगपद्ये तु तीर्थानां दिवारुक्रम
दिसंयोगके तु तद्रूपेण रागमोहितः। द्विधा समुत्सृजेदुक्तं। यमकं तत्र जायते। तीर्थं तिथौ क्रमेण तु। प्रथमं
द्रिसंयोगके तु विरूपे रागमोहितः। द्वितीयां समुत्सृजेत्युक्तं। यमकं तत्र जायते। योगपद्ये तु तीर्थानां दिवा रुक्रम
दिसंयोगके तु तुरूपेण रागमोहितः। ऋतुग्रहणक्रमः। इति कश्यपः। स्त्रीणां तस्मिन् युग्मा।
तो व्रजेत्। रक्षणार्थमपुत्राणां ग्रहणक्रमशोपि वा। ऋतुग्रहणक्रमः। इति कश्यपः। स्त्रीणां तस्मिन्युग्मा।
तो व्रजेत्। रक्षणार्थमपुत्रां वा ग्रहणक्रमशोपि वा।

च

५०
१

सुसंविशेदिति सर्वासु युग्मासु गमनं बहुपुत्रार्थं। तत्र छंदोगाश्रुतिः। एतमु एव परमध्ययना शिवेर्तस्मान्मम त्वमे कोसी
ति ह कौषीतकिः। पुत्रमुवाच रश्मीस्त्वं पर्यावर्तयात्। बहवस्ते पुत्रा भविष्यंतीति। अयमर्थः। कौषीतकिर्मुनिरादि
त्यमंडलमेकमेवोपास्यैकपुत्र माप्य तमाहाहमेकोपासकत्वादेकपुत्रत्वमप्रशस्तमाप्तो त्वं बहुपुत्रत्वाय रश्मीन् बहु
त्वमुपास्वेति। प्रसार तेपि अपुत्रश्चैकपुत्रत्वमित्याहु धर्मवादिनः। चक्षुरेकं च पुत्रश्च अस्ति नास्ति च सारतः। चक्षुर्नाशे
तु पास्वेति प्रसार तेपि अपुत्रश्चैकपुत्रत्वमित्याहुर्धर्मवादिनः। चक्षुरेकं च पुत्रश्च अस्ति नास्ति च सारतः। चक्षुर्नाशे
तो नाशः पुत्रनाशे कुलक्षयः। मनुरपि ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः। तासामाद्याश्चतस्रस्तु निं
दितैकादशी च या। त्रयोदशी च शेषास्तु प्रशस्ता दश रात्रयः। भारते। ऋतौ गच्छति यो भार्यां मन्त्रैनेयं गच्छति।
यावज्जीवं ब्रह्मचारी मुनिभिः परिकीर्तितः। तथा। तत्रैव। होमकाले यथा वन्हिः कालमेव प्रतीक्षते। ऋतुका
लं तथा नारी ऋतुमेव प्रतीक्षते। तत्र तिथ्यादि नारुश्रीधरः। षष्ठ्यष्टमीं पंचदशीं च तुर्थी चतुर्दशीमप्युभयत्र हित्वा।
शेषाः शुभाः स्युः तिथयो निषेके। वाराः शशांकार्यसितेंदुजानां। आर्यो गुरुः सितः शुक्रः इंदुजो बुधः। उभयत्र प
क्षद्वये। तथा। विष्णुप्रजेशा रविमित्र समीरपौष्णमूलोत्तरावरुणभानि निषेककार्ये। पूज्यानि पुष्य वसु शीत
करादित्यचित्रादित्याश्च मध्यमफलाविफलास्युरन्ये। अत्र मूलस्य ग्राह्यत्वमुक्तं। पाल वल्कोन तु। एवं गच्छन्स्त्रि
यं क्षामां मघां मूलं च वर्जयेदित्युक्तं। विश्वादिदेवसनक्षत्राण्युक्तानि रत्नमालायां। त्वेशाद् दस्रयमाग्निधा
तृशशिनः शर्वोदितिर्वाक्पतिः कद्रूजाः पितरो भगोर्यमरवी त्वष्टा च वायो मारुतः। शक्राग्नी त्वथ मित्र वास
व ऋत्वी नीरं पंच विश्वे विधिर्नो विंदो वसवो बुधाजचरणा हिर्बुध्न्यपूषाभिधाः। अत्रविधिरभिजिन्नक्षत्रे देवताः। नैतेतोद
जला

कौमुद्यामत्र स्वार्थमाहस्म भवान्। गर्भलंभः पुंसवनं गर्भस्यानवलोभनं। इति कर्मत्रयमिदं यत्नोपनिषदीरितं॥१॥ नामंधीतवतः कर्मत्रयं तत्रैव वस्तु
ग्रहं॥ निषिक्तोय अयोगेणगार्भः लभ्यार्थते क्रिया॥२॥ तद्गर्भलंभनं नाम कर्मप्रोक्तं मनीषिभिः। पुमान्प्रसूयते तत्पुंसवनमीरितं। नलुप्येतत्र

प०वि० अष्टाविंशतिः। आश्वलायनः। क्रूरं दारुणमसंयोगं दत्वाग्नौ चाहिदेवतं। श्राद्धाहं चैव रिक्तां च हित्वा यस्मिन् गर्भाधान०
विधीयते। ग्रहसंहितायां। स्त्रीपुरुषस्तु शुक्रे नपुंसकं शोणितशुक्रसाम्ये। यस्मादतः शुक्रविवृद्धिद
५१ नि निषेवितव्यानि रसायनानि। हर्म्येषु मधुनाथरश्मयः सो त्पलमधुमदालसप्रिया। वल्लकीक्षुभरवारहः
स्त्रजो वर्गएष मदनस्य वागुण। माक्षीकधातुमधुपारदलोहचूर्णपथ्याशिलाजितुविडंगघृतानियोगात्
सेक। निविंशति रहानि जरान्वितोपि सोशीतिकोपि रमयः सबलायुवेन। माषस्तुपमहिते न सर्पिषा षष्टिको
दनमदंतियेनराः। क्षीरमप्यनुपिबंति ये पुनः शर्वरीषु मदनेनशेरते। ऋतावगमने प्रायश्चित्तमुक्तंमि
ताक्षरायां। स्मृत्यंतरे। आहिताग्निरुपस्थानं न कुर्याद्यस्तु पर्वणि। ऋतौ न गच्छेद्भार्यां वा सोपि कृच्छ्रार्द्धमाच
रेदिति। अत्र समासु पुत्रा विषमासु कन्या। तत्रापि समासु शोणिताधिक्ये स्त्रीवपुरुषाकृतिः। एवं विषमासु शुक्रा
धिक्ये पुरुषएव स्त्र्याकृतिः। शुक्रशोणितादेरुपादानकारणत्वात् समादेश्च निमित्तकारणत्वादित्यादिमि
ताक्षरादेर्ज्ञेयं। कालहेमाद्रौ। अल्पायुरल्पवीर्यो वा क्लीबो वाप्यत्र जायते। एवं प्रदुष्यते गर्भो दिवा मैथुनसंभ
वः। सुश्रुते। सद्योगृहीतगर्भायाः। श्रमो ग्लानिः पिपासा सक्थिसदनं स्फुरणं च योनेरिति। इमत्र गर्भस्यापि
निषदि गर्भलंभनं पुंसवनमनवलोभनं च यदि नाधीयादिति गार्भोपानादित्रयमुपनिषत्प्रोक्तं कुर्यात्। ५१
योनिकायां श्रुतिविधेर्गर्भान्तरं तत्कुर्यादित्युपनिषदि। इति
गेधेन तत्कर्मानवलोभनमिति॥ नामनधीतवतो ज्ञातार्थस्यांतरं कर्म वक्ष्यति। यदि नधीतात्यीय इत्यादि। एवं वदत आचार्येणके
वलोपगमनेनैवा गर्भलंभनं। प्रतिपादितमिति वदंति अन्येतु शौनकोक्तरित्येसाहुः। यत्नोपनिषदि॥

विशेषः। गर्भो लभ्यते येन कर्मणा निषिक्तं वीर्यममोघं भवति। तद्गर्भलंभनं। पुमान्गर्भो जायते येन तत्पुंसवनं
पुमांश्च सन्न येन कर्मणा नावलुप्यते नम्रियते। न च स्त्री भवति तदनवलोभनं। अनवलोभनमिति वक्ष्यमेऽनव
लोभनमिति वर्णविकार इति वृत्तिः। अस्मच्छाखायां सा उपनिषन्नास्ति। तस्याः उत्सन्नत्वात्। यदि तां नाधीय
तत एवं कुर्यादिति वृत्तिः। वस्तुतस्तु स्मृत्यधिकरणोक्तरीत्या असंता वहिताध्येतृकाणां वाक्यात्साद
तत्तद्वेद्यायोद्ध्येतव्य वदुपनिषत्साद्यो ग्रन्थस्याः। उपनिषदः शाखांतरगतत्वमात्रमवश्यं वाच्यं ततश्च स्वाध्यायोध्येतव्य
इत्युपादेयगतस्यैकत्वस्य विवक्षितत्वेन परशाखाध्ययने दोषाद्यदि तां नाधीयादित्युक्तं। अतएवाध्ययन
विध्यावद्यायपदं ऋग्वेदत्वादिव्याप्यशाखापरं सन्नत्रैव स्वीयत्वेकत्वयोर्विशेषणतामंगीकरोति। अत
श्च स्वशब्देनाधीयवाविनापित्रादिपरंपरागते कशाखाध्ययनमेव कर्तव्यं न त्वेकस्य वेदस्य शाखांतर
६१ ध्ययनमिति शाखांतराधिकरणे स्पष्टं। तेन यदि नाधीयादित्यनुवादः। तदुपनिषद्ध्येतुस्तु विशेष उक्तः। ५
प्रयोग पारिजाते आश्वलायनेन। स्नातां मासः सकुशापाश्च ऋतुमत्याः समेहनि। प्रतिष्ठु दयं कृत्वा पुष्पार
हं वापि वाचयेत्। तत उदीरतां पुण्यां स्वयमन्यैरपि द्विजैः। अधीयतोपनिषदमपराह्णे समापयेत्। विप्रैः सहैव पु
ण्याहं वा स्वस्ति वाचनमेव च। ततो स्तमय वेलायां कृतकृत्सोऽश्वेन रहस्यादिकृतनित्यः कृत संध्यावंदनादि क्रि
यः वक्ष्यमाणं विधिं कुर्यादित्यर्थः। गृह्यपरिशिष्टे। अथ ऋतुमत्याः प्राजापत्यमन्ते तत्प्रथमेऽहनि स्नाना
यः। तथान्वारब्धः प्राजापत्यस्य स्थालीपाकस्य हुत्वेताज्याहुतीर्जुहुयात्। विष्णुर्योनिं कल्पयतु इति त्वष्टारं मे

Indira Gandhi National
Centre for the Arts

षेतितिस्रः। प्रजापते न त्वदेतान्यन्यो विश्वा इति प्राजापत्ययाधर्तोमूर्ध्न्यपनः शोशुचदघमिसत्र्यासिरसि एवमभिमृश्य यः फलिनीरिति
कृत्या वधेन दस्युं तिषड्डिरजनि स्त्रुक् विश्व वसुममग्निर्ददातित्सपतिमिति द्वाभ्यामग्निमुपस्थाय स्विष्टकृदादि
शेषं समाप्य सूर्यो नो दिवस्पातिति पंचर्चेन सूक्तेनादित्यमुपतिष्ठेतेति। प्रथमग्रहणाद्द्वितीये गर्भाधाने
नायं विधिः। अयं च प्राजापत्यहोमः गृह्याग्नावेव कार्यः विच्छिन्नाग्निः सर्वाधानिनश्चाग्निपुनः संधानं कृत्वा
तत्र कार्यः स्तत्प्रकारस्तु वक्ष्यते। अथ गर्भालंभनमनवलोभनं च अनुकूलायां निशि स्वलंकृते वेश्मनि पर्यंकशयने सुस्नातां
तामलंकृतां शुक्लांबरवतीं स्त्रग्विणीं भार्यां स्वपंतथाभूतो निवेश्य दूर्वाः पिष्ट्वाश्वगंधां वा सूक्ष्मेण वाससा संगृह्य
शीर्ष्णातः पतिवती विद्वाभ्यां स्वाहां ताभ्यामुपयोनौ सा विलयो निषिंच रसे उदरंगते तामाचमय्य गंधर्वस्य वि
श्वावसोर्मुखमसीत्युपस्थमभिमृश्य विष्णुर्योनिं कल्पयत्विति द्वाभ्यां दूरं विहार्य तां पूषनिस्यनुप्रहरेत्। ततो विहृत्य
योनिं मोषधीनां अहं गर्भमदधामोषधीष्विति जपित्वोपगच्छेत्। प्राणेतेरेतो दधामसाविसनु प्राण्य यथाक्षमिति
गर्भो। यथाद्यौरिंद्रेण गर्भिणी वायुर्यथा दिशां गर्भ एवं ते गर्भं दधाम्यसाविति स्वनामोक्त्वा सुसीमे हृदयमभिमृश्याचामे
त्। केगमने मंत्रविधिमिच्छं सोषधिनिषेकमकुर्वोपगच्छेतीति। कारिकायां। जयंतो केन मार्गेण गर्भाधानमिहोच्य
ते। चतुर्थदिवसात् पूर्वं मघामूलादिवर्जयेत्। अलं कृतो गृहस्थो पगं धान्यादिपिः शुभैः। ऋतुस्नातां शुभे गंधमा
ल्यादिभिरलंकृतां। अलंकृतस्वयं तद्दृग्गणपशयनं शुभं। पेषयित्वाश्वगंधायामूलं शुद्धं दरे क्षिपेत्। ऋचोदीर्ष्वात
इत्यस्या दक्षिणे नासिकापुटे। निष्पीड्य पिष्टं तन्मूलं वस्त्रे संशोधयेत्तत इति। अत्र च गणपतिपूजनादिनांदीश्रा ५२



द्धांते कृते गर्भाधानांगभूतं प्राजापत्यहोममकृदिष्य रसयोनरसं कल्पयेतिपक्षः। अत्र नांदीश्राद्धं आश्वलायनानां
तु कृते गर्भाधानांगभूतो नामगर्भा
दक्षत्रकृ विश्वेदेवो किंतु सत्य वसु संज्ञकावेवेत्युक्तं प्राक्। अत्राग्न्येयोग्निर्मारुतसंज्ञः। अग्निरेतु प्रथमो देवतानामिति सूक्तेन पत्न्याः मूर्ध्नाभिमर्शनं। या
धेनो विधीयत इति पूर्वमुक्तेः। प्रधानहोमानंतरं च अपनः शोशुचदघमिति सूक्तेन पत्न्याः मूर्ध्नाभिमर्शनं। यादधं दातु सपतिमित्येतैरग्निमुपस्थाय। न
फलिनीरित्येका जपेत् वधेनदस्युमिति षड्डिरजनि स्त्रुक् विश्व वसुममग्निर्ददातु सपतिमित्येतैरग्निमुपस्थाय। न
तः स्विष्टकृदादि शेषं समाप्य ततः सूर्योपस्थानं कृत्वा ब्राह्मणान्भोजयित्वा तेभ्यः स्वस्त्ययनपूर्वकमाशिषं गृहीत्वा
भुंजीत। ततः रससेचनादिः एवं ते गर्भं दधाम्यसाविति स्वीये हृदमभिमृश्योदिसेतः उपगमनविधिरिति प्रयो
गपारिजाते। स्विष्टकृदर्थ वाज्यस्थाप्य वदानमिति केचित्। अन्येतु गर्भस्य स्विष्टकृदित्याहुः। मदेस्तु इदानीं
शिष्टानस्यं दत्वे वा स्विष्टकृदादि होमशेषं समापयंतीत्युक्तं। अस्मत्पितृचरणा अप्येवमाहुः। अतएवाश्व
लायनस्मृतौ। आसीनायाः शिरः स्पृष्ट्वा प्राङ्मुखः पाणिना पतिः तिष्ठंजपेदिमे सूक्ते वपनं श्ववधेनयः।
अग्निस्तुविश्रवस्तममिस्यचोर्द्धे तथैव च। सूर्यो नो दिवइत्येतैः स्तुत्वा सूर्यं वपं वसिः अश्वगंधा रसं
पत्न्या दक्षिणे नासिकापुटे। उदीर्ष्वेति पठेन्मंत्रं। सिंचेद्दूर्वारसं शोधितं। ततः स्विष्टकृदादि स्याद्ध्वास
हीत्वतवेतस्योरित्यादिना तस्यदानो त्तरमेव स्विष्टकृदुक्तः। तेन रससेचनस्य प्रधानस्थलोपगमनांग
त्वात्सपक्षे तस्मिन्रससेचने पक्षे बहुक्रमत्वादुपगमनांगमंत्राणां गंधर्वस्य विश्वावसोर्मुखमसीत्या
दिप्राणेतेरेतो दधामि एवं ते गर्भं दधाम्यसाविसंतानामपकर्षात्तदुत्तरं स्विष्टकृदादि। अतएव देरस

Indira Gandhi National
Centre for the Arts

त्र०चि० ५२

सेचनं पर्यंको पर्युक्तमुपगमनं तामिति पितृचरणाः। तस्यार्थः चौगंधायाः एवमलस्य पेषणमिति कारिकाश्लो
नकाश्वलायनादयः। दूर्वाणां वा पेषणमिति गृह्यपरिशिष्टे। यदा त्वश्वगंधायाः ग्रहणं तदा कपिलाया
यसंमिश्रं कोल्यपात्रगतं शुभमिति प्रयोगपारिजाते आश्वलायनवचनात् हृष्टस्य ग्रहणमिसन्ये।
निषेचनं च चोदीर्ष्वेति इस्तस्या दक्षिणे नासिकापुटे इति कारिकावचनात् दक्षिणनासापुटे एवेति शिष्टाः।
आस्मिन्पक्षे उदीर्ष्वेति रूप यस्या ता कारां मंत्रः तेन मंत्रद्वयेन तद्दक्षिणनासापुटे रस सेचनं प्रयोगार
त्नौ तं शांस्वाय नसूत्रमूलकं। तत्र खेव मुक्तं। उदीर्ष्वातः पतिवतीति द्वाभ्यां मंत्राभ्यां नस्तो दक्षि ५
गेविले निषिंचेदिति। ततो वस्त्रसंशोधनं। निषेचनोत्तरं च तस्याः आचमनं उदस्थेरसे तस्मिन्नाचांत सलि
लां सतीं। उपगछेदमूमेवं विधिनोपगमे कृते। गर्भः स्थिरः स्यादिसेवं गर्भलंभनमूचिरइति शौनक
वचनात्। तेनेदं रससेचनप्राधान्यमृतोपगमनांगं। उपगमनं च गंधर्वस्य विश्वावसो मुखमसीति मंत्रेण
विष्णुर्योनिमितित्रिभिर्नेजमेषेति च तस्मिन्स्य योनिमभिमृश्य तां प्रणिपत्यमंत्रप्रयोगः गर्भमोषधीनामि
त्रि अहं गर्भमिति च मंत्रं जपित्वा सकृत्कार्यमिति पद्धः। अभिध्यानेतु। विष्णुर्योनिं जपेत्सूक्तं योनिं स्पृष्ट्वा
त्रिभिर्व्रती। गर्भाधानं ततः कुर्यात् सपुत्रो वै प्रजायत इत्युक्तं। त्रिभिः अंगुलीभिः गमने मंत्राः। तस्य दानं
च कृताकृतमित्युक्तं गृह्यपरिशिष्टे। आश्वलायनः। ततः स्विष्टकृदादि स्याद्दासीचनवेद्ययोः। फलानि ५२
च पतिस्तस्यै प्रदेयात् मंत्रतः। मातुलिंगं नारिकेलं रंभा खर्जुरपूगकं। शक्त्या तस्यै यानि चान्यानि

तेति यानिच। हषभं गां सुवर्णं च होत्रे दद्याच्च दक्षिणां। पुत्रवान्धनवांस्तेन भवेत्कर्ता न संशय इति। गर्भा
धानं गर्भाधानस्य करणात्तस्यां जातस्तु दुष्कृती। अकृत्वा
धानांगहोमं करणे प्रायश्चित्तमाह आश्वलायनः। गर्भाधानस्य करणात्तस्यां जातस्तु दुष्कृती। अकृत्वा
गाद्भिर्जेद्वा कुर्यात्पुंसवनं पतिरिति। कात्यायनानां तु स्त्रीसंगोत्तरं तस्याः दक्षिणस्कंधस्योपरि हस्तं नीत्वा
हृदयस्पर्शे मंत्रः। यत्ते सुशीमे हृदये दिवि चंद्रमसि श्रितं। वेदाहं तन्मां तद्विद्यात्पश्येम शरदः शतं
जीवेम शरदः शतं। शृणुयाम शरदः शतमिति। ततो ब्राह्मणभोजनं॥ अथास्मत्पितृकृतः रजोदर्श
नशांतिर्लिख्यते पुनः संधानस्य गर्भाधानस्य च प्रयोगः। कर्ता मम पत्न्याः प्रथमरजोदर्शने दु
ष्टमास तिथि नक्षत्रादि सूचितासर्वारिष्टशांत्यर्थं सनवग्रहमखां रजोदर्शनशांतिं करिष्य इति
संकल्प गणेशपूजादि नांदीश्राद्धांतं कृत्वाचार्यमृत्विजश्च वृणुयात्। आचार्यः पूर्ववन्मध्ये दक्षिणोत्तरयोश्च सर्वत्रमं
त्रावृत्तिः। मही द्यौरिति भूमिं स्पृष्ट्वौषधयः समिति द्रोणप्रमाणव्रीहिराशित्रये आकलशेष्विति कुंभत्रयं संस्थाप्या
पलं सुवर्णाश्चत्वारः कुडवं प्रस्थमाढकं। द्रोणं चत्वारि कानि चेति पूर्वपूर्वाश्चतुर्गुणं प्रस्थास्त्वकोद्रोणाः। चत्वारः प्रस्था
प्रसुव आपरत्नित्वानांप्रियमेधपुत्रः सिंधुक्षित्प्रऋषिः नद्योदेवता जगती छंदः। प्रसुव आपो महिमानमुत्तमं ते
कारुर्वोचाति सदने विवस्वतः। प्रसप्तसप्त त्रेधाहि चक्रमुः प्रसत्वरीणामति सिंधुरोजसा। प्रते दद्रूरणोपात
वेपथः सिंधो यदाजां अभ्यद्रवस्त्वं। भूम्या अधिप्रवतायासि सानुना यदेषामग्रं जगतामिरज्यसि। दिविस्वनो य
न्तेभ्यस्योपर्यनं तं शुष्ममुदियर्ति भानुना। अभ्रादिव प्रस्तनयंति वृष्टयः सिंधुर्यदेति वृषभो न रोरुवत्।

Indira Gandhi National
Centre for the Arts

ओम्०

प्र०भं० अस्मिन्ना सिंधो शिशु मिन्वमातरो वाश्रा अर्षंति पयसेव धेनवः। राजेव युध्वा नयसि त्वमित्सिचौ यदासामग्रं भुवनेश्व०
५४ प्रवतामिनक्षसि। इमंमेगंगेयमुने० त्वष्टा मया० त्वंसिंधो० अजीसेनी० अद्भ्यासिंधु० स्वश्वासिंधु० ऊर्णाव
ती० सुरथंरथं युयुजे० महानस्य० याः प्रवतो वासिष्ठो नद्यः शक्वरी। याः प्रवतो नि० अभ्यां मंत्रा तृसास्त्व
मंत्रांते जलेनापूर्य गंधद्वारामिति गंधं० [illegible] यौषधीरिति सर्वौषधी। ओषधयः समिति यवांश्च त्रिष्टुष्लिखाम
केशर ध्यकुंभे गायत्र्याय वश्रीहि तिलमाष श्यामाक मुद्गान् क्षिप्त्वा गायत्र्यो वा कुश दूर्वा रक्तोसल चंपक बिल्व
कुरुंटा तुलसी बर्हिषशं खपुष्पीशतावर्यश्वगंधानि गुडूचि रक्तपीतसर्षपाद्या मार्गपलाश पनस बंधूक
प्रियंगु। गोधूम ब्रीह्यश्वत्थ दधि दुग्ध घृतपद्मपत्र नीलोत्पल सित रक्त पीत कुरंटक गुंजा वचा भद्रक मुस्ता
ख्यानि द्वात्रिंशद्दोषघ्नानि यथासंभवं वा क्षिपेत्। ततः स्त्रिषु कांडात्कांडादिति दूर्वा अश्वत्थे व इति पंचपल्लव
न्यो त्रेति अश्मद्रोयाः फलिनीरिति फलं साहिरत्ना वीति पंचरत्नानि हि रण्यरूपइति हिरण्यं सित्सायु
वासुवासा इति वस्त्रेणावेष्ट्य पूर्णादर्वीति यं वादि पूर्णानि पूर्णपात्राणि सवस्त्राणि निधाय तत्राष्टदलानि कृ
ता मध्ये गायत्र्या भुवनेश्वरीमावाह्य दक्षिणकुंभे इंद्राणीं वृषाकपिरिंद्राणी पंक्तिः इति प्राणीं चुत्तरकुंभे इंद्रत्वावि
श्वामित्र इंद्रो गायत्री। इंद्रमावाह्येत मंत्रैः षोडशोपचारैः पूजयेत्। ततो मध्यकुंभस्य पश्चाद्गायत्रीमाहमात्
जपेत्। अष्टसहस्रमष्टशतं वा जपेत्। ततो हिरण्यवर्णामिति पंचदशानां कर्दमानंद चिक्लीतेंदिरा सुताऋषयः श्री ५४
र्देवता तिस्रोनुष्टुप् एका प्रस्तारपंक्तिः द्वे त्रिष्टुभावष्टावनुष्टुभोंत्या प्रस्तारपंक्तिः। जपेत् वि० एकत्वितिदक्षिण

लो
चनाभ्यां वसिष्ठो रुद्रलिंगा त्यांस्त्रिष्टुप्।

कुंभे। कद्रुद्रायेति नवानां घोरः कण्वो रुद्रो गायत्री। इमारुद्रायतवसे इत्येकादशानां कुत्सो रुद्रो जगत्यांत्येत्रिष्टुभो। आ
ते पितरिति पंचानां गृत्समदो रुद्रस्त्रिष्टुप्। इमारुद्राय स्थिरधन्वन इति चतुर्णां वामदेवो रुद्रस्त्रिष्टुप्। आ वो राजा
नं वामदेवो रुद्रस्त्रिष्टुप्। तमुष्टुहि सोमो त्री रुद्रस्त्रिष्टुप्। भुवनस्यपितरं ऋजिश्वा रुद्रस्त्रिष्टुप्। त्र्यंबकं वसिष्ठो
रुद्रोनुष्टुप्। अथान्ये दुत्तरकुंभे रुद्रे कादशिनीं न्यास ऋष्यादिपूर्वकं जपेत्। शंन्न इंद्राग्नी पंचदशानां वसिष्ठो विश्वे
देवास्त्रिष्टुप्। इति जपेत्। अथाग्नि प्रतिष्ठाद्येशान्यां महान् रुद्रो भास्कर विष्णु ब्रह्मेंद्र यम काल चित्रगुप्तान्
धिदेवान् गन्यभूमि। विष्णु। रुद्रेंद्राणी प्रजापति सर्प ब्रह्मणः प्रत्यधिदेवान् विनायकादीन् मंचाशे लोकपालो
श्चावाह्य संपूज्येशान्यां कुंभे वरुणं संपूज्यान्वादध्यात्। चक्षुष्यंते नयमहान्। प्रत्येकमनुकसंख्याभिः
समिच्चर्वाज्याहुतिभिः दधि देवादीन् एकैकयाहुत्या भुवनेश्वरीं प्रत्येकं दूर्वा तिल मिश्र गोधूम पायसाज्या
नामष्टोत्तराष्टाविंशत्यन्यतराहुतिभिरिंद्राणीमिंद्र प्रत्येकमुक्तद्रव्यो वान्येनावाष्टाविंशत्यष्टान्यतराहु
तिभिः शेषेण स्विष्टकृतमित्याद्युक्त देवेभ्यो मुख्ये त्वेतिमनसा नूच्छीनि रूप्यमहेभ्यश्च रुद्रं भुवनेश्वर्यै चतसि
रे चरुं कृत्वा व्यस्तागांते यजमानेन त्यागे कृते उक्तसंख्याया होमः। तत्र तिस्रः समिद्दूर्वापि दधि मध्वाज्याक्त
भिरेकाहुतिभिः। एवं समिधोभ्यक्ताः। ततः स्विष्टकृदादि प्रायश्चित्तहोमांते दिक्पालेभ्यो नवग्रहेभ्यो
भुवनेश्वरीं द्राणींद्रेभ्यश्च सदीपमाषभक्तबलिं दत्वा समुद्राहूर्मिरिति सूक्तस्य वामदेवोग्निस्त्रिष्टुपवितियसोपी
ताकूर्वकं धाई इति पूर्णाहुतिं हुत्वा प्रणीताविमोकादि शेष समाप्तो यजमानमभिषिंचेत्। आपोहिष्ठेति नवानां वसिः यतइंद्र
मंत्र० यदकशहिदमतेगौतमोइंद्रत्रिष्टुप्। ततस्तु१

Indira Gandhi National Centre for the Arts

अंगोतिमंत्रयांतेत्रिभिर्द्धुंदेवेतिसप्तानांवसिष्ठस्त्रयाणांअग्निस्ततोविश्वेदेवाआद्यागायत्रीततोनुष्टुप्।तिस्रो
गायत्र्योद्वेत्रिष्टुभौ।उभयंशृणवच्चनेतिभर्ग इंद्रो बृहती।स्वस्तिदाविशोयम इंद्रोनुष्टुप्।त्र्यंबकं।तवेदस्ते कश्यपो
त्रि दुर्गस्त्रिष्टुप्।भुवनस्पतिरं।मातेरुद्र कश्यपोरुद्रः स्वराड्नुष्टुप्।यज्जाग्रतइतिषण्णां प्रजापतिर्मनस्त्रिष्टुप्।इंद्रस्या
वृषभंपंचानांविश्वामित्रइंद्रोगायत्री।ततः।सुरास्त्वेत्याधेरभिषिक्तोग्निसंपूज्याचार्याय धेनुं।रुद्रजापिनेनपु
हंसदक्षिणमन्येभ्यश्चदक्षिणांदत्वादेवानामुत्तरपूजांकृत्वाविसृज्याचार्याय दत्वाग्निंसंपूज्यगच्छगच्छेति
विसृज्यमहाशांतिंपठित्वाविप्रान्संभोज्यभुंजीत॥ग्रहणेरजोदर्शनेतुभुवनेश्वर्याद्यावाहनोत्तरंसूर्यग्र
हहेमंसूर्यंचंद्रग्रहेचराजतंचंद्रं।उपयत्रस्वर्भानोइति राहुंच कुंभाधः वस्त्रे संपूज्य पायसाज्यति
लैर्होमंकुर्यादितिविशेषः।इतिरजोदर्शनशांतिः।अथगृह्याग्नेः पुनःसंधानं।कर्ताग्निविच्छेदकालगतोन
यायदिप्रसंगंकृत्वा।सायंप्रातर्होमदर्शपूर्णमासस्थालीपाकविच्छेदनिमित्तंतत्संख्यान्व्रीह्यादिद्रव्यंदत्वादेश
कालौसंकीर्त्यविच्छिन्नस्यगृह्याग्नेःपुनःसंधानमहंकरिष्य इत्युक्त्वाग्निंप्रतिष्ठाप्याघारावाज्येनेसंते त्रिरग्निंपव
मानमग्निंप्रजापतिंचाज्येनार्यमाग्निंवरुणाग्निंपूषाग्निंप्रजापतिंचलाजद्रव्येण सूर्यं सावित्रीं चतुर्वीरमाज्ये
नशेषेणस्विष्टकृतमित्यादिनारांतेत्र आयूंषीतितिसृणांशतं वैखानसा अग्निः पवमानो गायत्री।होमे विं इति
त्रिभिर्हुत्वा।त्वमर्यमा वसुश्रुतोग्निस्त्रिष्टुप्।अग्नय इदं न मम।प्रजापतेनत्वदेतावान्यं रुत्वापत्यं जलावुप
स्तीर्यद्विर्लाजानाधायहविरवत्तंचाभिघार्य अर्यमणं वरुणं पूषणमिति त्रयाणां वामदेवोर्यमाग्निर्वरुणा

Indira Gandhi National
Centre for the Arts

गर्भाधा॰

प्र॰चि ग्निः पूषाग्निरनुष्टुप्। इति त्रिभिर्लाजान् हुत्वा प्रजापतये स्वाहेति शूर्पपुटेन हुत्वा। आनः प्रजामिति चतुर्णां
५८ सूर्या सावित्री ऋषिः सूर्या सावित्री देवता आद्या जगती द्वितीया त्रिष्टुप् अंत्ये अनुष्टुभौ। इत्याज्यं हुत्वा। समंजंतु
तिसूर्या सावित्री ऋषिः सूर्या सावित्री अनुष्टुप्। इति दधि प्राश्य पत्न्यै दत्वा अवशेषेण वा प्राश्य स्विष्टकृदादि शेषं
६१ समापयेत्। इति पुनः संधानं। अथ गर्भाधानं॥ कृतदेशकालो संकीर्त्य अस्यां भार्यायां जनिष्यमाणसर्व
गर्भाणां बीजगर्भसमुद्भवैनोनाशद्वारा प्रतिगर्भसंस्कारातिशयार्थं परमेश्वरप्रीत्यर्थं गर्भाधानं करिष्ये तदं
गतया गणेशपूजा पुण्याहवाचनमातृपूजनान्दीश्राद्धानि कृत्वा अग्न्याधानं माहृतसंज्ञं प्रज्वाल्याग्निं
न्वाहितेऽग्नौ वृत्त्यादि चक्षुष्यंते प्रजापतिं चरुणा विष्णुं षड्वारमाज्येन प्रजापतिं चाज्येन शेषेण स्विष्टकृतमि
त्यादि प्रजापतये मंत्रवच्चरुं श्रपयित्वा चक्षुष्यंते चरुमवदाय प्रजापतये स्वाहेति हुत्वा॥ विष्णुर्योनिमिति त्र
याणां त्वष्टा विष्णुरनुष्टुप्। ॐ विष्णुर्योनिं॰ गर्भं धेहि सिनीवालि॰ हिरण्ययी॰ इत्याज्यं हुत्वा नेजमेषेति तिसृणां
त्वष्टा विष्णुरनुष्टुप्॰ नेजमेष॰ यथेयं पृथिवी॰ विष्णोः श्रेष्ठेन॰ प्रजापते न त्वदेतान्या॰ इत्याज्यं हुत्वा अपनः शोशुचद
घमित्यष्टानां कुत्सोऽग्निर्गायत्री पत्न्याः मूर्द्धाभिमर्शने वि॰ याः फलिनी॰ यथेन दस्युं पश्चात् वसुश्रुतोऽग्नि
स्त्रिष्टुप्। अग्न्युपस्थाने वि॰। यथेन दस्युं॰ स्वस्ति॰ अग्निस्तु विश्रवस्तममिति द्वयो वसुश्रुतोऽग्निस्त्रिष्टुप्।
अग्निस्तु वि॰ अग्निर्ददाति सत्पतिं। इत्यग्निमुपस्थाय। सूर्यो नो दिवस्पात्विति पंचानां चक्षुः सूर्यो गायत्री। ५८
सूर्योपस्थाने वि॰। सूर्यो नो दिवस्पातु वातो अंतरिक्षात्॥५ इति सूर्यमुपस्थाय तदा रात्रौ वा अ[illegible]गर्भाधायाः।

६

दूर्वां पावाकल्कं वस्त्रे सिक्त्वा। उदीर्ष्वेति द्वयोः सूर्या सावित्री ऋषिः सूर्या सावित्री देवता त्रिष्टुप्छंदः अं
ना त्यानुष्टुप्। पत्न्याः दक्षिणनासापुटे दूर्वारससेचने विनियोगः॥ उदीर्ष्वातः पतिवती ह्येषा विश्वावसुं॥ इत्येनां पापसा
स्वजस्वाहेति स्वाहांत दक्षिणनासापुटे रसमासिच्य। रसे उदरं गत्वा तामाचमय्य गंधर्वेण विश्वावसो मु
खमसि। विष्णुर्योनिमिति त्रयाणां तथा। नेजमेषेति त्रयाणां त्वष्टा विष्णुरनुष्टुप्। प्रजापते इत्यस्य नेनचयोनि
मक्षिमच्छ्यः। तां पूषन्नित्यस्य सूर्या सावित्री ऋषिः सूर्या सावित्री देवता त्रिष्टुप्छंदः। यो गर्भमोषधीनां
वसिष्ठः पर्जन्यो गायत्री। अहं गर्भं प्रजावान् प्रजापत्यो गर्भ इंद्र त्रिष्टुप्। अहं गर्भमदधामोषधीष्वहं
विश्वेषु भुवनेष्वंतः। अहं प्रजा अजनयत् पृथिव्या अहं जनिभ्यो अपरीषु पुत्रान्। इति त्रियं गत्वा प्रा
वातेरेतो दधाम्यसौ। यथा भूमिरग्निगर्भा यथा द्यौरिंद्रेण गर्भिणी। वायुर्यथा दिशां गर्भ एवं तेग
र्भं दधाम्यसावितिस्वनामोक्ता। स्विष्टकृदादि शेषं समाप्य दशब्राह्मणान् भोजयेदिति॥ इत्युक्तमितिस्त्र[illegible]
तेगर्भाधाने प्रयोगः॥ निर्णयसिंधौ ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति घोरायां भ्रूणह[illegible] ल
यां युज्यते नात्र संशय इति। अयं च ऋतौ भार्यामुपेयादिति एष नियमः अजातपुत्रस्यैवेति केचित् अन्ये
तु प्रतिनिमित्तं नैमित्तिकावृत्तेरेष्टव्या बहवः पुत्रा इति लिंगात्। प्रतिनिमित्तं नैमित्तिकावृत्तिरिति साधुः। इत्येवमु
उपनिष क्तं। इत्यनंतभट्टकृत श्रीरामकल्पद्रुमे प्रयोगचिंतामणौ गर्भाधानप्रयोगः॥ अथ पुंसवनं। निर्णयसिं
त्वन्तोप धौ जातूकर्ण्यः। तृतीये वा चतुर्थे वा मासि पुंसवनं भवेत्। व्यक्ते गर्भे भवेत् कार्यं सीमंतेन सहाथ वा॥ बृहस्प
निषदि

Indira Gandhi National
Centre for the Arts

पुंसवन

प्र॰चि॰ तिः। तृतीयमासि कर्तव्यं गृह्येऽन्यत्र शोभनं। मृष्टे च तुर्ये मासे तु षष्ठे वाप्यथ वाष्टमे। सकृत्प्रसूतानां(?)
५८ तेनेदं प्रतिगर्भमपि भवतीति गम्यते। वराहः। हस्तो मूलं श्रवणपुनर्वसुमृगशिरस्तथा पुष्यः पुंसंज्ञ
केषु कार्यं चैतानि श्रुतानि धिष्ण्यानि। गर्गोऽपि। पुन्नामश्रवणस्तिष्यो हस्तश्चैव पुर्वं पुनर्वसुः। अभिजित्प्रो
ष्ठपाचैव अनुराधा तथाश्वयुक्। अनुराधापि पुंनक्षत्रं। अनुराधां न्यूनविषावर्ज्यं तं इति श्रुतेः। नृसिं
हः। रिक्तां पर्व च नवमीं त्यक्त्वा पुंसवने शुभाः। वसिष्ठः। मस्तु भ्रूसौरे स्तनहानिरिं दोर्मे तत्प्रजा पुंसवने तथा
बुधस्य। काकी च वंध्या भवतीह शुक्रे स्त्री पुत्रलाभो रविसोमजीवैरिति। पुंसवनादेर्न मलमासादि
निषेधः। तदाह यमः। गर्भे वार्धुषिकेष्टसेष्वाद्य कर्मणि मासिके। सपिंडीकरणे नित्ये नाधिमासं विवर्ज
येदिति। अनवलोभनस्याप्ययमेव कालः। अत्रानवलोभनस्य कालांतरं नोक्तं तथापि यावता पुंसवनस्य कालोऽस्ता
वदेव अस्यापि। अनवलोभस्याप्ययमेव कालः। अत्रानवलोभनस्य कालांतरं नोक्तं तथापि यावता पुंसवनस्य कालोऽस्ता
वंतो स्याप्यर्थासिध्यंति। सूत्रे पुंसवनानवलोभनयोः। सहप्रयोगस्य नित्यवदाम्नानात्। तथाहि तृतीय गर्भमा
सइत्यादि एवं त्रीन् प्रसृतानि सीमंतोन्नयनं पुंसवनं विधायाथास्यै मंडलागारच्छायायामित्यादिनानवलोभनमुक्तं॥
तत्राथशब्देनैकप्रयोगता गम्यते॥ अत एवोक्तं वृत्तिकृता॥ कर्मांतरत्वात्कालांतरप्राप्तावानंतर्यार्थोऽथशब्द इति॥
गर्भाधानेवत्कृते गां दत्वा पुंसवनं कुर्यात्। तथा चाश्वलायनः। गर्भाधानस्याकरणात् तस्यां जातस्य दुष्यति। अकृ
त्वा गां द्विजे दत्वा कुर्यात्पुंसवनं पतिरिति। इदमत्रागं(?)। तृतीये गर्भमासे तिष्येणोपोषितायाः। शालूप्रवसाया
गोर्दधनि द्वौ द्वौ तुमाषौ यवं च दधिप्रसृतेन प्राशयेत्। किं पिबसि किं पिबासीति पृष्ट्वा पुंसवनं पुंसवनमि ५८

ति त्रिः प्रतिजानीयादेवं त्रीन् प्रसृतान्। गर्भसहितो मासो गर्भमासः। तिष्येणेति प्राशनकर्मणा संब
ध्यते। तेन पूर्वदिने पुनर्वसुना उपोषिता या तिष्येणेदं कर्म कुर्यादिति वृत्तिः। उपोषितशब्देन गर्भो
सिद्ध्यविरोधि हविषा कृते कभक्तो लक्ष्यते। तदाह शौनकः। गर्भस्य चेद्यथाशास्त्रोपोषणानुपरोध
तः। पूर्वस्मिन्दिवसे पत्नी हविष्यैकाशना भवेत्। वृद्धिश्राद्धं पतिः कुर्यात्सुब्राह्मणवारीणां च स्वसे देति तेन गण
पतिपूजनं पूर्वकं वृद्धिश्राद्धमपि पूर्वदिने लभ्योया॥ पुंसवने सीमंते चाश्वलायनो निषेककाले सोमे चे भो ५
ति वचनान्नवक्षरूक्रतु विश्वेदेवो किं तु सत्यवसुसंज्ञकाचेवेसुक्तं प्राक्॥ तथा च पूर्वपुः। संवृत्तं यत्तु
तद्दधि प्रसृतोऽक्षिपेदिति वचनात् यवधुरे वत्समानरूपवत्सायागोर्दधि संपादयेत्। सूत्रे गोग्रहणं स
मानरूपवत्सायाअभावे असरूपवत्साया अपि गोर्दधि ग्राह्यमित्येवमर्थमिति वृत्तिः। अत्र च प्रा
शनस्यास्य करणात्। गर्भस्य संस्कृतो भवेत्। स्मरत्यनेकजन्मानि प्रागतीतानि यानि च। पुंसवने मंत्रसा
मर्थ्याद्वृत्तिं प्राग्जन्मनः स्मृतिमिति प्रयोगपारिजाते। आश्वलायनवचनादेवमनः शमयति बीज
गर्भसमुद्भवमिति। याज्ञवल्क्यवचनाच्चास्यामुत्पत्स्यमानगर्भस्य बैजिकगार्भिकदोषनाशपुंरूपता
सिद्ध्यर्थं प्रतिरोधिनाशगर्भलोपनपरिहारद्वारा पुंसवनमनवलोभनं च करिष्य इति संकल्पः। अ
श्वोपासनाग्निः पवमानसंज्ञ इति भट्टाः। अन्ये तु पुंसवने चंद्रमाश्चैव भृंगः कर्मणि शोभन इति वाक्याच्चंद्र

Indira Gandhi National Centre for the Arts

देवतापरिग्रहार्थमन्वाधानं करिष्ये इत्येवम् पुंसवन

प्र०चि० ५८ मिप्योग्निरिसाहुः। अत्र चानवलोभने होमाभावात् पुंसवनहोमे देवतापरिग्रहार्थमन्वाधानं करिष्ये इत्येवम् पुंसवन निर्वापप्रोक्षणे स्यातां प्राजापत्य चर्वर्थः। स

न्वाधानसंकल्पः। अतएव पूर्वा पात्रनिधानां तमन्वाधानादिपूर्ववत्। समानरूपवत्सायां गोर्दधिप्रस्थे तोक्षिपेदिति कारिकायां शौनकेन च। पुंसव

कत्वाज्यभागपर्यंतमन्वधानादिपूर्ववत्। समानरूपवत्सायां गोर्दधिप्रस्थे तोक्षिपेदिति कारिकायां शौनकेन च। पुंसवनं

नएव चरो हृसति हृक्तानस्यैव चरोरग्नेउत्कर्षः। एवं च यथाक्रमं चरुः पुंसवनांगं। हृदयाभिमर्शनं त्वनवलोभनां

गं। अन्यथा पुंसवने होमाभावे तत्राज्यभागयोर्निर्वापान्वाधानादिस्वाकरणापत्तेरिति केचित्। वस्तुतस्तु माषद्वय

पुत्रयवसहितदधिप्राशनस्य पुंसवनशब्दार्थत्वेन स्पृक्त हृदयपूर्वकं दूर्वारससेचनस्य चानवलोभनशब्दार्थत्वे

नोभयत्र होमाभावात् प्राजापत्यहोमस्य चाग्न्याधानादौ पूर्वं क्रियमाणस्यांगत्ववदत्र प्राजापत्यस्य स्थालीपाकस्य हु

ते सुसयोरंते। क्रियमाणस्योत्तरांग वदुभयांगत्वोपपत्तेरुभयोर्दृश्ये नपुंसवनानवलोभनहोमे न्वाधानं करिष्य इ

त्येवमन्वाधानं संकल्प इति भट्टाः। प्रयोगपारिजाते प्येवमन्वाधानसंकल्प उक्तः। वयं तु। अथास्येमंडलागारछा

यः पामिस्यथ शांदृ नपुंसवनप्रकरणाविच्छेदाधत्ते सुषीमेमाहं पौत्रमघं नियामि त्यनवलोभनलिंगाच्चा

नवलोभनस्य संदंशारम्भाबीतत्प्रकरणोक्ते स्तन्मध्यपतितस्य प्राजापत्यहोमस्य तन्मात्रांगत्वादनवलोभनहोमे

न्वाधानं करिष्य इत्येवं संकल्पः। नच प्राजापत्यचरोरनवलोभनमात्रांगत्वे पुंसवनशब्दवाच्यस्य च दधिप्राशनास्य

कच चरोर्निर्वापादिकरणं नस्यादिति वाच्यं। सहालंभन्यायेन प्रधानयोः साहित्यार्थं तदुपपत्तेरिति प्रतीमः। यदि ५८

तुपवमानः पुंसवनं इत्याद्यग्निविधानान्यथानुपपत्त्या पुंसवने होमस्तदाग्निरिद्रः प्रजापतिरित्याद्यना

दिष्टहोमोस्तु न तु प्राजापत्यहोमस्य तदंगतेति दिक्। तथा। मुहूर्ते स्थापितं कृत्वा वह्निमौपासनं ततः। तत्रान्वाधानमा

रभ्यप्रणीतासादनावधि। पुरस्तात्तत्र माचार्यः प्राजापत्यचरुं ततः। निरूप्य श्रपयित्वाज्यं संस्कारं वाघपूर्वकं। आ

चांततो यानीत्वाग्निमात्मानमपि चांततरां। आत्मनो दक्षिणे पार्श्वे प्राङ्मुखीमुपवेशयेदिति शौनकः। स्वचनादन्वाधा

नादिपूर्वकं प्राजापत्य चरोर्निर्वापादिना चरुं कृत्वा आज्यसंस्कारांते। आत्मानमग्निं चांतरापत्नीमाचांतसलिला

मानीय स्वदक्षिणतः चर्मण्युपवेश्य। तमान्वारब्धः इध्माधानाघाज्यभागांतं कुर्यात्। शौनकः। ततः प्रक्षालिते

पाणिं भार्यायाः प्रसृतीकृतं। दध्नः प्रसृतिमात्रं तु क्षिपेत्तत्र विचक्षणः। दध्नश्चोपरि निक्षिप्य पुल्लिंगानुकृतं यवं

अंडानुकारिणो माषौ क्षिप्त्वा तु सयपार्श्वयोः। ततः किं पिबसीत्येवं वदन् पृच्छेद् भूवरः। त्रिः पुंसवनमित्युक्ता

वधूः सयवमाषकं। पीत्वा तद्दधिनिःशेषमाचामेदुदकं ततः। अनेनैव प्रकारेण पुनर्द्विर्दधिप्राशयेदिति। सूत्रे

द्वौ द्वौ माषाविति वीप्सावचनं प्रतिप्रसृतं माषद्वयप्राप्त्यर्थं। अन्यथा वीप्साभावे स्यालीस्यदध्न्येव माषयोर्य

वस्य च प्रक्षेपः स्यात्। गोर्दध्नीति दध्नः सप्तमीनिर्दिष्टत्वात्। दधिप्रसृतेनेति पुनर्दधिग्रहणं दध्नः प्राश

नार्थं। अन्यथा पूर्वस्य सप्तमीनिर्दिष्टत्वाद्दध्नः प्राशनं न स्यादिति वृत्तिः। अंडरूपेण माषौ स्तः शिश्नरूपेण वै यव

धा२ प्रा इति पुंसवनं। अथानवलोभनं॥ सूत्रे। अथास्य मंडलागारछायायां दक्षिणस्यां नासिकायामजीतामोषधीं नस्तः करोति।

प्रजावज्जीवपुत्राभ्यां हैके। दक्षिणग्रहणं [illegible]णेंद्रियस्यानंगत्वज्ञापनार्थं। तेनात्र संपूर्णनासिकापानांगत्वं केचित्तु पुट

स्येवेत्यर्थः। अजीतेति अजीर्णा ओषधी दूर्वा नस्तः करणं नासिकायां रससेचनं प्रजावतादय स्तूक्तमाते गर्भ इत्यादि अ

प्र०चि० गिरे तु प्रथम इति औचपुत्र ऋषिणा दृष्टं सूक्तं । आभ्यां सूक्ताभ्यामेकेन वा तः करणमिच्छंत्येके तृतीये हरशादौ मिमतं चतुर्था सिमंत०
५९ पत्रार्थ इति वृत्तिः । अपश्यं त्वा मनसेतीदं प्रजावत् सूक्तमिति केचित् । तत्र । यत्नो जयेत् तेन यातेगर्भ इत्यस्य सैवो क्तेः । सूत्रे
दे सूत्रे प्राजापत्यस्य स्थालीपाकस्य हुत्वा हृदयदेशमस्या आलभेत । मंत्रे सु सीमंतिया मिति प्राजापत्यस्य स्थाली
पाकस्यैकदेशं हुत्वा । यत्त इति मंत्रेण स्याहृदयमालभेत ॥ ततः स्विष्टकृदादि समापयेदिति वृत्तिः । दूर्वारससेचनं चत
स्याः । प्रसक्तदेशीतिश्रुताकार्यं ॥ प्रसक्तदेशोस्त्रियास्ति षुन । दक्षिणे नासिकाबिले । अथ दूर्वारसं सिंचेत् । उदरस्येर
से तस्मिन्नवीतो द्रुपातः । इच्छे वदस्य जुहुयात् प्राजापत्यचरुं तत इति प्रयोग पारिजाते शौनकेन वचनात् । दूर्वारसं
चकन्यामा दृषदुपलाभ्यां पेषयित्वा वस्त्रे कृत्वा सूक्ष्मयांते दक्षिण नासापुटे अंगुष्ठाग्रेण रसलवासिंचेदित्युक्तं प्रयो
पा गपारिजाते । कारि कायां । परिमंडलगेहस्यछायामुपवेश्य तां सिंचेद्दूर्वारसं त्वस्या दक्षिणे नासिकाबिले प्रजावज्जीव
पुत्राभ्यां सूक्ताभ्यां वा तदिष्यते । अन्ये त्वाहुरिदं कर्म कृत्स्नं स्यात् परिमंडले । एकदेशं चरोर्हुत्वा प्राजापत्यं इत्यथ । य
त्ते सुशीमे इत्यस्या हृद्देशं पाणिना स्पृशेत् । ततः स्विष्टकृदादि । नभा । कर्तास्या ह्येवरस्तस्याः यस्याः पत्युरसं भवः ।
आवर्त्तत इदं कर्म प्रति गर्भमिति स्थितिरिति । अस्मिंश्च कर्म भूयेशतं ब्राह्मणान् भोजयेदिति । सद्धाः । अष्टकेत्ति
जयेत्रीन्वा तत्तत्संस्कारसिद्धये इति । वचनाद्दशैत्रयो वा । सोस्माद्दसपरे ॥ इति पुंसवनानवलोभनेकर्मणि ॥
अथ सीमंतः । कारिकायां ॥ चतुर्थे गर्भमासे तु सीमंतोन्नयनं भवेत् ॥ पूर्वस्यां संभवषष्ठेमासे यद्वाष्टमे भवेत् । हेमा ५९
द्रौ शंखः । गर्भस्यंदने सीमंतोन्नयनं । यावद्वा न प्रसव इति । मासश्चात्र सावनः सौरो वा । वसिष्ठः । चतुर्थे सावने

मासि षष्ठे वाप्यथवाष्टमे । कालविधाने । चतुर्थषष्ठाष्टममासस्थौ तु । सौरेण गर्भे प्रथमं विधेयं । सीमंतकर्मद्वि
जभामिनीनां मासेष्टमे विष्णुबलिं च कुर्यात् । नारदः । अरिक्ताप र्वदिवसे कुजजीवार्कवासरे । निर्णय
सिंधौ । शुभसंस्थे निशानाथे अष्टमीं च चतुर्दशीं । पौर्णमासीं प्रशंसंति केचित्सीमंतकर्मणि । कालविधाने ।
सीमंते तिष्य हस्तादि निशाशास्त्रसौम्यविष्णुत्तराख्याः पक्षछिद्रं चरिक्तोपि त्तिथि मप हाय परास्तु : प्रशु
स्ताः । एतानि दशनक्षत्राणि सीमंते पूज्यानि । पक्षछिद्रं चाह वसिष्ठः । तुर्ये चतुर्दशी चतुर्थी च अष्टमी नवमी तथा ॥
षष्ठी च द्वादशी चैव पक्षछिद्रा ह्वयाः स्मृताः । कुमारेतासु तिथिषु वर्जनीयाश्च नाडिकाः । स्मृताः ५ ८ मनु १४ त
वां २४ कृ दश १० शेषासु शोभना इति । नारदः । विप्रक्षत्रिययोः कुर्याद्दिवा सीमंतकर्म तत् । वैश्यशूद्रकयो रेत दिवा
निश्यपि केचन । एतच्च सीमंतोन्नयनं कर्म न स्त्रीसंस्कार इष्यते । केचिद्गर्भस्य संस्कारात् प्रतिगर्भं प्रयुंजत
इति हेमाद्रौ विष्णुवचनादेवं तं गर्भमाधे हीति मंत्रलिंगाच्च गर्भसंस्कारकमिदं प्रति गर्भं कार्यमिति केचित् । अत्र स
कृदा वृत्ति विप्रतिपत्तौ आश्वलायनापस्तंब सांख्यायन नारद हारीतादि बहु स्मृति विरोधात् विष्णुवाक्ये केचिद्द्वौ सं
मत त्वपरः । ब्रौहे मंत्रेण यो वेद नामधेयं षडंगमेके इतिवत् ॥ इतो तु चतुर्थे गर्भमासे सीमंतोन्नयनमिति सूत्रे
सीमंतः उन्नीयते अस्मिन्न कर्मणीति समाख्याया बलवत्त्वात् सकृदेव तदित्युक्तं हारीतोपि । सकृच्च कृतसंस्काराः
सीमंतेन द्विजस्त्रियः । यं यं गर्भं प्रसूयंते स सर्वः संस्कृतो भवेत् । हारीतः । स्त्रीयद्यकृतसीमंता प्रसवेत् कु
त थंचन । गृहीतपुत्रा विधिवत् पुनः संस्कारमर्हति । सूत्रे । आपूर्यमाणपक्षे यदा पुंसा नक्षत्रेण चंद्रमा युक्तः स्यात् तदाग्नि

मुपसमाधाय पश्चादस्यानडुहं चर्मास्तीर्य प्राग्ग्रीवमुत्तरलोम तस्मिन्नुपविशयां समन्वारब्धायां धातादधातु दद सीमंत
प्र०चि० शुष इति द्वाभ्यां राकामहमिति द्वाभ्यां नेमेष प्रजापते न त्वदेता न्यन्य इति चाधाज्ये युग्मेन शलाटु ग्लप्सेन त्रेण्या च
६० शलल्या त्रिश्वेतया कुशपिंजूलैरूर्ध्वं सीमंतं व्यूहति भूर्भुवः स्वरोमिति त्रिश्च वीणागाथिनौ संशास्ति सोमं रा
जानं संगायेतामिति सोमो नो राजावतु मानुषीः प्रजा निविष्टचक्रासौ नदीमुपावसीतामभवंति ब्राह्मणपाश्च वृद्धाजीवपत्नी जीव
प्रजाम ग्र्युपदिशेयुस्तत्तत्कुर्युः ऋषभो दक्षिणेति ॥ पुंनक्षत्राणि तु पुंनामश्रवणास्तिष्यो हस्तश्चैव पुनर्वसुः।
कारि अभिजित्प्रोष्ठपाच्चैव अनुराधा तथाश्वयुगिति कारिकायामुक्तानि। अभिजिन्नाम उत्तराषाढायाः अंत्यःपादः श्रवणस्य अभिजित
घटिका चतुष्टयमित्येवं षोडशघटिकात्मकं पारिभाषिकं। तत्रापि ऋक्षस्य मध्यमे पादद्वये इदं कर्म कुर्यात्॥
ऋक्षस्य मध्यमे पादद्वये कर्मैतदिष्यते इति कारिकायामुक्तेः। अत्र च पत्न्याः प्रथमजं गर्भमत्तुकामाः सुदुर्भगाः
आयांति काश्चिद्राक्षस्यो रुधिराशनतत्पराः। अलक्ष्यो दुर्भगाः क्रूराः राक्षस्यः पिशिताशनाः। रूपं संप्रगृह्यते
पीड्यंते च विशेषतः। कासांचित्ताद्दशी राक्षसीगणा विहिता पुरा तासां निरसनार्थाय श्रियमावाहयेत्पतिः।
सीमंतकरिणी लक्ष्मी स्तामावहति मंत्रतः। श्रियाश्रितशरीरस्त्वात्तां सजंतीह नाहिताः। तस्मात्प्रथमगर्भ
स्य सीमंतारव्यधिर्धीयत इत्याचार्यवचनात् रुधिरप्रिया लक्ष्मीभूत राक्षसीगणनिरसनद्वारा महाल
क्ष्मीसमावेशार्थं बीजगर्भसमुद्भवैनो निबर्हणद्वारा प्रतिगर्भसंस्कारातिशयार्थं स्त्रीसंस्काररूपं सीमंतोन्नय ६०
नं करिष्ये इत्येवं संकल्पः। ततो गणपतिपूजनादि कृत्वा निषेककाले सोमेव सीमंतोन्नयने तद्धेतिवचना

रल

त्कर्मांगत्वेन कृताकृतं नांदीश्राद्धं दक्षक्रतू च तत्र विश्वेदेवाविति केचित्। तत्राश्वलायनातिरिक्तपरमिदमुक्तं प्राकृते
नावसथ्यासंभवात्। नांदीश्राद्धं कृत्वा सीमंते मंगलानां नामेति वचनान्मंगलार्थं लौकिकरूपं समाधेयः। ततः।
अथाग्निमुपसमाधायेति सूत्रकारोक्तेरग्निस्थापनांतं कृत्वा ततः आस्तीर्य तस्मिन्नासीनाधो तस्मा
सोयुगं तथा। आचांतसलिलां नारीमुपवेश्य प्रयत्नत इति शौनकोक्तेस्ताद्दशीं पत्नीमानडुहाजिने
उपवेश्य तया न्वारब्धः। आघाराज्यभागांते धाता ददातु दाशुष इत्यष्टावाज्याहुतीर्जुहुयात्। नेजमेषेति
हीनपादत्रयं पाठसंस्कृतं। तेनाष्टावाहुतय इति सूत्राशयः। ततः पत्न्याः पश्चात्तिष्ठन्सीमंतं व्यूहनं कु
र्यात्। तदुक्तं शौनकेन। हुत्वोपात्तस्त्रियाः प्रसक्तप्रदेशे प्राङ्मुखस्थित इति। कारिकायां आज्यासादनप
र्यंतं पवित्रकरणाद्यथा। कर्मण्यथोपविष्टायाः समन्वारभते पतिः। स्यादाज्यभागपर्यंतमिध्माधानादि पूर्ववत्
त्। अष्टावाज्याहुतीर्हुत्वा मंत्रैर्धाता ददात्विति। औदुंबरस्यास्तबकः स्तबकाद्यावेन्यवृक्षजः। फलवंत नवकोमल स्ल६
हौ त्रिः शुक्लशललीतथा। त्रीणिस्युः कुशपिंजूला येषिरे कावर्त्तरथ। ललाटकेशयोः संधिमारभ्य व्यूह
नेमवेत्। त्रिर्व्यूहेद्धसीमंतमान्मूर्ध्नोर्भूर्भुवःस्वरों। चतुर्वा व्यूहनं कार्यं सूत्रकारवचो यथा। आ
यतेयेत्वयं मंत्रः। सर्वत्रैवं प्रतीयतामिति। आश्वलायनः। उपात्तस्त्रेत्तानेह त्र्येनीमेकीकृतं तथा। त्रिकुल
मेतु गर्भिण्याः। सीमंतस्थानमूलकत्तु इति सूत्रेपि। ततः। अथाज्येयुग्मेनेति सूत्राद्युग्मेन समेन। शलाटुरिति
अपक्वानां फलानां समाख्या ग्लप्स इति स्तबक उच्यते। सत्वौदुंबरस्य [illegible] वेन्येन॥ त्रीणि एतानि शुक्ला

Indira Gandhi National
Centre for the Arts

त्रियस्याः सेयं त्रेणी ता दृशी शला का कुशापिंजूलैः। कुशा तरुणैः पत्रैः पिंजूलं कुशपत्रैस्यादिति कारिकाक्षा सीमंत०
प्र०चिं० त्रेविभ्य केशान्तादित्यर्थः। एतैरेकीकृतैः ललाटकेशयोः संधिमारभ्य आमूर्धप्रदेशपर्यंतं व्यूहति केशान्
६१ पृथक् करोतीति वृत्तिः। त्रिव्यूहतीति सनेनक्रियावृत्तौ मंत्रावृत्तिरुक्ता। नत्वत्र सकृन्मंत्रेणद्विस्तूष्णी चतुर्वा व्यू
ब हति। ततः वीणागाथिनौ संशास्ति। वीणागाथिनौ ते यद्यस्तौ तयोक्तौ। तौ संप्रेष्यति सोमं राजानं संगायेतामि
ति। तौ च गाथां गायतः। यथाह सोम एव नो राजा वतु मानुषीः। प्रजा निविष्टचक्रासा विति आश्वलायनः। सामस्व च
रेण मंत्रं च सोमं राजानमनुचरेत। समीपस्थ नदीनाम सम्मुखं नमेदधीति॥ असाविसस्य स्थानेयस्या नद्याः
समीपे वसति तस्याः नामग्रहणं। तीति वृत्तिः। ततः स्विष्टकृदादि। तदुक्तं कारिकायां। समीपे या नदी तस्या नाम
गंगे सरस्वती। ततः स्विष्टकृदादि स्यादीयते वृषभस्ततः। ब्राह्मणो तदभावे तु ब्राह्मणेभ्यः प्रदीयते। अत्र च
स्रुवेणैव स्विष्टकृद्धोमः। एवं यत्राज्य होमस्तत्र स्रुवेणैव स्विष्टकृत्। यदा तु पुंसवनानवलोभनसीमंताः तंत्रेण
क्रियंते तदा स्रुचि उपस्तरणपूर्वकं चरो हुतावशेषात्सकृदवदानं गृहीत्वा आज्यं च सीमंतसंबंधी ससकृद्
हीत्वा द्विरभिघार्य स्विष्टकृद्धोमं कुर्यात्। यदा त्वाज्यं च सर्वसंयोगादिति न्यायेन नाज्यस्य स्विष्टकृत् तदा च रोरेव स
ह सन्यत्र विस्तरः। ततः ब्राह्मणभ्यश्च वृद्धा जीवपत्नी जीवप्रजाः घृपदिशेयुस्तत्तत्कुर्यु अत्र गौर्दक्षिणा। अर्षभो
वो दक्षिणा मतो लेच्चन समर्थः। दक्षिणा च ब्राह्मणेभ्यो गृदभावेसंनिहिततेभ्यो ब्राह्मणेभ्यः कर्मांगत्वाद्दक्षिणायाइतिवृत्तिः। अत्र च ६१
पतिरेव कर्ता॥ अस्यैमे पुत्रकामायै इति लिंगात्। नतु पुंसवनादिवत्कर्तास्याद्वरस्तस्या यस्याः पत्युरसंभव

इत्यन्यत्र श्रुतं। अत्र च शातं विप्राणां ज्या इतिश्रुताः। सीमंतेसोऽजनेप्रायश्चित्तमुक्तं। प्रयोगपारिजाते सौम्येन। ब्रह्मो
दनेच सोमेच सीमंतोन्नयने तथा। जातकर्मनवश्राद्धे भुक्त्वा त्वा चांद्रायणं चरेत् इति। ऋ। विधानेतु। अत ऊर्ध्वं जपेन्मंत्र
शतवारं न संशयः। सीमंते च यदा भुंक्ते मुच्यते किल्बिषात्ततः। सीमंते सभवः भ्रूणः। स्त्रीयदा कृतसीमंता प्रसवेतु कथंचन
गृहीतपुत्रा विधिवत्पुनः संस्कारमर्हति। अथ कात्यायनानां पुंसवनसीमंतौ। तत्र पुंसवने गृह्यं। मासे द्वितीये तृतीये
वा यदहः पुंसा नक्षत्रेण चंद्रमा युज्येत। तदहरुपवास्याप्लाव्याहतेवाससी परिधाप्याथ न्यग्रोधावरोहां शुंगांश्च दृषदि पिष्ट्वा पूर्ववदा
सेचनं हिरण्यगर्भोऽद्भ्यः संभृतः इत्येताभ्यां कुर्यात्। कंसो मांथं चैके। कूर्ममपि तं चोपस्थे कृत्वा सपदि कामयेत वीर्यवान्स्यादि
ति विकृसेन मभिमंत्रयेत सुपर्णोसीति प्राग्विष्णुक्रमेभ्यः। अथ सीमंतोन्नयनं। पुंसवनवत्प्रथमगर्भे मासि षष्ठे ष्टमे
तिलमुद्गमिश्रं स्थालीपाकं श्रपयित्वा प्रजापतेर्हुत्वा पश्चादग्नेर्भद्रपीठ उपविष्टायाः युग्मेन शलाटुग्लप्सेनौदुंबरेण त्रि
स्विश्च दर्भपिंजूलैस्त्रेण्या शलल्या वीरतरशंकुना। पूर्णपात्रेण च सीमंतमूर्ध्वं विनयति भूर्भुवः स्वरिति। प्रतिमहा
व्याहृतिभिर्वा व्यूहत आबध्नोत्स यमूर्जो वृक्षः ऊर्जीव फलिनी भवेति अथाह वीणागाथिनौ राजानं संगायेतां यो वान्यो
वीरतरः इति नियुक्तः। मथ्येके गाथामुपोदाहरंति। सोम एव नो राजेमा मानुषीः। प्रजाः अविमुक्तचक्र आसीरंस्तीरे तुभ्यमसा
विति यो नदीमुपावसि तस्या नाम गृह्णाति ततो ब्राह्मणभोजनं॥ इति श्रीमिमांसकानां नभट्टकृते श्रीरामक
ल्पतरौ तेप्रयोगचिंतामणौ पुंसवनानवलोभनसीमंतेषु मूलप्रमाणपरिष्कृताः। अथास्मत्सिद्धः कृतः पुंसवनानवलोभ
न सीमंतानां तंत्रेणप्रयोगः। गृह्याग्नि समीपे कर्ता शुभे मासि पुन्नक्षत्रेविता नव्यतथा मा मा नडुहे चर्मणिपत्नीमु
पवेश्य देशकालौ संकीर्त्य अस्यां मम भार्यायां जनिष्यमाण सर्वगर्भाणां बैजिक गार्भिक दोषनाश पुंरूपता ज्ञानोदयप्र

Indira Gandhi National
Centre for the Arts

तिरोधिनाशद्वारेश्वरप्रीत्यर्थं पुंसवनमनवलोभनं च तथा तनुरुधिरप्रियालक्ष्मीभूतराक्षसीगणनाशद्वारा ममहाल सीमंत॰
प्र॰वि॰ लक्ष्मीसमावेशार्थं प्रतिगर्भं बीजगर्भजैनोनाधातृरासेस्कारातिशयार्थं सीमंतोन्नयनं च तंत्रेण करिष्य इति संकल्प्य
६२ गणपतिपूजनादि नांदीश्राद्धांते कृते पवमानं पुंसवने सीमंते च मंगलसंस्कारं प्रधानाग्निं निधाय अग्निं नत्वा हितेना
विसादि चक्षुषी ते प्रजापतिं चरुणा तथा सीमंतोन्नयनहोमे द्विर्धातारं द्विः राकां। त्रिर्विष्णुं प्रजापतिं चाज्येन शेषेण
स्विष्टकृतमित्यादि। ततः निर्वापादि नाप्राजापत्यं चरुं कृत्वाज्यसंस्कारांते आत्मानमग्निं चांतरा पत्नीमावीतसलिला
मानीय स्वदक्षिणतः। चर्मण्युपवेश्य तया न्वारब्धः आज्यभागांते क्षालिते पत्नीहस्ते प्रस्ततिमितं गोदधि तत्र
स्थापितं यवं तत्सादृश्यो द्वौ माषौ निधाय किं पिबसीति त्रिः पृष्ट्वा पुंसवनमिति सा त्रिरेकैकं प्राश्याचम्य पुनरेव
द्विः प्राश्याचमेत्। इदं पुंसवनं। ततो दूर्वाकल्कं कन्यया पेषितं वस्त्रे गृहीत्वा पत्न्याः दक्षिणनासापुटे अंगुष्ठाग्रे
ज णस्रक्तैर्यांते रसांसिंचेत्। ॐ आलेग र्भो या निमेतु पुमान् बाण इवेषुधिं। आवीजो दोमसां पुत्रस्ते दशमास्यः।
करोमि ते प्राजापत्यमागर्भो योनिमेतु ते। अनूनः पूर्णो जायतामश्लोणोपिशाचधीतः। पुमांस्ते पुत्रो।
नारी तं पुमाननुजायतां। तानि भद्राणि बीजान्यृषभा जनयंतु नौ। यानि भद्राणि बीजान्यृषभा जनयंति नः।
काम तैस्त्वं पुत्रान् विंदस्व सा प्रसूर्धेनुका भव। कामः समृध्यतां मह्यमपराजितमेव मे। यं कामं कामये देव तं
मे वायो समर्धय। ॐ अग्निरेतु प्रथमो देवतानां सोस्यै प्रजां मुंचतु मृत्युपाशात्। तदयं राजा वरुणोनुमन्य ६२
तां यथेयं स्त्री पौत्रमघं न रोदात्। इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः। अशून्योप



स्था जीवतामस्तु माता पौत्रमानंदमभिप्रबुध्यतां। मा ते गृहे निशि घोष उत्थादन्यत्र त्वद्रुदत्यः संविशंतु। मा त्वं
विकेश्युर आवधिष्ठा जीवपत्नी पतिलोके विराज। पश्यंती प्रजां सुमनस्यमाना। अप्रजस्तां पौत्रमृत्युं पा
प्मानमुत वा अघं। शीर्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः प्रतिमुंचामि पाशं। देवकृतं ब्राह्मणं कल्पमानं तेन हन्मि योनिषदः पि
शाचान्। क्रव्यादो मृत्यूनधरान् पादयामि दीर्घमायुस्तव जीवंतु पुत्रा इति नस्यं दत्त्वा। मा चरुमवदा
य प्रजापतये स्वाहेति हुत्वा। यत्ते सुशीमे हृदये हितमंतः प्रजापतौ। मन्येहं मां तद्विद्वांसं माहं पौत्रमघं नियामिति प
त्न्या हृदयं स्पृष्ट्वा सीमंते स्नुवेणाज्यं जुहुयात्। धाता ददातु धाता प्रजानामिति द्वयोर्हिरण्यगर्भो धातानुष्टुप् द्विती
या त्रिष्टुप्। सीमंतोन्नयने प्रधानाज्यहोमे वि॰ धाता ददातु दाशुषे प्राचीं जीवातुमक्षितां वयं देवस्य धीमहि सुमतिं वा
जिनीवतः स्वाहा। धात्र इदं न॰ धाता प्रजानामुत राय ईशे धातेदं विश्वं भुवनं जजान। धाता कृष्टीरनिमिषाभिचष्टे धा
त्र इद्धव्यं घृतवज्जुहोत स्वाहा। धात्र इदं। राकामहं। यास्ते राके इति द्वयोर्गृत्समदो राका जगती। उभयत्र राकाया
इदं। नेजमेषेति त्रयाणां त्वष्टा विष्णुरनुष्टुप्। नेजमेष। यथेयं पृथिवी। विष्णोः श्रेष्ठेन। सर्वत्र विष्णव इदं। प्रजापते न
त्वदेतान्युक्त्वा पत्न्याः पश्चात् तिष्ठन्। उदुंबरगुच्छं त्रिः शुक्लशलली कुशपत्रत्रयं चोर्णासूत्रेण दीरुस। भूर्भुवः स्वर्ध्याहृति शि
रवं॰ ॐ व्याहृतीनां प्रजापतिः प्रजापतिर्बृहती सीमंतकरणे वि॰ ॐ भूर्भुवः स्वरोमिति उत्रिश्च तु वा सीमंतं व्य
ह॰ गुच्छं तत्रैव संस्थाप्यौदुंबरमालां कंठे दत्त्वा॰ सोमं राजानं संगायेतामिति वीणागाथिनौ द्विजौ संप्रेष्य सोमो
नो राजावतु मानुषीः प्रजा निविष्टचक्रासौ गंगे इति समीपनदीनाम्ना तौ त्रिर्गापयेतां। ततः स्विष्टकृदादि होमशेषं

Indira Gandhi National
Centre for the Arts

समाप्य ब्राह्मणे यस्मै वा वृषं दक्षिणां दत्वा शतमष्टौ वा ब्राह्मणान् भोजयेत्। ततः नीराजनं कृत्वा फलतांबूलादि विष्णुबलि
प्र०चि० तद्धस्ते दत्वा शिषो दद्यात्। इत्यस्मत्सिद्धकृतः पुंसवनानवलोभनसीमंतोन्नयनानां तंत्रेण प्रयोगः।
६२ अथ विष्णुबलिः। आश्वलायनः। तथा विष्णुबलिश्चापि अष्टमे गर्भपुष्टये। गर्भे वा धानि रक्ष्यर्थं सुखप्र ६५
सवार्थमेव च। सर्वदोषापनुत्यर्थं बलिः कार्यो यथाविधीति। श्रीधरः। रोहिण्यां वा श्रवणे पूर्वपक्षे द्वादश्यां वास
नाकः प्तमे वा तिथौ च। मध्याह्ने पूर्वे नराङ्गो विष्णोः पूजां कारयेत् पूर्वपुष्यै। तेन देशकालौ संकीर्त्य गर्भिण्याः मम पत्न्याः गर्भ
स्य निर्बाधपरिपोषणपूर्वकसुखप्रसवसिद्ध्यर्थं विष्णुप्रीत्यर्थं विष्णुबलिं करिष्य इत्येवं संकल्प्य। ततः स्थंडिले लौ
किकाग्निं समाधाय गोमयेनोपलेपिते दत्तैर्हुत्वाज्यभागांतं स्थंडिले चार्चयेद्धरिं। अग्नेर्दक्षिणतः कुर्यात् स्थंडि
ले यजनं हरेः विना स्थंडिलयोगेन केचिन् जुह्वति वह्निमाः। स्थंडिलमकृत्वैवा अष्टदले विष्णुपूजनं कुर्यादित्यन्ये।
तेनाज्यभागांतं कृत्वा चरुहविः सिद्धेन चरुणा वदानधर्मेण चतुःषष्टिमंत्रैर्विष्णवे जुहुयात् तथा। अतो देवादृति
चरुं तस्मिन्नग्ना वधिश्रिते। षड्भिर्विष्णोर्नुकादयश्च दशभिः शेषसप्तभिर्हुनेत्। अग्ना वधिश्रिते चरुं अतो देवाद्दिष
ड्भिर्विष्णो र्नुकं भिस्यादयश्च दशभिः सप्तभिश्च जुहुयादित्यर्थः। अतो देवेति पंचानां मेधातिथिर्विष्णुर्गायत्री। विष्णो
र्नुकमिति सप्तदशानां उचथ्यपुत्रो दीर्घतमा ऋषिः। विष्णुर्देवता प्रथमस्य त्रैष्टुभं द्वितीयतृतीये जागते। संवा
मीसप्तानां भरद्वाजो विष्णुस्त्रिष्टुप्। परो मात्रयेति वार्हस्पत्यवसिष्ठो विष्णुस्त्रिष्टुप्॥ सहस्रशीर्षेति वर्गत्रयस्य
नारायणः पुरुषोऽनुष्टुप्। अंत्यास्त्रिष्टुप्। विष्णुर्योनिमिति त्रयाणां विष्णुस्त्रिष्टुप्। सर्वत्र विष्णुर्देवता। होमानंतर ६६

६

मग्नेरैशान्यां द्वात्रिंशदंगुलायामविस्तारे गोमयेनोपलिप्ते स्थंडिले चतुरंगुलचतुःषष्टिपंक्तिनिर्जसामंडलं कृत्वा
नैर्ऋतपदमारभ्य बाह्यपंक्तौ तदनंतरासु च पंक्तिषु पूर्वोक्तैः चतुःषष्टिमंत्रैः स्वाहांतैः प्रादक्षिण्येन तत्तेन चरु
६ णा बलिं दत्वा सर्वत्र विष्णव इदमिति त्यागं कृत्वा। मध्ये ॐ नमो नारायणायेति बलिं दत्वा तेनैव मंत्रेणार्घ्यं दत्वा ब
लिं दत्वा बलिशेषात् पिंडद्वयं कृत्वा दंपती प्राश्नीयातां। तत आचम्य स्विष्टकृदादि शेषं समाप्य ब्राह्मणान् भोजयित्वा
तृष्णी कर्मेश्वरार्पणं कुर्यात्। अयं च प्रतिगर्भं बलिः कार्यः सीमंतवत्प्रशस्यते इत्याश्वलायनात्। प्रतिगर्भं कार्यः। ग नवच
र्भसंस्कारत्वादनुक्तत्वान्न शिशावावर्तंतीति भट्टाः। इति विष्णुबलिः। अथ गर्भिणीधर्माः। विष्णुधर्मोत्तरे। कटुती
क्ष्णकषायाणि असृक्लवणानि च। आयासं च व्यवायं च गर्भिणी वर्जयेत् सदा। कश्यपः॥ गर्भिणी कुंजराद्या
दिशैलहर्म्यादिरोहणं। व्यायामं शीघ्रगमनं शकटारोहणं त्यजेत्। शोकं रक्तविमोक्षं च साध्वसं कुक्कुटासनं। व्यव
सायं दिवास्वापं रात्रौ जागरणं त्यजेत्। निर्णयसिंधौ। अंगारभस्मास्थिकपालचुल्लीशूर्पादिके पविशेन्न ना
री। नोलूखलादिषु दृषदादिके वापि तत्र तुषाये न तथोपविशेत्। नो मार्जनीगोमयपिंडकारी कुर्यान्न वा रिक्तघटा ह
नंसा। अंगारस्पृष्टा नखरेखां लिखेत् तक्रं कलिंव पुष्पं गमनं न कुर्यात्। नो मुक्तकेशी विवशा च ना स्यात्
त्। भुंक्ते न संध्यावसरे न शेते। नामंगलं वाक्यमुदीरयेत् साभ्र आलये वृक्षतले न यायात्। याज्ञवल्क्यः। दो
हृदस्याप्रदानेन गर्भो दोषमवाप्नुयात्। वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियाः॥ दोहदं गर्भिणीप्रियं।
अथ गर्भिणीपतिधर्माः। कालविधाने। क्षौरं शवानुगमनं नखकृंतनं च युद्धादि वास्तुकरणं त्वतिदूरयानं। उद्वा

Indira Gandhi National Centre for the Arts

हमोपनयनं जलपेश्च गाहमायुः क्षयार्थे ॥ मिति गर्भिणीकापतीनां । तथा । प्रव्यक्तगर्भोपतिरब्धियानं
म तस्य दाहं क्षुरकर्म संगे । तस्यानुयत्नेन गयादि तीर्थयागादिकं वास्तु विधिं न कुर्यात् । प्रव्यक्तगर्भावनि
ता भवेन्मासत्रयात्परं ॥ षण्मासात्परतः सूतिनेत्र मेरिए वासिनी । दिष्टं सूतिकागृहे । मिताक्षरायां । उद
न्वतो ऽस्ति स्नानं नरव कृशादि कृन्तनं । अंतर्वत्न्याः पतिः कुर्वन्नप्रजाजायते ध्रुवं । गारुडे । गयायां पिंडदानस्य
न कदाचिन्निरा क्रियाअत्र काले दाप्रत्यय स्मृतेर्निषिद्धकालस्येव मलमासादेरपवादो न तु गर्भिणीपत्या
शौचादि निमित्तस्येति तात्पर्यं । अथ सूतिकाप्रवेशः । तच्चेनेत्र सा कार्यं । वारुण्यां मो अन गृहे नेत्रे
शोवादि निमित्तस्येति तात्वरणः । अथ सूतिकाप्रवेशः । तच्चेने सा कार्यं । वारुण्यां सा । पुनर्वसौ पुष्ये हस्ते
त्यां सूतिकागृहमिति वसिष्ठवचनात् । गर्गः । रोहिण्ये वपो मृगसु स्वाती वरुणयो रपि । पुनर्वसौ पुष्ये ह
स्ते चाश्विन्यां सतिका गारे प्रवेशनं ॥ एतच्च संभवे । प्रसूति संभवे काले सद्य ए
स्त चानि धा अनुत्तरासु च । मैत्रे त्वाष्ट्रे तथाश्विन्यां सतिकागारे वेशनं ॥ एतच्च संभवे । प्रसूति संभवे काले सद्य ए
व प्रवेशयेदिति वसिष्ठोक्तेः । मार्कंडेयपुराणे । क्रां मंतिशु कपीतानि स्त्रीणां गर्भोदरे तथा । तेनाप्यापितदेहस्तु जंतुर्बुद्धि
मुपैति वै । तथा । मध्ये क्लीबस्तु वामस्त्री दक्षिणे पुरुषस्तथा । तिष्ठत्युदरभागे तु पृष्ठस्याभिमुखस्तथा । यातवक्षः पुन
र्मोत्री पुनर्गर्भे मोहस्तस्य प्रधावति । अष्टमे मास्यतो गर्भो जातः प्राणैर्विमुच्यते । नवमे दशमे वापि प्रबलैः सूतिमारु
तैः । निःसार्यते वाण इव यंत्रच्छिद्रेण सज्वर इति । ऋग्विधाने । प्रमंदिनेति सूक्तं जपेद्गर्भप्रमोचनं । इंद्रं वमनसा
मिति वायुना गर्भं प्रमुच्यति । अन्यदपि । विजिहीर्षु वनस्पत इत्यनेन उदकमभिमंत्र्य तस्याः पाययेत्सुखप्रसवा । धोमि
सुक्तं । तत्रैव । प्रयोगपारिजाते तु एरंडमूलं चूर्णं न सप्ततेन तथैवतां सुखप्रसवनार्थाय पाययेत्कूपयेत्तत्त





इत्युक्तं । षष्ठातिकतैले दूर्वाभिर्का दत्त्वाभिमंत्र्य दद्यात् । तत्र मंत्रः । हिमवत्स्योत्तरे पार्श्वे विशल्या नाम राक्षसी ॥
तस्यास्तु घोर शब्देन विशल्या भव तु गर्भिणी । अत्र यमल जातयोः संस्कारक्रमार्थं ज्येष्ठकनिष्ठभाव उक्तो मनु
ना । जन्म ज्येष्ठेन चाह्वानं सुब्रह्मण्यास्वपि स्मृतं । यमयोश्चैव गर्भेषु जन्मतो ज्येष्ठता स्मृता ॥ देवलोपि ॥ यस्य
जातस्य यमलौ पश्यंति प्रथमं मुखं । संतानं पितरश्चैव तस्मिन्ज्येष्ठ्यं प्रतिष्ठितं । श्रीभागवते तु पश्चाद्गुस
जातस्य यमलौ पश्यंति प्रथमं मुखे । संतानं पितरश्चैव तस्मिन् ज्येष्ठ्यं प्रतिष्ठितं । श्रीभागवते तु पश्चादुत्प
न्नस्य ज्येष्ठ्यमुक्तं । अथ जातकर्म । मुखं दृष्ट्वा जातकर्म कुर्यात् । ऋणमस्मिन्सन्नयति इति श्रुतेः । वसिष्ठः । श्रुत्वा जातं पिता
पुत्रं सचैलं स्नानमाचरेत् । उत्तराभिमुखो भूत्वा नद्यां वा देवखातके । रात्रौ तडागादौ स्नानाशक्तो तु सं
प्राप्य नः । दिवा पद्मातं तोयं कृत्वा स्वर्णयुतं तु तत् । रात्रि स्नाने तु संप्राप्ते स्नायादनलसंनिधाविति । तत्का
ल्यायनः । दिवा पदाहृतं तोयं कृत्वा स्वर्णयुतं तुलत् । रात्रिस्नाने तु संप्राप्ते स्नायादनलसंनिधाविति । तत्का
कमाह मनुः । प्राङ्नाभिवर्द्धनात्पुंसो जातकर्म विधीयते । नर्द्धनं छेदनं । वैजवापः । जन्मतो नंतरं कार्यं जातकर्म
यथाविधि । दैवादतीतकालं चेदतीते सूतके भवेत् ॥ विष्णुधर्मे । अछिन्ननाभिकर्तव्यं । श्राद्धं वै पुत्रजन्म
नि । पुत्रपदेन कन्यापि गृह्यते । तथा च कार्ष्णाजिनिः । प्रादुर्भावे पुत्रपुत्र्योर्ग्रहणे चंद्रसूर्ययोः । स्नात्वानंतर
मात्मिपात पितॄन्श्राद्धेन तर्पयेदिति । तच्च श्राद्धं रात्रावपि कार्यं । पुत्रजन्मनि यात्रायां शर्वर्यां दत्तमक्ष
यमिति । व्यासोक्तेः । केचित् । नाष्टका सु भवेच्छ्राद्धं न श्राद्धे श्राद्धमिष्यते । न सोष्यंतीजातकर्म प्रोषितागत
कर्मस्वति छंदोगपरिशिष्टे वचनान्न जातकर्मणि नांदीश्राद्धमित्याहुः । सोष्यंती आसन्नप्रसवा । तस्याः सोष्यं
ती मथ्युक्ष्येत्युक्तं कर्म । प्रोषितेति प्रोष्येत्यागृहमुपतिष्ठते पुत्रं दृष्ट्वा जपतीत्युक्तं कर्म । अन्ये तु कोसाय

प

Indira Gandhi National Centre for the Arts

प्र॰चि॰ नो कृत्स्यश्राद्धस्य पाक प्राशान्या साकस्य च। जातश्राद्धनिषेधात्तदेव नान्दीनयात् परत्वायं निषेधः। आमहेमश्रा
श्राद्धं तु भवत्येवेत्याहुः। अन्ये तु। जातकर्मण्येव निषेधः। पुत्रजन्मनिमित्तं कं तु कुर्यमेव। जन्मन्यथोपनयन
६५ स्मृतेः। नैमित्तकमथो वक्ष्ये श्राद्धमाभ्युदयात्मकं। पुत्रजन्मनि तत्कुर्यात् जातकर्मसमं नरैरिति मार्कंडेयपुराणा
त्। तेन जातकर्मसममिति समपदान्तेदं जातकर्मांगमित्याहुः। गौडा अप्येवं। वाचस्पतिमिश्रास्तु जातकर्मणि का
लोत्तरे श्राद्धनिषेधो न जन्मनीत्याहुः। वस्तुतस्तु। छंदोगपरिशिष्टवचनात् द्विषयक एवायं निषेधः अन्यथा वृ
द्धिश्राद्धं तु कर्तव्यं जातकर्मादिकेषु हीति हेमाद्रिधृत वचनविरोधापत्तेः। न चायमन्नद्रव्यसंविता नवहुश्रीहि
र्मा नामावादितियुक्तं प्रतीमः। तच्चामेन हेम्ना वेति केचित्। हेमाद्रिस्तु पुत्रजन्मनि कुर्वीत श्राद्धं हेम्नैव बुद्धि
मान्। नपक्केन नचामेन कल्याणान्यभिकामयन्निति। संवर्त वचनाद्धेम्ना वेत्याह। तेन पुमान् ब्राह्मणेभ्यः दस्य मा
नं। हेमनिष्क्रयभूतं वा द्रव्यं स्वाहा नमः इदं च वृद्धिरित्येवं प्रयोगः कार्तिकायां। जातकर्म ततः कुर्याद्भ्येरा
लंभनात्पुरा। एकस्मिन्भाजने सर्पिर्मधुलीढि समानयेत्। अवघृष्य हिरण्येन संसृज्य तन्मेलनं वा यथा।
हिरण्येन कुमारं तं प्राशयेन्मधुसर्पिषी। प्रते ददामि मंत्रेण मातुरुत्संगसंस्थितं। अत्रेन जातकर्मात्पूर्वं
मातुरपि नास्पृश्यत्वं। अत एव शुद्धिं तत्त्वे नालच्छेदात्प्राक् मातुः स्पर्शे न दोष इत्युक्तं। तथा हिरण्यं दक्षिणे ६५
कर्णे निधाय तामृचं जपेत्। मेधां त इति सव्ये च निधाय तामृचं जपेत्। तेन कर्णद्वये पि मेधांत इति मंत्रः।
अकत्रयेणास्यं युगपद्दसावभिमृशेदथ। प्रथमाश्मा भवेति द्वितीया नीसपरा तथा तृतीया सेप्रयंधीति

कुमार्या स्याद्मंत्रकं। इदमत्र गद्यं। कुमारं जातं पुरान्यैरालंभात्सर्पिर्मधुनी हिरण्यनिकाषं हिरण्येन प्राश
६६ येत् प्रते ददामि मधुनो घृतस्य वेदं सवित्रा प्रसूतं मघोनां। आयुष्मान् गुप्तो देवताभिः शतं जीव शरदो लोके
अस्मिन्निति। कर्णयो रुपरि निधाय मेधाजननं जपति मेधां ते देवः सविता० पुष्करस्रजाविति। अंसावभिमृश
ति। अश्मा भव० शरदः शतमिती दृः श्रेष्ठानि द्रविणानि धेह्यस्मे प्रयंधि मघवन्नृजीषिन्निति चेति। कुमारग्रह
णं कुमारीनिवृत्त्यर्थमिति केचित्। तन्न। आवृतैव कुमार्यै इत्यस्मिन् तस्या अपि वक्ष्यमाणत्वात्। यद्यपीदं कुमार्य
नुवादेनामंत्रकत्वमात्रविधिपरं। न तु कुमार्या जातकर्मादिविधायकं। तथाप्यनुवादान्यथानुपपत्त्या वि
रुत्वा वर्धित्वानुवादवदुपरि हि देवश्यो भारयतीति न च कुमार्याः जातकर्म अमंत्रकत्वं वा नेन विधीयत इति
साशयः। मनुरपि। अमंत्रिका तु कार्येयं स्त्रीणामावृदशेषत इति। याज्ञवल्क्योपि तूष्णीमेताः क्रिया स्त्रीणां
विवाहस्तु समंत्रक इति। अत्र वोद्धैः प्रकीर्णप्रचरंतीति वचनीयानि देशाभावाद्यत्नाधवर्णवेकाम्याइत्यय
इति। व प्रथमांत पदोपात्तासु प्रधान क्रियास्वेय तूष्णीं त्वविधिस्तेन पुण्याहवाचन वृद्धिश्राद्धादिस्त्रीणां समं
त्रकमेति। युक्तं न च नवैताः कर्णवेधांतामंत्रवर्जं क्रियाः स्त्रियाः। विवाहो मंत्रतस्तस्याः शूद्रस्यामंत्र
तो दशेति व्यासवाक्ये शूद्रसंबंधिक्रियाणां प्रथमांतपदोपात्तत्वात्तत्रापि प्रधाने तूष्णीं त्वविध्यापत्त्या तेषां पुण्याहवा
चनादि स्यादिति वा संभूद्रो वर्णाश्चतुर्थोपि वर्णत्वाद्धर्ममर्हति। वेदमंत्रस्वधास्वाहावषट्कारादिभिर्विनेतिभूद्रसं
निधौ वेदमंत्र[illegible]पाहुनि निं नतस्से वेदिपुण्याहवाचनादेः वोतणमंत्रेरनुष्ठानात्तत्र विशेषमाह आचार्यः। जात
वेधे

Indira Gandhi National
Centre for the Arts

सं

कर्मादि चूडान्तं स्त्रीणां कार्यम मंत्रकं। होमस्तु पुंवत्स्यात् स्त्रीणां चूडाकृता वपीति। तेन स्त्रीणां चूडाकरणे समं
त्रकएव होमः। तेन स्त्रीणामावृद्दोष इति मनुवचनस्यायस्यान्तां प्रधानक्रियासु सर्वे मंत्रकमेवे
ति युक्तं। तेन कुमारग्रहणं सविकारार्थं चाष्टमे वर्षे ब्राह्मणमुपनयीत् इत्येवमुपनयने द्युपंप्रमाणविधीयते तेन
कुमारस्यैवं संस्कारसमर्थं तद्ग्रहणं न चाब्राह्मणामिति पुंल्लिंगोपदेशादेव कुमारीत्यादीनि सिध्यतीति तामे।
उद्देश्य विशेषणं पुंस्त्वाविवक्षया कुमार्या अप्युपनयन प्राप्तौ कुमारग्रहणस्य तद्यावृत्त्यर्थत्वादिति कृता
शयः। एवं चात ग्रहणमप्यधिकारार्थं। तेन एतेन गोदानं षोडशे वर्षे वर्ष इति जन्मतः प्रभृतीत्येवलभ्य
ते। न तूपनयनप्रभृति। एवं यमयो ज्येष्ठे तत्क्रमेण संस्कारकरणे चायमेव जातादिकारो नियामकः।
न तु गर्भाधिकारः। येन पश्चादुत्पन्नस्य ज्येष्ठं स्यात्। मनुस्मात्र वते पश्चादुत्पन्नस्य ज्येष्ठमुक्तं त
द्दूचातिरिक्तपरं। देशाचारस्य व्यवस्थेयमेव पुरा प्राक्। अभ्यग्रहणं प्रसवे अनधिकृता नामालंभनात् प्राक्क
र्तव्यमित्येवमर्थमिति। तेन कैवर्तादि स्त्रीणां स्पर्शेऽपि न दोषः। तत्तत्प्रयोगपारिजाते आचार्यः कैवर्तादि
स्त्रियो मुक्त्वा न स्पृश्यः शिशुस्तदत इति। यत्तु तस्तु मे रंमाके तु नाडीकृतिस्मृत्यात्। नैरस्य नालस्यालंभात्
च्छेदनात् प्रागिति सूत्रार्थः। एवं च या बहिष्कृते नालभिसाधनं गृह्यत इति। वयं। न यतस्यापि पूर्वमेव्याख्या
संमता। सर्पिर्मधुनी च हिरण्येनावघर्षति। तेहिरण्यसंसक्ते हिरण्ये। नप्राशयेन्मातुरुपस्थ आसीनं मं
त्रेणेति वृत्तिः। वृत्तौ उपस्थ शब्दः। उत्संगवाची न तु सामीप्यवाची। चूडाकरणप्रकरणे तु उपस्थशब्दस्य  ६६
प

ति कारणे वोत्संगपरत्वेन व्याख्यानात्। सर्पिर्मधुनी च मानतो विषमे ग्राह्ये साम्ये विषत्वाव प्रसंगादिति प्रयो पी
तिकारणे वोत्संगपरत्वेन व्याख्यानात्। तत्र प्राशनात् स्वर्णशिशोः कर्णेत्तु दक्षिण इति शौनक वचनात्ताद्दृशं
मपारिजातः। प्राशनानंतरं च। ततः प्रक्षाल्य तत्स्वर्णं शिशोः कर्णे तु दक्षिण इति शौनकवचनात्ताद्दृशं
हिरण्यं दक्षिणे तत्क्रमेण कर्णयोर्निधाय मेधां त इति मंत्रं जपेत्। उपग्रहणं तन्मुखसमीपे स्वमुखं नि
धाय जपार्थमिति वृत्तिः। मेधाजननमिति मंत्रानामधेयं। अत्र सकृन्मंत्रः। पर्यायेण कर्णयोर्हिरण्यस्थो
पयानं। यद्वा उभय त्र मंत्रावृत्तिरिति वृत्तौ पक्षद्वयमुक्तं। तत्रासपक्षएव युक्तः सकृन्मंत्रेण सा क्रिया वृत्तो स्य
पधाने। यद्वा उभयत्र मंत्रावृत्तिरिति वृत्तौ पक्षद्वयमुक्तं। तत्रासपक्ष एव युक्तः सकृन्मंत्रेण सो क्रिया वृत्तो स्य
मंत्रावृत्तिज्ञापकत्वात्। अत एवावरक्षोदिवहतिर्हतिमंत्रस्य व्याख्यानकरणकृपावनींगत्वात् साम्यास
स्यचापात्तस्य तंडुलभावनांगत्वात्। ताद्दृशस्यैवं मंत्रौ नमितिप्रधानक्रियावृत्तसभावादसकृदेव मंत्रद्वयु
कं छांदसो। अंसाववि मर्शतीत्यत्र स्तनकौशोर्मध्यप्रदेशोंऽसः। अत्र च त्रयो मंत्राः। तत्र सकृन्मंत्रपर्यायेण चो
साभिमर्शनं द्वयोरपि मर्शनं वा दिति केचित्। अन्ये तु तत्र देवी द्वारौ मामिति द्विवचनयुक्तत्वान्मंत्रस्य सकृत्पाठो
युक्तः। गृहत्वश्मा भवेत्येकवचनयुक्तत्वान्मंत्रत्रयस्यावृत्तिरेव युक्तेति। अपरे तु नात्राश्मा भवेत्यादि मंत्रे
वंसानुच्यंते। किं तर्हि कुमारः स चैक एवेति नावृत्तिर्मंत्रस्येति। अन्ये तु शरदः। शतमिति आद्यमंत्रांते इति करण
त्वेपात् क्रियापदः। तेन अश्मा भव त्याद्यो मंत्रः दक्षिणांसाभिमर्शने मंत्रद्वयं तु सव्यांसाभिमर्शने इत्येव
मंत्र विभागः। अन्यथा मंत्र मध्ये इति करणामर्थं स्यादित्याहुः। सिद्धांतस्तु सकृदेव त्रयो मंत्राः। न च सकृन्मंत्र
त्रयं पर्यायेण वांसाभिमर्शनं द्वयोरभिमर्शनं वा दिति वाच्यं। तत्र हस्तद्वयेन द्वारकावयवोः स्पर्शे अनादेशे दक्षि

Indira Gandhi National
Centre for the Arts

प्र॰चि॰ णं प्रतीयादिति परिभाषा बाधापत्तेरेकेन तु उभयत्र स्पर्शस्याशक्यत्वाच्च तत्तत्र स तु मंत्रपर्यायेण का
६६ र्यो रश्मिमर्शनं । रहत्कुशको तेमुगपदेसौ स्पृष्टुं । न च मध्ये इति करणेन करणभेदात् क्रियाभेद इति वाच्यं पु
रोऽश्मस्फोटने आसीदसदनं स्वमाक्षीपदसदनमिति माहिंसीरेवे त्रोरितैतिमंत्रे । नमो यत्र निषीदसी समुं मा हिंसी
रिसमास्य बहिः पतन मंत्रे च मध्ये इतिकारदर्शनेन तस्य कारणभेदसाधकत्वात् । वस्तुतस्तु मध्ये इति कर
णेन करणभेदेऽपि अस्मे प्रयंधि मघवन्नृजीषिन्नित्यं तेन च कारणगोश्चाम्ब्रे सादिव त्करणानां समुच्चयो केन
कश्चिद्विरोध इति वृत्तिकाराशयः । अत्र च गर्भाम्बुपानदोषाणामपनुत्त्यै शिशुं लिम्पेत । प्राशयेन्मधुना सार्द्धं सा
ज्यं होमरसं शुभं ॥ स्वर्णो न कर्णयोः श्रीवस्पर्शनादेव तच्छिरो । मंत्र एव च पोष्यलं स्यात्तदूर्ध्वमतः शु
चिः । मंत्रालंघनमात्रेण शुचिः स्यान्मलशासस्य । रक्षाप्युषोर्विवृ प्यर्थमजि प्रतिपिता सुतं । तावच्चामस्म
रक्षस्य नमोऽन्तं त्वधपायेदिति प्रयोगपारिजाते ॥ आचार्यवचनादस्य कुमारस्य गर्भाम्बुपानजनित
सकलदोषनिर्हरणायुर्मेधाभिवृद्धिबीजगर्भजैनोनाशार्थं च जातकर्म करिष्य इति संकल्पः । ततो गणपति
पूजनादीनि कृत्वा जातहोमकरणपक्षे जातकर्मादिसिध्यर्थं योग्याहुतिभिरावृतः । सोऽग्निः पौरुष इति संग्रह
वचनात्पौरुषं संतं प्रबलसंतं वा अग्निं व्याहृतिभिः प्रतिष्ठाप्यान्वाधाने पूर्ववत् अग्निमिन्द्रं प्रजापतिं विश्वेदेवान्ब्र
ह्मेत्यन्वादिश्याहुतीर्जुहुयात् । तदुक्तं गृह्यपरिशिष्टे । अथ जातकर्म । कुमारे जाते पुरान्यैरालंभादग्निरिन्द्रः प्रजाप ६६
ब्रले तिर्विश्वेदेवाः स्य नादिष्टदेवता न्यार्द्धा प्राक् स्विष्टकृतः सर्पिषो होमानादि कारयेदिति । अस्मिंश्च होमे परिस्तरणं नि

नित्यं । अन्यादिशास्य होमेषु तत्र नित्यापरिस्तृतिवचनात् । होमोत्तरं च प्राशनाद्येसाभिमर्शने कृते रक्षोघ्नपुरुषोर्विद्धि
पर्थं शिशोर्मूर्द्धानं अंगादंगात्संभवसि हृदयादधिजायसे इति मंत्रेण त्रिराघ्राय तद्दक्षिणे शिशोः करिष्यमाण
जातशिशोः करिष्यमाणनामासम नामा तु दक्षिणस्तनं प्रक्षाल्य इमं कुमार इति मंत्रेण माता कुमारं पाययेदि
ति । ततः । ब्राह्मणेभ्यो गोभूतिलहिरण्यादि दद्यात् वाराहपुराणे यावत्कालं सुते जाते नाडी छिद्येत नृप । चन्द्रसूर्या
परागेण तमाहुः समयं व्रतं । हारीतः । जाते कुमारे पितॄणामामोदात्पुण्यं तस्मात्तत्र दद्यात्तिलपूर्णानि पात्राणि हिरण्य
रूर्मिं गां रथादि च दद्यादिति । तत्र प्रतिग्रहे अदोषमाह प्रयोगपारिजाते । याज्ञवल्क्यः । कुमारजन्मदिवसे
विप्रैः कार्यः प्रतिग्रहः । हिरण्यभूगवाश्वानां धान्यादीनां तथैव च । तत्र सर्वं प्रतिग्राह्यं पक्वान्नं च विवर्जयेत् । भक्ष
यित्वा तु तन्मोहाद्द्विजश्चान्द्रायणं चरेत् । सूतके तु सकुल्यानां न दोषो मनुरब्रवीत् । एतच्च जातकर्म जननाशौचे मर
प्र॰आप णाशौचे च कार्यमित्याह ...... मिताक्षरायां तिः । आशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत् । कर्तुस्तात्कालिकी
शुद्धिः पूर्वाशौचेन शुध्यति । निर्णयसिंधौ तु मृताशौचस्य मध्ये तु पुत्रजन्म यदा भवेत् । आशौचापगमे कार्यं
जातकर्म यथाविधीति स्मृतिसंग्रहोक्तेराशौचान्ते कार्यमित्युक्तं । स्मृत्यर्थसारेऽपि विकल्प उक्तः ॥ इदं च जातकर्मा
द्युक्तकालाभावे नक्षत्रादौ कार्यं तदाह बृहस्पतिः । मुख्यालाभे विहितेन विधिः क्लीबः प्रमादतः । सन्त्रैति न
थि नाविद्यार्थे वं पुनः पुनः । मृदुध्रुवचरक्षिप्रभेषु बाम्युदयेऽपि च । गुरौ शुक्रेऽथवाऽर्के जातकर्म च नाम चेति ॥
मृदुध्रुवादीन्याह श्रीधरः । रोहिण्युत्तरभे स्थिरं । मित्रेशमूलं कें द्रोरगाद्रारूणं क्षिप्रं । वाश्विदिने पुष्यमनलं द्रागी

Indira Gandhi National Centre for the Arts

प्र.नि. तुसाधारणं।उक्तं पूर्वमर्धांतकं मृदुगति साश्रुंस मैत्रैश्वरं विष्णुस्वातिशतं दुवस्वदितयः कुर्युः स्वसंज्ञाफलं।अ षष्ठीपू
थ संक्षेपेण जातकर्मप्रयोगः।जाते पुत्रे पिता सचैलं स्नात्वा देशकालौ संकीर्त्यास्य कुमारस्य गर्भांबुपान
६८ जदोषनाशायुर्मेधावृद्धिबीजगर्भसमुद्भवैनोनाशद्वारेश्वरप्रीत्यर्थं जातकर्म करिष्य इति संकल्प्य गणपति
पूजनादि नांदीश्राद्धांते कृते मधुघृते हिरण्येन … एकस्मिन्पात्रे … दामि मधुनोप
नस्य वेदं सवित्रा प्रसूतं मघोनां।आयुष्मान् गुप्तो देवताभिः शतं जीव शरदो लोके अस्मिन्निति तेन व
प्राशयित्वा हिरण्यं प्रक्षाल्य शिशोर्दक्षिणे कर्णे समेव कूले मेधां ते देवः सविता मेधां देवी सरस्व
ती।मेधां ते अश्विनौ देवावाधत्तां पुष्करस्रजा।विति ततः।अश्मा भव परशुर्भव०शतमिति।इंद्रश्रेष्ठा
नि॰अस्मे प्रयंधि॰इति त्रिषु मंत्रैः रंसावभिमृश्य॰ततः अंगादंगादिति मंत्राः स्याम मूर्ध्नि त्रिरव
घ्राय।इमं कुमारो जराघयतु दीर्घमायुः प्रजीवसे।अस्यै स्तनं प्रथमं जानाभ्यां पुर्वे वोपमो
बले।इति दक्षिणस्तनं प्रक्षाल्य दद्यात्।अत्र जन्मनि दुष्टकालादौ शांत्यादि विहितं कृते शांतिरत्ने
ज्ञेयं।इति श्रीअनंतदेवकृते प्रयोगचिंतामणौ जातकर्म।।अथ षष्ठीपूजा।व्यासः।सूतिकावास
निलया जन्मदानाम देवताः।तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्तिता।प्रथमे दिवसे षष्ठे दश
मे चैव सर्वदा।त्रिष्वेतेषु न कुर्वीत सूतकं पुत्रजन्मनि।मिताक्षरायां मार्कंडेयः।रक्षणीया तथा ६८
षष्ठी निशा तत्र विशेषतः।रात्रौ जागरणं कार्यं जन्मदानां तथा बलिः।पुरुषाः शस्त्रहस्ताश्च

र्दशम्यां चैव सूतके।अपरार्के व्यासः।कृत्याश्च तस्यो एकाधा
नृत्यगीतैश्च योषितः।रात्रौ जागरणं कुर्यु … षष्ठी च शिशुरक्षिणी।खड्गे तु पूजनीया वै वैश्ये चान्ये
वातघ्नी चैव पंचमी।क्रीडनार्था च बालानां षष्ठी च … विशेषणं।तेन तस्याः खड्गे पूजेति केचित्।अन्ये तु
द्विजातिभिरिति।अत्र च शिशुरक्षिणी त्वं षष्ठ्या एव विशेषणं … प्रतिमादौ पूज्या शास्त्रे तु भगवती प्राहुः।राकाम
शिशुरक्षणी भिन्ना देवता।तेन षष्ठी शिशुरक्षणी च प्रतिमादौ पूज्या … जननात्पंचमे वाह्नि मृत्सु रायां
तुमिति सिनीवाली कुहू इति च … कन्याः तथा प्रयोगपारिजाते नारदः।जननात्पंचमे … विधेरिति।अत्र
तिथ्यातकः।तद्दिने चैव रक्षेयं कर्तव्या युर्वि वृद्धये सायाह्ने पूज्या विघ्नेशमपूर्वं … पंचायुधानां धारणं पूजनं
जातस्य पंचमे दिने पंचमनक्षत्रे वा रक्षार्थं शंखचक्रगदाशार्ङ्गनंदकानां पंचायुधानां धारणं … शिशोः सूतिकाया
वीतं प्रयोगपारिजाते।अथात्र प्रयोगः।पंचम्यां षष्ठ्यां वा रात्रौ पिता देशकालौ संकीर्त्यास्य शिशोः सूतिकाया
श्च सर्वारिष्टशांत्यायुरारोग्यसिद्ध्यर्थं जन्मदानां षष्ठ्याः जीवंतिकायाः स्कंदस्य राकादीनां च पूजनं क
रिष्य इति संकल्प्य कलशं संस्थाप्य तत्र प्रतिमासु वस्त्रपुंजेषु वा।गणेशं जन्मदा जीवंतिकां स्कंदं राकाम
नुमतिं सिनीवालीं कुहूं वा तद्घ्नीं कुर्यात् शिवतां षष्ठीं शस्त्रेभ गायत्री चावाह्य तदस्तु मंत्रैर्वा इति प्रतिष्ठाप्य
षोडशोपचारैः संपूज्य पद्यादधिपत्र … मन्येषां च सदीपमाषभक्तबलीन्दत्वा।गौरीपुत्रो यथा स्कंदः शि
शुत्वे रक्षितः पुरा तथा ममाप्ययं बालः षष्ठिके रक्ष्यतां नमः।तथा जय देवि जगन्मातर्जगदानंदकारिणि।
प्रसीद मम कल्याणि नमस्ते षष्ठिदेवते इति प्रार्थयेत्।ततो विप्रेभ्यः दोष दक्षिणादि दत्वा सर्वे रात्रौ जा

विघ्नेशस्य ६

Indira Gandhi National
Centre for the Arts

प्र०नि० जागरणं कुर्युः। इति षष्ठीपूजा। अथ नामकरणं। याज्ञवल्क्यः। अहन्येकादशे नामेति। निर्णयसिंधौ बृहस्प नामकर
६९ तिः। द्वादशे दशमे वापि जन्मतोपि त्रयोदशे। षोडशे विंशतौ चैव द्वात्रिंशे वर्णतः क्रमात्। त्रयोदशे इत्यस्य
ब्राह्मणस्य। षोडशे इत्यादयः। क्षत्रियादेः कालाः भविष्ये॥ नामधेयं दशम्यां तु द्वादश्यां मासिके च न। अष्ट
दशेहनि तथा वदंत्यन्ये मनीषिणः। दशम्यामतितायामिति माधवीयं। गोभिलः। गृह्यपरिशिष्टे तु जननाद्दश
रात्रे व्युष्टे शतरात्रे संवत्सरे वा नामधेयमित्युक्तं। अत्र व्युष्ट इत्यस्य त्रिष्वप्यन्वयः॥ इत्युक्तं गोभिलभाष्ये।
केचित्तु व्युष्ट इत्यस्य दशम्यामुषःप्राप्ये सायं के वा कथं तया दशरात्र इत्यत्रैवान्वय इत्याहुस्तन्न। तथात्वेन
वरात्रे देवीपूजनमितिवत् तत्र सत्त्वाहारस्याधिकारणत्वापत्त्या तन्मध्ये यस्मिन्कस्मिंश्चिच्छुभे दिने
लदापत्तेः। एवं वर्षे चौलमिति निसंवत्सरस्याधिकरणत्वापत्तेरित्याशयतो नुमासा। शरदशा। हारिबोधकैः
स्य संतरवाक्ये शतरात्रस्योपसंहारत्वापातमुख्यपक्षे मुख्याप्यपत्तेश्च। तेन नामोक्तिरूपमाख्यो किं व्युष्ट इत्यस्य
त्रिष्वनुषंगमपश्यंतो श्रोतारोऽपेक्ष्याः। प्रयोगपारिजाते। मलीपाते च संक्रांतौ ग्रहणे वैधृतावपि
श्राद्धं विना शुभं नैव प्राप्तकाले विमानवाः। गार्ग्यः। अमासंक्रांतिविष्ट्यादौ प्राप्तकालेपि नाचरेदिति। सू
त्रे तु नाम चास्मै दद्युरिति चकारेण जातकर्मानंतरमेव नामकरणमित्युक्तं। इदं तावपि नामकरणस्याका
यणि कालातिपाते जातकर्मानंतरे कार्यमित्येके। अन्ये तु शास्त्रोक्ते काले कार्यमित्याहुरित्युक्तं। श्रुता ६९
यपि। लग्ने रोहिणी नामेत्यादिना लिंगेन जननोत्तरमेव नामकरणमुक्तं। अन्ये तु करिष्यमाणस्यैव

नाम्नः स्मरणादिप्रायमिदमित्याहुः। उक्तदिनेष्वकरणे तु। श्रीधरः। मित्रादितिसमघोत्तराश्वतिषक्स्वातीध
निष्ठाच्युतप्राजेशाश्विशशांकपौष्णदिनकृत्सुधेषु राशौ स्थिरे। छिद्रां पंचदशीं विहाय नवमीं शुद्धेष्टमे सा
गे वा ताचार्यमपत्यपादसमागादिवसे नामानि कुर्याद्द्विजः। अत्र नामधेयेति बहुवचनान्मासनामादीनि सर्वाणि का
र्याणीति सूचितं। चतुर्थी षष्ठी अष्टमी द्वादशी चतुर्दशी चेति पक्षच्छिद्राः। अंत्यत पादघ्नंदः। मनुः। शर्मांतं
ब्राह्मणस्य स्याद्वर्मांतं क्षत्रियस्य तु। वैश्यस्य धनसंयुक्तं शूद्रस्य प्रेष्यसंयुतं। आश्वलायनः। तपसा ब्रह्म
चर्येण शमेन च दमेन च। आत्तौ शर्मेति नेन शर्मातो ब्राह्मणो भवेत्। इदमत्र गृह्यं। नाम चास्मै दद्युर्घो
षवदाद्यंतरंतस्थमभिनिष्ठानांतं द्व्यक्षरं चतुरक्षरं वा द्व्यक्षरं प्रतिष्ठाकामश्चतुरक्षरं ब्रह्मवर्चसकामो युग्मा
नि त्वेव पुंसामयुजानि स्त्रीणामभिवादनीयं च समीक्षेत तन्मातापितरौ विद्यातामोपनयनादिति दद्युरि
ति बहुवचननिर्देशात्। पितामाताबांधवाश्च समुद्दिश्य दद्युरित्यर्थमाह प्रयोगपारिजातः। घोषवदाद्य
नक्षत्रे तु। द्व्यक्षरं चतुरक्षरं वा। अपि वा षडक्षरमित्यादिना षडक्षरमपि नामोक्तं। घोषेति। वर्गाणां प्रथम
द्वितीया वर्णाः। हकारवर्जिताः। शषसहेति ऊष्माणश्चैते अघोषवंतः। षड्भिन्नाः घोषवंतस्ते आद्ये घोषस्य तादृशं
नां २ अंतः मध्ये यरलवाः। अंतस्था यस्य तादृशं। अभिनिष्ठानो विसर्जनीयः। सः अंते यस्य तादृशं। द्व्यक्षरं देवः शर्मः
इत्यादि। चतुरक्षरं देवदत्त इत्यादि। द्व्यक्षरं चतुरक्षरं च काम्यमपीत्याह द्व्यक्षरं प्रतिष्ठाकाम इत्यादि। युग्मा
नि समे त्वेवकारो नियमार्थः। पुंसां युग्माक्षराणि च स्त्रीणां तु विषमाक्षराणि। इदं नाम व्यावहारिकं कुला
च

अभिवादनीयं च कुर्यादिति वृत्तिः। तेन वृत्तिकारादिमते आदौ व्यावहारिकं ततो नाक्षत्रं। आश्वलायनस्तु तो वादौ जातकृ॰

प्र॰चि॰ नाक्षत्रं ततो व्यावहारिकमित्युक्तं। अत्र वृत्तौ पक्षद्वयमुक्तं। तत्राद्ये सांव्यवहारिकेन शर्मान्तनानियमः। त

७० थात्वे द्व्यक्षरत्वादिबाधापत्तेः। शर्मान्तत्वे अभिनिष्ठानान्ततावाधापत्तेश्च किं त्वभिवादनीय एव। तत्रैवायु

ग्मानामपि वा युक्शर्मन्निति शर्मान्तस्य प्रयोगात्। यद्वा युग्मानि त्वेवैव कारणे अभिनिष्ठानान्ततादीनां सर्वेषां

निवृत्तिः। तथा च तस्मिन्पक्षे युग्माक्षरमात्रादरेण देवस्वामी शिवशर्मा विष्णुशर्मा इत्येवं शर्मान्तमपि नाम भवती

त्युक्तं। कारिकायामपि। पक्षो घोषवदाद्यादिरेव कारान्तनाद्यन्त इत्युक्तमिति दिक्। कारिकायां। द्वादश्यां नामकरणं

अनन्तरं जातकर्मानन्तरं चेत्यर्थः। पुं

नान्दीश्राद्धं कृत्वैव भवेत्। अनन्तरं दशम्यादौ षष्ठे नाम्नः। कुर्वीत। युग्मानि त्वेवेत्येव कारणे सं

संयुग्माक्षराणि स्युरयुग्मानि तु योषितां।। पक्षो घोषवदादिसादिरेव कारान्तनाद्यन्तः। युग्मानि त्वेव से युकारेणैसं। कुर्यादिति शेषः।

र्थः। स्वस्त्यस्मै देवदत्ताय ब्रूतेति ब्राह्मणान्वदेत्। नामापि वादनीयं च गुप्तमामौञ्जिबंधनात्। कुर्यादिति शेषः। दिश्यानामनीं तन्नाक्षत्रस्यैवा

अभिवादनीयं च नाक्षत्रादिरिक्तमिति केचित्। तत्र। स्कन्दवाक्ये असावसाविस्यस्यादिश्यानामनीं तन्नाक्षत्रस्यैवा

नुवादात्। शांखायनसूत्रे तु। नक्षत्रदेवतासंबंद्धं नाम कुर्यादित्युक्तं। पारिजाते शौनकः। अभिवादननाम्ने ह्यस्मा

लोभ्यचेतसा उपाधु निर्दिशेच्च तज्जानीयुर्यथा परे। इदं चोपायुस्वप्रयोगकाले। संग्रहे। देवालयगजाश्वानां वृक्षाणां

वापिकूपयोः। सर्वापणानां पण्यानां चिकार्थं पोषितां नृणां कात्यानां च कन्यानां च पश्चात्तीनां विशेषतः। राजप्रासादवा

स्तूनां नामकर्म विशिष्यते। तत्र पुण्याहवाचनसमये अस्य नामकरणकर्मणः पुण्याहं भवन्तो ब्रुवन्त्विति त्रिरुक्त्वा ७०

स्वस्तिपर्यायमध्ये करिष्यमाणं नाम चतुर्थ्यन्तमुक्त्वा त्रिः एतन्नाम्ने नामकरणकर्मणश्च स्वस्तिं भवन्तो ब्रुवन्ति

त्रिवदेदिति भट्टाः। अस्मै देवदत्ताय स्वस्ति भवन्तो ब्रुवन्त्विति च वदेदिति कारिकायां। अस्मिन्पक्षे महांसहकुटुंबिनेह

साहीनां न प्रयोगः। शौनकोपि। ब्राह्मणैः सार्द्धमारभ्य पूर्वं पुण्याहवाचनं। तत्र पुण्याहपर्यायं यथाविधि समाप्य च स्व

स्तिपर्यायमध्ये तु नामधेयं विधिवित्तं। स्वस्तीत्येवं प्रतिब्रूयुरथ सर्वेपि ते द्विजाः। ततः पुण्याहशेषं ते सर्वे चापि स

माप्नुयुरिति। तेन सर्वे पुण्याहं समाप्य नान्दीश्राद्धं कृत्वा कांस्यादिपात्रे तण्डुलपूर्णे हेम्ना चतुर्थ्यं तं गणेशनामलि

खित्वा। कुलदेवतासंबद्धं पिता नाम कुर्यादिति विष्णुक्तेः। आदौ कुलदेवतानाम लिखेत्। ततो मासनाम। तन्मासना

म प्रथमं स्यात्। संबुध्यं वैवहीति मदनरत्ने उक्तेः। गार्ग्यः। कृष्णोनन्तोच्युतश्चक्री वैकुंठोथ जनार्दनः उपेन्द्रो य

ज्ञपुरुषो वासुदेवस्तथा हरिः। योगीशः पुंडरीकाक्षो मासनामान्यनुक्रमादिति। चैत्रादि मार्गशीर्षादि वा क्रमइति

मदनरत्ने तु। चैत्रादिमासनामानि वैकुंठोथ जनार्दनः। उपेन्द्रो यज्ञपुरुषो वासुदेवो हरिस्तथा। योगीशः पु

ण्डरीकाक्षः कृष्णोनन्तोच्युतस्तथा। चक्रपाणिरिति ज्ञेयानि क्रमादाहुर्मनीषिण इति वसिष्ठवचनात्। चैत्रादिपक्षे एवं क्रम

इत्युक्तं। मासाश्चात्र चान्द्राः। ते च विंध्यदक्षिणे अमान्ताः विंध्योत्तरे च देशभेदेन पौर्णिमान्ता इत्युक्तं समयकांडे। आश्व

लायनस्मृतौ तु। मार्गशीर्षसमारभ्य मासिकं नाम निर्दिशेत्। नक्षत्रपादतो जातं जन्मनाम तदुच्यते। यद्दत्तं पिता

नाम भवेत्सांव्यवहारिकं। क्रमेणानेन संलिख्य नामानि च समर्चयेत्। तत्तन्नामशिरोतः कर्णे त्रिस्त्रिर्ब्रूयात्ततः पिता।

नमस्करोत्पसौ देवो ब्राह्मणेभ्यः पिता वदेत्। त्रिस्त्रिः स्यात्प्रतिनाम्ने वनस्वस्तीति निर्दिशेदित्युक्तं। ततो नक्षत्रपाद्य

घाक्षरेण नाक्षत्रं नाम कुर्यात् तदुक्तं गृह्यपरिशिष्टे। तदक्षरादिकं नाम यस्मिन्धिष्ण्ये यदक्षरमिति। तच्च संग्रहे। चूचे

बु गा

प्र॰दि॰ चो ला अश्विनी चे च ली लू ले लो भरण्यथा। आ ई उ ए कृत्तिका स्यादो वा वी वु रोहिणी वे वो का की मृगशिर: कु घ ङ छ आ नामकर॰
र्द्रक:। के को हा ही पुनर्वसू हू हे हो डा पुष्यक:। डी डू डे डो तथाश्लेषा मा मी मू मे मघा तथा। मो टा टी टू तु पूर्वा
७१ स्यात् टे टो पा पी तु उत्तरा। पू ष ण ठा हस्त: स्यात् पे पो रा री तु चित्रका। रू रे रो ता तथा स्वातीति तू ते तो विशाखका।
ना नी नू ने अनूराधा ज्येष्ठा नो या यि यु स्मृता। ये यो भा भी तु मूलं स्यात्। भू धा फा ढा च पूर्वषा। भे भो जा जि उत्तरा
षाढा जू जे जो खा अभिजित् स्मृत:। खि खू खे खो श्रवणे गा गी गू गे धनिष्ठका। गो सा सि सु शततारा से सो
दा दी च पूर्वभा। दू थ झ ञा उत्तरा स्याद् दे दो चा ची च रेवतीति। सुदर्शनभाष्ये तु रोरमम ज्ये चिषु वृद्धिरादो ढां
स्व से श्र व शा श्वयुक्षु। शेषेषु नाम्नो: कपर: स्वरो स: स्वा घो र दीर्घ: सविसर्गो ह्रस्वान्त आस्यार्ध: आद्यानां
ब स्मा मा याक्षरे गृहीते रोहिणी रेवती माघ: मार्गशीर्ष: ज्येष्ठश्चैत्र इति सिद्धि:। ठौ मेति। प्रोष्ठपदा इत्यत्र रु कारा
न्देयक वृद्धि: प्रोष्ठपाद इति। अंत्य मध्य भरणी शब्द: आपस्तंबानां कृत्तिकाद्य भरण्यंत पाठात्। श्रव: श्रवण:
शा श तभिषक्। अश्वयुक् अश्विनी एतेषु चतुर्षु ना आदि वृद्धि:। अपभरण: आपभरण:। श्रवण: श्रावण:। श
तभिषक्। शातभिषक। अश्वयुक्। आश्वयुक इति। शेषेषु। उक्तभिन्नेषु पूर्विष्टा फल्गुनी अनुराधा तिष्या श्लेषा
हस्त विशाखोत्तराषाढा कृत्तिके सेव मे का दश नक्षत्रेषु नादि वृद्धि:। तथा च। श्रविष्ठ: फाल्गुन: अनूराध: पुष्य:।
आश्लेषा: हस्त:। विशाख: आषाढ: कृत्तिक: एव ह्रस्वं। आम्नोरा द्रौ मूल यो: रेस्य: स्वर:। कपर: आर्द्रक: मूलक इति।
स्वाघो: स्वातीपुनर्वसो: अन्त्य: स्वर: अदीर्घ:। सविसर्गश्च। स्वाति: पुनर्वसुरिति:। विशेषो निर्णयसिंधौ ज्ञेय:।।। ७१
अथात्र प्रयोग:। एकादशेऽह्नि देशकालौ संकीर्त्य अस्य शिशो: बीजगर्भसमुद्भवैनोनिबर्हणायुर्वृद्धि नामव्यवहारसिद्धि द्वा

नो१

र्म श्रि१ पी

द्वारा परमेश्वरप्रीत्यर्थं नामकरणं करिष्य इत्युक्त्वा गणपतिपूजनादि कृत्वा पुण्याहवाचने स्वस्तिपर्याये करिष्यमाणामुक
नाम्ने नाम करण कर्मणः स्वस्ति भवन्तो ब्रुवंतु इत्युक्ते पुण्याहवाचनं समाप्य। नांदीश्राद्धांते कृते कांस्यादिपात्रे तंडुलस्तीर्णे
स्वर्णशलाकया नाम लिखित्वा अमुकदेवताभक्त इति कुलदेवतानाम। ततो मासनाम। कृष्णोऽनंतोऽच्युतश्चक्री वैकुंठोऽथज
नार्दन:। उपेंद्रो यज्ञपुरुषो वासुदेवस्तथा हरि:। योगीश: पुंडरीकाक्षो मासनामान्यनुक्रमात्। इति मार्गादिक्रमेण। यथा।
वैकुंठ जनार्दन:। उपेंद्रो यज्ञपुरुषो वासुदेवो हरिस्तथा योगीश: पुंडरीकाक्ष: कृष्णोऽनंतोऽच्युतस्तथा चक्रधारी
ति। चैत्रादिक्रमेण वा कृत्वा। ततो नक्षत्रपादादिवर्णवशेन। य द्वारो हिलो इत्यादि नाक्षत्रं नाम लिखित्वा। ततो व्याव
हारिकं। द्व्यक्षरं चतुरक्षरं वा पुंसां युग्माक्षरं स्त्रीणां च विषमाक्षरमित्येवं विलिख्य वसनुसारेण त्वादौ व्यावहारि
कं ततो नाक्षत्रं विलिख्य तदस्तु गृहा वै इत्युक्त्वा नामदेवताभ्यो नम इति संपूज्य शिशोर्दक्षिणकर्णे अमुकना
म्नासि त्वममुकोसीत्युक्त्वा उत्थाय कृतांजलिरमुकनामाभवत: सर्वेभ्यो ब्राह्मणेभ्यो नमस्कारं वादयेत् ते आयुष्मान्भव
म त्वममुकशर्मा इति कुलदेवतानामादिवर्जं स्वाचारप्राप्तं स्त्रीणां च नाम देयं प्रयोज्यादौ नाम स्त्रीणामिति गोभिलोक्तेन।
दशाहान्तं नामेति पृथ्वीचंद्र:। अन्ये तु देविदा इत्युभयो: समुच्चयमाहु: अत्र कात्यायनसूत्रं। दशम्यामुत्थाप्य
ब्राह्मणान्भोजयित्वा पिता नाम करोति। द्व्यक्षरं चतुरक्षरं वा घोषवदाद्यं तरं तस्थं कृतं कुर्यात् न तद्धितमयुजा
क्षरमाकारान्तं स्त्रियै तद्धितं शर्म ब्राह्मणस्य वर्म क्षत्रियस्य गुप्तेति वैश्यस्येति। अथ दशविप्राप्तेज्या:। इसं नं तस्य
कृते श्रीरामकल्पद्रुमे नामकर्म। अथ दत्तकपुत्रप्रतिग्रहविधि:। मनु:। मनु:। माता पिता वा दद्यातां यमद्भि: पुत्रमापं

प्र०चिं० ६२ यदि स दद्यात्प्रीतिसंयुक्तं स ज्ञेयो दत्त्रिमः सुतः। शौनकः। अपुत्रो मृतपुत्रो वा पुत्रार्थं समुपोष्य च। वाससी कुंडले दत्त्वा उष्णीषं चांगुलीयकं। बंधून्नन्नेन संभोज्य ब्राह्मणांश्च विशेषतः। अन्वाधानादि यत्तंत्रं कृत्वा सोऽस्य वनं तथा। तुः सम दत्तपुत्र० ८
दत्त्वा उष्णीषं चांगुलीयकं। बंधून्नन्नेन संभोज्य ब्राह्मणांश्च विशेषतः। अन्वाधानादि यत्तंत्रं कृत्वा सोऽस्य वनं तथा
हस्ताभ्यां दत्त्वा तु पुत्रं देहीति याचयेत्। दाने समर्थो दाता स्मै ये यज्ञेनेति पंचभिः इत्यादि विशेषः। देवस्य त्वेति मंत्रेण हस्ताभ्यां
परिगृह्य च। अंगादंगेत्यृचं जप्त्वा आघ्राय शिशुमूर्धनि। गृहमध्ये तमाधाय चरुं हुत्वा विधानतः। यस्त्वा हृदेत्यृचा चैव
तनुष्य मग्न ऋचैकया। सोमो ददद्दित्येताभिः प्रत्यृचं पंचभिस्तथा स्विष्टकृदादि होमं च कृत्वा शेषं समापयेदिति। मि
ताक्षरायां त्वाज्येन माहृतिहोम उक्तः। अथ प्रयोगः। कर्ता देशकालौ संकीर्त्य मम पुत्रत्व प्रयुक्त पितृऋणापाकरण
द्वारा वंशाभिवृद्ध्यर्थं पुत्रप्रतिग्रहं करिष्य इति संकल्प्य। गणपतिपूजनं स्वस्तिवाचनं मातृपूजां नांदीश्राद्धं च कृत्वा बंधून्
ब्राह्मणांश्च संभोज्याग्निं प्रतिष्ठाप्यास्मिन्पुत्रप्रतिग्रहांगहोमे अन्वाधाने करिष्य इत्युक्त्वा चक्षुषी आज्येनेत्यंते अत्र प्रधानं।
अग्निं सकृत्। सूर्यां सावित्रीं षड्वारं चरुद्रव्येण। अग्निं वायुं सूर्यं प्रजापतिं चाज्यद्रव्येण शेषेण स्विष्टकृतमित्यादि तू
ष्णीं निर्वापादि चरुं कृत्वा। आज्यसंस्कारांते कृते दातुः समक्षं गत्वा पुत्रं देहीति याचयेत्। ततो दाता प्रतिग्रहीतारं गं
धादिभिः संपूज्य। ये यज्ञेनेति पंचानां मानवो नाभानेदिष्ठो विश्वेदेवास्त्रिष्टुप् पुत्रदाने वि०। पंच ऋचो जपेत्। देशकालौ सं
कीर्त्य इमं पुत्रं श्रीपरमेश्वरप्रीत्यर्थं तुभ्यमहं संप्रददे। न मम। प्रतिगृह्णातु भवानिति सकुशजलपूर्वकं दद्या
त्। आवयोः रयिमिति परिभाष्य दत्ते द्यामुष्यायणो नु नममेति न वदेत्। ततः दानसांगतार्थं यथाशक्ति हिरण्यं दक्षि
णां दद्यात्। ततः प्रतिग्रहीता तं हस्ताभ्यां परिगृह्य अंगादंगादिति मूर्धनि त्रिरवघ्रायांके उपवेशयेत्। ततः ६२
तस्मै वस्त्रयुग्ममुष्णीषं अंगुलीयकं कुंडलादि च दत्त्वा तिलकं कृत्वा स्वस्त्यंगेन स्वस्तिनेमिमिति साधयेत्। हमा

वा ५

नीयाग्नेः पश्चिमतो मातुरुत्संगे तमवस्थाप्य। बर्हिस्तरणाद्याज्यभागांते यस्त्वा हृदा चक्षुश्रुतेत्यग्निस्त्रिष्टु दोलारो०
प्। पुत्रप्रतिग्रहांगचरुहोमे विनियोगः। अग्नय इदं न मम। तनुष्य मग्ने सूर्या सावित्री सूर्या सावित्र्यनुष्टुप्। सूर्या
सावित्र्याः इदं०। सोमो ददद्दिति पंचानां सूर्या सावित्री ऋषिः सूर्या सावित्री देवता। आद्येनुष्टुभौ तृतीया जगती तत्त्रि
ष्टुप्। ततोऽनुष्टुप्। सूर्यासावित्र्या इदमिति सर्वत्र। ततः व्याहृतिभिराज्यं हुत्वा स्विष्टकृदादि शेषं समाप्याचार्याय धेनुं द
२ त्त्वा ब्राह्मणान्संभोज्य यथाशक्ति दत्त्वा कर्मेश्वरार्पणं कुर्यात्। इति दत्तकपुत्रपरिग्रहविधिः। पंचवर्षोर्ध्वं तु न दत्तकः। ऊर्ध्वं
तु पंचमाद्वर्षान्न दत्ताद्याः सुता नृपेति कालिकापुराणात्। तथा। चूडोपायनसंस्कारा निजगोत्रेण वै कृताः। दत्ताद्या
स्तनयास्ते स्युः रन्यथा दास उच्यत इति। यत्तु पञ्चवयतोऽत्र रम्भपि शुनःशेपादि प्रतिग्रहलिंगं तन्न दत्तकपरं। किंतु स्वयं
दत्तपुत्रतामिच्छुः कृत्वा दत्ता मे पुत्र परामिति दृक्। तथा। अपुत्रेण सुतः कार्यो यादृक् तादृक् प्रयत्नतः। पिंडोदकक्रिया
हेतोर्नाम संकीर्तनाय चेति। अथ दोलारोहः। प्रयोगपारिजाते बृहस्पतिः। दोलारोहस्तु कर्तव्यो दशमे द्वादशेऽपि वा।
त्रैव। आंदोलाशयने पुंसो द्वादशो दिवसः शुभः। त्रयोदशस्तु कन्याया नवनक्षत्रविचारणा। अन्यस्मिन् दिवसे चेत
स्यात्तिथ्यादि प्रशस्यते। ज्योतिर्निबंधे। कृत्तिका ये च रेवती पुष्य इति द्वे चाश्विनः तृतीयेतु। कुर्यात्प्रियं नं पतेश्चैत
द्दद्यां दोलनं वै युवर्जितो भवति। तेनवनामदिने अस्मिन् वा उक्ते दिने कुलदेवतां योगपूर्वं यतिं तदाहंसीं च संपूज्य मंगलगी
तैः। मात्राद्याः पर्यंके प्राक्शिरसं शिशुं न्यसेत्पुलयान्मनविशेषे। योगशायीं हरिस्मृत्वा प्राक्शीर्षं विन्यसेच्छि
शुमिति। अथ दुग्धपानं। पारिजाते नृसिंहः। एकत्रिंशदिने चैव पयः शंखेन पाययेत्। अन्नप्राशननक्षत्रे दिवसे
दमासः शिशुः। एकत्रिंशे अन्यस्मिन्वा जन्मनक्षत्रे कुलदेवतादि पूजां कृत्वा माता धात्री वा शंखेन गोदुग्धं पाय
७८ षोडशो दिवसे वापि द्वात्रिंशो दिवसेऽपि वा। अंदोला आंदोलाशयने पुंसो द्वादशो दिवसः शुभः

Indira Gandhi National
Centre for the Arts

प्र॰चि॰ येत्॥ अथ सूतिकायाः मासांते जलपूजनं। मुहूर्तचिंतामणौ। दंगीज्यास्त चैत्राधिमासेन पौषे जलं पूजयेत्सू कर्णवेधः।
तिकामासपूर्तौ। बुधेंदुजीज्यवारे विहिते तिथौ हि श्रुतीज्यादितीदुके नैत्रैसमैत्रे रिति। अथ कर्णवेधः। श्रीपद्धः
७२ मासे हि मे सप्तमे वाष्टमे वा वेध्यौ कर्णौ द्वादशे षोडशेन्हि। मध्ये नान्हः पूर्वभागे न रात्रौ नक्षत्रे द्वे तिथी वर्जे
यित्वा। तथा सप्तवा हरिहरकरचित्रा सौम्यपौष्णा तरार्या दितिवसुबुध ... ता तिसिंह वर्जेषु लग्नेशशिगुरुबु
धकामा तां दिने पर्वादिकारहिततिथिषु शुद्धे नैधने कर्णवेधः। प्रयोगपारिजाते तु दंतजननात् प्राक् कर्णवेधः
कार्य इत्युक्तं। पारिजाते विष्णुधर्मे। पूर्वाह्णे पूजनं कुर्यात् केशवस्य शिवस्य च। ब्रह्मेंद्रसूर्यसोमाश्वेविदिग्दिशा
नां तथैव च। नासत्ययोः सरस्वत्याः ब्राह्मणानां गवां तथा। गुरूणां पूजनं कृत्वा तत्र दत्वा वरासनं। तत्रोपवे
श्य द्वत्रीं शुचिरुक्तां वरावृतां। तं धृत्वा त्रिश्चलं सम्यगलंकरसांकितेः। विध्येद्देवकृते छिद्रे सकृदेवाति
लाघवात्। निर्णयसिंधौ सौवर्णी राजपुत्रस्य राजती विप्रवैश्ययोः। शूद्रस्य चायसी सूची मध्यमाष्टांगुल
लिका। अंगुलानि बालस्य। पारिजाते तु शुक्लसूत्रसमायुक्तताम्रसूच्याथ वेधयेदित्युक्तं। तेन पूर्वोक्तदि
ने केशवाद्युक्तदेवानां पूजनं कृत्वा उदङ्मुखस्य शिशोः। कर्णौ वेधयेत्। अथ कर्णवेधे कात्यायनगृह्ये। वर्षे
तृतीये पंचमे वा पुष्येंदुचित्राहरिरेवतीषु पूर्वाह्णे कुमारस्य मधुरं दत्वा प्रत्यङ्मुखायोपविश्य दक्षि
णं कर्णमभिमंत्रयते। भद्रं कर्णेभिरिति सव्यं वक्ष्यंती वेदीति चाथ पिपासतो ब्राह्मणभोजनं। अथ तां ७२
बूलभक्षणं। निर्णयसिंधौ चंडेश्वरः। सार्धमासद्वये दद्यात्तांबूलं प्रथमं शिशोः। कर्पूरादिकसंमिश्रं विलासाय तांबूल

हितायचेति। अथ निष्क्रमणं। यमः। तृतीये वा चतुर्थे वा मासि निष्क्रमणं भवेत्। प्रयोगपारिजाते तु। तृतीये मासि
कर्तव्यं तथा सूर्यस्य दर्शनं। चतुर्थे मासि कर्तव्यमग्नेश्चंद्रस्य दर्शनमित्युक्तं। कारिकायां। चतुर्थे मासि पुण्यदे
शुक्ले निष्क्रमणं भवेत्। स्नानं स्वलंकृतं वापि हि तस्य स्य पत्रं धिशुं। आदाय गेहान्निष्क्रम्य गच्छेयुर्देवतालयं। अ
भ्यर्च्य देवताः सम्यगाशिषो वाचयेदथ। कृत्वा प्रदक्षिणं गेहमानयंति ततः स्वकं। मातृपक्षसुहृद्गेहं यद्वा मातुला
दिगृहं नयेत्। तदाशीर्वचनाद्धेस्यात् दीर्घायुरभिनंदितः। जयं तस्य मनेनायां लिखितः शिशुनिष्क्रम इति। पा
रिजाते। शाकुनेयं जपेत्सूक्तं शिशोर्निष्क्रमणे पिता। द्विजाश्च दश पूर्वाणि मंगलानि पुरो नयेत्। तानि चाष्टौ मं
गलानि। तत्रैवोक्तानि। दर्पणः कलशः कन्या स्तथा सुमनसोक्षताः। दीपमाला ध्वजो लाजाः संप्रोक्तं चाष्टमंगल
मिति। अन्यत्रापि विवाहे निष्क्रमे काम्ये चंद्रोपूर्ले समागमे। उत्सवेषु च सर्वेषु प्रशस्तं मंगलाष्टकमिति। शिक्षिता
सुहृन्मित्राणि नित्यं पुष्ट्यै गृहात् स्वयं। सर्वेंदुदुभिनिर्घोषैर्वाद्यशब्दसमन्वितैः। चतुरस्रं चतो देशे गोमये
नोपलेपिते। धान्यपुंजे समासीनं बालं बालामथापि वा। अस्य रक्षा ततः कार्या मृतसंजीविनीं जपेत्। तत्रार्चये
दुर्गेशानं भूतेशानं तथैव चेति। विष्णुधर्मोत्तरे। चतुर्थे मासि कर्तव्यं शिशोर्निष्क्रमणं गृहात्। दिगीशानां
दिने तत्र तथा चंद्रार्कयोर्द्विजः। पूजनं वासुदेवस्य गगनस्य च कारयेत्। बहिर्निष्कासयेद्गृहात् शंखपुण्या
हनिस्वनैः। ततस्तत्र पठेन्मंत्रं यं तं रामं निबोध मे। चंद्रार्कयोर्दिगीशानां दिशां च गगनस्य च। निक्षेपार्थमि
मं दद्मि ते मे रक्षंतु सर्वदा। अप्रमत्तं प्रमत्तं वा दिवारात्रमथापि वा। रक्षंतु सततं सर्वे देवाः शक्रपुरोगमाः॥

Indira Gandhi National
Centre for the Arts

प्र॰चि॰ मार्कंडेयः। अग्रतोथ प्रविन्यस्य शिल्पभांडानि सर्वशः। शस्त्राणि चैव वस्त्राणि ततः पश्येत्तु लक्षणं। प्रथमं यद्
७२ स्पृशेद्बालस्ततो भांडं स्वयं तथा। जीविका तस्य बालस्य तेनैव तु भविष्यति। यमः। ततस्तृतीये कर्तव्यं मासि
सूर्यस्य दर्शनं। चतुर्थे मासि कर्तव्यं शिशोश्चंद्रस्य दर्शनमिति। अत्र वस्त्रवैधृतौ कर्मणि ये च तयोः श्राद्धं
नावद्यत इति गृह्यपरिशिष्टात्। छंदोगानां निष्क्रमणे वृद्धिश्राद्धं नेति कल्पतरुः। कारिकायां। कन्ये: बौ
दुपासंस्कारश्चाप्यण्णादिष्वपीष्यत इत्यादीनां पक्षे। तत्कृत्यमित्युक्तं। मदनरत्ने। अन्नप्राशनकाले वा कुर्या
८८ न्निष्क्रमणक्रियां। कात्यायनसूत्रेपि चतुर्थे मासि निष्क्रमणिका सूर्यमुदीक्षयति तच्चक्षुरिति। अथोपवेशनं। प्रयोगपा शु
रिजाते पाद्मे। पंचमे च तथा मासि भूमौ तमुपवेशयेत्। तत्र सर्वे ग्रहाः शस्ता भौमोप्यत्र विशेषतः। निर्णयसिंधौ वरा
हं पूजयेद्देवं पृथिवीं च तथा द्विज। रक्षैनं वसुधे देवि सदा सर्वगतं शुभे। आयुःप्रमाणं सकलं निक्षिपस्व हरिप्रिये। अचिरा तं
दायुषस्तस्य ये केचित्परिपंथिनः। जीवितारोग्यवित्तेषु निर्दहस्वाचिरेण तान्। धरण्यशेषभूतानां माता त्वमसि काम
धुक्। अजरा चाप्रमेया च सर्वभूतनमस्कृता। चराचराणां भूतानां प्रतिष्ठाना मपापहासि। कुमारं पाहि मातस्त्वं ब्रह्मा
तदनुमन्यतां। अथान्नप्राशनं। निर्णयामृते नारदः। जन्मतो मासि षष्ठे स्यात्सौरेणाद्याशनं परं। तदभावे त्वष्टमे मा
सि नवमे दशमेपि वा। द्वादशे वापि कुर्वीत प्रथमान्नाशनं परं। अत्र सौरेणेति ग्रहणान्मध्ये मलमासे सति न सप्त
मेन्नाशनं। किंतु षष्ठ एव। लौगाक्षिः। षष्ठेन्नप्राशनं जातेषु दंतेषु वेति। नारदः। षष्ठे वाप्यष्टमे मासि पुंसां स्त्री ६२
णां तु पंचमे। सप्तमे मासि का कार्यं नवान्नप्राशनं शुभं। रिक्तां दिनक्षयं नंदां द्वादशीमष्टमीममां। त्यक्त्वान्यतिथयः श्रो

त्ताः सौम्यजीवसितवासराः। चंद्रतारं प्रशंसंति कृष्णे चांत्यत्रिकं विना। श्रीधरः। आदित्यतिष्यवसुसौम्यकरानिलाश्विचि
त्राजविष्णुवरुणोत्तरपौष्णमित्राः। बालान्नभोजनविधौ दशमे विशुद्धे छिद्रां विहाय नवमीं तिथयः शुभाः स्युः।
राजमार्तंडः। वाचालो बलवान्दिने दिनपतेः स्यान्नदीप्तानलो देही हीनतनुस्ताशनः। शिशिरगौ कोजे कृजार्पीडि
तः। बौ जेथ्यो गतसुखश्रियो नवरतं। जीवे चिरायुः सुखी शुक्रे चातिबलान्विते तिमलिनो मंदे च मंदानलः। शिशि
रगुः श्चंद्रः। वसिष्ठः। बालान्नभुक्तौ व्रतबंधने च राजाभिषेके खलु जन्मधिष्ण्यं शुभं त्वनिष्टं सततं विवा
हे सीमंतयात्रादिषु मंगलेषु। विष्णुधर्मे। ब्रह्माणं शंकरं विष्णुं चंद्रार्कौ वा दिगीश्वरान्। भुवं दिशश्च
संपूज्य हुत्वा वन्हौ तथा चरुं। दिव्तापुरतस्तस्य धातुसंगतस्य च। अलंकृतस्य दातव्यं अन्नं पात्रे सकां ग
चनं। दधिमध्वाज्यसंयुक्तं प्राशयेत्पायसं तु वेति। कारिकायां। अथ पुण्येह्नि षष्ठे तु मासेन्नप्राशनं स्म
तं। कृत्वाभ्युदयिकं श्राद्धं दधिमध्वाज्यसंयुतं। अन्नं तु प्राशयेदन्नपत इत्यादिमंत्रतः। कामयोगे
न वाजादिपक्षोक्तं प्राशयेद्द्विजः। अमंत्रकमिदं कुर्यात्प्राशनं योषितामपीति। आचार्यः। स्वमलप्राशनाद्व
न्ये प्राशयेच्चापुरुषेपि तां। जातकर्मादि चूडांतं स्त्रीणां कार्यममंत्रकं। होमः कृतं तु पुंवत्स्यात् स्त्रीणां
चूडाकर्मावपीति। इदमत्र गृह्यं। षष्ठे मास्यन्नप्राशनमाजमन्नाद्यकामस्तैत्तिरं ब्रह्मवर्चसकामो घृतौ ल
दनं तेजस्कामो दध्योदनमिंद्रियकामो मध्वोदनमायुष्कामो दधिमधुघृतमिश्रमन्नं प्राशयेदन्नप
तेन्नस्य नो देह्यनमीवस्य शुष्मिणः प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पदे इत्यादृत्तैव कुमारं।

Indira Gandhi National
Centre for the Arts

प्र॰चि॰ अत्र च जाताधिकाराज्जन्मप्रभृत्येव षष्ठे। न गर्भप्रभृति। तैत्तिरिसाह चार्यादजस्यापि मांसमेव तनुक्षीरत्य नादि। अ अन्नप्रा॰
७५ त्र तैत्तिरमांसादीनां व्यंजनत्वमात्रं। पाकप्रमयेष्टत्ते संस्कृत ओदनो घृतौदनः। अक्राम संयोगेपि दध्यादिमिश्र
मन्नं। सर्वप्राशनेषु चायं मंत्रः। मंत्रवत् प्राशनानंतरं च पंचकृत्वस्तूष्णीं प्राशयेदिति जयंतः। महामाहृति
भिः प्राशनं। होषं माता प्राश्नीयादिति शांखायनसूत्रे उक्तं कुर्यान्मासस्व मंत्रकं प्राशनमिति वृत्तिः। होमोत्र कृता
कृतः। होमपक्षे जातकर्मवद्दनादेशाज्याहुतीर्जुहुयात्। अथात्रास्मसित कृतो निष्क्रमणोपवेशनं सूर्यावलो
श्रा कनान्नप्राशनादीनां तंत्रेण प्रयोगः। कृतदेशकालो संकीर्त्याश्य शिशोरायुःश्रीवृद्धिबीजगर्भसमुत्थैनोनाशार्थं
बलायुर्वर्चोभिवृद्ध्यर्थं निष्क्रमणं सूर्यावलोकनमुपवेशनं च तथा मातृगर्भमलप्राशनशुद्ध्यन्नाद्यब्र
ह्मवर्चसतेज इंद्रियायुर्वृद्ध्यर्थं ईश्वरप्रीत्यर्थं मन्नप्राशनं च तंत्रेण करिष्य इति संकल्प्य गणेशपूजना
दिनांदीश्राद्धांते कृते सूर्याग्निचंद्रस्थे नूनां नूर्यरवेणदर्शनं कारयित्वा स्वस्तिन इति सूक्तेनां कुमारोप्याशुः
शिशुमान इति सूक्तं पठित्वा तच्चक्षुरिसस्य वसिष्ठ ऋषिः सूर्यो देवता पुर उष्णिक् छंदः। अनेन मंत्रेण सूर्य
मीक्षिता। ततः पीठे त्रयो विंशतिपुंजेषु अष्टचत्वारिंशत्तंडुलपुंजेषु। प्रतिमासु वा। इंद्रादीन् षोडशान्यादि
राशिशाः। चंद्रार्कवासुदेवगगनानां निष्क्रमे वराहस्भ्यो रूपवेशने। अन्नप्राशने च ब्रह्मशंकरविष्णुचंद्रार्क
लोकपालक्ष्मादिशाः संपूज्य तन्मंत्रैर्नामभिर्वा हुत्वा शिशुमश्वेन सतूर्यं बहिर्नीत्वा कृनिक्रदिति ७५
व सूक्तांते पठेत्। चंद्रार्कयोर्दिगीशानां दिशां च गगनस्य च निक्षेपार्थं महं दद्मि ते मे रक्षंतु सर्वदा। अप्र

मत्तं प्रमत्तं वा दिवारात्रमथापि वा। रक्षंतु सततं सर्वे देवाः शक्रपुरोगमा इति। ततो देवालये बंधुगृहे वा देवं
संपूज्य पंचधान्यराशिषु मुपवेश्य मध्ये वस्त्रे आसीनस्य रक्षां कुर्यात्। यथाविभूति गृहीत्वा। त्र्यंबके
बलिहोमसुंजयोनुष्टुप्। हौं जूं सः त्र्यंबकं सः जूं हौं हुं इत्यापि मंत्रेण तेन वलक्षादेशरीरे च निक्षिप्य वदा हृत्वा
थिवीं। गुरुदेवद्विजान् संपूज्य शिशुमुपवेशयेत्। रक्षीनं वसुपे दिवि सदा सर्वगतं शुभे। आयुः प्रमाणं
सकलं क्षितिं निपस्व हरिप्रिये।। आचिरात्दायुषस्त्वस्य येषां चित्तपथिनः। नीतिवितांतोम्यायि चत्ते शुनिर्द ह
स्वा चिरजातान्। परिस्य शेषभूतानां मातात्वमसि कामधुक्। अजराचाप्रमेया च सर्वलोकनमस्कृ
ता कुमारं पाहि मातस्त्वं ब्रह्मा तदनुमन्यतामिति। होमपक्षे अन्नप्राशने ब्रह्मशंकरविष्णुचंद्रार्कलोक
पालभूमिदिशा वरुणा। यद्वा। अग्निरिंद्रः प्रजापतिर्विश्वेदेवा ब्रह्मेत्यन्नादिष्टो कुलीराज्येन हुत्वा स्विष्ट
कृदादि कुर्यात्। ततः इष्टदेवं ब्रह्मादींश्च नत्वा संपूज्य तदग्रे दधिमधुघृतमन्नं हेमादाय अन्न
पते कुबेरोन्नपतिर्जगती। अन्नप्राशने विनियोगः। ॐ अन्नपतेन्नस्य नो देह्यनमीवस्य शुष्मिणः।
प्रप्रदातारं तारिष ऊर्जं नो धेहि द्विपदे चतुष्पद इति शिशुं प्राशयित्वा पंचकृत्वस्तूष्णीं प्राशयाच भय
ग तांबूलं दत्वा परीक्षार्थं चाग्रे हिरण्यादि निधायाशिषो क्षयात्। आश्वलायनः। सौवर्णे राजते पात्रे कां
स्ये वाथ नवे शुभे। क्षीराज्यदधिमध्वान्नं निधाय प्राशयेच्छिशुं। मंत्रेणान्नपतेनस्य हिरण्येन स्रुवेण च। पा
णिना सपवित्रेण जलं चापि हि पाययेत्। पदार्थप्रायतत्पात्रं हस्तीमवतु योषितइति। एवं कुमार्या अपि अत्रे

Indira Gandhi National Centre for the Arts

अन्नप्रा॰

प्र.सि.
७६

वोपवेशनान्नप्राशनसंधारणेन विशेषमाह निर्णयसिंधौ मार्कंडेयः। आगतोथ प्रविश्य स्वपितुरुत्संगादनि
सर्वेषां शास्त्राणि चैव वस्त्राणि ततः पश्येत्तु लक्षणं। प्रथमं यत्स्पृशेद्बालस्ततोभांडं स्वयं तदा। जीविकातस्य
बालस्य तेनैव तु भविष्यतीति। इत्यन्नं तत्स्पृष्टकृते श्रीः। गमकृत्यद्भुमांतर्गते प्रयोगा ...
बालस्य तेनैव तु भविष्यतीति। ... स्थालीपाकं
अन्नप्राशनं। अथान्नप्राशने कात्यायनसूत्रं षष्ठे मास्यन्नप्राशनं। ... स्वाहेति। वाजो नो अद्येति चाहुती
श्रपयित्वाज्यभागौ। विष्णु आहुती जुहोति देवीं वाचं। वर्द्धते सुष्टुते स्वाहेति। वाजो नो अद्येति चाहुती
यां स्थालीपाकस्य जुहोति प्राणेनान्नमशीय स्वाहा। अपानेन गंधानशीय स्वाहा। श्रोत्रेण यशोशीय स्वाहेति
ति प्राशनांते सर्वान्रसान्सर्वमन्नमेकत उद्धृत्याथैनं प्राशयेत्। हंतकारं मनुष्या इति
श्रुतेर्भारद्वाज्याया मांसेन वाक्प्रसारिकामस्य मत्स्यैर्जवनकामस्य कृकषाया आयुष्कामस्याघाब्रह्मव
र्चसकामस्य सर्वैः सर्वकामस्यान्नपर्यायं वा ततो ब्राह्मणभोजनं। अथाब्दपूर्तिः। निर्णयसिंधौ नंदावरत्तरे
पूजयेच्चिरायुषं। मार्कंडेयं नरोभक्त्या पूजयेत्प्रयतस्तथा। ततो दीर्घायुषं व्यासं रामं द्रोणं कृ
पं बलिं। प्रह्लादं चहनुमंतं विभीषणमथार्चयेत्। स्वनक्षत्रं जन्मतिथिं प्राप्य संपूजयेन्नरः। षष्ठीं च
दधिभक्तेन वर्षे वर्षे पुनःपुनः। एतं नाममितितिलहोमो पिढुविदुक्तः। प्रयोगपारिजाते आदित्यपुराणे।
स वैश्रवजन्मदिवसे स्नातो मंगलवारिभिः। गुरुदेवाग्निविप्रांश्च पूजनीयाः प्रयत्नतः। स्वनक्षत्रं च पि
लं रस्तथा देवः। प्रजापतिः। प्रतिसंवत्सरं यत्नात्कर्तव्यश्च महोत्सवं मंगलपाणिमिरिति कल्पतरौ पाठः।

उष्णोदकस्नानस्य जन्मदिने निषेधाच्च। ब्रह्मपुराणे। प्रतिसंवत्सरं तर्क्षे वक्ष्येन्नत्यंविधिपरं। पूर्वाह्णे जन्मर्क्षे वेक्षेदिना
त्वा न घांतरोत्तमः। मध्वाज्यदधिसंयुक्ता दूर्वाम्भः संजपेन तु। अष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा अष्टाविंश
तिं वा कुर्यादाहुतीश्च यथाक्रमात्। ततोपराह्णसमये कृत्वा कौतुकमंगलं। ग्रहपूजां प्रकुर्वीत नक्षत्राधिपपूजनं।
आयुष्यहोमं कृत्वा च श्रोत्रियान्नपि भोजयेत्। शौनकः। अथाज्यसागपर्यंतं कृत्वा लोकेत्वादिपूर्ववत्। कृत्वा चं तु
हुया त्सम्यगवदानादि संपदा। आनोभद्राः कृत वद्रस्य चोदशकेन तु। इमं स्तोममर्हत इत्यचां षोडशेन च। ए
कथा जातवेदस्यां ततः। स्विष्टकृतं हुनेत्ततः। होमशेषं समाप्याथ ब्राह्मणान्भोजयेत्ततः। स्वस्ति वाच्याधि
जान्मेस्तु धेनुं दद्याच्च दक्षिणामिति। अथात्र प्रयोगः। देशकालौ स्मृत्वा मम अब्दपूर्तिजन्मदिने आयुरभिवृ
द्धिद्वारा परमेश्वरप्रीत्यर्थं दूर्वाहोमं करिष्य इति संकल्प्य गणपतिपूजनादि स्वस्ति वाचनांते कृते अग्निं
प्रतिष्ठाप्यान्वाधानादि पूर्ववत्कु। तिलस्थिरसिद्धिस्त्र्यंबकवीतिरष्टोत्तरसहस्रमष्टोत्तरशतादिसंख्यया
त्र्यंबकमंत्रेण मध्वाज्यदधिसंयुक्ताः दूर्वा जुहोत्। त्र्यंबकं वसिष्ठो मृत्युर्लयो नुष्टुप्। उं जूं सः त्र्यंबक
कं पुष्टिमाम् ताता। सजूर्हेंद्र से वसं पुष्टि तेन मंत्रेण हुत्वा स्विष्टकृदादि शेषं समापयेत्। अथ पराशर
मध्ये तपानीमे वचा ग्रहपूजां कुर्यात्। यद्वा देशकालौ स्मृत्वा मम अब्दपूर्तिजन्मदिने आयुरभिवृद्धिद्वारा परमेश्वर
प्रीत्यर्थं ग्रहहोमं यथा दूर्वाहोमं तथा वक्ष्यमाणदेवताभ्यस्तिलाज्यहोमं चरुहोमं च करिष्ये इति संकल्प्य ग
णपतिपूजनादि स्वस्तिवाचनांते कृते। अग्निं महांश्च प्रतिष्ठाप्य तदुत्तरतः मृत्युंजयं॥ तथा कुलदेवता

Indira Gandhi National Centre for the Arts

नां। स्कान्दं। विभीषणं। मार्कंडेयं। व्यासं। वासुदेवं। जन्मनक्षत्रं तद्देवतां। रामं अश्वत्थामा बलिर्व्यासह नूमांश्च विभीषणः कृपः परशुरामश्च सप्तैते चिरजीविनः
नां स्थापयेत्। विभीषणं मार्कंडेयं। व्यासं। वासुदेवं। जन्मनक्षत्रं तद्देवतां। रामं अश्वत्थामा बलिर्व्यासहनूमदादीन् चिरजीवि
नः षष्ठिं च संपूज्य तस्ये दधिभक्तं निवेद्य ग्रहाणां समित्तिलचर्वाज्यैर्नुविभीषण मार्कंडेयादीनां तिलाज्येन
होमं कृत्वा। आयुष्येऽह सिद्धान्नेन चरुहोमं कुर्यात्। आ नो भद्रा इति सूक्तस्य गोतम ऋषिः। विश्वेदेवा देवता॥
आदितः पंचमी सप्तमी च जगत्यः। षष्ठी विराट् अष्टम्या [illegible] स्त्रिष्टुभः। इमं स्तोममिति सूक्तस्य षोडशर्चस्य सूक्त
स्य आंगिरसः कुत्स ऋषिः। किंतोक्ताः अग्न्या [illegible] द्योदेवताः। आदितश्चतुर्दश जगत्यः। अंत्ये द्वे त्रिष्टुभौ। जा
तवेदसे कश्यपो दुर्गा त्रिष्टुप्। एतैः सप्तविंशति मंत्रैश्चरुहोमं कृत्वा। स्विष्टकृदादि होमशेषं समाप्य मार्कंडेयादी
नां उत्तरपूजां कृत्वा गुडदुग्धतिलान् दद्यात्। हस्ते ग्रंथींश्च बंधयेत्॥ गुग्गुलु निंबसिद्धार्थ दूर्वा गोरोचना
दिकमित्यादि पंचद्रव्ययुतां पोटलिकां हस्ते ग्रंथौ च बध्नीयात्। तथा। संपूज्य भानुविधेः सौम्य हविः प्रार्थये
त्। चिरंजीवि यथा त्वं भो मार्कंडेय नमस्तेस्तु सप्तकल्पांतजीवन। आयुरारोग्यसिद्ध्यर्थमस्माकं वरदो भव। चिरंजीवि यथा
त्वं भो मुनीनां प्रवरद्विज। कुरुष्व मुनिशार्दूल तथा मां चिरजीविनं। मार्कंडेय महाभाग सप्त कल्पांतजीवन। 
आयुरारोग्यसिद्ध्यर्थमस्माकं वरदो भवेति प्रार्थयेत्। [illegible] ततः षष्ठी प्रार्थना। जय देवि जगन्मातर्जगदानंद
कारिणि। प्रसीद मम कल्याणि नमस्ते षष्ठि देवते। रूपं देहि यशो देहीत्यादिभिश्च प्रार्थयेत्। सतिलं गुडसं
= अन्ना [illegible] नेन कार्यं तानम्रां अश्वत्थामा बलिर्व्यास ह
= शोत्तरशतसंख्या दूर्वाहुतिभिः तथा कुलदेवतां भानुं विभीषणं मार्कंडेयं व्यासं वासुदेवं जन्मनक्षत्रं षष्ठीं तामं अश्वत्थामा बलिव्यास ह
= दीनेकैक संख्यातिलाज्या हुतिभिः। तथा आ नो भद्रा इति दशभिः। इमं स्तोममिति षोडशभिः। जातवेदसे इत्येकयेति सप्तविंशति मंत्रैः [illegible] न
= चरुद्रव्येणापरो षेण। स्विष्टकृतमित्यादि आज्यभागांते पूर्वोक्त संख्यया मंत्रेण होमं कृत्वा



मिश्रं मज्जत्यर्धं मितं पयः। मार्कंडेयाद्दूरं लब्ध्वापि वाप्यायुर्विवृद्धिरूप इति। वचनात्। तादृशे दुग्धं पीत्वा कार्यो यद्दक्षिणां दत्वा
ब्राह्मणान् भोजयेदिति संक्षेपः। इदं चाधिमासे न कार्यं [illegible] अधिमासे न कर्तव्यं श्राद्धं संवत्सरादिकं॥
वर्षवृद्ध्यभिषेकादि कर्तव्यं मलिम्लुचे नत्विति हेमाद्रौ कौथुमि वचनात्। तत्र बृहज्ज्योतिः पराशरेऽपि। उपाकर्म तथो
त्सर्गः प्रसवाहोत्सवाष्टकाः। मास वृद्धौ पराः कार्या वर्जयित्वा तु पैतृकमिति। प्रसवाहोत्सवो वर्धमान संतत इति मदनः।
तद्दिवर्षापनं। जातेष्टि रिति हेमाद्रिः। तन्न। उत्सवपदानर्थक्यात्। तेन दर्शादिमासेनैव कार्यं। यत्तु अर्जुन सौरेण शि
 शोः समांते जातं तु से स्नाप्य पथजन्मतिथ्य इत्यादि प्रयोगपारिजाते सौरमासविधानं तत्सौरमानगणनया क्रि
यमाणे वर्षफलादावुपयुक्तं। न तु जन्मतिथौ तथा त्वे तस्याः। अनियमापत्तेः। तेन वर्षप्रवेशतिथ्युत्सवः सौरमा
ने नेति मलमास मध्ये एव तद्दुत्सवः॥ जन्मतिथ्युत्सवस्तु चांद्रमात्रे ते विशुद्धमासे एवेति दिक्। वर्धापनादि नाप
नं। इति मलमासमध्ये एव तदुत्सवः॥ जन्मतिथ्युत्सवस्तु चांद्रमात्रे ते विशुद्धमासे एवेति दिक्। वर्धापनादि नप
कटिसूत्रबंधनमुक्तं प्रयोगपारिजाते ब्राह्मे। प्रतिसंवत्सरं तद्वर्ष्ये नक्षत्रेण विधिपरं। दत्वा गतोऽप्य
हिरण्यादि तथा स्वर्णादिनिर्मितं बध्वा वा कटिसूत्रं च वासः संप्रसन्नतनं। दूर्वांकुरं तथा ज्ये नवरुणं
चपिता सकिंनं। आयुष्य होमं कृत्वा च तर्पयेत् पितृदेवताः। कटिसूत्रे बंधनं च गर्भस्थे मतिरिक्तविषयं। तस्य [illegible]
 निषेधात् पारिजाते। आश्वलायनाः। यत्किंचित् कुरुते कर्म वैदिकं चाथ तांत्रिकं। [illegible] कांची
कटिबंधन युक्तस्य तत्सर्वं निःफलं भवेत्। रौप्यं कार्पासकं हेमं पट्टसूत्रं कृतं तु वा वर्जयेत् कर्मकालेषु कांची
विप्रो विशेषत इति। ब्रह्मचारिणस्तु न दोषः। कौपीनाच्छादनार्थाय मौंजी कार्पासिकीं द्विजः संधारयेत्
नी

Indira Gandhi National
Centre for the Arts

प्र·चि·
७८



निहतां वासरीन्वाहते तथे प्राश्वलायनवचनात्। कार्पासिकी मौञ्जी रज्जुमित्यर्थः। अथेह मांड्ये वर्षापने
विशेषः। भविष्ये। युधिष्ठिर उवाच। देवदेव महाभाग बालानां हितकाम्यया॥ वर्षापनविधिं ब्रूहि तता
मपि विशेषतः। कृष्ण उवाच। मासि प्रविष्टे प्रथमे बालवर्षापनं बुधैः॥ मातृणां बात-मुनिश्रेष्ठ समाते चापि
पीयते। कुमुदा माधवी गौरी रुद्राणी पार्वती उमा। काली सरस्वती चैव सावित्री ब्रह्मणः प्रियाः
सती संज्ञा तपा मेधा पुष्टिस्तुष्टिसमन्विता। नृपडिंभपरित्राणा जीवंती नाम षोडशी। पूजनीयाः
प्रयत्नेन भूर्पन्नन्ये विलिख्य तु। रजनीपिष्टतो वापि लिखित्वा कुंकुमेन तु। गंधैः पुष्पैः सुगंधैश्च दीपवस्त्र
निवेदनैः। पूजनीयास्तु संस्थाप्य कुमुदाद्याः पृथक् पृथक्। नामभिः पूजनीयास्ताः पूजयित्वा तु बा
लकं। पूजयेन्मातृपितरौ बालवर्षापने सति। पुरोधाः पूजयेद्भूलन्न राजा वर्षापनाविधौ। कुमुदाद्याः
समुद्दिश्य वंशपात्राणि कल्पयेत्। एकैकस्याधना... यस्तु दद्यात् षोडश षोडश। तदर्धानि तदर्धानि वैवै
केकमथापि वा। बहुपक्वान्नयुक्तानि बहुपुष्पफलानि वा। सुवासिनीभ्यो विप्राणां दद्याद्दक्षिणपुरःसरं। प्री
यतां कुमुदाद्याश्च मे बालायुर्विवर्धिनीः। बलेनमथ सा तुष्टा बालं मे वर्द्धयंतु वै। प्रयच्छंतु सदारोग्यं सौख्यं
सौभाग्यमेव च। श्रीश्वतेति मंत्रेण अर्घ्यं ताभ्यः प्रदापयेत्। वस्त्रतांबूलपुष्पादि दिने तस्मिन्न कल्पयेत्।
सुवासिनीनां देयं तु कुमुदा प्रीयतामिति। एवं वर्षापनं वत्सरांते वै जन्मवासरे। व्यतीतेषु च मासेषु बाला

६८



नांबलवृद्धये। न बालरोगाः प्रभवंति तस्य न स्कंदरोगा न च शाकिनीभ्यः। भयं स्यदेवं नैव जलाग्निदि
कश्चो बालश्च पुष्टः सविशेषतश्च। संप्राप्य राज्यं नृपतिः समांते कुर्यादिमं शांतिमहोत्सवं च। ग्रहांस्त
था पूज्याधिनायकं च। दुर्गाश्च सत्या कुमुदादिदेवीः। यः पूजयेद्दक्षिणपुरःसरं हि स हेमपूर्णो बलं च
द्धिसुकृशति (?)। श्रीरामकल्पद्रुमांतर्गते त्रयोमा चिंतामणौ वर्षापनविधिः। तिथितत्त्वे स्कांदे। खंडनं न
खकेशानां मैथुनाध्वगामी तथा। आमिषं कलहं हिंसा वर्षवृद्धौ परित्यजेत्। वह्निमनुः। मृते जन्मनि संक्रां
तौ श्राद्धे जन्मदिने तथा। अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा। जन्मतिथिश्चोदयिकी ग्राह्या।
युगाद्या वर्षवृद्धिश्च सप्तमी पार्वतीप्रिया। रवेरुदयमीक्षंते न तत्र तिथियुग्मतेति। कृत्यतत्त्वार्णवे वच
नात्।। विशेषो निर्णयसिंधौ ज्ञेयात्। अथ चौलं।। पारिजाते। जाताधिकाराज्जन्मादितृतीयेब्दे तु चौलकं।
आद्येब्दे कुर्वते केचित्। पंचमेब्दे तृतीयके। उपनीतमासहे वेति विकल्पाः कुलधर्मतः। नारदः। जन्म
तस्तु तृतीयेब्दे श्रेष्ठमिच्छंति पंडिताः। पंचमे सप्तमे वापि जन्मतो मध्यमं भवेत्। अधमं गर्भतः
स्याच्च नवमैकादशेपि वा। पारिजाते नृसिंहः। तृतीये पंचमे वर्षे गते भागे तृतीयके। सदा चौलं प्रकुर्वीत
न्यामिति केचित्। प्रजाक्षत इति बृहस्पतिः। उत्तरायणगे सूर्ये विशेषात् सौम्यगोलके। शुक्लपक्षे
शुभं प्रोक्तं कृष्णपक्षे शुभेतरत्। अशुभांत्यत्रिभागस्यात्। कृष्णपक्षे त्रिधाकृते। वसिष्ठः। द्वित्रिपंचमसप्त

Indira Gandhi National Centre for the Arts

प्र॰चि॰ न्या मे का दश्यां तथैव च। दश्यंम्यां च त्रयोदश्यां कार्यं क्षौरं विजानता। नृसिंहः। षष्ठ्यष्टमी चतुर्थी च नवमी च चतुर्दशी
७२ द्वादशी दर्शपूर्णे द्वे प्रतिपच्चैव निंदिताः। वसिष्ठः। खेरंगारकस्यैव सूर्यपुत्रस्य चैव हि। निंदितादिवसाः क्षौरे शेषा कार्यकरा
शुभाः। बृहस्पतिः। पापाः हार्णां का राद्दौ विप्राणां शुभदं रवेः। क्षत्रियाणां क्षमा सूनोर्विट्शूद्राणां शनेः शु
भं। हस्ताश्विविष्णुपौष्णाश्च श्रविष्ठादि सपुष्यकं। सौम्यचित्रे न वक्षौरे उत्तमानवतारकाः। त्रीण्युत्तराणि याम्यं
मं रोहिणी वारुणं तथा। क्षौरे षण्मध्यमाः प्रोक्ताः शेषा द्वादश गर्हिताः। निधने जन्मनक्षत्रे वैनाशे चं
द्रमोऽष्टमे। विपत्करे [illegible] प्रसरं च विवर्जयेत्॥ एतच्च। शिशोर्माता यदि गर्भिणी तदा न कार्यं। तदाह
वृद्धगार्ग्यः। पुत्रचूडाकृतौ माता यदि स्याद्गुर्विणी भवेत्। शास्त्रेण मृत्युमाप्नोति तस्मात्क्षौरं विवर्जयेत्। ए
तद्बालस्य पंचमाद्धात्प्राक्। ऊर्ध्वं तु गर्भिण्यामपि मातरि कार्यं। तथा ह नारदः। स्त्रीकर्मा तीत गर्भिण्यां चूडाक
च र्म बालस्य पंचमाद्वात्प्राक् गर्भोर्ध्वं तु गर्भिण्यामपि कारयेत्। यदि गर्भे विपत्तिः स्यात्॥ शिशोर्वा मरणाय
मेव कारयेत्। पंचमाद्धात्प्राक् गर्भोर्ध्वं तु गर्भिण्यामपि पंचमासपर्यंतं दोषः ... स्यादि। सुहोपनीसा ... कुर्याच्चेत् तदा दोषो न विद्यते। गर्भिण्यामपि पंचमासपर्यंतं ... बालस्य च
हनि र्णयसिंधौ गर्गः। पंचममासोर्ध्वं मातुर्गर्भस्य जायते। मृत्युरिति। तेन गर्भिण्यां मातरि यत्। बालस्य च
हो तरम्नुपानी सा सहायत कर्तव्यत्वप्राप्तः तन्मातुः पंचममासप्रमाप्तिपर्यंतमेव। नोर्ध्वमित्येव मे कृवाक्यात्।
एवं मातुरजोदोषेपि न कार्यं। प्राप्तमभ्युदयश्राद्धं पुत्रसंस्कारकर्मणि। पत्नी रजस्वला चेत्स्यात्तन्न कुर्यादिति ७२
तावदेति। बृहस्पत्युक्तेः। संकटे ... सा का सारे। अलाभे सुमुहूर्तस्य रजोदोषे ह्युपस्थिते। श्रियं संपूज्य

विधिवत्ततो मंगलमाचरेत्। गर्गः। ज्वरस्यो मादनं यस्य लानं तस्य न कारयेत्। दोषनिर्गमनात्सम्यक् स्वस्थो
विधिवत्ततो मंगलमाचरेत्। गर्गः। ... विशेषो निर्णयसिंधौ ज्ञेयः। कारिकायां। तृतीये वत्सरे चौलं कुर्यात्
धर्मं समाचरेत्। लग्नमुपलक्षणं। अन्यश्चात्र विशेषो निर्णयसिंधौ ज्ञेयः। कारिकायां। तृतीये वत्सरे चौलं कुर्या
तास्यो तरायणे। शुक्लपक्षे शुभर्क्षे तु कृत्वाभ्युदयिकं तथा। यथा त्वयं वा केषांचिदुपनीत्या सहाथ वा तच्च यथा
कुलाचारं कार्यं तत्रापि द्वितीया दौ जन्मतो मुख्यं गर्भतो गौणमिति भट्टाः। मनुः। जातकर्मादिसंस्कारास्स्वकाले
त्वप्रवर्तिचेत्। चौलादर्वाक् प्रकुर्वीत प्रायश्चित्तादनंतरं। अत्र च। चौलादर्वाक् शिशुकेशतः। पूर्वं नामकरणा
न्नप्राशन काले वा ति पन्नसंस्कारकरणे वा ति पत्ति प्रायश्चित्तं। तेन नामकरणकालेनीते जातकर्मकरणो
जातकर्मनिमित्तं वक्ष्यमाणं तत्स्वपेक्ष्यः। नहि कुत्रापि प्रयोगपारिजाता दावति पत्ति निमित्तकं प्रायश्चित्तं
नाम करणसमये उक्तमित्यादिक। प्रायश्चित्तं चाह शौनकः। आरभ्याधानमाचौलात्कालेऽतीते तु कर्मणां
व्याहृत्याज्यं तु संस्कृत्य हुत्वा कर्म यथाक्रमं। आज्यं हुत्वा कर्म यथाक्रमं कार्यमिति संबंधः। तथा स एव
व्याहृत्याज्यं ... अनापदि तु सर्वत्र द्विगुणं
एतेष्वेकैकलोपे पादकृच्छ्रं समाचरेत्। चूडायाअर्द्धकृच्छ्रं स्यादापत्तिलेवमीरितं। अनापदि तु सर्वत्र द्विगुणं
पादकृच्छ्रं द्विगुणाचरेदिति। प्रायश्चित्ते तु कृते तत्कर्म कृताकृतं। तदुक्तं कारिकायां। प्रायश्चित्ते कृते पश्चाद्यतीतान्यपि
कर्मवैकार्यमित्येक आचार्या नेत्यन्ये तु विपश्चित इति। त्रिकांडमंडने तु कालातीतेषु कार्येषु। प्राप्तवत्स्वपरेषु च। का
लातीतानि कृत्वैव विदध्यादुत्तराणि विसुकं। तेन पादकृच्छ्र व्याहृति होमादि प्रायश्चित्तं कृत्वा तंत्रेण सर्वेषां नोदिष्टाद्य
कृत्वा। तानि कृत्वा चूडाकर्म कुर्यात्। यत्त त्वतीतानामकरणमिति पक्षः। स्तदेके कस्य पादकृच्छ्र व्याहृति होमादि प्रा

प्र०वि० ८०

प्रायश्चित्तं कृत्वा ... [illegible] ... चूडाकर्म०

[illegible] ...

... [illegible] ... चौलांगप्रधानहोमात्पूर्वं भूर्भुवः स्वाहेति प्रतिकर्मलोपमेकैकामा-
ज्याहुतिं हुत्वा प्रधानहोमं कुर्यात्। यदा तु प्रमादादतिपन्नप्रायश्चित्तमकृत्वैव चूडाकरणमारब्धं तदा तदीयप्रधानं
होमात्पूर्वं प्रत्येकं सप्ताज्याहुतिहोमं चूडाकरणहोमं च सांगं कृत्वा पश्चादेकैकस्मिन्पादकृच्छ्रादिप्रायश्चित्तं कार्यं। ए-
वं च हुत्वा यथाक्रममारब्धं कर्म कार्यमिति संगच्छत इति सच्चरणानामाशयः। एतदेवाभिप्रेत्य प्रधानहोमात्
पूर्वं समस्तव्याहृतिभिः प्रतिकर्मलोपमेकैकामाज्याहुतिं जुहुयादिति भट्टैरुक्तं। अत्र जातारण्यस्थावे चौलकर्मोपनय-
ने विवाहः प्रथमस्तथा। एतानि स्नानमिसेषां लौकिकाग्नि [illegible] स्थितिरिति। कारिकावचनाल्लौकिकोग्निः। सोपि स-
भ्यनामा। सभ्यनामाथ चूडायां व्रतादेशे समुद्भव इति वचनात्। अग्निश्च एवमेनः शामंयाति बीजगर्भसमुद्भ-
वमिति याज्ञवल्क्यवचनात्तथा। गार्भैर्होमैर्जातकर्मचूडामौंजीनिबंधनैः। बैजिकं [illegible] गार्भिकं चैनो निर्द्वि-
जानामपमृज्यत इति वचनाच्चास्य कुमारस्य बीजगर्भजैनोनाशद्वारेश्वरप्रीत्यर्थं चौलकर्म करिष्य इति सं-
कल्पः। ततो गणपतिपूजनादि नांदीश्राद्धांते कृते सभ्याग्निं प्रतिष्ठाप्य। प्रणीताप्रणयनोत्तरमग्नेरुत्तरतो व्रीह्यादि-
पूर्णशरावचतुष्टयं निदध्यात्। तदुक्तं कारिकायां। पूर्णपात्रनिधानांतमुपलेपादि पूर्ववत्। व्रीहिपूर्णं श-
रावं स्थाप्य यवपूर्णं तथापरं। माषपूर्णं तथान्यस्यात्तिलपूर्णं तथापरं। एतानि च शरावाणि स्थले दुत्तरतोन- ८०
लात्। सूत्रेपि। उत्तरतो व्रीहियवमाषतिलानां पृथक्पूर्णानि शरावाणि निदधाति। प्रणीताप्रणयनोत्त-

रमेतान्यग्नेरुत्तरतः स्थापयति। पृथग्ग्रहणं द्रव्यभेदार्थं। अन्यथा सर्पिर्मधुनी हिरण्यनिष्काषमिति वन्मिश्रि-
तानां पूरणं स्यात्। यद्वा समासोपदेशात्कामं तु व्रीहियवतिलैरित्यादिवद्द्रव्यविकल्पनिरासार्थं पृथग्ग्रहणमि-
ति वृत्तिः। तानि शरावाणि स्तीर्णेषु दर्भेषु सादनीयानि। तदाह शौनकः। ततः कौतुकमाबध्य मुहूर्ते शोभनेन
कं। प्रतिष्ठाप्योत्तरे तस्माद्दर्भान्संस्तीर्य यत्नतः। कृतानि शरावाणि चत्वारि व्रीहिभिर्यवैः। माषैस्तिलैश्च प्र-
त्येकं पूरितान्येकशः क्रमात्। व्रीहिभिः पूरयेत्पात्रं यवाभावे तु तत्समैरिति। तेनैतान्येकैकशः सादनीया-
नि। व्रीह्यादिशरावस्थापने कारणमाह आश्वलायनः। अ[illegible]त्वादपक्वानां ओषधीनां द्विजातिभिः। तस्मा-
द्व्रीह्यादिबीजानि स्थापयित्वा स्मरेत्तदेति। सूत्रे। पश्चात्कारयिष्यमाणो मातुरुपस्थे आनडुहं गोमयं नवे श-
रावे शमीपर्णानि चोपनिहितानि भवंति मातुः पिता दक्षिणत एकविंशतिं कुशपिंजूलान्यादाय ब्रह्मा वैतानि
धारयेत्। कारयिष्यमाणः कुमारः। अग्नेः पश्चान्मातुरुपस्थे उत्संगे आस्ते। तेन कुमारस्यांतरंगत्वादग्नेः। कुमा-
रस्य व्यवधानं न कार्यं। पिता मातुर्दक्षिणतः कुशपिंजूलान्यादायास्ते। ब्रह्मास्ति चेत्तद्धारयेत्। पितुरसंभवे-
न्यस्मिन्वा कर्तरि ब्रह्मधारणपक्ष एवेति जयंतः। मातृग्रहणं मातुरुत्संगाद्दक्षिणतो यथा स्यादग्नेर्दक्षिणतोपि
माभूदिति वृत्तिः। कारिकायामपि। कुमारो मातुरुत्संग आस्ते प्रत्यङ्मुखो विभुजः। अथानडुहं कस्मिंश्चिच्छरावे
गोमयं क्षिपेत्। शमीपर्णानि वान्यस्मिन् द्वे ते मातुः समीपत इति। तेन शरावद्वयं मातृसमीपे। आश्व-

प्र॰वि ८१ लायनेन तु क्षुरेणैवाति तीक्ष्णेन ताम्रयुक्तेन चैव हि। छेदितान् तान् समादाय मातृहस्ते निवेदयेदिति सूत्रं। आश्वलायनः। चूडाकर्म॰
पुरस्थे शरावे तु विन्यसेद्वृषगोमयं। तदुत्तरे तथैवास्मिन् शमीपर्णानि पूरयेदिति। जयंतोपि। अग्नेः पश्चान्मातु
रंके अपस्थितस्य कुमारस्य दक्षिणतः गोमयेन वै शरावे प्रक्षिप्य। शमीपर्णानि चैकस्मिन् शरावे प्रक्षिप्य स्थापयेत्। ताम्रम ८५
यक्षुरपरि॰ मन्होप्यस्मिन्नेव काल इति। शौनकोपि। अंके निधाय तीष्णुक्रमासीत प्राङ्मुखी सती। तस्याः पुरस्ताद्द
क्षपश्चादानडुहं शकृत। अस्य शमीमिविन्यस्य शरावे सादयेत्ततः। शमीपर्णानि चान्यस्मिन् शरावे वापि॰
केत। अत्रे वसमयेकुर्यात्क्षुरस्यापि परिग्रहमिति। स च क्षुरस्ताम्रमयः। तदाह प्रयोगपारिजाते षड्रुहि
ब्धः। क्षुरस्यापि स्तं लौहत्वात् ताम्रस्याग्नेः लोहानीः। ग्ह्यांतरेषु बहुषु क्षुरस्ताम्रमयो यत इति। ततः
आघारौ। ते त्रिरन्नं ये पवमानाय प्रजापतये च जुहुयात्। तथा च सा॰ घृतेन पुरस्ताच्चेत स्त्रआ
ज्याहुतीर्जुहुयात् इति। तेषामिति निर्धारणे षष्ठी तेन तेषां चौलादीनां संबंधिन्यः ताः जुहुयात्। ते सर्वे तेन तु तेभ्यः
पूर्वं च तत्र स्तरति संख्यावचनं तु व्याहृतीनां चानां च समुच्चयेपि॰ केन स्यादिति चेत। न पुरस्तात् हुतास्या
वाहुतयः स्युरिति। तेना॰ भ्यागयोर्निर्देशः संख्या वचनं। न हि स्विष्टकृदपि न स्यादिति चेत। न पुरस्तात् हुतास्या
योगाव्यवच्छेदेन पुरस्तादेताएवाहुतयः इत्येवं नियमार्थत्वात्। आघारौ तु स्त्व एवं अनाहुतित्वात्। आज्यग्र होमे
हणं तु अनादिष्टे ज्यं वा दास्येति कुपि परिस्तरणविकल्पार्थं। तेन न सर्वत्राज्यै परिस्तरणविकल्पः। किंतु यत्रा ८१
मपदंश्रूयते तत्रैवेति वृत्त्याशयः। आहुतिचतुष्टयं तु अग्न आयूंषीति तिसृभिः प्रजापतेन इति च। अत्र च
त = स्युरित्येवमर्थमिति केचित। तन्न अस्य सूत्रस्याहुतिसमुच्चयपरत्वेन मंत्रव्याहृतिसमुच्चयपरत्वे मानाभावात्। तेन नियमार्थमिदं च तस्त्र
= एवाहुतयः॥ ४

पवस्व शतं वैखानसो नाहस्य अनुष्टुप्। परास्तिस्र आग्नेय्याः पवस्वविश्वचर्षण इति द्वितीयं सूक्तं। अत्र त्वं सोमस्य
पवस्व शतं वैखानसो नाहस्य अनुष्टुप्। परास्तिस्र आग्नेय्याः पवस्व इत्युक्ते। नवमं च मंडलं पा
रस्य द्वितीयमनुष्टुप्। तदुत्तरमग्न आयूंषीत्यादिऋक्त्रयमग्निर्देवं संतिस्र आग्नेयइत्युक्तं सर्वानुक्रम
वमात्तं तेनाग्न आयूंषीति तिसृणां शतं वैखानसा ऋषयः अग्निः पवमानो देवता गायत्री छंद इत्युक्तं सर्वानुक्रम
णाच्चो। व्याहृतिभिर्वेति॰ तिसृभिरिति द्वितीयः पक्षः। ऋगाहुतीनां व्याहृत्याहुतीनां च समुच्चयः। तेनाष्टावा
ति हुतय इति तृतीयः। नैके कांचनैः पक्षे कामिति किंशब्दस्य सर्वनामत्वात् सर्वनाम्नां च प्रकृतपरामर्शित्वाद् ऋगाहुती
नो व्याहृत्याहुतीनां च निजैषीपि अनादिष्टा आहुतयो सर्वं से वेति॰ त्रिस्वरसः कारिकायां। कुर्यादाघारपर्यंतं मा
ज्यले कादि पूर्ववत्। इदमादि विराहांतं नैवेद्यानामैष्णाग को अग्न आयूंषि तिसृभिः प्रजापतये इत्यस्य चानुबेणाज्या
हुतीर्हुत्वाशीतोष्णांभः स्यथानयेत्। पश्चात्स्थित्वा कुमारस्याशीताउष्णाश्चापः। पाणिभ्यां संजने मणि
समुग्गपत्निन्येदथ। उष्णेन वाय उदकेनेहीति तेन तद्वेत। सूत्रेपि। पश्चात्कारयिष्यमाणस्यावस्थाय उ
ष्णेन वायुउदकेनेहीति। आघारांते पूर्वोक्ताहुतीर्हुत्वा कुमारस्य पश्चिमदेशे स्थित्वाशीतमुष्णं चोदकमु ती
भाभ्यां पाणिभ्यां गृहीत्वा अन्यस्मिन् पात्रे युगपन्नयतीति वृत्तिः। उदकद्वयं शरावद्वये गृहीत्वा पश्चात्स्थित्वा
अस्मिन् शरावे युगपन्निनयतीति जयंतः। अत्र च। यद्यपि पश्चात्स्थित्वा उदकद्वयं युगपन्निनयतीति अवि
जोते भृतिषेणोक्तं तथापि उष्णाशीतोदकैः स्निग्धा केशास्तु लेपितो दतीति पाहि आचार्यवचनात्। कुमारस्य केशमूलेषु
शोदकधारायां शीतलोदकदानपूर्वं युगपन्निनयेत्। कारिकायामेकदेशां गृहीत्वा संनयनीतं तथैव च।

Indira Gandhi National Centre for the Arts

प्र॰चि॰ दध्नोद्रप्ससमुपादत्ते नास्ति चेन्नवनीतकं। प्रदक्षिणं कुमारस्य त्रिस्त्रिः केशयते त्वथ। आरभ्य वामतः कर्णप्रदेशात् चूडा कर्म॰
केशनं भवेत्। जयंतोपि। वामतः कर्णप्रदेशात् आरभ्य शिरस्त्रिरुंदतीत्याह सूत्रे। तासां गृहीत्वा नवनीतं दधि
८२ द्रप्सान्वा प्रदक्षिणं शिरस्त्रिरुंदत्सदितिः केशान्वपतु वापतु इं वेन्नवे स इति। तासामप्यामेकदेशं नवनीतं तद्रप्सा
न्वेदधिद्रप्सं गृहीत्वा प्रदक्षिणां त्रिरुंदति। क्लेदयति। अत्रमंत्रावृत्तिरिति वृत्तिः। दधिद्रप्सो दधिलेशः इति जयंतः। रस=२
सूत्रे दक्षिणे केशपक्षे त्रीणि त्रीणि कुशपिंजूलान्यभ्यात्मानाग्राणि निदधात्योषधे त्रायस्वैनं स्वधिते मैनं
हिंसीरिति लोहेन क्षुरेण प्रछिनत्ति त्रीणि त्रीणि इति वीप्सा वक्त्वार्था। अभ्यात्मा ग्रामाणि पश्चिमाग्राणीति
वृत्त्याशयः। जयंतेनापि अग्रे हृदयमालिखन्ति वनिदध्यानीत्युक्तं। अत्र हृदयाभिमुखाग्रत्वमिति केचित्। तत्तःप
पश्चिमाग्रत्वेपि हृदयाभिमुख्या विरोधात्। पारिजाते पश्चिमाग्रता केश्च। कारिकायां। निदध्यादोषधेत्राय
स्वेनमित्यस्य दक्षिणे। केशपक्षे कुमारस्य हृदयगं तत् कुशत्रयं पिंजूलेषु क्षुरं न्यस्य स्वधिते मैनमित्यथेति ततः।
येनावपदिति मंत्रेण सकेशान्तान् प्रछिद्य प्रागग्रान् कृत्वा शमीपर्णैः सह मात्रे प्रयछति तां नानडुहे गो
मये निदधाति। तथा च कारिकायां येनावपदिति छिंद्यात्। छिन्नान् प्रागग्रान् एकीकृत्य शमीपर्णैस्तांश्च
मात्रे प्रयछति छेदनं च सकेशानां पिंजूलानां भवेदिह। निदधाति च सा माता तानानडुहगोमये। पूर्ववत्कु
शपिंजूलनिदधानादि संभवेत्। येनधातेति मंत्रोपं छेदने तु विशिष्यते। तृतीये येन भूयश्च चतुर्थे छेदनं
त्रिभिः। सूत्रे। प्रछिद्य प्रछिनत्तीति द्वौ वीप्सावचनं योत्र धर्म उपदिश्यते। स सर्वेषु छेदनेषु यथा स्यादित्येवमर्थं स्व ८२
यंप्रागग्रान् कृत्वा तस्या हस्ते निदध्यात्। तस्याः स्थापनेन प्रागग्रता नियम इति वृत्त्याशयः। जयंतस्तु प्रागग्रा

नुदगग्रान्वा निदध्यादित्याह देवत्रातस्तु आध्येतु प्रथमनिधाने प्रागग्रतानियमो न द्वितीयादिष्वित्युक्तं। सूत्रे।
तथैमंत्रैश्च तुर्थमेवमुत्तरतस्त्रिस्त्रिरिति। अत्र च येन भूयश्चेति मंत्रे येन क्षुरेणऽसौ यं माणवकः। सूयो
भूयिष्ठं चरातीति लट्। आमेवं। ज्योक दीर्घकालं सूर्यं पश्यतीत्येवं प्रयोगपारिजाते मंत्रार्थकल्पनाद्रासा
मिसे यं पाठः। रात्र्यामिति तु अपपाठः। कारिकायां। तृतीये च चतुर्थे च पिंजूलादि समं भवेत्। तृतीये येन भू
यश्च चतुर्थे छेदनं त्रिभिः। एवमेवोत्तरपक्षे त्रिरवछेदनं भवेत्। कुर्यादित्यारभ्य नवलुर्थं समाचरेदिति त
तः मातुः जलस्पर्शः। ततः क्षुरतेजो निमृजेति यत्क्षुरेणेति मंत्रेण। क्षुरधारां निमार्जनं च उपरिप्रारभ्याधः
कुर्यात्। तथा च शौनकः। मंत्रं तु यत्क्षुरेणेति प्रक्रांतसक्तुदीर्घतु। क्षुरस्य धारामुपरि प्रारभ्याधः परामृ
शेदिति। ततः शीतोष्णाभिरद्भिरर्धं कुर्वाणोक्षुणवन् कुशली कुर्वित्यनेन नापिताय प्रैषं दद्यात् कुशलीकरणं व
पनं विपरीत लक्षणया ज्ञेयमिति वृत्तिः। सूत्रे। यथाकुलधर्मं केशवेशान्कारयेदावृतैव कुमार्या इति। एक
शिखस्त्रिशिखः पंचशिखः पूर्वशिखोपरशिख इति कुलधर्म इति वृत्तिः। अनेन प्रवरसंख्यया शिखास्थापन
मुक्तं भवति। तत्र विशेष उक्तः। प्रयोगपारिजाते। मध्ये शौंसि चूडा स्याद् वसिष्ठानां तु दक्षिणे। उभयोः पार्श्व र
योरत्रि कश्यपानां शिखा मता। लौगाक्षिः। दक्षिणतः कम्बुजा वासिष्ठानां उभयतोत्रिकश्यपानां मुंडा भृगवः
पंचचूडा आंगिरसः वाजिमेके मंगलार्थं शिखिनोन्ये यथाकुलधर्मं वेति। कम्बुजा शिखा। तेन वासिष्ठानामे
कप्रवरत्वेन दक्षिणे शिखा। तथा वासिष्ठानां त्रिप्रवरत्वेपि दक्षिणे मध्या शिखा व जमि केव शिखा। अत्रिकश्य

Indira Gandhi National
Centre for the Arts

प्र·चि· पानां कूभयोः पार्श्वयोः शिखाद्वयं। क्षत्रियाणां तु न पार्श्वतः शिखा एवमंगिरसां त्रिपरस्वेपिपंच चूडाअस्येषे। चूडाकर्म
८२ प्रवरसंख्यया शिखास्थापनं केशपंक्ति वीं। कारिकायां। शिलोच्छाविरिति प्रैषेणानुशिष्याच्च नापितं। न
न:स्विष्टकृदादिस्यात्। कुमार्या अप्यमंत्रकं। श्रीधरीयदर्पणा येनानि नापिताय प्रयच्छति। शिखा अपि
चकर्तव्याः। कुमारस्यर्षिसंख्येति प्रवरसंख्यमेत्यर्थः। शूद्रस्य तु ऋष्यभावात्पंचात् प्रवरसंख्यया
पि शिखास्थापनाभिति चरणाः। आपस्तंबस्तु कृत्वा कुशानाविनीयय थर्षिशिखानिदधातीत्याह अ
पराके। उदङ्मुखः प्राङ्मुखो वा वपनं कारयेत्सुधीः। तथाह स्मृतिरूर्णमारस्य धर्मार्थे पाप संचये। शिखाघ्
नवसंस्कारे शिखाद्यं तच्छिरो वपेदिति। नवसंस्कारे नूतने चूडाकरणे इत्यर्थः। आश्वलायनः। पावंतः प्रव
रा स्तस्य शिखामध्ये च पार्श्वयोः। पश्चात्सूर्यैस्तथा पंच प्रवराणां शिखाः स्मृताः। तासां च मध्य शिखावर्जमु
पनयने वपनं कार्यं। प्रतिदिशं वपतीत्यापस्तंबोक्तेः। श्रुतिरपि। रिक्तो वा एषो नपिहितो यन्मुण्डस्तस्यैतदपिधा
नं यच्छिखेति। शिखेसेककवचनादेकैव शिखा परिधानार्था। न तु सर्वा:यत्तु कुमाराविशिखा इत्येतिलिंगं त
च्छंदोगपरं। शांखायनसूत्रे प्रागुदीच्यां दिशि वकोषधिके देशे अपांवा समीपे केशान्नि खनंति। नापितायधा
न्यपात्रां ददाति। अत्र भोजने प्रायश्चित्तमुक्तं माधवीये। निवृत्ते चूडहोमे तु प्रागुक्तकरणं तथा। चरेत्सांतप
नं भुक्त्वा जातकर्मणि चैव हि। अतो येषु येषु संस्कारेषूपवासे न भुञ्जीत। आश्वलायनः। होमं कृत्वैव पुंसां
कृत्वा तत्स्त्रीणां चूडाकृता वपीति होमोप्यमंत्रक इति केचित्। मनुरपि। अमंत्रिका तु कार्येयं स्त्रीणां ८२

मावृद्दशेषतः इति। होमो नेति वृत्तिकृत। पुण्याहवाचनादि तु समंत्रकं सर्वसमुक्तं प्राक्‌चूडाकरणप्रयोगस्तत्रैव द्रष्टव्ये
त्। अत्र दशाधिप्राप्तोज्याः। अत्र कात्यायनसूत्रं। सांवत्सरिकस्य चूडाकरणं तृतीये वा प्रतिहते षोडशवर्षस्य केशां
तः अत्र दशादिप्राप्तोज्याः। अत्र कात्यायनसूत्रं। सांवत्सरिकस्य चूडाकरणं। माता कुमारमादाय आप्लुते वाससी परिधाप्यां कआधाय प
ते यथा मंगले वासवेषां ब्राह्मणान्भोजयित्वा माता कुमारमादाय आसिंचत्सुखेन वाय उदकेने चते केशान्वपेति।
श्वादग्ने रूपविष्टा अन्वारब्धा व्याहृतीर्हुत्वा प्राशनान्ते शीतोष्णस्वसु उष्णाआसिंचत्सुखेन वाय उदकेनेधते केशान्वपेति
केशश्मश्रु लिच केशांतेषात्रं नवनीतपिंडं घृतपिंडं दध्नो वा प्रास्यति। ततआदाय दक्षिणं गोदानमुंदन्सवि
त्राप्रसूतादैव्या आप उंदंतु ते तनुं दीर्घायुत्वाय वर्चस इति त्रेण्याशलल्या विनिय। त्रीणि कुशतरुणान्यंतर्दधाति
ओषधे इति शिवो नामेति लोहं क्षुरमादाय निवर्तयामीति प्रवपति येनावपत्सविता क्षुरेण ब्राह्मणा वपते दमस्या
युष्यं जरदष्टिर्यथासदिति स केशानि प्रच्छिद्यानडुहे गोमये पिंड प्रास्यन्नुत्तरतोप्रियमाणे। एवं द्विरपरं त्र्यायुषमि
न्तरयोश्चोदनाद्यथ पश्चात्त्र्यायुषमिस पथोत्तरयो। येन भूयश्च रात्र्यां ज्योक्‌च पश्चाच्चि सूर्यं। तेन तेघामि ब्रह्म
जीवातवे जीवनाय सुश्लोक्याय स्वस्तय इति। त्रिःक्षुरेण शिरः प्रदक्षिणं परिहरति। सुमुखं केशांते। यत्क्षुरेण
मर्चयता सुपेशसा वप्ता वापयति केशा। धीर्मुखमिति च केशांते तता सिरद्भिः शिरः समुद्य नापिताय क्षुरं प्रयच्छ
त्यक्षुण्वन्परिवपेति। यथा मंगलं केशशेषकरणं मनु गुप्तमेतं सकेशं गोमयपिंडं निधाय। गोष्ठे पल्वल उदकांते वा
आचार्याय वरं ददाति गां केशांते। संवत्सरमवपनं च केशांते द्वादशरात्रं त्रिरात्रमंततः। इत्यनंतकृतं चूडाकरणं॥ प्रयोगचिंतामणौ॥
अथ विद्यारंभः। निर्णयसिंधौ नृसिंहः। अक्षरस्वीकृतिं कुर्यात्प्राप्ते पंचमहायने। उत्तरायणगे सूर्ये कुंभमासं वि

Indira Gandhi National
Centre for the Arts

प्र·चिं· ८१ र्जयेत्। श्रीधरः। हस्तादिसप्तमी रमित्रपुरजित्पौष्णाश्विचित्रासुते बाराकशौरादिनोद्यादिरहितेराशौस्थिरे उपनय.

बोधये। पक्षे पूर्णनिशाकरे प्रतिपदं रिक्तां विहायाष्टमीं षष्ठीमप्यमशुक्लमाजिसवन्ने प्रोक्ताक्षरस्वीकृतिः

ता। वर्षे पञ्चमके काले  ... नीं कुजं। अनध्यायान्विनानवारे वंगं यत्कृतं गुरुं पूजयित्वा हरिं ल

क्ष्मीं तथा देवीं सरस्वतीं। स्वविद्यासूत्रकारांश्च स्वां विद्यां च विशेषतः एतेषामेव देवानां नाम्ना तु जुहुया

कृतं। दक्षिणाभिर्द्विजेंद्राणां कर्तव्यं चात्र पूजनमिति। मार्कंडेयः। प्राङ्मुखो गुरुरासीत उत्तराभिमुखः

शिशुः। अध्यापन्तु प्रथमं सम्यक्चैव सुपूजित इति॥ तथा सूर्यस्य ग्रहणे ... समंत्रमाहरेत्

ये पूर्णिमां लघ्य तां भुक्त्वा सप्ताहं वा कृपतिर्भवेत्। तत्र मंत्रः। हूं तहयशिर वागीश्वराय नमः। आनुपनीत

स्पर्धमाः। गौतमः। प्रागुपनयनात् कामचार वादभक्षा इति। एतन्महापातकव्यतिरिक्तविषयं। तथा च पा

न रिजाते। स्पर्शं तरे स्यात्कामचारवादभक्षोक्तिर्महतः पातकादृत इति। महापातके तु पित्रादिभिः प्राय

श्चित्तं कर्तव्यं। तथा च स्मृतिः। ऊनैकादशवर्षस्य पंचवर्षात्परस्य च। चरेद्गुरुः सुहृच्चैव प्रायश्चित्तं विशु

द्धये। अतो बालतरस्यास्य नापराधो न पातकमिति। आपस्तंबः। अन्नप्राशनात्प्रभृति आसंवत्सरात्

दिवसेके। शातातपः। शिशोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतं। रजस्वलादिसंस्पर्शे स्नानमेव कुमारके। ८१

प्राक्चूडाकरणात् बालः प्रागन्नप्राशनाच्छिशुः। कुमारकस्तु विज्ञेयो यावन्मौंजी निबध्यते तथा। कूर्मे

रस्त्रीचशूद्रश्चेति चकारादनुपनीतस्य सकृदाचमनं। गौतमः। यथोपपादितमूत्रपुरीषो न स्य

वृत्ति। न तस्याचमनकल्पो विद्यते न ब्रह्माभिव्याहरेदन्यत्र स्वधानिनयनादिति गौतमः। न तदुपस्प

र्शनाशौचं। तस्यानु [illegible] नुपनीतस्य चंडालादिस्पृष्टस्यापि स्पर्शात्स्नानं। इदं च पंचवर्ष

पर्यंतं। ऊर्ध्वं तु स्नानं भवत्येव। बालस्य पंचमाद्वर्षाद्रक्षार्थं शौचमाचरेदिति स्मृतेः। कामचारादि

कृत्ये बाभितानिर्णयामिंधावुक्तं। विष्णुधर्मोत्तरे। बालानां प्रार्थितं दत्वा नाकलोके महीयते। बालका

श्चानुनेयास्तु धर्मकामैः सदा नरैः। बालक्रीडनकं दत्वा मोदते नंदने वने। तस्मात्सर्वप्रयत्नेन बाल

नग्रे तु भोजयेत्। अभुक्तवत्सु बालेषु नचाश्नीयात्कदाचनेति। अथोपनयनं। तत्र गुरूणां सुमु

हूर्ते पुत्रमुखनिरीक्षणात्मेवोपनयनं।। तथा च ज्योतिर्विदुक्तसमये कुमारमुखदर्शनं।। उपायनं तु

तं प्राहुर्यदिति कात्तत्वदर्शनं इति। ... ते रिति केचित्। सावित्र्याः प्रापणमुपनयन

मिति कात्यायनः। तथा च तत्सूत्रं। गायत्र्या ब्राह्मणमुपनयेदिति। श्रुतिरपि। गायत्र्या ब्राह्मण

मसृजदिति। अपरार्केपि। उपनयनं नाम बटोर्मन्त्रीसंबंधकरणमिति। तत्त्वाचार्यकृत्यं। तस्य

उपानायनं। येन लक्षणेन ... चार्यसमीपे नीयते तदुपनयनमिति प्रारुचिः। पितृकुलाद्विधिवदाचा

र्यकुलप्रापणमुपनयनमिति हरदत्तः। उपनयनमिति रूढं कर्मनामधेयं। उपान यानाख्यं सकर्मविद्या

र्थं तत्तु तदुदीरितमिति संग्रहोक्तेरित्यन्ये। उपनयने ईते सालमनेपदासंमानने लंजनाचार्यकरणात्मनेप

व

Indira Gandhi National Centre for the Arts

इति

प्र०वि० तिनिगणनमयेषु निश्चेसं तेभ्याचार्यः उपनयनेन त्वमिन्नाचार्यकत्वं भावयेदित्यर्थेनाचार्यसं | उपनयन
स्कारकं तदिति प्राभाकराः। नन्वानयने त्वात्मनेपदविधानस्याकर्तृत्वप्रायत्वात्। तेन माणवकसं
स्कारद्वारेणाध्ययनांगमुपनयनमनुषंगादध्यापनं चाजिनमिवाचार्यकत्वं निष्पादयतीत्येतावा
४ विधाना दात्मनेपदमुच्यते। ननु तादर्थ्ये नोदितसुक्तं तत्र तले। अतएव नाध्यापनविधिप्रयुक्तमध्ययनं
९९ अध्यापनस्य तु सर्वत्रैव विध्यनर्हत्वात्। तेनाष्टवर्षं ब्राह्मणमुपनयेदित्यस्याष्टवर्षो ब्राह्मणउप | स्का
गच्छेदित्यर्थे न माणवकसंस्कारकं तदिति मीमांसकाः। यद्यपि ब्राह्मणमुपनयीतेति संप्रविशेषणं
पुंस्त्वाविवक्षया स्त्रिया अप्युपनयनं प्रतीयेत। तथापि तन्मध्याय ईते स्येव ताकतया पुंस्त्वादिरूपा
देयकर्तृविशेषणत्वाद्विवक्षेत्यन्यत्र विस्तरः। अतएव वैवाहिको विधिः स्त्रीणामौपनायनिकः परः पति
सेवा गुरौ वासो गृहार्थोऽग्निपरिक्रियेति मनुना स्त्रीणामुपनयनस्थाने विवाह उक्तः। याज्ञवल्क्यः। गर्भा
ष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनयनं। राज्ञामेकादशे सैके विशामेके यथाकुलमिति। सैके एकादशे द्वादशे इत्यर्थः।
गर्भाष्टमग्रहणं सर्वत्रानुवर्तते। इह नैवोपनयने द्वितीयं जन्मोच्यते। मनुः। तत्र यद्ब्रह्मजन्मास्य मौंजीबंधन
चिन्हितं। तत्रास्य माता सावित्री पिता त्वाचार्य उच्यत इति। याज्ञवल्क्योऽपि। मातुर्यदग्रे जायंते द्वितीयं मौंजी | ८५
बंधनात्। ब्राह्मणक्षत्रियविशस्तस्माद्द्विजाः स्मृताः। ब्राह्मे जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते। विद्यया

ता२ दते१

तो५

चापि विप्रत्वं त्रिभिः श्रोत्रिय उच्यते इति। इदमत्र गृह्यं। अष्टमे वर्षे ब्राह्मणमुपनयेद्गर्भाष्टमे वा एकादशे क्षत्रि
यं द्वादशे वैश्यमाषोडशाद्ब्राह्मणस्यानतीतः कालः। आद्वाविंशात्क्षत्रियस्याचतुर्विंशाद्वैश्यस्यात ऊर्ध्वं
पतितसावित्रीका भवंति नैतानुपनयेन्नाध्यापयेन्नयाजयेन्नैभिर्व्यवहरेयुरिति याज्ञवल्क्यः। आषोडशाद्वा
विंशाच्चतुर्विंशाच्च वत्सरात्। ब्रह्मक्षत्रविशां काल औपनायनिकः परः। अत ऊर्ध्वं पतंत्येते सर्वधर्मबहिष्कृता
इति। आङ् अभिविधौ। षोडशाब्दपर्यंतमित्यर्थः। अन्ये तु। सावित्रीपतिता यस्य दश वर्षाणि पंच च। सशिखं वप
नं कृत्वा व्रतं कुर्यात्समाहितः। एकविंशतिरात्रं तु पिबेत्प्रसृतियावकं। तै[illegible]यावकभुक् स्यात्तस्योपनयं स्मृतमि | पनं५
म ति। मिताक्षरायां। पञ्चाब्दात्प्रं च दश वर्षाणि गौणः काल इष्यते। युक्तं तु बुद्धिविषयाकाङ्क्षा दुर्बलः षोडश। जन्मतः पंच
दशेति। पतितसावित्रीकस्यापि उद्दालकव्रताचरणेन पश्चात्तस्येवोपनयनं। तत्र च प्रयोगपारिजाते स्मृतिभास्करे। | माघ
पतितसावित्रीक उद्दालकव्रतं चरेत्। द्वौ मासौ यावकेन वर्तयेत्। मासं पयसा अर्धमासमामिक्षया अष्टरात्रं घृतेन
त्रिरात्र५ षड्रात्रमयाचितेन त्रिरात्रमब्भक्षो अहोरात्रमुपवासो अश्वमेधावभृथं गच्छेद्व्रात्यस्तोमेन वा यजेतेति। यत्तु गार्ग्येणोक्तम्
वा प्राजापत्यत्रयेण वा चान्द्रायणेन वा शुद्धास्तेषु वंतीह लक्षमाष्टेतत्रैव पक्षान्तरमुक्तं तद्दशकपर्दे। ब्रह्मना
औ२ रदीये तु। द्वि[illegible]पनयने विप्रानुख्यकालमतिक्रमे। द्वादशाहं चरेत्कृच्छ्रं पश्चाच्चान्द्रायणं तथा। तथासौपनं चैव स
त्वा कर्म समाचरेत्। अन्यथा पतितो विघ्नात्कृतोपि ब्रह्महा भवेदित्युक्तं। मुख्यकालो त्वष्टवर्षादिः। तदेतदन्यत्परं। स्य
काम्योपनयने कालमाह मनुः। ब्रह्मवर्चसकामस्य कार्यो विप्रस्य पंचमे। राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्था

Indira Gandhi National
Centre for the Arts

गर्भाष्टमेषु ब्राह्मणमुपनयीत। बह्वृचवचनं गर्भचतुर्गर्भे सप्तमयोः प्राशस्त्यमिति तत्रैवोक्तं। यत्तु गर्भे पंचमे ब्राह्मणमुपनयेत्।

प्राचि० र्षिणोष्टमइति। निर्णयसिंधौ। आपस्तंबः। गर्भाष्टमे वा गर्भैकादशे राजन्यं गर्भद्वादशे वैश्यमिति पैठीनसिवच उपनयन
८६ नं। तत्कामसंयोगे नविहितं पंचमेऽपि वर्षे पाष्ठिक गर्भपंचमत्वप्राशस्त्यं। अन्यथाप्रवेविधोगौरवं स्यादितिनि
पु० ३ र्णायविदः। गर्गः। विप्रं वसंते क्षितिपं निदाघे वैश्यं घनांते व्रतिनं विदध्यात्। माघादिशुक्रांतिकपंचमा
सा: साधारणा वा सकलद्विजानां। अपरार्के। नष्टे चंद्रे ऽष्टमे शुक्रे निरंशे चैव भास्करे। कर्तव्यं नोपनय
हे ५ नमनध्याये गलग्रहे। नारदः। कृष्णपक्षे चतुर्थी च सप्तम्यादिदिनत्रयं। त्रयोदशी चतुष्कं च अष्टावेते
५६ गलग्रहाः। यत्तु। या चैत्रे वैशाखसितादितीयामाघस्य सप्तम्यथ फाल्गुनस्य कृष्णद्वितीयोपनये प्रशस्ताः
प्रोक्ता भरद्वाजमुनिप्रमुख्यैरिति मन्वादियुगादिगलग्रहचातुर्मास्यद्वितीयाविधायकं वसिष्ठवचनं तत्
पुनरूपनयनविषयं। स्वाध्यायविधिपुनरोपस्था: कृष्णप्रतिपदादयः प्रायश्चित्तनिमित्ते तु मेखलाबंधने
मताइति निर्णयामृते गार्ग्योक्तेः। आदिशब्दात् मन्वादियुगादिचातुर्मास्यादीनां संग्रहः। अन्ये तु अतीतका
लस्यानैमित्तिकोपनयविषयमिदं प्रतिपद्द्वितीया ह्युः। निर्णयामृते चातुर्मास्यद्वितीयासु मन्वादिषु युगादिषु।
पु अनध्यायास्तु कर्तव्योपावसोपपदा लिखि। गर्गः। शुचावुर्जे तपस्ये च याद्वितीया विधुक्षये। चातुर्मास्यद्वितीया
स्ता ऋषुद्रतिमनीषिणः। आमान्तमासात्तिप्रायेण आषाढी कार्तिकी फाल्गुनी समीपस्थद्वितीया: इत्युक्तं
स्म यर्थसारे॥ तत्र मार्तंडः। आरंभानंतरं यत्र प्रसारंभो नास्ति ध्याति। गर्गादिमुनयः सर्वे तमेवाहुर्गल
ग्रहं। निर्णयसिंधौ वसिष्ठः। अनध्यायस्य पूर्वे ऽह्नि घुसस्य चैवापरेऽहनि। व्रतबंधं विलग्नं च विद्या ८६

व
स्वनकारयेत्। तेन द्वितीयायामपि नोपनयनं। अनध्यायोत्तरदिनं वादि सप्ये। यत्तु तृतीया पंचमी षष्ठी
द्वितीया वापि सप्तमी पक्षयोरुभयोश्चैव विशेषेण सुपूजिता। द्वितीया विधायकं पारिजाते नृसिंहवच
न नं तत्सप्तमीनीवदन्य गतिक विषयं पुनरुपनयनविषयं वेसवर्गतव्यं। स्कु वसिष्ठः। मित्रस्य क्षात्रियस्य
पिमैजीस्या दुत्तरायणे। दक्षिणे तु विशं कुर्यान्नानध्याये न संक्रमे। अनध्याय शब्देन नित्यनैमिति
कानध्यायानां सर्वेषां संग्रहः। एवं प्रदोषदिनमपिवर्ज्यमित्युक्तं। निर्णयसिंधौ नारदः। गुरुभृगुकुजबुधानां तु वारा श्रे
ष्ठतमा स्मृताः। अधमः सोमवारस्तु सूर्यवारस्तु मध्यमः। ज्योतिर्निबंधे। अष्टकासु च सर्वासु युगमन्वंतरादिषु।
अनध्यायं प्रकुर्वीत तथा सोपपदास्वपि। स्मृत्यर्थसारे सिताज्येष्ठे द्वितीया च आश्विने दशमी सिता। चतु
र्थी द्वादशी माघे एता: सोपपदा स्मृताः। वसंते तु गलग्रहे न दोषः। तथाह नारदः। विना तु वा वसंतेन कृष्णपक्षे ग तथा
लग्रहे। अपराह्णे चोपनीतः पुनःसंस्कारमर्हति। अपराह्णे च त्रेधा भक्तदिन तृतीयांशइत्युक्तं निर्णयसिंधौ नारा
यणानुकूलेषु ग्रहेषु शुभभिषपि पुनर्वसौ कृतो विप्रः पुनःसंस्कारमर्हतीति। तत्र जमातेष्ठु राका त्सर्वशाखिनां
ब्राह्मणानामुपनयने पुनर्वसु निषेधः। नच। पूर्वाहस्तत्रयोसार्पभ्रूतिमलेषु बह्वृचां। यजुषां पोष्णमैत्रार्कादिसपुष्य
म दृभुवे:। सामगानां हरिशार्क वसुपुष्योत्तराश्विनेः। धनिष्ठादितिमैत्रार्कत्विंदपोष्णाथर्वणामिसादि ज्योतिर्निबंध
वचनवचनैर्यजुषामथर्वणां च पुनर्वसुविधानात् निषेधस्य बह्वृच सामगादिपरत्वमिति वाच्यं। विप्रपदात्तस्या
विशेषतः सर्वशाखीय ब्राह्मणपरत्वेन बह्वृच सामगादि विषयत्वेन संकोचायोगात्। अन्यथा हस्तत्रयेपुष्यधनिष्ठयोरश्व

६ व्रतबंधो विवाहश्च चूडाकर्म तथैव च। द्विधा भक्तदिने नैव पूर्वार्धे तु समाचरेदित्युक्तं तंत्रांतरे। ६

Indira Gandhi National Centre for the Arts

प्र०चि०
८६
पद७

उप-नक्षत्र

पौष्णाश्विसौम्यादितिविष्णुभेषु। शस्तेतिथौ चंद्रबलेन युक्ते न कार्यो द्विजानां व्रतबंधमोक्षाविति हेमाद्र्याद्युदाहृतानां पुनर्व
स्वादुपनयनविधायकानां सामान्यवाक्यानां ज्योतिर्निबंधीयवचनैर्यजुषाथर्वणादिपरत्वेनोपसंहाराद्यस्यावकृता
नां तत्रोपनयनप्राप्त्यभावात् पुनर्वसुनिषेधकं वचनं तद्विषयत्वेनार्थकमेव स्यात्। ए तेन रहस्ये देवस्य वस्थेत्यपा
स्तं। नापि संग्रहे देवन सप्तम्यंतवसुशब्दस्य धनिष्ठानक्षत्रपरत्वं। पुनः पदवैयर्थ्यात्। नापि योगिप्रः पुनः संस्कारमर्ह
ति। स पुनर्वसाविसेवं पुनरुपनयने पुनर्वसुनियमः। पूर्वापरसंगतेः। तेन हेमाद्र्यादिधृतानां पुनर्वस्वादुपनय
नविधायकानां सा[redacted]वस्यावाक्यानां च द्विजपदस्वारस्येन यजुषादिपदस्वारस्येन च यजुषाथ
र्वणक्षत्रियवैश्यपरत्वाद्राजमार्तंडवाक्यां तर्गत विप्रपदस्वारस्येन सर्वेषां ब्राह्मणानामुपनयने पुनर्वसुनि
षेधः। यदपि पुष्ये पुनर्वसौ पौष्णे हस्ते मैत्रे शशांकभे। ध्रुवेषु च प्रशस्तं स्याद्यजुषो मौंजिबंधनमिति ज्योतिर्निबं
धीयं वचनं तदपि यजुषक्षत्रियपरमेव। न च ब्राह्मणवत्क्षत्रियादीनामवेदव्यवस्थेति वाच्यं। उपनीतानप्र
तिप्रवृत्तेनस्वाध्यायोध्येतव्य इत्य[redacted]परागतस्वस्वशाखाध्ययनस्य ब्राह्मणवत्क्षत्रिया
दीनामपि विधानात्। अत्र चाध्याय पद ऋग्वेदत्वादिमाप्यशाखापरं सन्नत्रैवस्वीयत्वेक्त्वयोर्विशेषणतामंगीकरोतीति
तिशास्त्रांतरापिकरणोस्यष्टं। तेन पुनर्वसावुपनयनविधायकानां सामान्यवाक्यानां यजुषाथर्वणक्षत्रियवैश्यपर
त्वात्। सर्वेषामेव ब्राह्मणानां पुनर्वसावुपनयननिषेध इति सुधीभिर्हृदि विभावनीयं। इदं चोपनयनं नैमित्तिका
त्वात्। सर्वेषामेव ब्राह्मणानां पुनर्वसावुपनयननिषेध इतिसुधीसिद्धं रविभावनीयं। इदं चोपनयनं नैमित्तिक का
नध्यायादि वर्जितेष्वशुक्र गुर्वौर्बाल्य वार्द्धक्यादिवर्जिते ज्योतिर्विदुक्ते शुभकाले कार्यमिति निबंधे। नांदीश्राद्धं कृतं चे
द्यपनविधिना पित्र्यादिषु ५

१ ब्रह्मौद्यपूर्वसंध्यायां नादितो यदि गर्जति। तद्दिने स्यादनध्यायो व्रतं तत्र विवर्ज
१ येदिति उक्ष्य वचनं। अत्र प्रातः संध्यान्यकालीनवर्जनं नोपनयनेवर्जनेत्यर्थः
ग

पनयनं स्युर्न भिजनेर नवान्। ८

स्यादनध्यायस्वकालिकः। तदोपनयनं कार्यं वेदारंभं न कारयेदिति। अत्र केचित्। कार्यमित्यंतं सर्वसाधार
णं। निषेधस्तु विशेषविषयकः। तेन यथा आर्षेयं वृणीत इत्येतत्सर्वसाधारणं। न चतुर इति निषेधस्तु वृत्तिका
रादिमते क्षेत्रजद्व्यामुष्यायणादि। विशेषपरस्तद्वदिहापीत्याहुस्तन्न। वृत्तिकारादिलिखनस्य वाक्यभेदापत्त्या
मीमांसकैर्निरस्तत्वात्। तेन वाक्यभेदपरिहाराय येषां वेदारंभविशिष्टमुपनयनं। विहितं तेषामेवोपनय
नमात्रस्याकालिकानध्याये प्रतिप्रसवविधिरयमिति पितृचरणाः। वस्तुतस्तु निषेधस्य विषयविषयत्वे त्रीन्
वृणीत इत्यादौ वाक्यभेदस्य वृत्तिकारादिभिरंगीकारात्तद्वदत्र वाक्यभेदेन कार्यमित्यस्य सर्वसाधारण्ये निषेध
स्य च कासापनादिविषयत्वेन न किंचिद्बाधकं। प्रयोगपारिजाते। एवं समाप्य विवाहार्थे च काले निर्दोषता गते। दैवं तं सम्यग्
[illegible] यथा। शक्तिनवं नयेत् तत्रादौ आचार्यलक्षणं शौनकः। कृतारस्यौतपसा पूतनिः
१.२४ शेषया प्राकुर्याद्द्विजोत्तम इति। आपस्तंबः। तमसो वा एष तमः प्रविशति यमविद्वानुपनयते यश्चाविद्वानिति। तथा
तस्मिन्नभिजनविद्यासमुदेतं समाहितं संस्कर्तारमीप्सेदिति। व्यासोपि। वेदैकनिष्ठं धर्मज्ञं कुलीनं श्रोत्रियं शुचिं।
स्वशाखाश्रयमालस्यं विप्रं कर्तारमीप्सितमिति। इदं चोपद्रष्टृपरं। अन्यथा। पिता पितामहो भ्राता ज्ञातयो गोत्र
जाग्रजाः। उपायनेधिकारी स्यात् पूर्वाभावे परः परः। पितैवोपनयेत्पुत्रं तदभावे पितुः पिता तेनियमबाधापत्तेः। पिते
तिविप्रपरं न क्षत्रियपरं। उपनेतृत्वस्य दक्षार्थत्वात् तेषां चाध्यापने नधिकारादिति पितृचरणाः। एवं च सांगोपनय
ने पुरोहितस्याधिकारान्नांदीश्राद्धाद्यपि तस्यैव। एवं चौलस्योपनीत्या सहानुष्ठाने प्रधानभूतोपनयनानुरो
पन

येन चौलस्यापि पुरोहित एव कर्ता इत्यन्यत्र विस्तरः। एवं च वैदेकनिष्ठमित्यादि पूर्वोक्तविधिरशक्तकर्तृकपनम
पिक्षत्रियादिपरमेव सम्यं। एतेन मासवचनं शौनकवचनं च पित्राद्यधिकार्यभाव विषयकमिति कस्य
चिदुक्तिः परास्ता। वचनस्य निरविषयत्वापत्तेः। पित्राद्यधिकारिणाम तत्त्वेन मः प्रवेश रूप दोषापत्तेश्चे
ति यत्किंचिदेतत्। इदं चोपनयनं षंडमूकादीनामपि भवत्येवेति पारिजाते स्फुटं। तत्र तेतावान्विशेषः॥
संस्कारमंत्रहोमादीन् करोत्याचार्य एव तु। उपनेयांश्च विधिवदाचार्यः स्वसमीपतः। आनीयाग्निसमीपं
वा सावित्रीं स्पृष्ट्वा जपेत्। कन्यासी करणादन्यत् सर्वं विप्रेण कारयेदिति। एवं कुंडगोलकावपि संस्कार्यौ।
एवमेव यद्दिष्टे जातौ संस्कार्यौ कुंडगोलकाविति वचनात्। तयोः संस्कार्यत्वं श्राद्धनिषेधश्च क्षेत्रजपुत्रवि
षयः। अन्यस्या ब्राह्मण्येन तोपनयना प्राप्तेरिति पितृचरणाः। अपरार्के त्वेवं। गर्भाधानादिसंस्कारलोपे एकैक
सपादकृच्छ्रः चूडायास्तु अर्धकृच्छ्र इत्येवं प्रायश्चित्तं कृत्वा। कालातीतानि कुर्यात् प्राग्नवेत्युक्तं प्राक्। यत्तु त्रिकांड
मंडनमतात् यावद्यमकं तेषां करणं तदा तंत्रेण सर्वेषां नांदीश्राद्धं कुर्यात्। गणशः क्रियमाणानामिति वच
नात्। चौला पूर्वभाविनां। पूर्वेषु नांदीश्राद्धोत्तरमनुष्ठानमित्युक्तं प्रयोगपारिजाते। एवं चौलस्य उपनी
६ त्यासानुष्ठाने उपनीतिदिन एव तदनुष्ठानं। सहत्वस्य दिवसैक्येन संनिकृष्टत्वादिति पितृचरणाः। तथा। आ
चार्यकुमाराभ्यां उपनेतव्योपनेयत्वाधिकारसिद्ध्यर्थं प्रत्येक कृच्छ्रत्रयमाचरितव्यं। कृच्छ्रत्रयं चोपनेतात्री ८८

त

न कृच्छ्रांश्च चतुरश्चरेदिति प्रयोगपारिजाते वचनात्। इदं च बटोः कामचारादिनिमित्तमिति पारिजातादयः। त
त्र कामचारादिः प्रागुपनयनादनुलातत्वेन दोषाप्रसक्तौ प्रायश्चित्ताप्रवृत्तेः। अत एव प्रयोगपारिजाते।
त्र कामचारादिः प्रागुपनयनात् ... बालस्याचमनं स्मृतं। रजस्वलादिसंस्प
र्शक्ष्याभक्ष्ये तथापेयवाच्यावाच्ये न तावत्तौ ... क्षणं प्रोक्तं बालस्याचमनं स्मृतं। रजस्वलादिसंस्प
र्शेस्नानमेव कुमारके। प्राक् चूडाकरणाद्बालः प्रागन्नप्राशनाच्छिशुः। कुमारकस्तु विज्ञेयो याव
मौंजीनिबंधनं। अस्मिन् काले न दोषः स्यात् स यावन्नोपनीयते। एतन्महापातकव्यतिरिक्तविषये। तथा च
महापातके तु पित्रादिभिः प्रायश्चित्तं कर्तव्यं ... हतः पातकादन इति। महापातके तु पित्रादिभिः प्रायश्चित्तं कर्तै
व्यमिति वचनात्। स्यात् कामचारभक्ष्याणि ... अनुपेतस्तु यो विप्रो मोहान्मद्यं पिबेद्यदि। तस्य कृ
च्छ्रमित्युक्ते। पराशरप्रायश्चित्तकांडे ज्ञातृकर्तेन। अनुपेतस्तु यो विप्रो मोहान्मद्यं पिबेद्यदि। तस्य कृ
७ ता च्छ्रत्रयं कुर्यात् पिता ज्ञातापि वा तथेति। इत्यादिना दोषाभाव उक्त इति वयं। तथा सावित्रीमभ्यसेदग्निं पवित्राणि
च संस्मरेत्। सहस्रं द्वादशाल्पं वा सावित्रीं प्रजपेद्बुध इति पारिजाते वचनादाचार्यो द्वादशाधिकं सहस्रं गा
यत्रीं जपेत्। अग्निः शुचिव्रततम इत्यादि न्यग्निपवित्राण्याचार्यः सावित्रीजपात् पूर्वं पठेदित्यर्थः। तथा। पूर्वे
द्युरेव परिधानार्थं शुक्लं वस्त्रं काषायं प्रावरणार्थं कृष्णाजिनं वा कौपीनं तद्बंधसूत्रं उपवीतं दंडं केशसमितं कर्मं
३४ डलुं कटिसूत्रं कौपीनमहतं वाससी बटोः। अजिनं चोपवीतं च मेखलां दंडपात्रं जनं भिक्षापात्रमित्येतान् संभा
तान् संपाद्य स्वस्तिवाचनं नांदीश्राद्धं गृह्य इत्यंतं कुर्यात्। तदाह शौनकः। पूर्वेद्युरेव सकलान् संभारांश्च यथो
दितान्। संपाद्य साभ्युदयश्राद्धमपि कुर्याद्यथाविधि। अपि धर्मे गृह्यतोपि समुच्चीयत इति पारिजातादयः।

Indira Gandhi National Centre for the Arts

होमसं
उपनयन

प्र·धि· तत्रापि यदा करिष्यमाणामुककर्मांगत्वेन स्वस्तिवाचनादि करिष्य इति संकल्प्य तदा तु नांदीश्राद्धोत्तरं गृह्य
८९ ताद्यनुष्ठानं। यदा तु प्रधानसंकल्पोत्तरं स्वस्तिवाचनादि। तदाभिन्नप्रयोगविधिपरिगृहीतेन गृह्यत्नेन म
ध्येमवधानायोगात्। पूर्वमेव गृह्ययत्नादीनि निष्कर्षः। अत्र च द्विजत्वसिद्ध्या वेदाध्ययनाधिकारार्थमुपन
यनं करिष्ये इति संकल्प्य। ततः। गणपतिपूजनादि मंडपप्रतिष्ठांते कृते कुमारं भोजयेत्। प्रागेवैनं तदहर्भो
जयंतीति। मदनपारिजाते गोभिलोक्तेः। ततो वपनं। भुक्तस्याप्यस्य शिरसो वपनं स्नानमेव च। कृ
तं कुमारं तमवस्थाप्यांतिके ततः। ज्योतिःशास्त्रविदुक्ते तु मुहूर्ते शोभने तत इति कारिकायामुक्तेः। आश्व
लायनः। चौलांगास्थापिते पंचशिखे वा द्विपि वापयेत्। सकेशीं च कुमारस्याहि लैव कांमध्यमां शिखां। अलंकृ
तं कुमारं कुशलीकृतशिरस्तमिति सूत्रकारास्त्वश्व। तत्र भोजनं मात्रा सह। वपेकृत्वतां केशांतं मात्रा
च सह भोजनमिति साश्वलायनोक्तेः। कुशलीकरणं वपनमिति वृत्तिः। अत्र चास्य कुमारस्योपनयनं
कर्तुं तत्राध्यांगभूतं वपनं करिष्य इत्येवं वपनं संकल्प्य इति महाः। ततः नाहतां कुमारमत्ति वादयित्वा
अंकमारोपयेयत्तेन स्यादि पंचवर्गे पाशिषोगच्छीयात्। कृतस्नानमलंकुर्याद्दाशिबोबाचयेदिति कारिका द्ये
वचनात्। आश्वलायनः। दत्वाफलमसौ तस्यानिदध्यात् पादयोः शिरः। शिरःस्पृशेदिति तालस्य स्वांके त
मुपवेशयेत्। येयत्नेन पठेत् सूक्तं आचार्यो ब्राह्मणैः सहेति। ततस्तं दक्षिणत उपवेश्यास्य कुमारस्य द्विज ८९
त्वसिध्या वेदाध्ययनाधिकारार्थमुपनयनहोमं करिष्य इति संकल्प्य इति पितृचरणाः। [redacted]

ता ध्यं
[redacted] ।अग्निं प्रतिष्ठाप्य द्विजाता
सिध्यर्थे क्रियमाणे उपनयनहोमे चान्वाधानं करिष्य इत्येवमन्वाधानसंकल्प एवेति सद्गाः। अन्वाधाने चाधारांत
मुक्त्वा त्रिरग्निं पवमानं प्रजापतिं च संकीर्तयेत्। ततः आज्यसंस्कारपर्यंतमुपलेपादि पूर्ववत्। परिधानं सवे स्य
वाससैवाहतेन तु। अवेक्ष्यावरणं वासः कृष्णाजिनमथापि वा एवंभूतं कुमारं तं कुर्याद्यज्ञोपवीतिनमिति कारिका का४
द्राज्यसंस्कारांते कृते। कृत्वा नवं ततो दध्यात् कौपीनं कटिसूत्रकमिति साश्वलायनवचनात् बध्वा सूत्रं कटावा
बध्य। कौपीनं तु तंत्री परिधाप्य पुनर्वस्त्राणीत्यनेन भुक्त्वा अहतं वासः परिधाप्यते नैवमंत्रेण काषायवाससा प्रावर
येत्। प्रावरणार्थं कृष्णाजिनं वा। तत्र त्र्यंगुलं तु बहिर्लोमयद्वास्याच्चतुरंगुलं। अजिनं धारयेद्विप्रः चतुर्विंशाष्टषोड
शौ तिति प्रयोगमत्ले उक्तं। चतुर्विंशांगुलपकः खंडः अष्टांगुलषोडशांगुलो तु द्वीखंडाविति खंडत्रयात्मकं परिमंड
लमिस्पर्धः। वस्तुतस्तु इदं सम्यगुक्तं कृष्णमृगाजिनधारणपरं। सूत्रोक्तं चर्म तु प्रावरणार्थं येणेयेन वा अवि
तेन संवीतं। सम्यक् प्रावरणमित्युक्तेरर्थस्य च। तद्योगात्। अतएव वाससीतेस्व गुरवे मे जन कर्मणीति प्रा
वरस्थानापन्नस्य मृगाजिनस्य गुरवे दानेपि त्र्यंगुलादिः सर्वदा धारणं। तथा च पारिजाते यमः। मेखलामजिनं
दंडमुपवीतं तु नित्यशः। कौपीनं कटिसूत्रं च ब्रह्मचारी तु धारयेदिति। दंडास्त वल्कयोपि। दंडाजिनोपवीतानि मे
खलां चैव धारयेदिति। इदं च प्रावरणोत्तरं धार्यमिति केचित्। तत्र तत्तु निक्षिप्य ब्रह्मसूत्रं तु वितत्साधः प्रसारयेच्च।
नामांतस्यापथिवी तत्पाकृष्णमृगाजिनमिति शौनकवचनादुपवीतान्तरमेव तद्युक्तं। कृष्णसद्योपवें। सूत्रेपि।

प्र॰षि॰ अहतेन वाससा संवीतं मैणेयेन वाजिनेन ब्राह्मणं रौरवेण क्षत्रियः माजेन वैश्यं यदि वासांसि वसीरन्रक्तानि व कृष्णाजिन
९० सीरन्। काषायं ब्राह्मणो मांजिष्ठं क्षत्रियो हारिद्रं वैश्य इति। ऐणेयेन वाजिनेन संवीतं सम्यक् प्रावृतमित्यर्थः अ॰ २
एणी विंदुरहिता मृगीति पारिजाते। तस्याः संबंधी एणेयं। एण्याँ [illegible]ति पालिनि स्मृतेः। ऐणेय मेण्या श्च मा
मेण स्येलमिति कोशा च्च। तेन मृगी चर्मणैव प्रावरणार्थत्वात्स्थूलस्य अंगुलस्य चतुरंगुलस्य वा
कृष्णाजिनस्य संपूर्णप्रावरणे असामर्थ्यात् अंगुलेस्योपवीतोत्तरं धारणे न भिन्नकाल त्वाच्च न तेन वस्त्रनि
त्तिः अतएवेदं वासः शिरोवगुंठनार्थमिस्यग्रे वक्ष्यते। तेन तादृशाच्छादन समर्थ मृगयजिनाभावे तत्स्थाना
पन्नस्याहतस्य अंगुल कृष्णाजिनस्य स्थूलस्य समुच्चय एव। वस्त्राजिनयोर्विकल्प इति वृत्तिलिखनं
मृगयजिनाभिप्रायं न तु अंगुलाद्यभिप्रायं। एतदृषि प्राचेणो वपिलचरणे हूपोः। समुच्चय उक्त इति वयं प्रतीमः॥
अत्र व्यवहितकल्पनया वासांसि वसीरन्नित्येको विधिः। यदि रक्तानि रंजितानि वसीरन्। तदा काषायं ब्राह्मण इत्या
दिप्रतिवर्णं वर्णविशेषविधिर्द्वितीय इति हरदत्तः। तेन प्रावरणार्थे शुक्लमपि सवतीति गम्यते। वसिष्ठोपि शुक्लमहतं
वासो ब्राह्मणस्य कार्पासमिति। अजिनस्य मित्रस्य चक्षुरित्यनेन धारणं। तेन च वाससी मेधाजननकर्मणि स्वगृ
ह्ये दधाति। ननु तदानीं। वाससी ते स्वगुरवे मेधाजिनन कर्मणि॥ दद्यात्तावत्समसेव कौपिनेन प्रवर्तयेदिति पा
रिजाते। आचार्य वचनात्। कौपीनमात्रावर्त्तेते तथान्ये ब्रह्मचारिण इति वचनांतराच्च। यत्तु तत्रादोपरिधानार्थक
ल्पयेन्नव वस्त्रकं। शिरोवगुंठिनं चैव नवमन्यत् प्रकल्पयेदिति शौनकोक्तं शिरोवगुंठनरूपं वस्त्रमुक्तं तदपि प्रा ९०

*

ऋत्वय उः स्तामगैश्चैव च त्रदश अविशेत्तथा। यज्ञोपवीतमंत्रेण धारयेदुपवीतकंमिति कात्यायनः॥ १०

वरणार्थमेवेत्यविरोधः। अहतमाह प्रचेताः। ईषद्धौतं नवं श्वेतं सदशं यन्न धारितं। अहतं तद्विजानीयात्स
र्वकर्मसु पावनमिति। इदं चाहतं द्वितीयजन्मनो मूलप्रतिनिधिस्थूलमिसुक्तं प्रयोगपारिजाते। तेन युवे वस्त्राणि
परीधानं। तस्य च यथोदीर्घं तमामित्रावरुणौ त्रिष्टुप्। कुमारस्य द्वितीयजन्मनो मूलप्रतिनिधिस्थूलस्य शुक्लवस्त्रपरिधाने
विनियोग इत्येव प्रयोगः। अयं च मंत्रः। आचार्यस्यैव। अजिनमंत्रस्तु दधेहमिति मंत्रलिंगात् कुमारस्यैव। ततः श्रौ
तस्मार्तकर्मानुष्ठानसिध्यर्थं द्विजत्वसिद्ध्यर्थं च यज्ञोपवीतमिति मंत्रं वाचयित्वा तद्दक्षिणं बाहुमुद्धार्योपवीतं
परिधापयेदिति सिद्धाः। यद्यपि यज्ञस्य परमात्मनः। उप समीपे वीतं विधेर्विभागतं जीवस्वरूपं प्रतिमुंच मोच
येत्येव मर्थेन ब्रह्मोपनिषत्प्रकरणपठितस्यास्य मंत्रस्य ब्रह्मपरत्वं। तथापि प्रसिद्ध यज्ञोपवीतपरत्वस्यापि संभवा
त्तत्र विनियोग इति पारिजातादयः। वस्तुतस्तु। स्वगृह्ये यज्ञोपवीतस्य तन्मंत्रस्य चानाम्नानात् शांखायनसूत्रे च
यज्ञोपवीतमसि यज्ञस्य त्वोपवीतेनोपनह्यामीति यज्ञोपवीतं कुर्वीत इति करणविनियुक्तमंत्राम्नाता तेनैव मंत्रेणो
पवीतं वै कुर्यात्। यज्ञोपवीतमाह मनुः। कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत्। ग्रुः। त्रिवृदूर्ध्ववृतं कार्यं तंतु त्रि
त्रयमधोवृतं। त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रंथिरिष्यते। उर्ध्ववृतं दक्षिणकरमूर्ध्वं कृत्वा वलितं। वामावर्त्तेन
वलितं त्रिगुणं कार्यं। तत्एकस्तंतुः। एवं त्रितंतुकमिति। निर्णयसिंधौ देवलः। कार्पासक्षौमगोवालशणवल्कल
तृणादिकं। यथासंभवतो धार्यमुपवीतं द्विजातिभिः। मनुः। ॐकारोग्निश्च नागश्च सोमः पितर एव च। प्रजापति
श्च वायुश्च सूर्यः सर्पाश्च देवताः। एतास्तंतुदेवताः। आशार्कयमः। मंत्रान्यज्ञोपवीतं यज्ञोद्देशेन कृतं च न। मोहाद्विज
श्र कृत्वा दक्षिणावर्तं वलितं त्रिगुणं कार्यं २

Indira Gandhi National
Centre for the Arts

प्र·नि· ९१ स्तदुच्य स पुनर्मंत्रेण धारयेत् । स्मृतः । तैत्तिरीयाः कठाः काण्वास्तथा वाजसनेयिनः । कंठादुत्तार्य सूत्रं तु पुनर्दहिति यज्ञोपवी उपनयन
स क्रियां । मंत्रेण पुनरन्योपवीतं धारणमित्यर्थः । आशार्कः स्मृतिः । विना यज्ञोपवीतेन योऽश्नुते ब्राह्मणो यदि । स्नानं
कृत्वोपवासेन पंचगव्येन शुध्यतीति । देवलः । सावित्र्या दशकृत्वोद्भिर्मंत्रिताभिस्तदुक्षयेत् । विच्छिन्नं चाप्यधोयां
तं भुक्त्वा निर्मितमुत्सृजेत् । भुक्त्वा निर्मितं भोजनोत्तरं निर्मितमित्यर्थः । मनुः । मेखलामजिनं दंडमुपवीतं क
मंडलुं । अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मंत्रतः । देवलः । उपवीतं बटोरेकं द्वे तथेतरयोः स्मृते । एकमेव यती
नां स्यादिति शास्त्रविनिश्चयः । यतीनां त्रिदंडिनां । अत्र च भवेत्प्रावरणं वासः कृष्णाजिनमथापि वा । एवंभूतं
कुमारं तं कुर्याद्यज्ञोपवीतिनं इति कारिकावचनेन । संस्कारोत्तरमहतधारणं । यज्ञोपवीतधारणं चोक्तं ।
प्रयोगपारिजाते आश्वलायनाचार्येण तु । स्मृतिरूपेण संस्कृत्य सा यथान्यायं वर्हिषि स्थाप्य पश्चिमे । स्रुवसं
मार्जनं कृत्वा कुर्याद्यज्ञोपवीतिनं मित्युक्तं । अस्मिन्पक्षे आज्यसंस्कारोत्तरमहतधारणमेव केवलं । स्रुवसंमा
ति र्जनोत्तरं तूपवीतिधारणमिति विशेषः । इदं च यज्ञोपवीतदानमेतेन वक्ष्यमाणेन रुद्र कृतिरंतमर्थकं । प्राङ्मुखः प्रा
ङ्मुखास्थितम् कुर्याद्यज्ञोपवीतिनमिमाश्वलायनस्मृते रुत्तरत एवेति केचित् । प्रयोगपारिजाते तु यस्तु द
क्षिणे इत्याहुः । यद्यप्याश्वलायनस्मृतौ ब्रह्मसूत्रप्रदानांते प्राङ्मुखस्यास्थितस्य तु । आवध्य मेखलां दद्यादजि
नं दंडमेव च । सभ्यगाचमयित्वा तं मंत्रेणाप्यवायतः । आगत्य प्राङ्मुखासीनं स्पृष्ट्वा होमं समाचरेदिति वच ९१
नेनोपवीतिधारणानंतरं मेखलाबंधनमुक्तं । तथापि हृदयस्पर्शनानंतरं मेखलादंडधारणयोः । सूत्रोक्तत्वात्तदे

न्ना

वप्रबलं बकृत्यं वाश्वायनेनोक्तमिति वचनात् । एवमुपवीतं परिधाप्य कुमारमात्मनोऽग्नेश्च मध्ये यज्ञपात्रोत्तर न
देशं गमयित्वा विधिवदाचमेत् । तथा च कारिकायां । आचांतमुत्तरेणाज्यं यज्ञपात्राणि चानयेत् । अंतरेणाग्नि
मात्मानं दक्षिणे तूपवेशयेत् । उत्तरेणाचांतमिति संबंधः । यद्यप्याचांतमुत्तरेणाग्निमित्येनागमनमेवो स
क्तं । न तु गमनं । तथाप्यकुर्वन्नात्मनोऽग्नेश्च मध्ये यापं गच्छतीतरः । अमवापश्च संस्कारः कर्मस्वग्निकुमारयो
व रित्सोंसाहरणा सन्निध्यात् तेनापि कारिकावचनेनाम्यायेन कर्मसूत्तरतो गमनं न गमनविधानाद्वापि
तीर्थप्रवेशार्थमुत्तरतो गमनेऽव्यवायप्रवेशिसदृचरणानामाशयः । जयंतोपि । यज्ञोपवीतिनं कृत्वा यथा
शास्त्रमाचामयतीति । तत्राचमनकल्पे विशेषो जयंतेनोक्तः । यथा ऋग्वेदः प्रीयंतां एवं यजुर्वेदः । साम तां
वेद इति त्रिभिराचमनं । ततः पाणी प्रक्षाल्य अथर्ववेदः प्रीयं इति सेतिहासपुराणानीति ॥ अंगुष्ठमूलेन ओष्ठ
योः परिमार्जनं । पुनः पाणिपादौ च प्रक्षाल्य अग्ने वैष्णु इति पादौ शिरश्चाभ्युक्षेत् । ततस्त्रिभिरंगुलीभिः ।
अंगुष्ठेन च अत्रानि रिति मुखं स्पृशेत् । अत्र प्राण इति अंगुष्ठप्रदेशिनीभ्यां नासिके । अत्र चंद्रादित्योइ
ति अंगुष्ठानामिकाभ्यां चक्षुषी । तथैव अत्र दिशा इति कर्णौ अंगुष्ठकनिष्ठिकाभ्यां अत्र पृथिवीतिना
भिं । करतलेन हृदये रुद्रः । सर्वाभिरंगुलीभिः शिरसि सप्तर्षिभ्यः इति । यद्वा केशवादिनामभिराचमनं कुर्यात् ।
तथा केशवादिभिस्त्रिभिः पीत्वा । गोविंद विष्णु इति करौ प्रक्षाल्य । मधुसूदन त्रिविक्रमेति द्वाभ्यामोष्ठौ संमृज्य ।
वामन श्रीधरेति द्वाभ्यामुन्मृज्य हृषीकेशेति वामकरं प्रोक्ष्य पद्मनाभेति पादौ प्रोक्ष्य दामोदरेति मूर्ध्नि संकर्ष

Indira Gandhi National Centre for the Arts

= प्रतीयते। तथापि तीर्थप्रवेशं कृत्वा होमस्तदुत्तरं तत्र वस्त्रधारणार्थमुत्तरतो गमनमात्रं। न तु तीर्थप्रवेश = ८ उ०न०९११०
प्र०वि० णोस्तु खोष्ठं वासुदेवप्रद्युम्नेति दक्षनासे। अनिरुद्ध पुरुषोत्तमेति नेत्रे अधोक्षज नरसिंहेति श्रोत्रे। अच्युतेति
नाभिं। जनार्दनेति हृदयं। उपेन्द्रेति शिरः। हरीति दक्षिणबाहुं। कृष्णेति वामस्य स्पृशेत्। अत्र मूलं प्रयोगपारिजाते
८२ ण ज्ञेयं। एवं कुमारं विधिवदाचम्य। पुनस्तथैव आनीय दक्षिणत उपवेश्य बर्हिःस्तरणादि कुर्वन् संमार्जनांते। बटुना
न्वारब्धः आघारौ आज्यभागौ च हुत्वा ततः आयुः षि सादिना चौलवज्जुहुयात्। तदुक्तं कारिकायां। बर्हिरास्तरणादि स्यात् स्नु वसं
मार्जनांतकं। समन्वारब्ध एतस्मिन् ब्रह्मचारिण्यथेतरः। कुर्यात् आघारपर्यंतं चौले कृत्वा पाठ तथैषि। अथ्रा
ज्यभागौ नेवेष्टा विस्तु सुक्तं पूर्वमेवाखिलेति। पश्चादाचार्यः उत्तरतोग्नेः प्राङ्मुखस्तिष्ठेत्। कुमारो वास्या चार्यं पो
मध्ये तीर्थे न प्रविश्य आचार्यस्य दक्षिणत उपविशेत्। तीर्थं नाम प्रणीतानां पश्चिमो देश इति यथाश्रुत रहत्तिम
ण ७ तीर्थ थाहोमोत्तरमेव वस्त्रधारणात् पूर्वं च प्र[illegible] वेश इति ज्ञेयं। तत्रोत्तरतो गमनं मध्ये हूतरत्तत्ति[illegible]चार्यः प्राङ्मु
६ कुर्चेन्ना खस्तेत्। अत्र मनो तिथ्र्वं च बाण [illegible] तीतरः। अयमवात्य संस्कारः कर्मस्वत्निकुमारयोरिये वं कारिकोक्तं द्रष्ट
व्यो। तेन पूर्वं तीर्थप्रवेशार्थमुत्तरतो गमनमप्येवमेवे सुक्तं। प्राक्। ततः। कुमारस्या युक्तमुपदेशश्च विल्वासि
द्ध्यर्थं कुमारा जलधारणं कुर्यात्। तथा च प्रयोगपारिजाते आश्वलायनः। शुचि विल्वसिद्ध्ये तस्य सावित्री
ग्रहणे कुरुः। अभिमंत्रयथा वारि सिंचेत् स्यवमद्दजलौ। एवं त्रिवारं शिष्यस्य हस्तं गृह्णाति वै गुरुरिति शौनकः।
शिष्यांजलौ स्वांजलिस्थमरक्षायो दकं गुरुः। शिष्यांजलिगताश्चापो रक्षार्थं स्वेन पाणिनेति। अथा वेदमव
क्षारणं शुचिता वाद कलेन गायत्र्युपदेशांगं। एवं समिदाधानमपि तदंगं। समेवे स्पात्र वक्ष्यामः कारिकायां। ८२

ये
ब्रह्मचारिणा आचार्यः पुरुषे दद्यादंजलिं। आचार्यस्यांजलिं चाम्यः पूरयेत्ततो गुरुः। तत्सवितुर्वृणीमहस्य
मिनीयांजलिमंजलौ अवक्षारयतीत्यर्थः स्वेन पूर्णेन दंजलिं। आश्वलायनः। स जले चांजलौ तस्यां गंधपुष्पा
णि चावपेत्। सुवर्णं च यथाशक्ति फलैः क्रमुकजैः सह। आचार्यस्यांजलौ ब्रह्मा पूरयेत्तस्य किं चतत्
आचार्यो मंत्रमुच्चार्य तत्सवितुर्वृणीमह इति। अस्य मंत्रस्य [illegible] वाभ्व ऋषिः सविता देवता अनुष्टुप् छं
दः। देवस्य त्वेति मंत्रे [illegible] यात् पाणिं सांगुष्ठमस्य च। असौस्थाने स्य नाम स्यादेवमुत्तरयोरपि। अत्राभिवा
दनीयकं नाम ग्राह्यमिति भट्टाः। प्रयोगपारिजाते असाविति पदस्थाने संबुध्या चास्य निर्दिशेत्। आ
• नि भिवादिकं नाम न तु सांव्यवहारिकमिति। तेनासौस्थाने स्य नाम ग्राह्यमिति यत्नोलिखन मपि वादे यकपरमे नी
वा जयंतोप्येवं। अपूरणमादिन हतस्यादन्यो मंत्रः। करग्रहेति न देवस्य त्वे सस्य नारतिः) द्वितीये सवितुः सादिः। ने)
तृतीये अग्निराचार्यस्तवेति हस्तग्रहः। इत्थं हस्तग्रहणं शिष्यत्वसिद्ध्यर्थमिति भट्टाः। तत आचार्यो देव सवितरि
सुत्कारविमीक्षयेत्। तेन आचार्यः बटुना सह निष्क्रम्य मंत्रं पठित्वा। ततो ब्रह्मा नांपतये ददातिरवये बटुं
मिति पारिजाते द्रुतपतये आदित्याय बटुं ददामीति मनसा स्मरन्नेनं रविमीक्षयेत्। ततउभावप्यनेरुत्तर
तः अन्योन्याभिमुखौ तिष्ठेयातां। तथा च शौनकः। आदित्यमीक्षयेच्छिष्यमथोभावपि पूर्ववत्। तिष्ठेतामुत्तरेण
ग्निमन्योन्याभिमुखौ तत इति। तत आचार्यः कस्येति मंत्रं पठित्वा प्रजापतये बटुं समर्पयेत्। कारिकायां क
स्येति परिदायमंप्रजाधिपतये ततः। युवा स्वद्धनेतः कुर्यात् प्राङ्मुखं दक्षिणातरं। अस्योपर्यंसयोःस्व

Indira Gandhi National Centre for the Arts

प्र·कि ८३ स्यपाणीहत्वाहृदंस्पृशेत्। तंधीरासईवंतः कुर्याद्ब्रह्मचार्यसुनोऽक्षणोऽसीति। कस्यपरिददामीतिप्रजापतये। उपनयन
उपांशुब्रह्मसमर्पणमितिजयंतः। ततः कर्मसाक्षिणमादित्यंतर्पयेत्। यथोक्तवत्। सर्वेब्रतानांसगुणानस्य।
यंनियतिरीश्वरः। कालकर्मगुणानां चतस्मात्तंतर्पयेत्इतिपारिजाते आचार्यवचनात् यथाशक्तिसवि
तृप्रीत्यर्थंब्राह्मणतर्पणानि कुर्यात्। इदमत्रगृह्यं। समन्वारब्धेहुत्वोत्तरतोग्नेः प्राङ्मुखआचार्योव
तिष्ठतेपुरस्तात्प्रत्यङ्मुखइतरोपांजलिंपूरयित्वातत [illegible] ततसवितुर्वृणीमहइतिपूर्णोतस्यपूर्णमवस्रा
रयतस्त्वासिच्यदेवस्यत्वासवितुः प्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांहस्तंगृह्णाम्यसावितितस्यपाणिना
पाणिंसांगुष्ठंगृह्णीयात् सवितातेहस्तमग्रभीदसावितिद्वितीयमग्निराचार्यस्तवासावितितृतीयमादित्य
मीक्ष्ययेदेवसवितरेषतेब्रह्मचारीतंगोपायसमामृतेत्याचार्यः कस्यब्रह्मचार्यसिप्राणस्यब्रह्मचार्यसिकस्त्वा ध्यं१ क्रं१
कमुपनयतेकाय त्वापरिददामीतिसुवासुवासाइत्यर्द्धर्चेनैनंप्रदक्षिणमावर्त्तयेत्तस्योपाणिंस्वाहृ
दयमालभेतोत्तरेण। उत्तरेणतंधीरासइत्यर्धर्चेनेत्यर्थः। अस्यांजलिमद्भिः पूरयित्वातस्योपरिस्वयमं
य जलिंकरोति। तमद्भिः पूरयतीतिजयंतः। सुवासुवासाइत्यस्यकौशिकोविश्वामित्रोपरस्त्रिष्टुप्।
३ र्च पूर्वार्धस्यप्रदक्षिणावर्तनेउत्तरार्द्धर्चस्यपाणिभ्यांबटुहृदयालंभनेविनियोगइत्येवंप्रयोगः। गाथीवि
श्वामित्रइत्युक्तंप्रयोगपारिजाते। कुर्वंसेवाससातत्ततः सर्वोनपूर्वमुखस्थितान् तस्मात्सर्वेतुखंरुला
पगृह्णीयात्। शिष्यमेवतंशिष्यइति तस्वीकारानंतरंचततः पूर्ववदासीतगुरुः शिष्योपिचासनात् न्यवधानंप



रिहरन्नग्नेर्गंतातिकेगुरोः। आसित्वादक्षिणेतस्यवह्निंपरिसमुह्यचेतिप्रयोगपारिजातेशौनकवचना
त्ततोब्रह्मचार्यग्नेर्मध्येवायंपरिहरन्नाचार्यस्यदक्षिणतउपविशतीतिजयंतोक्तेश्चाचार्यस्यद
क्षिणतउपविष्टोबटुः परिसमूहनादिपूर्वकंसमिदाधानंकुर्यात्॥ केचित्तुएवंकृतोमंत्रहोमाभ्या
धानोपस्थानानीतिश्रौतसूत्रेउक्तत्वात्घृतेश्चाप्रेक्षितोयजेदन्यत्राप्यतीतिसूत्रेअन्यत्रेतिवचनंगा
(श्रोत) ह्येष्विपिप्रापणार्थमितिवृत्तिग्रंथाच्चसमिदाधानंबटुर्वायम्यादिशान्तिवाकुर्यादित्याहुस्तत्प्रयोगपारि
जातजयंतादिविरोधात्स्यब्रह्महोत्रादिकर्तृकाभ्याधानादिपरत्वाद्यवधानंपरिहरन्नग्नेर्गंतातिकेगु
रोरितिपूर्वोक्तश्लोकेनकवाक्यात्वाचायुक्तं। अनियमेनदेशप्राप्तौहिपरिभाषयानियमोनतुवचनांतरस्वत्वइति
तिष्ठत्समिधमा दद्यात्रिभिः यत्किंचिदेतत्। तथ्यांसमावर्तनेतिष्ठत्कृणमम्यत्रासीनस्यकर्माणिस्युरित्येवमर्थं। तेनात्रोपविश्यैव
दक्षिणोहोमइत्यन्ये इदमत्रगृह्यं। अग्निंपरिसमुह्यब्रह्मचारीतूष्णींसमिधमादध्यात्तूष्णींवैप्राजापत्यं
प्राजापत्योब्रह्मचारीभवतीतिविज्ञायते। मंत्रेणहैकेग्नयेसमिधमाहार्षंब्रह्मणावयंस्वाहेतिसमिधमा
धायाग्निमुपस्पृश्यमुखंनिमार्ष्टित्रिस्तेजसामासमनज्मीतितेजसाह्येवात्मानंसमनक्तीतिविज्ञायते
मयिमेधांमयिप्रजांमय्यग्निस्तेजो। मयिमेधांमयीन्द्रोमयिसूर्यः। यत्तेअग्नेतेजः। पतेअग्नेवर्चेहतेपते
हरः। हरस्वीभूयासमित्युपस्थायजान्वाच्योपसंगृह्यपाद्धीहिभोः सावित्रींभोअनुब्रूहीतितस्मैत
स्यवाससापाणिभ्यांचपाणीसंगृह्यसावित्रीमन्वाहपच्छोर्धर्चशः सर्वांयथाशक्तिवाचयीतहृदयदेशे



Indira Gandhi National Centre for the Arts

प्र.वि.
६४

स्यो ध्वौंगुलिं पाणिमुपदध्याति। मम व्रते निपुनक्तु मह्यमिति मेखलामाबध्य दंडं प्रदाय ब्रह्मचर्यमादिशे — मेधाप०
ब्रह्मचार्यस्यपोशानकर्म कुरु दिवा मा स्वाप्सीराचार्याधीनो वेदमधीष्वेति सायंप्रातर्भिक्षेथाः सायंप्रा
तः समिधमादध्यादिति। अत्र समु ह्येति वचनमनर्थकं। अग्नेः संस्कृतत्वात् तेन सायंप्रातः समि
दाधाने परिसमूहनपर्युक्षणादि प्राप्त्यर्थमिदं। अत्र तु परिसमूहनाद्यस्त्वेव ब्रह्मचारी तूष्णीं समि
धमादध्यात् प्राजापत्यो ब्रह्मचारी। तेनात्र प्राजापत्यैव तत्तूष्णीं समिदाधानं। मंत्रेण
वा। इत्याद्यभिमतत्वो ज्ञापनार्थः। तेन पूर्वस्यानुसा कृष्णेपि विकल्प इति वृत्तिः। शौनकस्तु। आसि
त्वा दक्षिणेनस्य वह्निं परिसमूह्य च। तूष्णीं समिधमादध्यात् प्राङ्मुखो यदि वाग्नये इत्यादिनानित्यवद्
वपरिसमूहनादिकमित्याह कारिकायां। तूष्णीं समिधमादध्यादग्नये प्रादेशसंमितां। एतच्च वीर्धं वादध्याद्
ग्नये समिधं वृहतीति। अस्य चि कल्पमंत्रस्य हिरण्यगर्भ ऋषिः। अग्निर्देवता त्रिष्टुप् छंदः। एकैकसा चायं — मनत्मी
मंत्रः प्रयोगः समिधि जपंतः। ततो ब्रह्मचारी समिधमाधाय मयि धाथ तेजसा मामि मेने नमुखं त्रिर्निमार्ष्टीति वृत्तिः।
अत्र केचित्। स्पृष्ट्वाग्निं तेजसा मामितीव च मार्ष्टि ततो मुखं। प्रक्षाल्य हस्तमनले मुपस्पृश्य च मार्ष्ट्यं च। औ
ष्टौ विलोमको कृत्वा संवृतौ तन्निमार्जनमिति। कारिकावचनादोष्ठयोरेव निमार्जनमित्याहुः। तन्न। सूत्रे मु
खं त्रिर्माष्टीति संपूर्णमुखस्यैव त्रिर्निमार्जनोक्तेः। शौनकोपि। अपस्पृश्याग्निं तत्र वक्त्रं तं वृतोष्ठपुटद्वयं। — ६७
तेजसा मा समित्यादि मंत्रेण परिमृज्य वा पाणिं प्रक्षाल्य भूयोपि स्पृष्ट्वाग्निं तेजसा मुखं। त्रिर्निमृज्य तथा पा
णिं प्रक्षाल्य च पुनः पुनरिति। तत उत्थाय हृदयसंमितौ पाणी कृत्वा नयि मेधामिसे नमादित्यैः षड्भि

य — संवृतोष्ठपुटद्वयमिति पथाप्रत्र वतिमध्येसर्भः

मंत्रैरुपस्थानं कुर्वीतेति जपंतः। एतेषां षण्णां मंत्राणां हिरण्यगर्भ ऋषिः। पूर्वेषां त्रयाणां अग्निर्देवता।
उत्तरत्रयाणामग्निर्देवता गायत्री छंदः इति भट्टाः। ततः मानस्तोके कुत्सो रुद्रो जगती इति विष्णुतिं कृत्वा
आयुषं जमदग्नेरिति ललाटे। कश्यपस्येति कंठे। अगस्त्यस्येति नाभौ। यद्देवानामिति दक्षिणांसे तन्मे अस्तु त्र्यायु
षं नाम सांसे शतायुषं शिरसीति भट्टाः। आश्वलायनेन तु हृदि नाभौ तथा वाहौ मेस्तके च तथैव च। त्र्या
युषं जपेन्मंत्रान् उपस्थायां च मे स्वरस्तु कं। ततः परिसमूहनपर्युक्षणे कृत्वाऽग्नेः चमरस्युपस्थाय कर्णौ धत्वामु
कप्रवरान्वितः अमुकशर्मा अहंभो आचार्य अभिवादयेदित्यभिवादयेदिति पितृचरणाः। शौनकः। गुरोरग्नेः त्र
जानत्वात् पूर्वाग्नेर्जुहुयादुरिति। अत्र गुरोरग्निसाम्येनाग्नेरप्यभिवादनं कार्यमिति गम्यते। ततः अग्निमुत्त
रतः प्रत्यङ्मुखो बटुः दक्षिणं जानुं भूतले निधाय पाणिभ्यां सव्यदक्षिणश्रोत्रसंस्पर्शः स्पृष्टपाणिराचार्यस्य
दक्षिणं पादं स्वदक्षिणहस्तेन सव्यं च सव्यहस्तेन जानुप्रभृति पादपर्यंतं स्पृष्ट्वा अमुकगोत्रो अमुकशर्मा अहं भो अ
भिवादये इति शिरो वनति पूर्वमभिवाद्याचार्येण आयुष्मान् सोम्य देवदत्ता इति प्रयुक्ताशीर्वादोपसवेदिति भट्टाः।
केचित्तु विपर्यासं तरिते मंत्रे कर्मणि व्याख्याते चोपलक्ष्य वा जान्वा कुर्तिं जुहुयादिति सूत्रे सर्वत्र जानुनिपा — य्या४
तनमुपस्थस्यो तान वाविरोधेन कर्तव्यमिति वृत्तिग्रंथादत्रापि उपस्थाविरोधे नैव जानुनिपातः। अतएव
तस्यानिसाः प्रांचः चेष्टाः। अंकधारणा च यज्ञोपवीतशौचेच वि होमाद्या वृत्तिश्च नत्र चेतकर्मको गावव ने
दक्षिणं प्रतीयादनादेशाइतिषु सूत्राणि सर्वार्थानीति वदता वृत्तिकृता अंकधारणानित्ये सुक्तमित्याहुः

Indira Gandhi National
Centre for the Arts

उपदेशशास्त्रा
उपनयन

प्र·चि·
९८

अन्ये तु वचनांतरस्य सामान्यपरिभाषामाषा: अत्रानुपयोगाद्योन कात्यसुक्त एवात्र जानुनिपात: तथा च शौनक: । कृत
के दक्षिणं जानुं पातयित्वाभिवादयेत । शर्मेशहं तमुच्चार्य ततो नामाहमस्मि भो । इति चोच्चार्य गुरो: पादौ पाणिभ्याम
भिसंस्पृशेत । समंसमेनचरणं दक्षिणेन तु दक्षिणं । जानुप्रभृति पादांतमहं भो अभिवादये इति मनु: । विप्य
स्तेवसानेन पादो ग्राह्यौ गुरो: सदा । संहस्तहस्तावा बध्य सहिब्रह्मांजलि: स्मृत: । व्यस्तपाणिना कार्यमु
पसंग्रहणं गुरो: सव्येन सव्य: स्प्रष्टव्यो दक्षिणेन तु दक्षिण इति । जयंतोपि । ब्रह्मचारी दक्षिणं जानुं पातयि
त्वा सम्यसुक्तेन विधिना अभिवादनी[illegible]कं च नामोक्त्वा आचार्यस्य पादानुपसंगृह्यादिति । तेन सूत्रे जान्वा
चे सव्येन जानुनिपात एवात्रापि मत: । बौधायन: । श्रोत्रे संस्पृश्य मन: समाधाय अधस्ताज्जान्वो: पद्भ्यामन्योपसंग्रहणमि
ति । अन्ये तु गुरु: [illegible] अगोत्र ज्ञानार्थं प्रवरसंकीर्तनमप्य[illegible]तिवदं: प्रसाभिवादने चायुष्मान् भव सौम्य देव
दत्ता इत्येवं प्रयोग इति सदा: । अन्ये तु आयुष्मान् भव सौम्येति या [illegible] प्राभिवादने । अकारश्चास्य नाम्नोंते
वाच्य: पूर्वाक्षर: प्लुत इति मनुवचनादायुष्मान् भव सौम्य देवदत्त शर्मा ३ न अइ सेवं प्रयोग इत्याहु: । तत:
अधीहि भो: सावित्रीं भो अनुब्रूहीति बटुर्वदेत । अधीहि स्मरे सर्व: । ततस्तंडुलपूर्णपात्रं माय[illegible]लिदे
दिति आचारप्राप्तं । तत: वामपाणिमध: कृत्वा दक्षिणं चोपरि न्युब्जमुखौ कृत्वा पाणि[illegible]मंगुलीभिरांगुष्ठौ
च[illegible]कृत्वा ब्रह्मांजलिं दक्षिणांके निक्षिप्याचार्याभिमुख आसीतेति सदा: । अथाचार्यस्तत्सरि ९८
हृतवाससांजलिमाच्छादयेत । तदुक्तं गृह्ये । तस्य वाससा पाणिभ्यां च पाणी संगृह्णीति । प्रावरणस्या

न्तस्य वाससरिहितेन वाससेति वृत्ति: । तत: आचार्य: आच्छादितं तदंजलिं पाणिभ्यां परिगृह्य प्रणवमाहृतिपूर्वकं सा
वित्रीं प्रथमं पादश: स्वयमुक्त्वा तथैव वाचयेत । ततोर्द्धर्चश: । तत: सर्वां । तथा च शौनक: । अथाचार्योपि शि
ष्यस्य पाणी तच्छादितवाससा पाणिप्रदेशमात्[illegible] पाणिभ्यां परिगृह्य च । सावित्रीं स्वयमाचार्य: पूर्वं पठेत्तथैव
वंच । शिष्यं च वाचयेत् [illegible] स्वयमुच्चार्यार्द्धर्चश: स्वयं तथैव वाचयेच्छिष्यमथो त्वा सकृत्स्वयं । एवं तथैव शिष्य
च वा चयेदित्ययं क्रम इति । वृत्तावपि । स्वयं पादं पादं उक्त्वा तेन वाचयतीति । सदा: । अप्येवं । तेन सर्वां गायत्री
मुक्त्वा याचनं चिंत्यं सूत्रे । यथाशक्ति वाचयीतेति । यदि ब्रह्मचारी पादं पाद अर्द्धर्चश: सर्वां वाचयितुं न स्त
शक्नोति तदा यथाशक्ति वाचयीतेति वृत्ति: । अत्र केचित । जपे दं पूर्वा व्याहृतय: सावित्रीं चात्रिरभ्यस्य वेदादि
मारभेत् सदुपाकर्मणि । तथा ब्रह्मयज्ञादौ च यत्रापि पूर्वा व्याहृतय इति व्याहृतिपूर्वत्वविधानात एव तत्पूर्वं कृत्वा त
या च गायत्र्युपदेशो तस्य वाससा पाणिभ्यां च पाणी संगृह्य सावित्रीमन्वाह पच्छोर्द्धर्चश इत्याद्यो सूत्रकारेण
व्याहृतिपूर्वकत्वानभिधानात् शुद्धगायत्र्या एवोपदेश इति । तन्न । अधीहि भो: सावित्रीमित्यादिना पादश: प्रवण
व्याहृति सर्वां गायत्रीं जपेदो मादृशीत्वं स्मरतात् दृशीमेवानुब्रूहीत्यादिना प्रैषेण माहृत्यादि युक्ताया एवोपदेश
वगमात् । तत्रापि ब्रह्मयज्ञसूत्रे च कारात्सावित्रीं पूर्वां व्याहृतीस्तत्र सकृत्सठित्वा केवल गायत्र्या: पच्छोर्द्धर्चशश्च यथात्रय
हं ब्रह्मयज्ञे त्रिरभ्यास स्तथात्र न स्मरणं किंतूपाकर्मणि सा । वित्रीं चात्रिरभ्यस्येति च कारादेव व्याहृतीनां गायत्र्या
श्च यथा पच्छादि त्रिरभ्यासस्तादृशीं त्वं स्मर । तादृशीमेवाध्ययनधर्मेणास्मरपठे सर्व: । एतदपि प्रायेणैव का

Indira Gandhi National
Centre for the Arts

प्र॰चि॰ रिकाकारेण ॐ भूर्भुवः स्वः फू र्वं तु सावित्रीं वाचयेत् । पादं पादं च सावित्र्याः स्वयमुक्त्वा वाचयेदिति दिक् । उपनयन
९६ तत्र प्रणवमंत्रस्य परब्रह्म ऋषिः परमात्मा देवता दैवी गायत्री छंदः इति स्मृतः । केचित्तु ॐकारस्य ऋषिर्ब्रह्मा
देवोग्निस्तस्य कथ्यते । गायत्री च भवेच्छंदो विनियोगः सर्वकर्मस्विति मदनपारिजाते संकर्तीकरणे देवस्ते
साहुः । नारदेवाह्निके कात्यायनेन तु ॐकारस्य ऋषिर्ब्रह्मा परमात्मा च देवता । गायत्री च भवेच्छंदो विनियोगः वे
सर्वकर्मस्विसुक्तः समस्तव्याहृतिमंत्रस्य प्रजापतिर्ऋषिः । प्रजापतिर्देवता बृहती छंदः । गायत्र्या विश्वा
मित्रः सविता गायत्री । प्रयोगपारिजात एवं । केचित्तु समस्तव्याहृतिमंत्रेपि अग्निर्वायुः सूर्यादीनां
देवतात्वमिच्छाहुः । तन्न । तासां मस्तव्याहृतिपरत्वात् । तेनायं जान्वाभ्योपसंगृह्य सादि प्रणवव्याहृतिपू
र्वकं गायत्र्युपदेशः उत्तरतोग्नेः कार्य इति स्मृतः तथा च छंदोगसूत्रं । उदगग्नेरुत्सृप्य प्राङ्मुखाचार्य उप
विश्य सुदर्भेषु दर्भेषु प्रसङ्गमाणवकः इति । तद्भाष्येपि । उत्तरत एवाग्नेरुपदेश इति । निर्णयसिंधौपि त्रि
चरणा अप्युत्तरेणाग्निमुपविशतः प्राङ्मुख आचार्यः प्रत्यङ्मुख इतरो व्रीहिष्वो इति शांखायनसूत्रो
क्तेः यद्यपि कात्यायनेनाथास्मै सावित्रीमन्वाहोत्तरतोग्नेः प्रत्यङ्मुखायोपविष्टाय दक्षिणतस्तिष्ठत आसीना
यैवैके इति विकल्प उक्तस्तथापि कातीयानामयं सः बह्वृचानां तूत्तरत एव वेदेत्यादि साहुः । कौथुम सूत्रे १०२
२ यो चलकुगृहीतं षडंगमेक इति बह्वृक्षिणत उपदेशस्थान स्मिन्न लैवैत के केचित्तु अथोक्षायां जलिं कृत्वा
हृदये पाणिं धाय च । मयि मेधां मयि प्रजां साध्वीः षड्भिर्मंत्रैर्बिंसावस्तु । उपतिष्ठे कुमारणां ग्नेः पश्चादाघयो ९६
= पश्चिमभूतले । आसीन प्राङ्मुख शिष्योपाचार्याभिमुखोस्य वेदिति प्रयोगपारिजाते शौनकवचनाद्याग्नेः = १

श १
पवेदृशाकं तथोपविश्याचार्यः तस्याभिमुखीभूतो ब्रह्मचारी दक्षिणं जानुं पातयित्वे त्यादि जयंतलिखनां
च पश्चिमत एव गायत्र्युपदेशः । एवं च हरस्वीकृत्यासमिसुपस्थाय जान्वाभ्योपसंगृह्य त्यादि सूत्रं । षडुपसि
रूपस्थाय दक्षिणं जान्वाभ्य विधिवदुपसंगृह्याचार्यं ब्रूयादिति इति लिखनं च संगच्छते । नहि यत्र क्वचिदुप
स्थाय यत्र क्वचिद्दक्षिणं जान्वाभ्य एवं संभवति । तन्न क्रियाद्वयस्याप्यानंतर्येण सन्निकृष्टतामादुत्त
रतो गत्वे स्येव मन्त्रोक्ते । रेवं त्रिर वमभ्याग्निमुपस्थाय मयीत्यपि । जान्वाभ्य दक्षिणं पार्श्व वा चार्यस्योपगृह्य चे
ति कारिकावचनाच्च पश्चिमत एव गायत्र्युपदेशः कात्यायनशांखायनादि लिखनं तु तच्छाखीयपरमित्याहुः ।
अपरे तु । अवधारणस्याश्रुचिता पादनेन गायत्र्युपदेशांगत्वात्तत्रोत्तरतोग्नेः प्राङ्मुख आचार्यः प्रत्यङ्मु
ख इतर इति विशेषकथनं । न तन्मात्रांगं किंतु गायत्र्युपदेशस्याधिकारांगप्रयोगांगमित्युत्तरत एवोपदेशः ।
एवं चाग्नेः पश्चतः करणमपि परिहृतं भवतीत्याहुः तन्न अवधारणस्यांगत्वेपि तत्रोक्तविशेषस्य तन्मा
त्रार्थत्वेन प्रयोगांगत्वे मानाभावात् । अन्यथा तत्र प्राङ्मुख आचार्यो वतिष्ठत इति द्वयोस्तिष्ठतो रुत्पत्तिपि ति
ष्ठत्वाद्यापत्तेः । अवधारणवत्समिदाधानस्याप्यंगत्वात्तत्रोक्तपश्चिमदेशविशेषस्यावधारणोक्तदेश
विशेषस्य चाप्राप्तिः दिसत्र विनिगमकाभावाच्च । अग्नेः पश्चतः करणं त्वग्न्याचार्ययोर्मध्ये गमनं प्रमाण
२ ते बलादायातं न केनापि विहिरूध्यत इत्येवं वाच्यं । इहहि जान्वाभ्योपसंगृह्य सादिकमुच्यमानं वा क्वालिंगाच्च
गायत्र्युपदेशांगं । न तु तत्र साकांक्षायाः सुत्तरतोग्नेरिसवधारणोक्त एव देशविशेषात्र संबध्यते । अंग

Indira Gandhi National
Centre for the Arts

प्र०चि०
८६

प्रधानयोरेकदेशत्वसंसर्गित्वात्। अंगवशेन प्रधानस्य व्यवस्थादर्शनाच्च। नचैवं। समिदाधानस्यापि तद्देशत्वापत्तिः। अ
ग्न्याधानोपस्थानानीति सूत्रकारपरिभाषया तस्योपस्थानादेश्च तद्देशत्वस्येष्टत्वात्।। तेन सूत्रे वतिष्ठतइत्यादि बाधे
न त्वा न्वाख्येत्यादि विशेषविधानेपि नोत्तरदेशस्य बाधइत्यसमस्तूत्रोक्तोपचैवोपपुत्तरतएवोपदेशः। अस्तु वानिरवकाशे
शौन कृजयंतादिवचनैस्तन्मात्रस्यान्यदेशत्वंनत्वेतावतागायत्र्युपदेशस्याप्यन्यदेशत्वंयुक्तं। तेनशौनकजयंता
दिवचनानामग्नेः पश्चाद्यथोपवेष्टुंशक्यतइत्युक्त्या प्रसगुदक्देशपरत्वेन पश्चिमदेशपरत्वाभावात्सा
यनगद्याद्येकवाक्यतया वक्ष्यारत्नसूत्रैकवाक्यतया चोत्तरएवगायत्र्युपदेशइति वयं प्रतीमः। एवंसौत्रीवा
चयित्वात्रैवासीनस्य हृदयदेशेऊर्ध्वांगुलिं पाणिमुपदधाति मंत्रेणेति जयंतः। शौनकोपितततः शिष्योरसि
मम व्रतइत्यादिमंत्रतः। निधायोर्ध्वांगुलिं पाणिमथाबध्नीतमेखलां। दंडं चास्मै प्रदायोक्तं ब्रह्मचर्यं च निर्दि
शेदिति। सूत्रेपि। हृदयदेशेस्योर्ध्वांगुलिं पाणिमुपदधाति। मम व्रते० नियुनक्तुमह्यमिति। मेखलामाबध्य
दंडं प्रदाय ब्रह्मचर्यमादिशेद्ब्रह्मचार्यस्यपोशान कर्म कुरु दिवा मास्वाप्सीराचार्याधीनोवेदमधीष्वेति। द्वादश
वर्षाणि वेदब्रह्मचर्यं ग्रहणांतं वा। सायंप्रातर्भिक्षेत। सायं प्रातः समिधमादध्यादिति। मम व्रतइतिमंत्रस्य
प्रजापतिर्बृहतीलिंगोक्ताः। मेखलाबंधने च। इयं दुरुक्तादितिद्वयोर्वामदेवऋषिः। मेखला देवता त्रिष्टुप्छंदः। अ
स्मिन्मंत्रे स्थाने समंतमनुपरीहीसेनपाठोनतु परेहीति। पारिजाते। अनुपरीहि आनुपूर्वेण परिगच्छेति व्याख्या
नात्। प्रयोग[illegible]नुपरेहीसेवंपाठोप्यतस्तत्र मूलं न विद्मः। आश्वलायनं सूत्रेतौं आ[illegible]ब[illegible]अमेखलां तस्य
इत्ते ... नु

उपनयन
न
वि०
८६

प्रावेपामेस्तचैवहि। एषस्तेसनयादंडंधारयित्वादिशेच्चतमितिसुक्तं। अत्रापस्तंबेन मौंजीमेखलांप्रदक्षिणमुत्तर
स्यांपरिवीयेत्यादिनाबंधनमुक्तं। बौधायनस्तु। अथैतांमौंजीं मेखलां त्रिवृतांत्रिःपरिव्ययन्वाचय
तिइयंदुरुक्तादिति। ततः परिवीतामनुमंत्रयते ऋतस्य गोप्त्रीति। ततो ग्रंथिं करोति। प्राणानां ग्रंथिरसि
विस्त्रसइतिमंत्रेण नाभिदेशइत्यादिना पूर्वस्य परिव्याणे उत्तरस्यानुपरिवीतानुमंत्रणे। तृतीयस्यानु
ग्रंथिबंधनइत्येवंविनियोगमाह। पारिजाते आश्वलायनः। त्रिस्त्रयेणावृतोहमितिमन्येतसद्विजः। तद्
यस्त्वंगानितद्रहस्यानि संस्मरेदिति तेन मेखलां त्रिरावृतांकृत्वा नाभिदेशेग्रंथित्रयंकृत्वा बटुः सर्
हस्यांगसहितवेदत्रयेणावृतोहमितिमन्येतेतिसहृत्वाः। इदमत्रापूर्वं। तेषां मेखला मौंजीब्राह्मणस्य धनुर्ज्या
क्षत्रियस्य। औवीं वैश्यस्येति औवींआविकंतुभिःकृता। यमः। एतासामप्यभावेतु कुशाश्मंतकबल्व
जोरिति।। कात्यायनसूत्रे। मौंजीरसना ब्राह्मणस्य धनुर्ज्या राजन्यस्य औवीं वैश्यस्य मुंजाभावे कुशाश्मं
तकबल्वजानामिति। आचार्यः। त्रिवृतामेखलाकार्या त्रिवारं स्यात्समावृता। तद्वृथयस्त्रयः कार्याः पंचवास
प्तवापुनरिति। जयंतस्तुत्रिवृतां ग्रंथिंविकल्पोभवतीत्याह। प्रवरसंख्यया ग्रंथयइतिशिष्टाः। मेखलाबं
२ये धनानंतरं च स्वस्तिनः इत्यात्रेयोविश्वेदेवाअनुष्टुबितिमंत्रेस्वयमुक्त्वा तस्मैयोगक्षेमार्थमधर्मनिवृत्त्यर्थं
च दंडंदत्वा आरोतंदमयित्वेतिमंत्रं वाचयेदितिसहृत्वाः। शांखायनसूत्रेतु स्वस्ति नो मिमीतामितिपंचर्चेन
दंडंप्रयच्छतीत्युक्तं।। प्रयोगपारिजातादिषिस्त्वयं मंत्रोनपठ्यतः। सूत्रे। तेषांदंडाः पालाशोब्राह्मणस्यौदुंबरः

नैकेनत्रिभिः पंचभिरेववेत्तु नोग्रंथिः

Indira Gandhi National Centre for the Arts

प्र॰चि॰ क्षत्रियस्य बैल्वो वैश्यस्य केशसंमितो ब्राह्मणस्य ललाटसंमितः क्षत्रियस्य प्राणसंमितो वैश्यस्य। सर्वे वा उपनयन
८८ सर्वेषामिति प्राणसंमितो नासासंमितः। कात्यायनसूत्रे तु पालाशो ब्राह्मणस्य [illegible] बैल्वो राजन्यस्यो-
दुंबरो वैश्यस्य केशसंमितो ब्राह्मणस्य ललाटसंमितः क्षत्रियस्य। मुखसंमितो वैश्यस्य। सर्वे वा सर्वेषामित्यु- ६४
क्तं। मनुः। ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः। अनुद्वेगकरा नॄणां सत्वचो नाग्निदूषिता इ-
ति। गौतमः। यज्ञियो वा सर्वेषां मूर्द्धललाटनासाग्रप्रमाण इति। जयंतः। अथ दंडं दत्वा ब्रह्मचर्यमादि-
शति। ब्रह्मचार्यस्यपोशानेत्यादि। यद्यपि सूत्रे आचार्याधीनो वेदमधीष्वेत्युक्तं। तथापि आचार्या-
धीनो भव वेदमधीष्वेति प्रैषद्वयमिति वृत्तिः। प्रैषार्थमेवमुक्तं तु कालमेवं तु निर्दिशेत्। तेन द्वादश
वर्षाणि वेदग्रहणांतं वा ब्रह्मचर्यं चरेति प्रैषः। सायं प्रातरित्यादिकं तु न प्रैषद्वयमिति वृत्त्याशयः। भट्टै-
स्तु आचार्याधीनो वेदमधीष्व सायं प्रातर्भिक्षेथाः। सायं प्रातः समिधमाधेहीत्येवं प्रैषप्रकारा उक्ताः।
प्रयोगपारिजाते त्वेवं प्रैषप्रकार उक्तः। ततः स्विष्टकृदादिशेषं समाप्याग्निं रक्षेत्। अत्र शतद्वयं शतं वा
विप्राणां भोज्या इत्यपि स्मृतः। हेमाद्रौ तु। शतं विवाहे संस्कारे पंचाशन्मेखलादिष्वित्युक्तं। अथ भिक्षा सूत्रे।
अप्रत्याख्यायिनमग्रे भिक्षेताप्रत्याख्यायिनीं वा भवान् भिक्षां ददात्विति अनुप्रवचनीयमिति वा तदा-
चार्याय वेदयीत तिष्ठेदहः शेषमिति। अयं नियमो अनुप्रवचनीये सत्येव स्त्रीभिक्षा चेदुभयत्र मंत्रे भव- ८८
ती ददात्विति ब्रूयादिति वृत्तिः। उभयत्र भवती अनुप्रवचनीयं ददातु। भवति भिक्षां ददात्विति मंत्रद्वये।

अत्र सूत्रानुसारात् पुरुषभिक्षाया एव प्राथम्यमिति केचित्। वस्तुतस्तु यद्यपि सूत्रे पुरुषभिक्षायाः प्रा-
थम्यं प्रतीयते तथापि अप्रत्याख्यायिनीं नारीमप्रत्याख्यायिनं नरं। ब्रह्मौदनार्थं विप्रार्थं सुश्रुद्धान्न्याच-
येत्तदेति पारिजाते। आचार्येणोक्तरूपेण मातृभिक्षायाः प्राथम्योक्तेः मातरमेवाग्रे भिक्षेतेति क-
त्यायनोक्तेर्मातरं भिक्षेत मातरं वै प्रथमां। याचेनं न प्रत्याचक्षीतेति शांखायनसूत्रे उक्तत्वाच्च तद्दे-
कवाक्यतया श्रीहिरण्यकेशिबह्वृचरथंतरवच्चविकल्परूपेणाविशेष प्रवृत्तस्य सूत्रस्य वाक्यांतरानुरोधे-
न स्त्रीभिक्षा प्राथम्यपरत्वादन्यथा बृहद्रथंतरादावपि पाठेन बृहदादेर्मुख्यत्वापत्तेश्च मातरमेवाग्रे
भिक्षेत। पश्चात्पितरं। पारिजाते प्रयोगरत्ने च मातृभिक्षाया एव प्राथम्यमुक्तं मनुरपि। मातरं
वा स्वसारं वा [illegible] मातुर्वा भगिनीं निजां। भिक्षेत भिक्षां प्रथमं या चैनं न विमानयेदिति। भिक्षायां च
भवत्पूर्वां भिक्षादिशास्त्रांतरोक्तौ विधिर्दृष्टव्य इति वृत्तिलिखनाद्भवच्छब्दपूर्विकैव भिक्षा। भवन्मध्यां
ताद्वचनं तु क्षत्रियपरं। तथा च कात्यायनसूत्रे भैक्षाचर्याचरणं भवत्पूर्वां ब्राह्मणो भिक्षेत भवन्म-
ध्यां राजन्यो भवदंत्यां वैश्य इति। मनुरपि। भवत्पूर्वं चरेद्भैक्ष्यमुपनीतो द्विजोत्तमः। भवन्मध्यं तु राजन्यो
वैश्यस्तु भवदुत्तरं। याज्ञवल्क्योपि। आदिमध्यावसानेषु भवच्छब्दोपलक्षितं [illegible] ब्राह्मणक्ष-
त्रियविशां भैक्ष्यचर्या यथाक्रममिति। अत्र प्रकारो भिक्षामित्युक्त्वा पूर्वं ततः परं। भवान्ददात्विति ब्रूयात् पु-
रुषं प्रति भिक्षणे स्त्रियं तु भिक्षां भवती ददात्विति सम्यग्याचितमिति। शौनकवचनात्तथा अप्रत्याख्यायि-
आहुः केचित्तु

Indira Gandhi National Centre for the Arts

× भवानिति भवतीति वृवन्याचेदप्रसार्याविनीयदितिकारिकावचनादिति ग्रंथात् अनुप्रवचनीयार्थमिक्षा २

प्र॰ वि॰ नं पूर्वं याचेद्भिक्षां भवान् ददात्वित्येव प्रयोगः। भवत्पूर्वामित्यादिर्वृत्तिग्रंथस्तु सायंप्रातर्भिक्षापरइत्याहुः। उपनयन
१९ वस्तुतस्तु अयं नियमोऽनुप्रवचनीयपक्ष इति वृत्तिग्रंथेनानुप्रवचनीयेपुरुषानिर्देश्य प्रसार्यमायित्वनियम एवोच्यते न तु मंत्रनियमः। तस्मिन्नेराप्रसार्यमायित्वनियमे ऋषिणाक्षत्रियपरो भवन्मध्यएव स्वतंत्रेऽपि न ३
मंत्रः। भवान् ददात्विति पदयोस्ता दृशानुपूर्वीविशिष्टयोरप्रसार्यमायित्वद्योतनार्थलिंगदर्शनतो नोक्तः। ब्राह्मणपरो भवच्छब्दपूर्वोमंत्रस्तु न तथा अप्रसायित्वद्योतकः। भिक्षापदेनमध्ये व्यवधानेन तत्रा प्रसार्यमायित्वनियमस्य शीघ्रमनुपस्थितेः। नापि वैश्यपरस्ताशानुपूर्व्यभावे। बोद्धव्यविधेयभावैपरीत्यातेनो भयत्राविलंबितोपस्थितिकत्वात् क्षत्रियपरएवमंत्रो लिंगादर्शनत्वेनोक्तः। अन्यथा मंत्रविधिर्मि भिक्षां भवान् ददात्वनुप्रवचनीयेति नेति सूत्रप्रतीकग्रहणानंतरमयं नियम इति वृत्तिग्रंथस्या
मिति म। तेनाप्येतदपि प्रायेणैव तत्रापि भवत्पूर्वामित्यादिर्विधिरनुसंधेय इति वृत्तिग्रंथेन तत्रेति अहनि रात्रौ वक्रियमाणायां भिक्षा त्वा वच्छिन्नायां भवत्पूर्वामित्यादिनियमोस तिसंकोचे मानाभावादनुप्रवचनीयार्थभिक्षायामप्यग्निकार्यं च भिक्षायाः प्रागूर्ध्वं वा तदिष्यते अहः शेषं न तिष्ठेत् सायं संध्यामुपासीत चा। लिकारिकानुसारेण सायंप्रातर्भिक्षेतेति सूत्रानुसारेण च सायं भिक्षात्वादन्यथा पूर्वोक्तोपनीतस्य त्रिवर्षादेस्तिष्ठेदहः शेषमित्यादानयाकार्थविप्लापत्तेः। कारिकादि वचनौचक्षत्रियपरत्वात्तृतीय १९
सूत्रमाज्ञवल्क्यादेरेकवाक्यतया रत्तिस्वारस्येन चानुप्रवचनीया र्थभिक्षायामपि ब्राह्मणस्यभ

[redacted] १ नौ २

वत्पूर्वैवेति वयं प्रतीमः। आश्वलायनस्मृतिरपि। माचयेत्प्रथमां भिक्षां पितरं मातरं तु वा। पितरं यदियाचेत भवान्भिक्षां ददात्विति। भवतीति पदं स्त्री स्त्रा भिक्षां देहीति याचयेदिति। तेन सूत्र वृत्त्याद्याशयमन्ताना। अनुप्रवचनीयार्थभिक्षायां भवन्मध्यतापक्षं ब्राह्मणस्य वदंतोऽनंता नादृत्युपेक्ष्याः। अत एव प्रयोगरत्नेऽपि वदाद्यतपक्ष एवाश्रितः। अयं तत्तु भिक्षां भवान् ददात्विति पुरुषं प्रतियाचेतेति सर्वत्रास्य मध्यतां वदन्नुपेक्ष्यः। अनुप्रवचनीयं भवान् ददात्विति सूत्रे पक्षांतरं मनुः। निसंभुड्वा कारुहस्तः पर्यंप्यच प्रसारितं। ब्रह्मचारी गतं भैक्ष्यं नित्यं मेध्यमितिस्थितिः। भोजनार्थं च तस्य कांस्यपात्रं न ग्राह्यमि
त्याह निर्णयसिंधौ प्रचेताः। तांबूलाभ्यंजनं चैव कांस्यपात्रे च भोजनं। यतिश्च ब्रह्मचारी च विधवा च विवर्जयेदिति। अथ पलुषं तदा चार्याधीनं कृत्वा तिष्ठेदहः शेषं आसनादिं कुर्यात्। तेनेयम नू ६
नुप्रवचनीयार्था भिक्षापि दिवसपंचमभागरूपे सायंकालेऽ नतु पूर्वोक्ते तत्र यद्यपि सायंप्रातः
४वा भिक्षमाद ध्यादित्यादिना सामिदाधानं विहितं तथापि सामिधाधानं पूर्वं भैक्षं वेति क्रमान्नियम इति वृत्तिकारः। तत्सायंभिक्षायां लब्ध्वा माचार्यायनिवेद्य तस्मिन्नेहनि सायंकाले यावच्छिष्टं तावंतं कालं तिष्ठेत्। आसनादिं न कुर्यात्। उपनीतिदिने मध्याह्नसंध्यायाः कर्तव्यत्वमाह पारिजाते जैमिनिः। यावद्ब्रह्मोप
देशस्तु तावत्संध्यादिकं न चरेत्। ततो मध्याह्नसंध्यादि सर्वं कर्म समाचरेत्। कृतसंध्यादीकारस्तु म

Indira Gandhi National Centre for the Arts

प्राह्णसंध्यायाः। होजनोत्तरे कर्तेम लापत्ते:। प्राप्य देवीं तुलां विन्नांगुलोऽग्रं वानुशासनात्। संध्या अ॰प्रायश्चि॰
प्रा॰चि॰ प्राह्णसंध्यायाः। ...मध्याह्नसंध्यायाः। यत्तु उपायनेनु कर्तव्यं सा
१०० त्रयं तु कर्तव्यं सायमादि यथाक्रममिति प्रजापतिवचनात् मध्याह्नसंध्यानेघंति। यत्तु उपायने तु कर्तव्यं सा
त्रयं तु कर्तव्यं सायमादि यथाक्रममिति प्रजापतिवचनाच्च मध्याह्नसंध्या नेच्छंति। अनुपाकृतवेदस्य कर्तव्यो ब्रह्मयज्ञकः। वेदस्थाने तु
येसंध्ये उपासनं। आरंभे ह्वनयज्ञं तु मध्याह्ने तु परेहनि। अनुपाकृतवेदस्य कर्तव्यता वचनं तत्पारंतात्पर्यविषयमित्युक्तं प्र
ला॰ सावित्रीग्रहणेतत्समाप्त इति द्वितीयेन्हि सावित्र्याब्रैयज्ञकर्तव्यता वचनं तत्पारंतात्पर्यविषयमित्युक्तं प्र
त्रयोगपारिजाते। उपा॰नयनाग्निस्त्रिरात्रं धार्यः। अहमेतमग्निं धारयंतीं सापस्तंबोक्तेः। बौधायनसूत्रे तु सद्य ५५२
धारणमुक्तं। उपनयनादिरग्निस्तमोपासनमिति बह्वृचपरिशिष्टादिरिसंद्रेनिसोधार्यो नुंतोनिर्मरति। तेना
ला नुप्रवचनीयहोमात्प्राक् त्रिरात्रमध्ये वाग्निनाशे अयाश्चेसे काहुतिः। द्वादशरात्रादर्वाग्गोपास॰ नाग्निनाशे
अयाश्चेसे काहुते रुक्त॰ त्वादेतस्य च तत्तुल्यत्वात्। तेन मेधाजननात्पूर्वमग्निनाशे उपनयनाहुतिभिरग्न्युत्पत्तिं
वदंतो निबंधारा एव सुपेक्ष्याः। अथाग्निकार्यं सायंसंध्यां कृत्वा प्राणानायम्य सायमग्निकार्यं करिष्य इति संकल्प्य परिसमु
ह्य पर्युक्ष्याग्नये समिधमित्यनेन समिधमाधाय पूर्ववत्परिमुखमवमृज्य। मयि मेधामिति षड्भिर्मंत्रैरुपस्थाय। प्रातस्तो
केत्यायुषमिति विभूतिं धृत्वा पुनः परिसमूहनपर्युक्षणे कृत्वा ॐ च म इत्युपतिष्ठेतेति। इदं चाग्निकार्यं संध्याद्वयेऽपि सं व
ध्योत्तरं कार्यं। अग्निकार्यं ततः कुर्यात् संध्ययोरुभयोरपीति पारिजातवचनात्। अशक्तौ सायमेव तथा मदनपारिजाते।
कौगाक्षिः। सायमेवाग्निमिंधीतेत्येके इति। अथानुप्रवचनीयहोमः। आचार्यः देशकालौ स्मृत्वा उपनयनांगमनुप्र १००
वचनीयहोमं करिष्ये इति संकल्प्य अग्निस्थापनाद्याघारांतं कुर्यात्। नात्र चक्षुषी। ऋषिस्य तत्तीयं सो विरहूतं चतु



र्थमिति सूत्रे संख्यावचनस्याग्नि यन्नानुनिष्ठायाज्यभागपरिसंख्यार्थत्वादिति हृदाशयः। कारिकायामपि अन्व
रथो गुरुः कुर्यादाघारांतमतः परं। अत्राज्यभागौ नैवेष्टौ चतुर्थमिति यत्नत इति। अत्र च पूर्णपात्रनिधानांत
मन्वाधानादि पूर्ववत्। विप्राणां भोजनायालं तूष्णीं निर्वाप्य पाचितं। तूष्णीं प्रोक्ष्याबघाताद्विश्रपणांतं करोत्यथ।
आचार्यो मध्यतः स्थालीपाकं त्विति निवेदयेदिति कारिकावचनात्। प्रतिषिद्धधर्मसमवाये भूयसां साधर्म्यं
स्यं वा पूर्ववोढ़्राल्लौकवीदिति न्यायाच्च देवतात्रयस्यापि तूष्णीं निर्वाप प्रोक्षणादय इति पारिजातादयः। पित्र व
वरुणाह्वदेवताद्वयमंत्रेण होमात् स्त्रतूष्णीं निर्वापः। तृतीयेनाममंत्रेणाहोमात् समंत्रकं निर्वापः। तूष्णीं
वीप्यसादि कारिकावचनं त्वाद्यनिर्वापद्वयविषयं। न्यै तावता स्थालीभेदापत्तिः। एकादशिनी सापत्नि वेषम्य स्ये
वस्थालीभेदप्रयोजकत्वे नात्र तद्दृष्टा वात्। तेन विरोध एव मुख्यभूयस्त्वादि विचारेणात्र विरोधाभावात् त्सी
येसमंत्रक एवं निर्वाप इत्याहुः। वस्तुतस्तु आदिष्टमंत्रेषु पाकयज्ञेषु निर्वापप्रोक्षणे तूष्णीं भवत इत्याश्वमुनी
म्प्रकरणे वृत्तिकारलिखनात् तृतीयेपि तूष्णीमेव निर्वाप इति वयं प्रतीमः। भट्टा अप्येवं। अत्र चौवितापयेद्ध अथ५
प्रंथतो ब्रह्मोदनप्रश्न तो ब्रह्मोदनम्भरुः। अनुप्रवचनीयो वै सा चार्य स्तदनं तरमितिशौनकवचनात् भ्रं तो ब्रह्मोदनम्भ
तोऽनुप्रवचनीय इति जयंतलिखनाच्च। वैकल्पिकं प्रैषद्वयं। कारिकायां। चर्वाहुतित्रयं हुत्वा सदसस्पतिमित्यृचा।
तत् सवितुः स्तद्दृषिष्य इति मंत्रतः। कुर्यात् स्विष्टकृदाद्यंते चान्ने नद्विजभोज ...द्विजान् प्रस्तुतं व
तोवेदसमाप्तिं वाचयेद्यति। सदस्पतिमंत्रस्य काण्वो मेधातिथिऋषिः। सदसस्पतिर्देवता गायत्री छंदः।

Indira Gandhi National Centre for the Arts

स्कं ६

उपं प्रव०

कु॰ चि॰ १०१

अभ्यस्यैवं। प्रवरान्ब्राह्मणान्भोजयेदिति पारिजातः। शौनकोपि। शौनकोक्ते शिष्टमंत्रं च ब्राह्मणान्भोजयेद्यथा। युक्त
वद्भिश्च तैर्वेदसमाप्तिं वाचयेदपि। ब्रूयाद्द्विजान्गुरुर्वेदसमाप्तिं वदतेति तान्समाप्तिरस्त्विति ब्रूयुस्तेपि वेदपद
सरमिति। त्रिर्वेदसमाप्तिं ब्रूतेति वदति। ते च वेदसमाप्तिरस्त्विति वदंतीति जयंतः। अथ ब्रह्मचार्याचार्ययोः परिसम
हनपर्युक्षणे कृत्वा समिधमाधाय भैक्षमाहृत्य क्षारलवणवर्जितं त्रिरात्रमश्नातीति। तेन जयंतमते सायंसंध्योत्त
रमादायानुप्रवचनीयहोमस्ततः समिदाधानं। इदमत्र गृह्यं। अस्तमिते ब्रह्मौदनमनुप्रवचनीयं श्रपयित्वाचार्या
यन्निवेदयीताचार्यः। समन्वारब्धे जुहुयात् सदसस्पतिमद्भुतमिति सावित्र्या द्वितीयं यद्वा ऊर्ध्वमनुक्तं स्यादृषि
भ्यस्तृतीयं सौविष्टकृतं चतुर्थं ब्राह्मणान्भोजयित्वा वेदसमाप्तिं वाचयीत। तत ऊर्ध्वमक्षारलवणाशी ब्रह्मचा
र्यधःशायी त्रिरात्रं द्वादशरात्रं संवत्सरं वा चरित्वा व्रताय मेधाजननं करोतीति। अत्र सावित्र्या द्वितीयमित्यु
क्तेः। यद्यदन्यत्कृतं तदभिसर्थः। तेन हि
न्तरार्धं। तेनात्र सावित्री द्वितीया। यद्यप्यात ऊर्ध्वमिति महानाम्न्यादिव्रतेषु यद्यदन्यदुक्तं तदभिसर्थः। उपनिषदे स्वा
तीयं जुहोति तेन महानाम्न्यादिव्रतेषु तत्सावित्र्युरित्संख्याने महानाम्नीभ्यः स्वाहा महाव्रताय स्वाहा उपनिषदे स्वाहेति वै व
रुत्साद्या आहुतय इति वृत्तिकारः। इत्यनुप्रवचनीयहोमः। यदानुप नगर्जादिना अनध्याय संभावनात यदि वैव
चरुं श्रपयेत्। तदुक्तं संग्रहे। न संध्यागर्जिते काले न दृष्टुत्पातदूषिते। ब्रह्मौदनं पचेद्गेहे पक्वं चेन्ननिवर्तते
सहृदयमुपनयनानुप्रवचनीयचरुश्रपणयोरंतरा नध्ययने पुनरुपनयनं कार्यमित्युक्तं। तेन पाकमकृ
त्वा गर्जिते शांतिं कृत्वा पाकः कार्य इति वदंतोऽभ्रांता एव। तेन पाकोत्तर एव गर्जिते शांतिः। पाकात्प्रागेव तु पुन

१०१

स्प५

गर्जेत्तअनध्यायः नादिशाद्दृष्टं नैव स्याद्यदि पदि गर्जेत तदोपनयनं कार्यं वेदारंभं न कारयेदिति॥ तथा चलकः॥ व्रतेन्द्रियं ये संध्यायां वा दिवापि गर्जेति तदि नैव स्यात्

कृ॰ चिं॰ प्रा॰

रूपं नयनमेवेति युक्तं। शांतिस्तु कानिणयसिंधौ। ब्रह्मौदनविधेः पूर्वं प्रदोषे गर्जितं यदि। तदाविघ्नकरं स्ते
यं बटोरध्ययनस्य तत्। तस्य शांतिप्रकारं तु वक्ष्ये शास्त्रानुसारतः। प्रधानं पायसं साज्यं मंत्रं शांतियजो
सवेत्। सूक्तं बृहस्पतेर्विद्वान्पठेत्तावितृद्धये। गायत्री चैवमंत्रः स्यात्प्रायश्चित्तं तु सर्पिषा शतमष्टोत्त
रं धीमान्हवनं कारयेद्बुधः। तेनात्र लौकिकाग्नौ अष्टोत्तरशतसंख्यया साज्येन पायसेन गायत्र्या सवितृत्री
सर्थहोमो व्याहृतिहोमश्चाज्येन। धेनुं सवत्सां कांस्यदोहां दद्यादाचार्याय पयस्विनीं। ब्राह्मणान्भोजयेत्पश्चात्
तो ब्रह्मौदनं चरेत्। कारिकायां। स्नानादि वर्जमश्नीयाद्ब्रह्मचारी दिनत्रयं। शर्ते ताधश्च तुर्थेन्हि मेधाजननमाच न
रेत्। अथ ब्रह्मचारिधर्माः॥ निर्णयसिंधौ मनुः। मेखलामजिनं दंडमुपवीतं च नित्यशः। कौपीनं कटिसूत्रं च
ब्रह्मचारी तु धारयेत्। बृहन्नारदीये। यज्ञोपवीतमजिनं दंडं च द्विजसत्तमाः। नष्टे भ्रष्टे नवं मंत्राद्धृत्वा भ्रष्टं
१० ब्रह्मचारी तु धारयेत्। बृहन्नारदीये। यज्ञोपवीतमजिनं दंडं च द्विजसत्तमाः। अधःशय्यां गुरोर्हितं कुर्यादिति शेषः। याज्ञवल्क्यः। मधुमांसांजनो
च्छिष्टशुक्तस्त्री प्राणिहिंसनं। भास्करालोकनाश्लीलपरिवादादि वर्जयेत्। मनुः। अभ्यंगमंजनं चाक्ष्णोरु
पानच्छत्रधारणं। वर्जयेदिति शेषः। कौर्मे। नादर्शं चैव वीक्षेत नाचरेद्दंतधावनं। गुरुच्छिष्टं भेषजार्थं प्र
युंजीत न कामतः। एतन्निषिद्धमध्वादिविषयं। अभ्यस्य गुरुच्छिष्टस्य सर्वदा अप्राप्तेरिति पितृचरणाः। सचेद्व्याधी
पीत कामं गुरोरुच्छिष्टं प्राश्नीयादिति वसिष्ठोक्तेः। एवं ज्येष्ठभ्रातुरपि। पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोज्यमेव हि
आपस्तंबोक्ते। ऋग्विधाने। तं वोधियाजपेन्मंत्रं लक्षं चैव शिवालये ब्रह्मचारी स्वधर्मेषु न्यूनं चेत्पूर्णमेति
अकालवर्षे तु प्रोक्तं पौषामास चतुष्टयं। दोषो स्यान्महान् व्याप्त्योदोषो ल्पवर्षणे॥१॥ न दोषो वृष्टिजः स्नाव यावद्भूने पदांकिता॥ आकालवर्षणे
जाते ब्रूयेस्यावश्यके त्यजेत्॥२॥ अहं पौषे च द्वयहं माघे दिनमेकं तु फाल्गुने चैत्रे घटिद्वयं दोषो नायं गर्ज समुद्भवैरिति॥ मुहूर्तगणपतौ मोति
निर्णये॥ तथा गर्जितोदके॥

Indira Gandhi National
Centre for the Arts

ततु॥अथमेधाजननं॥पारिजातेसंग्रहे।वेदग्रहणसामर्थ्ययुक्तामेधातुजायतेयेनतन्मेधाजननंकर्म्म मेधाजन॰
प्र॰वि॰ त॥अथमेधाजननं॥पारिजातेसंग्रहे।वेदग्रहणसामर्थ्ययुक्तामेधासाविद्यासिद्धि
परिशति स्वयं।आश्वलायनः।यासावित्रीजगद्धात्रीसैवमेधास्वरूपिणी।मेधाप्रसिद्ध्येरूपाविद्यासिद्धि
१०२ मौनीमुपैतेति।तेनात्रास्यबटोरुपनयनसमाप्तिवेदग्रहणसामर्थ्यलक्षणमेधासिद्ध्यर्थंमेधाजननाख्यं
कर्मकरिष्य इति संकल्प्य इति सद्वृत्ताः।अत्र च।ततः सम्मंगलैर्दीपैः पूर्णकुंभादिभिर्युतः।प्रापयेद्गृहमाचा
र्यः पुण्याहं वाचयेत्तथेति शौनकवचनात्तन्मे पुण्याहवाचनं कुर्यादितिसद्वृत्ताः।वस्तुतस्तु मेधाजनने
तै५ र्यः पुण्याहं वाचयेत्तथेतिशौनकवचनात्तन्मेपुण्याहवाचनंतेनात्रगणपतिसंपूज्यमे
रंगृहमागत्यपुण्याहंवाचयेदितिसेतत।परंधौनकीयं।नादौपुण्याहवाचनंतेनात्रगणपतिसंपूज्यमे
धापरनामकसावित्रीपूजनंपलाशेकुशस्तंबेवाकुर्यात।इदमत्रगृह्यं।अनिंदितायांदिश्येकंमूलंप
लाशंकुशस्तंबंवापलाशापचारेप्रदक्षिणमुदकुंभंत्रिः परिषिंचंतंवाचयति।सुश्रवःसुश्रवाइत्यास
मिति।दक्षिणाआग्नेयीनैर्ऋतीचनिंदिताअन्याः।अनिंदिताइतिवृत्तिः।एकमूलं।एकशाखापलाशापचारइति
पुनःपलाशग्रहणमेकमूलपलाशशाखाभावेकुशाअनेकमूलस्थापितस्यप्राप्त्यर्थं।तदभावेकुशस्तंबः।तदसंभ
वेस्वगृहेदेशानेसर्वतोद्वादशांगुलांत्रिमेखलांवेदिंकृत्वातत्रसपत्रांपलाशशाखांकुशस्तंबंवाप्रतिष्ठाप्य
पूजयेदाश्वलायनः।कुर्यात्त्रिमेखलांवेदिंसर्वतोद्वादशांगुलं।शुचौप्रागुत्तरेभागेतस्यांमेधांसमर्चयेत॥
पलाशशाखांतन्मध्येपत्रांकुरसमन्वितां।आर्द्रांवाथकुशस्तंबंसमूलंस्थापयेद्गुरुः।मेधामावा १०२
ह्यमतिमान्मेधायैनमइत्यथ।गंधपुष्पाक्षतैःसम्यक्धूपदीपादिभिःद्विजः।निवेदयेदन्नंसक्तुमिश्रंस

ती
क्षीरवकं।समोदकंनिवेद्यान्नंपुनश्चास्यार्चयेत्पूर्ववत।अत्रान्नशब्देनोदनः।सक्तुमेवान्नमितिकौस्तुभः।तेनोदनस
हितंसक्तुमोदकादिनिवेदयेत।प्रणम्यतस्यैमेधायैत्रीन्निःसार्यजलं।उक्त्वरनशुभावोमंत्रंजलंदद्यात
दक्षिणां।संस्थाप्यतांनमस्कृत्यतथाकुर्यात्पुनःपुनः।तेनप्रतिपर्यायंनमस्कारः।एवंत्रिवारमावर्त्यदंडाजि
नकमंडलून्।मेधाभिक्षिप्यवैस्नात्वावाससीचापिनिक्षिपेत।मेखलांचोपवीतंचबध्वात्वान्यानिविनिक्षिपे
त।अनेनक्रमोपिसिद्धः।स्नानाशक्तौमंत्रस्नानंवाकुर्यात।कारिकायामपि।तत्रैवमेखलादीनिगुरुस्तान्या
निधारयेदिति।तथावाससीतेस्वगुरवेमेधाजननकर्मणिदद्यात।ततप्रभृत्येवकौपीनेनप्रवर्तयेत।पुण्य
हवाचनंकृत्वाब्राह्मणांश्चापिभोजयेदिति।तेनतदंतेपुण्याहंस्वस्तिऋद्धिश्रीरित्यादिवदेत।तमावहतिसामेधा
मेधाजननकर्मणांतंकृत्वेमंप्रयत्नेनब्रतस्यचसमापयइति॥अत्रप्रयोगरत्नेमेधामह्यमितिसप्तर्चलिखि न
ता।तसाद्देमूलंचिंत्यं।अत्रपंचनारायणानिदद्यादिसाचारप्राप्तं॥अथास्मत्कृतःसंक्षेपोपनयप्रयोगः।कौ
तीकामचारकामवादकामभक्षणादिदोषपरिहारार्थंबहुनाकौरयिलांकृच्छ्रत्रयं।स्वस्योपनयनेअधिकार
सिद्ध्यर्थंकृच्छ्रत्रयंकृत्वा।तथाअग्निःशुचिव्रततमइत्यादिमंत्रपुरःसरंद्वादशाधिकसहस्रंगायत्रीजपं
वाकृत्वा।देशकालौस्मृत्वाऽस्यकुमारस्यबीजगर्भसमुद्भवैनोनिबर्हणद्वाराबलायुर्वर्चोभिवृद्ध्य
र्थंचौलकर्म।तथाद्विजत्वसिद्ध्यावेदाध्ययनाधिकारार्थंउपनयनंचकरिष्ये।तदंगत्वेनगणपतिपू
जनंस्वस्तिपुण्याहवाचनंनांदीश्राद्धमुपनयनांगंनंदिन्यादिमंडपदेवतास्थापनंचकृत्वाउपनयनादि

Indira Gandhi National
Centre for the Arts

श्री चौलोप नयनप्रयो

प्र०चि० १०३ नेलौ। चौ कर्मांगस्थंडिलादिसंस्थाग्नि प्रतिष्ठांतेन्वाधानेआघारांतमुक्त्वा त्रिरग्निंपवमानंप्रजापतिंचाज्ये
नरोषेणाग्निं एकतमित्यादिप्रणितांप्रणयनोत्तरं उत्तरतो व्रीहियवमाषतिलानांपृथक् पूर्णानिशरा
वाणिनिधाय॥ आघारांते। अग्नआयूंषीतिसूक्तांशतंवैखानसा ऋषयः अग्निः पवमानोदेवता
गायत्री छंदः। चौ कर्मप्रधानाज्यहोमेविनि० अग्नआयूंषि० स्वाहा० अग्नयेपवमानायेदं० एवमग्नेपिब
गित्रीऋषिः। अग्नेपवस्वस्वपा। प्रजापतेहिरण्यगर्भः प्रजापतिस्त्रिष्टुप् होमे० इतिहुत्वा उष्णेनवायउ
दकेनेहीतिशीतोष्णाअपएकीकृत्य तदेकदेशेन नवनीतंदधिद्रप्सं वालोऽप्य मातुरंकस्थस्यबटोः वाम
कर्णादि अदितिः केशान्वपत्वाप उंदंतुवर्चसइतितिस्रः शिरः केशान् संसिच्य एकविंशति कुशपिंजूलमध्ये त्री
णि दक्षिण कर्णपरिपश्चिमाग्राणि० ओषधेत्रायस्वैनमितिनिधाय। स्वधितेमैनं हिंसीः क्षुरंनिधाय० ओं
येनावपत्सविताक्षुरेणसोमस्यराज्ञोवरुणस्यविद्वान्० तेनब्रह्माणोवपतेदमस्यायुष्मान्जरदष्टिर्य
थासत्। इतिप्रच्छिद्य प्रागग्रान् शमीपर्णैः सह मात्रे प्रयच्छति तानानडुहे गोमयेनिदधाति। छेदनत्वादप
उपस्पृशेत्। एवं द्वितीये। ओषधेत्रायस्वैनमित्यादि० येनधाताबृहस्पतेरग्नेरिंद्रस्यचायुषेवपत्।
तेनतआयुषेवपामिसुश्लोक्याय स्वस्तये। तृतीये। येनभूयश्चरात्र्यांज्योक्चपश्याति सूर्यं० तेनतआ
युषे। इतिछेदः। चतुर्थे। येनावपत्। येनधाता। येनभूयश्चेति। सर्वैः छेदः। एवमुत्तरकर्णेमपिच
ओषधेइत्यादि।=२

तुर्थयजुर्भिः कृत्वा मात्राजलेस्पर्शः। यत्क्षुरेणमर्चयतासुपेशसावप्तावपसिकेशान्। शुंधिशिरोमास्य
युः प्रमोषीरिति उपरि प्राश्याधः क्षुरंनिमज्य शीतोष्णाभिरद्भिरर्थं कुर्वाणो क्षणवन् कुशलीकुर्वीति
नापितंशिष्यात्। प्रवरसंख्यया शिखारक्षित्वा शिखादिवपेत्। ततः बटुः स्नाने कृते स्विष्टकृदादि समा
पयेत्। दशविप्राभोज्याः। इतिलौचौ। अथभोजितं। ततः उपनयनप्रा आंगभूतं वपनं करिष्य इतिवापितं
स्नापितंच कुमारं। श्लक्ष्णकेशिवादयित्वा कुमारोप्य। येपतेनेत्यादि पंचवर्गो राशिषोगृहीत्वा। आचम्य
प्राणानायम्य देशकालौ स्मृत्वास्य कुमारस्य द्विजत्वसिध्यावेदाध्ययनाधिकारार्थं उपनयनहोमं करि
ष्ये। तदंगतयास्थंडिलोल्लेखनादि आज्यभागवर्जमन्वाधानं कृत्वा। आज्यसंस्कारांते बटोः सूत्रं क
टिदेशे बध्वा दीर्घतमाभित्रावरुणौ त्रिष्टुप्। वासोधारणे। त्र
त्तदबध्यको पीनंतू ष्णीं परिधाप्य। युवंवस्त्राणीति सो बध्यो दीर्घतमामित्रावरुणौ बलीयस्ते
वि० तेनैवमंत्रेण वासः परिधाप्य। मित्रस्यचक्षुर्यामरेवो जिनंत्रिष्टुप्। मित्रस्यचक्षुर्धरूणंबलीयस्तेजोयशस्वीस्थविरंसमिद्धं। अनाहनस्यंवसनंजरिष्णुपरीदंवाज्यजिनं दधेहमिति। इतिअजिनंपरिधाप्य
ष्य। यज्ञोपवीतं परब्रह्मपरमात्मा त्रिष्टुप्। इति यज्ञोपवीतं परिधाप्य। कुमारभोजनं मनेनश्चमज्येउप
नीत्वा विधिवदाचमय्य। तीर्थ प्रवेशं कारयित्वा आज्यं यज्ञपात्राणि वासापुनस्तथैवानीय दक्षिणतउपवेश्य
बर्हिस्तरणाद्याघारांते। अग्नआयूंषि स्वाहेत्यादि कौलवद्भुत्वा तथैव कुमारमुद्दनीत्वा। कुमारस्यगायत्र्युपदे
शाभ्यां चित्वसिद्धये कुमारांजलावक्षारणं करिष्य इत्युक्त्वा तस्यांजलिमुदकेनापूर्य स्वांजलिमप्येनपूरयि

स्व

प्र·वि ७७ त्वा। तत्सवितुः श्यावाश्वः सवितानुष्टुप् अवक्षारणे विनि०। इति कुमारं जलाववक्षार्य। देवस्य त्वा। हस्ताभ्यां हस्तं गृह्णा उपन·प्र·
मुकशर्मन्निति नाम्नः त्रनामग्रहणपूर्वं बटोर्दक्षिणं सांगुष्ठमुत्तानं हस्तं गृहीत्वा। तत्सवितुर्वृणीमह इति पुनरवक्ष
अमुकशर्मन्निति नाम्न त्र नामग्रहणपूर्वं बटोर्दक्षिणं सांगुष्ठमुत्तानं हस्तं गृहीत्वा। तत्सवितुर्वृणीमह इति पुनरवक्ष
र्य। सविता ते हस्तमग्रभीदिति हस्तं गृहीत्वा। पुनस्तथैवावक्षार्य। अग्निराचार्यस्तवामुकशर्मन्निति हस्तं गृहीत्वा। आ
दित्यमीक्षेत्। देव सवितरेष ते ब्रह्मचारी तं गोपाय स मा मृत तेसिद्ध तामंपतये आदित्याय बटुं समर्प्य। बटुं स्वाभिमुखं
कृत्वा। कस्य ब्रह्मचार्यसि प्राणस्य ब्रह्मचार्यसि। कस्त्वा कमुपनयते काय त्वा परिददामीति। प्रजापतये बटुं समर्प्य।
युवा सुवासा इत्यस्य गाथि विश्वामित्रो यूपस्त्रिष्टुप्। पूर्वार्धर्चस्य प्रदक्षिणावर्तने उत्तरार्द्धर्चस्य पाणिभ्यां बटुहृदयालं
भने विनियोगः। युवा सुवासा इत्यर्धेन बटुं प्रदक्षिणमावर्त्य। तं धीरास इति पाणिभ्यां तद्धृदयं स्पृष्ट्वा तथैव दक्षि
णोगत्वा। अग्नये समिधं हिरण्यगर्भो निस्त्रिष्टुप्। समिदाधाने विनि०। अग्नये इदं। तेजसा मा समनज्मीति त्रिमुं
खं निमृज्योपधाय। हृदयसंमितौ पाणी कृत्वा। मयि मेधामिति षण्णां हिरण्यगर्भ ऋषिः। पूर्वेषां त्रयाणां अग्नीन्द्र
सूर्या देवताः। उत्तरत्रयाणां मन्त्रिर्देवता। गायत्री छंदः अग्न्युपस्थाने वि०। इत्युपस्थाय। मानस्तोके कुत्सो रुद्रो ज
गती। इति विभूतिं धृत्वा। त्र्यायुषं जमदग्नेः ललाटे [illegible] कश्यपस्य। त्र्यायुषं कंठे। अगस्त्यस्य त्र्या० नाभौ। यद्देवानां त्र्या
युषं दक्षिणांसे। तन्मे अस्तु त्र्या० वामांसे। शतायुषं शिरसि ॐ नमः इति कर्णौ स्पृष्ट्वा। अमुकप्रवरान्वितः अमु
कशर्मा अहं भो अग्ने अभिवादये इत्यग्निमुपस्थाय। अग्नेरुत्तरतः दक्षिणं जानुं दक्षिणहस्तेन। सव्यं वसव्यहस्तेन ७०
नानुप्रभृतिपादपर्यंतं स्पृष्ट्वा अमुकगोत्रोमुकशर्मा अहं भो अभिवादये इति शिरो वनतिपूर्वमभिवाद्याचा

पा०।४

र्येणायुष्मान्भव सौम्य देवदत्तशर्मन्निति प्रयुक्ताशीर्वादो भवेत्। ततः आधीहि भोः सावित्रीं भो अनुब्रूहि
तिवदेत्। ततः तंडुलपूर्णे पात्रे गायत्रीं लिखेद्वित्याचारः। ततः वामपाणिमधः कृत्वा दक्षिणं चोपरीन्यमुखी
कृत्य पाणिद्वयमंगुलीभ्यां गुष्ठे च हृष्टि कृत्य कृतं ब्रह्मांजलिं दक्षिणांके निक्षिप्याचार्याभिमुख आसीत। अथाचा
र्यस्य परिहतवाससा पाणिभ्यां चोसंगृह्य प्रणवमाहृतिपूर्वं सावित्रीं प्रथमं पादशः सर्वो स्वयमुक्त्वा तथैव वा
त४ चयेत्। एवं द्वितीये अर्द्धशः। सर्वो स्वयमुक्त्वा तथैव वाचयेत्। तृतीये सर्वो स्वयमुक्त्वा तथैव वाचयेत्। यथाप्र
णवस्य परब्रह्म ऋषिः परमात्मा देवता देवी गायत्री छंदः समस्त व्याहृति मंत्रस्य प्रजापति ऋषिः प्रजापतिर्दे
वता बृहती छंदः। गायत्र्या विश्वामित्रः सविता गायत्री। गायत्र्युपदेशे वि० इति पच्छोर्धर्चशः सर्वा गायत्रीं वाचयि
त्वा। मम व्रते विश्वेदेवा बृहस्पतिस्त्रिष्टुप्। मम व्रते हृदयं ते दधामि मम चित्तमनुचित्तं ते अस्तु मम वाचमे
कव्रतो जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यमिति बटुहृदये ऊर्ध्वांगुलिं पाणिं निधाय। इयं दुरुक्तादिति
वामदेवो मेखला त्रिष्टुप्। इयं दुरुक्तात्परिबाधमाना शर्मवरूथं पुनती न आगात्। प्राणापानाभ्यां बल
माभरंती प्रिया देवानां सुभगा मेखलेयं ऋतस्य गोप्त्री तपसः परस्पी घ्नती रक्षः सहमाना अरातीः। सा नः
समंतमनुपरीहि भद्रया भर्तारस्ते मेखले मा रिषामेति नाभिदेशे मेखलां त्रिबध्वा सरहस्यांगसहितवेदत्र
येणाधृतो हमिति मन्येत। स्वस्ति न स्वस्त्या त्रेयो विश्वेदेवा अनुष्टुप्। इति दंडप्रदाय। अदोते दमयित्वा मां मार्गे
संस्थापयैवं यं। दंडः करेस्थितो यस्मात्तस्माद्रक्षन्तो भयमिति गृहीते ब्रह्मचर्यमादिशेत्। ब्रह्मचार्यस्यपोशान

Indira Gandhi National
Centre for the Arts

आ-[illegible]यस्यति रूपेणाप्याह। मेसंल[illegible]दिवापत्स्थालीपाकं निरूप्यच। [illegible]वादिजान्भोजयित्वा [illegible]सिया[illegible]स्त
य॥ प्रथमा गपोतंबन्धनं १ दिनात

प्र०चि०
१०८

नकर्मकुरु। दिवामास्वाप्सीः। आचार्याधीनो वेदमधीष्व द्वादशवर्षाणि वेदब्रह्मचर्यं गृहाणं तं वा। सायंप्रातर्भिक्षेतान्नस्य मेधाज०
यं प्रातः समिधमाधेहि। यथाविधि ब्रह्मचर्यं चर० ततः स्विष्टकृदादिशेषं समाप्याग्निं रक्षेत। ततः नीराजनं[illegible]
दत्वा। सायं भवती भिक्षां ददात्विति मातरं वा त्रिभिक्षेत। क्षौमे तंडुलान्निधाय अहःशेषं स्थित्वा सायंसंध्या
ग्निकार्यं कृत्वाचार्यः देशकालौ स्मृत्वोपनयनांगमनुप्रवचनीयहोमं करिष्ये तदंगत्वाधानमाचारान्ते। सदसस्पतिं सवि
तारं ऋषींश्च क्रमेणाज्येन स्विष्टकृतमित्यादि प्रणीताप्रणयनांते देवतात्रयपित्रूणीनिर्वापादिना चरुं कृत्वाज्यतः
स्थालीपाक इति बहुनोक्ते आचारान्ते स्रुवमवदाय० सदसस्पतिर्मेधातिथिः सदसस्पतिर्गायत्री। अनुप्रवचनी
यप्रधानचरुहोमे वि०। सदसस्पतये इदं०। सावित्र्या द्वितीयां ऋषिभ्यः स्वाहेति हुत्वा स्विष्टकृदादिशेषं समाप्य
हविःशेषेण ब्राह्मणान्भोजयित्वा। अस्य वर्षे वेदसमाप्तिरस्त्विति एवं तान्ब्रुवंत्विति। त्रिवेदसमाप्तिं वाचयीत। गौ
अथाचार्यश्चतुर्थे ह्नि देशकालौ स्मृत्वास्य बटोरुपनयनसमाप्ति वेदग्रहणलक्षणसामर्थ्यरूपमेधाभिवृध्य
र्थं मेधाजननाख्यं कर्म करिष्य इति संकल्प्य। गणेशं संपूज्य। पलाशवृक्षे। गत्वा सवेतो द्वादशांगुला त्रिमेख
ला वेदिं कृत्वा तत्र पलाशशाखां कुशस्तंबं वा प्रतिष्ठाप्य गायत्र्या षोडशोपचारैर्मेधापरनाम कां सावित्रीं संपू
ज्य। यावकसक्तु मोदकमिश्रमन्ने वायसान्निवेदनिते धसंपूज्य। जलधारां सिंच तं बटुं त्रिर्वाचयेत्। ॐ सु
श्रवः सुश्रवा असि यथा त्वं सुश्रवः सुश्रवा अस्येवं मां सुश्रवः सौश्रवसं कुरु। यथा त्वं देवानां यज्ञस्य नि
धिपोस्येवमहं मनुष्याणां वेदस्य निधिपो भूयासं। ततः मेखलाजिनोपवीतदंडान्नवान् मंत्रेणापयित्वा जी १०८

धा२

र्णानि विसर्जयेत्। ततः मेधासूक्तं विप्रैः पाठयेत्। ॐ मेधां मह्यमंगिरसो मेधां सप्तर्षयो ददुः। मेधामिंद्रश्चाग्निश्च मेधां
धाता ददातु मे। मेधां मे वरुणो राजा मेधां देवी सरस्वती मेधां मे अश्विनौ देवावाधत्तां पुष्करस्रजा। या मेधा अप्सरस्सु गंध
र्वेषु च यन्मनः। दैवी या मानुषी मेधा सा मामाविशतादिमां। यन्मे नोक्तं तद्रमतां शकेयं यदनुब्रुवे। निशामितं निशाम
ये मयि संतं सह श्रीयेण भूयासं ब्रह्मणा संगमेमहि। शरीरं मे विचक्षणं वाङ्मे मधुमद्दुहा। अवधमहमसौ सू
र्यो ब्रह्मण आणिस्थः श्रुतं मे माप्रहासीः। मेधां देवीं मनसा रेजमानां गंधर्वजुष्टां प्रति नो जुषस्व। मह्यं मेधां वद
मह्यं श्रियं वद मेधावी भूयासमजराजरिष्णुः। सदसस्पतिमद्भुतं प्रियमिंद्रस्य काम्यं। सनिं मेधामयासिषं।
यां मेधां देवगणाः पितरश्च उपासते। तया मा[illegible]मेधयाग्ने मेधाविनं कुरु। मेध[illegible] सुमनाः सुप्रतीक
श्रद्धामयाः सत्यमुच सुश्रवः। महायथाधारयिष्णुः प्रव[illegible]यासमर्थयेस्व भयाप्रयोगे। ततः। वायसानिदत्वा
देवको स्थापनादिनं कुर्यात्॥ इति सचौलोपनयनप्रयोगः॥ अथात्र ब्रह्मचारीविषये किंचिदुच्यते। व्यासः। ब्रा
ह्मणक्षत्रियविशश्चरेयुर्भैक्ष्यमन्वहं। सजातीयगृहेष्वेव सार्ववर्णिकमेव वा। सार्ववर्णिकमापद्विषयं। तत्रा
पि शूद्रस्यान्नमेव वर्जयेत्। यस्तु वेदमधीयानः शूद्रान्नमुपजीवति। शूद्रो वेदफलं याति द्विजः शूद्रत्व
मृच्छति। तथा शूद्रान्नेनोदरस्थेन ब्राह्मणो म्रियते यदि। त्रिकालं तो[illegible]धर्मे तोय षडंगवित्। चतुर्वेद्या
पियो विप्रः स प्रेतो जायते नरः। तथा गुरोः कुले न भिक्षेत न ज्ञातिकुलबंधुषु। अलाभे चान्यगेहानां पूर्वं पूर्वं
समाश्रयेत्। तथा। माधुकरीं च आदाय ब्राह्मणेभ्यः प्रयच्छति। संपाति नरकं घोरं भोक्ता भुंजीत किल्बिषं॥

प्रयोगपारिजाते। प्रमादादथ वा स्वप्ने निसर्गे रेतसो द्विजः। व्रती शुध्यति कृच्छ्रेण त्रिरात्रैर्विप्रजोतु ब्रह्मचार्येपि यः सुतः। सव्रतश्चापि कुर्वन्तर्ग्निपिंडोदकक्रियां।
तेनाशौचं न कर्तव्यं संध्या चैव न लुप्यते। अग्निकार्यं च कर्तव्यं सायंप्रातश्च नित्यशः इति। ८

मातापित्रो

Indira Gandhi National
Centre for the Arts

ने–



मेधातक

तस्मान्नैवाहरेद्भैक्षमतिरिक्तं कदाचनेति। मनुः। भैक्षेण वर्तयेन्नित्यमेकान्नाशी भवेद्व्रती। भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता। मनुः। निसंभ्युक्षः काल्हस्तः पण्यपश्च प्रसारितं। ब्रह्मचारी गतं भैक्ष्यं निसमे धमितिस्थितिः। हारीतः। भैक्षमेवाहितं पर्यग्निकृतमादित्य दर्शितं गुरवे निवेदितं। भक्ष्यं भक्ष्यवतीति। तं[illegible] कांस्यपात्रे भुक्तं प्राक्। तथा। अग्निकार्यविशेषः कारिकायामुक्तः। अग्निकार्यं चसि[illegible]णाः प्रागग्रैर्दर्भैरग्निं परिस्तीर्य स्थंडिलं संमृज्य प्रोक्ष्याद्भिस्ताप ईशानादि परिषिच्यते। पर्युक्षणे क्षणोक्त्या तामाघारं तेन कर्मणाः। मनुः। दूराद्धृत्य समिधः संनिदध्याद्विहायसि। सायं प्रातश्च जुहुयात्ताभिरग्निमतंद्रितः। बैजवापः। पुरस्तान्मध्यात प्राग्भुदीचीं दिशां वा समिधमाहरेदाद्रां मन्नाद्य[illegible]कामः शुष्कां ब्रह्मवर्चसकामः। उभयामुभयकाम इति। कात्यायनः। नांगुष्ठादधिका कार्या समित्स्थूलतमा क्वचित्। प्रादेशान्नाधिका ग्राह्या न विशुष्का त्वचा तथा। हारीतः। पुरानत्र स्तोके मानस्तोके ग्राह्येमसुहिंसायां ब्रह्मचारि[illegible]णां। अग्निस्त्वंमोचयामास तस्मात्सरिचरेत्कृतं। ऋग्विधाने। मानस्तोकेमि जपेन्मंत्रं शतसंख्यं शिवालये। अग्निकार्यविनाशकृत्तेन पापं ब्रह्मचारिण इति। तथाभिवादने विशेषः पारिजाते दर्शितः। यमः। ततो भिवादयेद्वृद्धान्नग्निकार्यादनंतरमिति स्मृत्यार्थसारे पापक्षये पतितं नाभिवादयेत्। ग्रासं तथा नक्षत्रजीविनं। अभ्यक्तशिरसं चैव जपंतं नाभिवादयेत्। तथा स्नानं प्रकुर्वंतं नाभिवादयेत्। तथा तत्रैव। सभायां च तथा लायां देवतायतनेष्वपि। प्रत्येकं तु नमस्कारो हंति पुण्यं पुराकृतमिति। विष्णुः। गुणामभिवादनं। आश्वलायनः। वामं वामेन संस्पृश्य दक्षिणेन तु दक्षिणे। हस्तेन कर्णौ हस्ताभ्यां गुरूणामभिवादनं। १०६

= समित्पुष्पकरं तथा। उदपात्रधरं चैव भुंजं तं नाभिवादयेत्। आहुवंतं तथा दानं देवताभ्यर्चनं तथा। यज्ञं च तर्पणं चैव कुर्वंतं

---

तथा

८ शिखासूत्रपरित्यागी विश्वगामी तथैव च। शूद्रपक्वान्नभोजी च पुनः संस्कारमर्हति। वेदानां च परित्यागी वेदारक्षणो[illegible] पतिग्राही पुनः

लोकिष्याणामाशिषं दद्यात्पादोषग्रहणं गुरोः। स्पृष्ट्वा कर्णौ तु विदुषां मूर्खाणां त्वेकपाणिना। मनुः। लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च। यः प्रयुक्ते तु विज्ञानं तं पूर्वमभिवादयेत्। भविष्ये। अभिवादनशीलस्य देवते यस्तु न करोत्यभिवादनं। आशिषं यान्न कुर्वीत स याति नरकं ध्रुवं। मनुः। अभिवादनशीलस्य नित्यं वृद्धोपसेविनः। चत्वारि तस्य वर्धंते आयुः प्रज्ञा यशो बलं। ब्रह्मचारी धर्मलोपे प्रायश्चित्तमुक्तं तेनैव विधाने। तेनैव भिया जपेन्मंत्रं लक्षं चैव शिवालये। ब्रह्मचारी स्वधर्मेषु न्यूनं चेत्स एव तदिति। ते ऋग्विधाने। तेनैवाभिया जपेन्मंत्रं लक्षं चैव शिवालये। ब्रह्मचारी स्वधर्मेषु न्यूनं चेत्स एव तदिति। एतच्चैकं वेदमधीते प्रायश्चित्तं कृत्वा समावर्तनं कार्यं। इति ब्रह्मचारी धर्माः॥ अथ पुनरुपनयनं। एतच्चैकं वेदमधीत्य दृष्टा सर्वेषां तत्राध्ययने। अज्ञानाद्धिरण्य मद्यादि भक्षणे निषिद्धे लशुनगृंजनादि भक्षणे प्रतिषिद्धे शाकैः मनादौ च निमित्ते भवति। तदं च गामामाहुर्हि। प्राच्यामुदीच्यां वा यत्र ग्राम्यपशुपाद्धौ नकृतेन त्र कार्यमिति। मद्यनरलोत्सपणं भविष्ये। अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च। पुनःसंस्कारमर्हति खरोष्ट्रमानुषीक्षीरभोजने पुनरुपनयनं तथा प्रेत तथा प्याप्रतिग्राही पुनः संस्कारमर्हति। अत्र[illegible] ब्रह्मांउभृत्समि हेमाद्रौ। तथा सयमुखीचोरा कांचनीं मेदिनीं द्विजः। अत्र पुनरुपनयनं। अत्र केनकु[illegible]चिदिति वचनाद्भूमिदानप्रशंसोक्तं संपूर्णसुवर्णपृथिवी प्रतिग्रदानं च गतां ह्येते केनकु[illegible]चिदिति वचनाद्भूमिदानप्रशं विप्रः पुरुषपुनरुपनयनमिति हेमाद्रौ स्पष्टं। तारावंद्रानुकूलेषु गृहादिषु शुभेष्वपि पुनर्वसौ कृतो विप्रः पु

तथा ५

मेधाजन

नःसंस्कारमर्हति। तथा। विनष्टैर्नावसं तेन कृच्छ्रपक्षेण गलग्रहे। अपराह्णे चोपनीतः पुनःसंस्कारमर्ह
प्र॰वि॰ १०६ ति। वसिष्ठः। पापांश कृगते चंद्रे अश्विनी चस्थितेपि च। अनध्याये चोपनीतः पुनः संस्कारमर्हति। तथा।
तीर्थयात्रां विना सिंधुसौवीर सौराष्ट्रादि देशगमने कर्मनाशाजलस्पर्शे करतोयाविलंघनादौ वेदपर
एप॥ रेतोमूत्रकरनि – मेथित। दधिबहिर्वेदि पुरोगशानामज्यंतष्या सेत्कृच्छ्रःपुनरूपनयनमिति
तथा। ब्रह्मचारिणः। मातृपि तृगुर्वाचार्य व्यतिरिक्तानामंत्यकर्मकरणे पुनरूपनयनमित्यादिनिर्णयसिं
धौक्षुण्णं। कारिकायां। वेदांतरमधीत्यैव ऋग्वेदं येत्वधीयते। उपनीतिरियं तेषामलंकरणवर्जिता। येद्वतदुपनीतस्य।
२० प्रायश्चित्तं यदाश्च वेद। कृताकृतं च वपनं मेधाजननमेव च। मेधाजननसद्भावे व्रतचर्याश्च वेदिह। अनुप्रवचनीयश्च व्रत
दक्षावेद्यं नहि। परिदानं न कार्यं स्यान्निमित्तानंतरं त्विदं। पूर्वस्या वाचयेत्स्थाने तत्सवितुर्वृणीमहे। भणितोत्र विशेषोयं
समानमितरद्भवेत्। तेन मेधाजननस्य कृतमपक्षाश्रयणेन्न लोदनेः त्रिरात्रादिव्रतानि च भवंति। अन्यथा नप्र
त्रिवेदमुपनयनं व तत्तद्दशारवया कार्यमित्युक्तं प्राणके। अन्ये तु सर्वेष्वेव देश्यः सावित्र्यनूक्तमतइति वचनात्रिष्य
एवतु वेदेश्यः पादंपादमद्भुदुहदिति वचनांतराच्च प्रतिवेदं नोपनयनमित्याहुः। अस्मिंश्च पुनरूपनयने निमित्तानंतरं
हमिति कारिकावचनान्निमित्तानंतरं क्रियमाणत्वकालनियमः। निमित्तानंतर्यापत्तावेतु जातेष्वित्वस्व कालएवोक्तरायणा
दौ कर्तव्यमिति सिंधौ पितृचरणाः तथा भणितोत्र विशेषोयमिति कारिकावचने अत्रेति निर्देशात्पुनरूपनयेयंमाम्य
त्री। तेन ब्रह्मणस्यत्जपादौ निषेधगायत्री। इदमत्र गृह्यं। अथोपेतपूर्वस्य कृताकृतं केशावपनं मेधाजननं चापरिकर्म १०७

परिदानं कालश्च। तत्सवितुर्वृणीमह इति सावित्रीमिति। पराशरः। वपनं मेखलादंडौ भैक्षचर्यो व्रतानि च। निवर्त्त
ते द्विजातीनां पुनः संस्कारकर्मणि। अस्मिंश्च पुनरूपनयने स्वस्तिवचनं नांदीश्राद्धाद्यपि कार्यमिति केचित्। अन्ये त
स्य प्रायश्चित्तत्वेन यावदुक्तेति कृतमतान्याहितानि न कार्यमित्याहुः। अथ पुनरूपनयनप्रयोगः। देशकालौ संकी
र्त्यास्य ब्रह्मचारिणः वेदांतराध्ययनाधिकारार्थं यद्वा निषिद्धदेशादिगमनसूचितप्रसवायपरिहारार्थं पुनरूप
नयनं करिष्य इति संकल्प्यास्थंडिलाद्यग्निप्रतिष्ठांते त्रिरग्निं पवमानं प्रजापतिं चैषेव माज्यभागवर्ज्यमन्वाधानं।
कृत्वा आज्यसंस्कारांते बटोः सूत्रं कृतावाबध्य कौपीनं वस्त्रं वा परिधाप्य। युवं वस्त्राणीति मंत्रेणैकं वासः परिधाप्य
तेनैव मंत्रेण द्वितीयं प्रावरयेत्। नात्राजिनं। ततोयज्ञोपवीतमिति मंत्रेण यज्ञोपवीतं परिधाप्य कुमारमंत्रमंत्रेण
धा मध्ये उदकनीत्वाविधिवच्चमप्य पुनस्तद्यैवानीय स्वदक्षिणत उपवेश्य बर्हिस्तरणाद्याघारांते। आनआयूंषीत्या
६ जो दिनोरु वर्धत्वा कुमारमालभ्य त्रेधा मध्ये उदकनीत्वा तस्यां ञ्जलिमुदकेनापूर्य स्वांजलिमन्येन पूरयित्वात
त्सवितुरिति कुमारांजलावनक्षार्य देवस्यत्वेति हस्तं गृह्णाम्यमुकशर्मन्निति तस्योत्तानं सांगुष्ठं हस्तं गृहीत्वा
पूर्ववक्षार्य सविता ते हस्तं गृहीत्वा पुनरवक्षार्य अग्निराचार्यस्तवामुकशर्मन्निति हस्तं गृहीत्वा आदित्यमी
क्षयेत्। देवसवितरेष ते ब्रह्मचारी तं गोपाय समामृतेति। अत्र कस्येति मंत्रो न भवति। परिदानवर्जमित्युक्तेः। ततः
युवासुवासाः इत्यर्द्धचेन बटुं प्रदक्षिणमावर्त्यतं धीरासइति तस्यांसयोरुपरि स्वस्यपाणी निधायित्वा पाणिभ्यां
तद्धृदयं स्पृष्ट्वा दक्षिणेन गत्वा अग्नये समिधमित्यनेन समिधमाधाप्यात्। अत्रायं बोधायनसूत्रे तुपालाशीं

Indira Gandhi National
Centre for the Arts

अथ



समिधं[illegible]नस्त्वादित्यायजमानस्यकामाः स्वाहेतिजुहोति। आज्येनजुहोतियत्रदेवाःपवित्रेणेतितिसृभिःजुहोति।
प्र०वि० समिधस्यमानस्त्वादिशं मानसस्तोकइतिविष्ट
१०८ सुक्तं। एवंहोमंकृत्वातेजसामासमनज्मीतिमुखंत्रिर्निमृज्य मयिमेधामिति षड्भिरुपस्थाय। मानस्तोक इतिविभूतिंधृत्वा। ॐचमरसुपस्थाय। कलौधृत्वा। अमुकशर्मा अहंभो अग्ने अभिवादये। इत्यग्निं नमस्कुर्यात्। अनेनतत्र
नप्रसङ्गुरुवआचार्यस्यपादावुपसंगृह्याधीहिभोःसावित्रींभोअनुब्रूहीति वदेत्। अथाचार्यः। प्रणव
स्यपरब्रह्मऋषिःपरमात्मादेवता। व्याहृतिमंत्रस्य। प्रजापतिर्ऋषिः। प्रजापतिर्देवता। बृहतीछंदः। त
सवितुः श्यावाश्वः सवितानुष्टुप्। उपदेशेविनियोगः। पच्छोऽर्धर्चशः। तत्सवितुर्वरेणीमह इतिगायत्री
मुक्त्वा। ममव्रतेप्रजापतिर्बृहस्पतिस्त्रिष्टुप्। ममव्रत इतिमंत्रेण बटुहृदयेऊर्ध्वांगुलिंपाणिंनिदध्यात्।
नात्रमेखलादंडभिक्षाः। ततः स्विष्टकृदादिशेषसमाप्तिः। बौधायनसूत्रे तुस्विष्टकृदादिशेषसमाप्तो
अंतेपिपालाशीं समिधं प्रक्षिप्य व्रस्यप्रायश्चित्तं जुहोति। अथव्याहृतीर्जुहोति। अथसावित्र्याशालस्क
लोपतमपिमंत्रप्राप्य। कृतप्रायश्चित्तोभवति। गुरोर्वाण्युच्छिष्टंभुंजीतेत्युक्तं। इदंचपुनरुपनयनं
यद्दाप्रतिवेदंक्रियते तदातत्तद्देशाखयाकार्यमितिराणकः। इतिश्रीअनंतभट्टकृते प्रयोगरत्नेनाम
गोपुनरुपनयनप्रयोगः। अथोपाकर्म। कारिकायां। अध्यायानामुपाकर्मश्रावण्यांश्रवणेनतु। तन्मासेहस्त
युक्तायां पंचम्यां वा तदिष्यते। अवृष्ट्यौषधयस्तस्मिन्मासेतुनभवंतिचेत्। तदाभाद्रपदेमासिश्रवणेनतु १०९
दिष्यत इति। केवलपंचम्यां हस्तयुते अन्यस्मिन्वादिनइतिहेमाद्रिः। शौनकः। दिवसेविद्धीतेतदुपाकर्मय

धौदितं। अध्यायोपाकृतिंकुर्यात्तत्रोपासनवह्निनेति। श्रवणयुतश्रावण्यां वाग्रहणसंक्रांतौ। सा पौ तु उपाक
र्मनकुर्वीतिक्रमात्सामन्र्यजुर्विदः। ग्रहणसंक्रांतियुक्तेषु हस्तश्रवणपर्वस्विति निषेधात्। पंचम्यादयो[illegible]:।
तत्रापिअटुद्रातेत्राद्धस्ताच्चसंक्रांतिर्ग्रहणंतु वा। उपाकर्मनकुर्वीरन्परतश्चेन्नदोषकृदितिवचनात् [illegible]हेमा त२
द्रिस्तुश्रावण्यांग्रहणादिदोषसत्वेकात्यायनभिन्नैः प्रोष्ठपद्यां कार्यं। तैस्तुश्रावणपंचम्यां संक्रांतिर्ग्रहणं
वापिपौर्णमास्यां यदा भवेत्। उपाकृतिस्तुपंचम्यां कार्या वाजसनेयिभिरितिवाक्यं वाजसनेपिग्रहणादि
त्याह। आपस्तंबैस्तुप्रोष्ठपद्यां कार्यं। छंदोगपरिशिष्टे। प्रसह्ययदुपाकर्मसोत्सर्गं विधिवद्द्विजैः। क्रियतेछंद
सांतेनपुनराप्यायनंभवेत्। अयातयामैः छंदोभिर्यत्कर्मक्रियतेनरैः। रममाणैरपिसदातदेषांसिद्धिकार
कं। अयातयामत्वं च तत्रैवोक्तं। अस्थानोच्चारविच्छेदघोषणाध्यापनादिकं। प्रमादिकंश्रुतौयत्स्याद्या
तयामत्वकारितत्। अत्र च कर्मद्वयमिदं केचिल्लौकिकाग्नौप्रकुर्वत इति कारिकावचनाद्विकल्पः। तत्रा
प्यध्याप्यैरन्वारब्ध इतिसूत्रात्। शिष्यस्यकर्तृत्वेतदधिकारिकस्यहोमस्यनान्यस्याग्नावन्योजुहु
यादित्याचार्याग्नौनिषेधाल्लौकिकः। एकस्यकर्तृत्वेतुस्मार्त इतिपितृचरणाः। तत्राप्याध्यापनां चतुरव
त्तंपंचावत्ताख्यपिलकल्पत्वेप्येतेनराजपुरोहितौसायुज्यकामौयजेयातामितिवदध्याप्यैरन्वारब्ध इ
तिवचनात्सहैवाधिकारः। इदमत्राष्टघं। अथातोध्यायोपाकर्मओषधीनांप्रादुर्भावेश्रवणेनश्रावण्यांपंचम्यां
हस्तेनवेति। अस्यार्थः। अध्ययनमध्यायः। तस्योपाकरणं प्रारंभो येन कर्मणा तदध्यायोपाकरणं। अतः श्रो

Indira Gandhi National
Centre for the Arts

प्र०चि० कोहोत्वर्षः। यस्मादुत्सयत्नोनित्यः अतोध्यायोपाकरणंकूम इति। तस्य कालमाह। ओषधीनामिति। श्रावणस्यमास उपाक०
१०८ स्यश्रवणेन कार्यं। ओषधीनांप्रादुर्भाव इति वचनं यदाश्रावणेप्रादुर्भावो नस्यात्तदाभाद्रपदे श्रवणेन कर्तव्य
मित्येवमर्थं। तस्यपकर्षे कर्मापकर्षशंकैवा नास्ति। यदाभाद्रपदादुत्कर्षोपि भवति तदापि कर्मोत्कर्षशंकैव न का
र्या। तद्धार्षिकमिसाचक्षत इति वक्ष्यमाणासमाख्याबलात्। वर्षासुक्रियंइति वार्षिकं। श्रावणभाद्रपदौमासौ त०
हि वर्षर्तुः। श्रावणेप्रादुर्भावाभावे कर्माकरणशंकाप्यनेनैव निरस्ता। श्रावणेनेतिश्रवणेयुते कालइत्य
र्थः नक्षत्रेयुक्तः कालइत्यण्। लुबविशेषइति तस्यलुप्। नक्षत्रेचलुपीति तस्यसप्तम्यर्थे तृतीया। नक्षत्र
श्राद्धेषु सर्वत्रैवयोज्यं। पंचम्यामिति। अत्रापिश्रावणस्येति संबध्यते। मध्यगतस्यविशेषोभावात्।
प्रयोजनवत्त्वाच्च। श्रावणस्यमासस्यपंचमीयदाहस्तेनयुज्यते तदाचेत्यर्थः। एवं कालत्रययुक्तं
भवतीतिश्रीनारायणेरभिहितः। गोभिलः। अध्यायानामुपाकर्मकुर्यात्कालेपराह्णिके। पूर्वाह्णेतु
विसर्गस्यादितिवेदविदो विदुरिति। अत्रचास्य नवब्रह्मचारिणः वेदग्रहणसिद्धिद्वारा। ममचउत्स
ष्टानांवेदानांपुनर्ग्रहणद्वाराप्यायनार्थंश्रीपरमेश्वरप्रीत्यर्थं उपाकर्मकरिष्ये। इति संकल्प्य इतिप्र
योगपारिजाते। अत्रच प्रथमारंभे वृद्धिश्राद्धं कुर्यादित्युक्तं नारायणवृत्तौ। तत्रापिपदाअध्यापन
विधिप्रयुक्तमध्ययनमितिप्रभाकरमते। तदासंस्कारस्याचार्यनिष्ठत्वादाचार्यः। स्वपित्रादिभ्यो नांदी
श्राद्धं कुर्यात्। यदानुवेदस्वीकाररूपस्योपाकरणसंस्कारस्यमाणवकनिष्ठत्वान्माणवकः संस्कारकर्मणि ९०

८४

उ

दं। तदामाणवकद्वारानांदीश्राद्धं कारयेत्। जीवत्पितृकस्यतत्पित्रा कारयेत्। स्वयंचकुर्यादितिपारिजातः। म
तपितृकस्यापि स्वपितृभ्यः पितादद्यात्सुतसंस्कारकर्मसु। पिंडान्नोद्वाहनात्तेषां तस्याभावेतुतत्क्रमा
त् इति कात्यायनोक्तेराचार्य एव तत्पित्रादिभ्योदद्यादिति केचित्। तस्यापितुरभावे संस्कार्यपितृक्रमादाचार्य
एव कुर्यादितिपूर्वमेवमाख्यातं। अत्रचनांदीश्राद्धं तेनिवीतिना। ऋषिपूजनं ऋषीणांतर्पणंच
कार्यं। उपाकर्मणिचोत्सर्गे यथाकालं समेत्यच। ऋषीन्दर्भमयान्कृत्वा पूजयेत्तर्पयेत्ततः। कुर्वीरन्ब्रा
ह्मणाः श्राद्धं वेदानुद्दिश्यशक्तित इति पारिजातेवचनात्। ताश्च ऋषीनेकस्मिन्नेव विष्टरे पूजये
दित्युक्तं। तत्रैव। विष्टरः सप्तभिर्दर्भैर्दशांगुलदैर्घिकं। चतुरंगुलमग्रं स्यात् ग्रंथिरेकांगुल
स्थिति। तथा। ऋषीणामर्चनं सर्वेकर्तव्यं चनिवीतिना। ऋषिपूजनंच सहस्तोमा इतिमंत्रेणेतिशि
ष्टाः। यद्यपिनासत्सप्तप्रजापतिः परमेष्ठीवावृतंतु। योपठन्प्राजापत्यो जगत्याद्याः। तथाचसह
स्तोमा इतीयं योयन्न इतिसप्तचेत्यस्य सूक्तस्यां त्यां अक्षरपरिमाणेनत्रिष्टुप्। अत्रप्रजापतिऋषिः
पूर्वसूक्तोक्तं चभाववृत्तं देवता। तथापिऋषयः सप्तदेव्या इतिलिंगादृषीणांदेवतात्वमिति
ध्येयं। ततोग्निस्थापनंकृत्वान्वाधानंकुर्यात्। कारिकायां। आज्यसंस्कारपर्यंतमुपलेपा
दिपूर्ववत्। आज्येनदधिसक्तूनां पर्यग्निकरणं भवेत्। उत्तरमात्रमान्यं चैतेषांत्रिःप्रोक्षणं
भवेत्। इध्माभिघारणांतंस्यादाज्यस्योद्वासनादिकं। अन्वारब्धोगुरुः शिष्यैः स्वयमेव न संतिचेत्। इह

Indira Gandhi National
Centre for the Arts

उपाकर्म

प्र॰वि॰ ११॰ मध्यागो निमीत स्तथैवो सर्जनेपि नो। हुत्वा तैर्नवभिर्मंत्रैः सावित्र्याद्यैस्ततः परं। हुत्वा वदानधर्मेण तान्सर्व
र्षीन्सयुतान्। हुत्वाग्निमीळ इत्याद्यै र्मंत्रैर्विंशतिभिः क्रमात्। शाकलानां समानीव इत्यं वा साहु
तिर्भवेत्। बाष्कलानां तु तच्छंयोरित्यं वा साहुतिर्भवेदिति। अत्र च येषां समानीव इत्यनेन वेद समाप्ति
स्ते शाकलाः। येषां तु तच्छंयोरित्यनेन ते बाष्कलाः। यस्तु पंचावर्ति नाशिष्येण सह क्रियते। तदा तर्थमेकमपि
कन्न वदानं ग्राह्यं। अप्यज्ञान मदग्नौ जामदग्न्य मामं त्रपंचावत्तं कुर्यादिति गोभिलसूत्रादिति शिष्टाः। इदम
त्रगृह्यं। आज्यभागौ हुत्वाज्याहुतीर्जुहुयात्। सावित्र्यै ब्रह्मणे श्रद्धायै मेधायै प्रज्ञायै धारणायै सदसस्पत
येनुमतये छंदोभ्य ऋषिभ्यः स्वाहेत्याहुः। तत्र हुत्वा ग्नेर्नवभिर्मंत्रैरिति कारिकावचन विरोधात्। सावित्र्यै स्वा
हेति नवाज्याहुतीर्जुहुयादिति वृत्तिग्रंथाविरोधाच्च। तेन विभक्तिभेदप्यन्तये पवमानायेत्यादि वदेकैव देवता।
केचित्तु छंदोभ्यः स्वाहेत्येतावदेव सूत्रमित्याहुः। तत्र प्रयोगपारिजातादिष्वत्र सूत्रपाठविरुद्धं। नवाहुत्यनंतरं
नवताभ्यः सर्पिषाहुत्वा सक्तुमिश्रीरैकिमिः कृतैः। गायत्र्यातिलहोमं तु कुर्याद्व्याहृतिभिस्तथेति पारिजाते व्या
सवचनात्। भर्जितव्रीहीणां सक्तुमिश्रमंडलदेवताभ्यो हुत्वा गायत्र्या व्याहृतिभिश्च तिलहोमं कुर्यादिति के
चित्। सर्वानुक्रमे। अग्निं न मधुच्छंदा वैश्वामित्रः। तेन अग्निमीळ इत्यस्य वैश्वामित्रो मधुच्छंदा अ
ग्निर्गायत्री। कुसुंभक स्तदगस्त्यः सूर्यो नुष्टुबिति पारिजातः। तत्र कं तत्। बोडशोपनिषत्पूष्णः सूर्यमानु ११:
ष्टुप्त्विषशं कावा नगस्त्यः प्राप्तं श्रीघ्र शाम्या द्यावश्चतिस्रो महापंक्तयो महाबृहती चेति सर्वानुक्रमविरोधा
इति अत्र केचित्सुत्रे पंचैतेभ्य ऋषिभ्य इति प्रत्येकं विभक्तिभगणं प्रत्येकं देवताल मिः८

त। तेनात्र अपत्यणः सूर्यो देवता। तेन कुसुंभक स्तदगस्त्योपत्यणः सूर्यो अनुष्टुप्। २। यआंगिरसः शौनहो
त्रो भूत्वा भार्गवः शौनकोभवत्स गृत्समदो द्वितीयं मंडलमपश्यत्स्व मानेजागतं तु। तेन त्वमग्नेग्त्स
मदोग्निर्जगती। ॥ यद्यपीयमक्षरपरिमानेन चत्वारिंशदक्षरा पंक्तिस्तथापि सूक्तस्य जागतत्वा
यं छत्र न्यायेन जगतीत्युक्ता। कनिक्रदज्जनुषं प्रब्रुवाण इति प्रदक्षिणि जागते मध्ये तिशाकुर्यपि वैतान्यात्म विरध्वनि नश्य
मानं शकुंतं तुष्टाव। तेन प्रदक्षिणी तिसृक्तं सा प्या। आ वदंस्तिस्रस्या गृत्समद ऋषिः। जागतमिसुक्ते जग
ती छंदः। शकुंतो देवता। तेन आवदंस्त गृत्समदः शकुंतो जगती। शकुंतस्त्वात्र शकुनिः। पारिजाते त्वत्र
वामदेवो ऋषिरित्युक्तं। तच्चिंत्यं। अत्र शकुंतरूपी इंद्रो देवतेति कल्पसदृः। ४। कुशिकस्त्वैषीरथिरिंद्रतु
ल्यं पुत्रमिच्छन्ब्रह्मचर्यं चचार तस्यं इंद्र एव गाथीपुत्रो जज्ञे गाथिनो विश्वामित्रः स तृतीयं मंडलमप
श्यत् सोमस्य त्वधिकात्रयोविंशर्चं सूक्तं। तेन सोमस्य मा गाथिनो विश्वामित्रोग्निस्त्रिष्टुप्। ५। इमा उत्वा
इंद्रावरुणा बार्हस्पत्यस्य पौष्णसावित्र सौम्य मैत्रावरुणास्तृचा अंत्यो जामदग्न्यार्षो वा। अस्मिन्सूक्ते तीमारुणो
नेति। तेन गाण्या नाजमदग्निर्मित्रावरुणौ गायत्री। ६। श्येन रूपेणेंद्रो वृहस्पर्धमाहरन्मधु यस्य सवा
मदेवो गोतमश्च तुर्थं मंडलमपश्यत्वां ह्यग्ने विंशतिरस्तु तिजगती धृतिरूपा द्याश्चतस्रो वारुण्य
श्च वा। तेन त्वां ह्यग्ने वामदेवोग्निरष्टी। ७। समुद्रादूर्मिरेकादशाग्नेयं जगसं तं सौपं वाघं वा गव्यं वाघ
तस्तुतिर्वा। अत्रांते जगती पादमंतरिति। तेन सूर्यो देवतेत्युक्तं पारिजाते। आपरति कल्पसदृः। पित्व

Indira Gandhi National
Centre for the Arts

उपाकर्म॰

प्र॰चि॰ णा अप्येव माहुः। तेन भामेते वामदेव आपो जगती। ८। नमो मित्रस्येति मोऽत्रिः पंचमे मंडले नु तद्गोत्रमात्रेयं विद्यात्संततं न
१११ स्याविर्धारूक्तस्पर्धी यमानुष्टुभ मवोधि द्वादशबुधगविष्ठिरौ। तेन अग्ने भात्रेयो बुधगविष्ठिरावग्निस्त्रिष्टुप। ९। प्रवो नये वयामरुद्
प्रवो नये वयामरुन्मारुतमति जागतं। अस्मिन्नवर्चे सूक्ते। तानत्रीती यमं सा अतिजगती। एवयामरुद्
षिः। मरुतो देवता। तेन गंतानत्एवयामरुन्मरुतोऽतिजगती। १०। बार्हस्पत्यो भारद्वाजः षष्ठं मंडलमपश्य
त्वं ह्यग्ने सप्तोना। तेन त्वं ह्यग्ने भरद्वाजो ग्निस्त्रिष्टुप। ११। जीमूतस्येव मे कोनापायुर्भारद्वाजः संग्रामांगान्य
न कधुः मितु शौर्य वर्मधनुर्ज्यामाली बुधिं जगत्सद्धे सारथिमद्भेर श्मीनस्वान रथं रथोऽपाजगत्सालिंगो
क देवता द्वाभ्यामिषू: प्रतो दं हस्तघ्नं द्वाभ्यामिषूः परा: पंक्त्यादयो लिंगोक्तदेवताः संग्रामाशिषो सानुष्टुप
अत्रयो नस्वेतीय मंत्रा। तेन यो नस्वः पायुर्भारद्वाजो विश्वेदेवा अनुष्टुप। अत्र पायुर्भारद्वाज ऋषिः। देव ब्रह्म
वर्माणीति ऋग्लभ दृस्तछिंसं। १२। सप्तमं मंडलं वसिष्ठोऽपश्यदग्निं पंचाधिका विराजो ष्टादशाद्या। अग्निं
नरदृति सूक्तं पंचविंशं वैवा। अत्राद्याः अष्टादश विराजः शिष्टास्त्रिष्टुभः सदसुक्तं सूक्तप्रतीके। तेन अग्निं
मा ४ नरो वसिष्ठोऽग्निर्विराट्। १३। इंद्रासोमं पंचाधिके इंद्रासोमं रक्षोघ्नं शापाभिशापप्रायं षट् सप्त वाद्याज
गत्यः एकविंशी त्रयोविंश्यौ चाष्टादशी मारुती चरमा चतुर्दश्या वाग्नेय्यो दैव्ये का दश्यं त्यानुष्टुप।।
अस्मिन्सूक्ते अस्यां प्रतिचक्ष्वेति। तेन प्रतिचक्ष्व वसिष्ठ इंद्रासोमानुष्टुप। रक्षोहणाविंद्रासोमौ देवते इति। १११
सदः। १५। मा चिदन्यत्त्रिंशन्मे ध्यातिथिर्मेध्यातिथी इंद्रा बार्हतं द्विप्रगाथौ दिद्धि त्रिसुबं तं मा द्वे चेप्रगाथौप

पश्यत। मेधातिथिर्मेध्यातिथी सूक्तस्याद्य ऋग्द्वयस्य प्रगाथः। तथा च मा चिदन्यत् प्रगाथ इंद्रो बृहती। १५।
अदृशीर्षल्कूनां सोभरि बार्हतं पंचमी विराड्रूपा सप्तम्या द्यनुजः सतो बृहत्यो युग्म्यादि युजः ककुप् रूली
यसी ककुबनुष्टुबं त्या गिमारुती अंत्या आग्नेया हीति। तेनाग्नेया हि सोभरि रग्नामरुतो नुष्टुप। अ
ग्ना मरुद्भ्य इहभीतिसागः। १६। नवमं मंडलं पावमानं सोम्यं स्वादिष्ठया मधुछंदाः। इदं दशर्चं सूक्तं।। अत्र
च पावमान सोमस्योक्तत्वात्तेन भिन्नदेवता। तत्र च सा गवेळाया मन्याचक्रवेन सोमस्य पूर्वेनिपात
त सोमपवमानो देवतेसु क्तं सूक्तप्रतीके। तत्र न सर्वानुक्रमभाष्ये पवमानगुणकस्य सोमस्यैव देव
तात्वोक्तेः। अतएव पवमानमिति विशेषणपदस्य रणस्य प्रयोजनं सोमस्य न स्या न्यादेरपि पव
मानगुणत्व प्राप्त्यर्थमिति तत्रैवोक्तं। तेन स्वादिष्ठया मधुछंदाः पवमानसोमो गायत्री। १७। शार्य
णावत्येकादशाकश्यपोप इंद्रो नुष्टुप। तेन प इंद्राजन्नि सस्या: प इंद्रो इति सूक्तांतस्य त्वात्सूर्वेषूक्तो
क कश्यपानुवृत्या। पवते राजन्कश्यपः सोमः पंक्तिः ऋग्छन्द स्तत्रापि पवमानस्यैव देवतात्वमाह। १८। दशमं
डलमग्ने सप्तत्रितः। तेनाग्ने बृहन्नत्रितोऽग्निस्त्रिष्टुप। १९। माधुच्छंदसो घमर्षणो मावद्धनमानुष्टुप्तु
संसं चतुष्कं संवननः संज्ञानमाग्नेयी तृतीया त्रिष्टुप। अत्र चतुर्थी अनुष्टुप। तेन समानीवः संवननः सं
ज्ञानमनुष्टुप। अत्रायं संग्रहः। अग्निमीले कुशुंभं कत्वमग्ने प्राव देस्तथा।। सोमस्य मा न एना वाच त्वां
ह्यग्ने सदमित्तथा। भामं ते बोधिगं तानं त्वं ह्यग्ने प्रथमस्तथा। यो नस्वो नि नरस्यैव प्रतिचक्ष्व तथै

Indira Gandhi National
Centre for the Arts

प्र॰चि॰ वच्च। माचिदाग्नेयाकृितथास्वादिष्टयातथैवच। यत्ते ये वृसमानी वो मंत्रक्रमउदाहृतः। सूत्रे ए ताभ्यो देवताभ्यो उपाकर्म
११२ हुत्वा सोविष्टकृतं हुत्वेति। अत्रस्विष्टकृद्धरणं प्रधान होमानंतरमत्रे वस्विष्टकृत। न तु कर्मांतइत्ये
वमर्थमिति वृत्तिकारः। स्विष्टकृदनंतरंच रज्जु प्रक्षेपः। यद्यपि रज्जु प्रक्षेपे काले विशेषो नोक्तस्तथापि शे
षण स्विष्टकृतमिश्रसंनकृते नरुद्रंपरमा। मानंयज्ञोपवीते नेत्यन्वाधाने क्रमोक्तेरत्रैव कुर्यात। न तु सर्व प्रा
यश्चित्तेभ्यः पूर्वंभद्रा। अप्येवं। दधिक्राव्णोवातिमंत्रेण दधिसक्तू प्राश्य मार्जनं। ततो यज्ञोपवीत होमं धारणं च
कुर्युः। पारिजातादिस्तु दधिक्राव्णोति मंत्रो नष्टः। कारिकायां। अथस्विष्टकृतं हुत्वा दधिसक्तूनिदंय
न। दधिसक्तून्स्वयं शिष्याः प्राश्याचम्य ततः परं। परिस्तरणदर्भैस्तैरेतदुत्पलितैर्जलैन। अभ्येनसेचयि
त्वाथतापि: कुर्वीत मार्जनमिति। शौनकोपि। दधिसक्तून्स्वयं प्राश्य शिष्यांश्चापि ततः परं। प्राशये दपउआचम्य
कुर्युः सर्वेपि मार्जनमिति। सूत्रेपि। सोविष्टकृतं हुत्वा दधिसक्तून्प्राश्य। ततो मार्जनमिति। यज्ञोपवीतधा
रणानंतरं मार्जनमिति पारिजातादयः। तत्कारिकाशौनकसूत्रविरोधादिष्टो प्राशनमार्जनयोर्व्युत्क्रमस्वाध्या
व च्छिंसं। अतएव प्रधानयागनामिष्ट्यो कृतक्रमत्वादेवविहृतो नारिष्टयोत्तरहो[illegible]मरत्युक्तं पेचमे। यद्यपि मार्ज म॰
नानंतरं यज्ञोपवीतहोमः तत्कारणं च सूत्रे कारिकायां शौनकेन वा नोक्तं तथापि। वेदारंभणातः पूर्वं सक्तु प्रा
शनतः परं। नवयज्ञोपवीतानि हुत्वा दत्वा च धारयेदिति। पारिजाते कार्लोजिनिरुक्तेः कर्तव्यं। पारिजाते ११२
ससब्रह्मोपि। यज्ञोपवीतानि नवानि कृत्वा तदुक्तमंत्रेण हुने दग्नौ। स्वयं तु देवानपि दर्भयस्थं दद्यात्स्वयं धार्य

मिति प्रसिद्धं वा युपुराणे। उपाकर्मणि शिष्येभ्यो दद्याद्यज्ञोपवीतके। आयुष्मान्जायते तेन कर्मणा मानवोभुवी
ति। ततो वेदोपाकरणं। तत्र विशेषमाह व्यासः। दर्भासनो दर्भकरः प्राङ्मुखो वाप्युदङ्मुखः। उपक्रमेतु येतान्वा
वेदो वा वेदमेव वा। प्रणवं वा प्रयुंजीत व्याहृतीः प्रणवं ततः। पश्चादुर्वेश्च सकलां सावित्रीमनुवाक्यमच।
उपक्रमेत ततो मंत्रानादौ च ब्राह्मणं ततः। ततोपनिषदे कल्पं रहस्यान्यपि शक्तितः। अधीत्य प्रणवं चोत्काभ्य
मिं स्पृष्ट्वा जलं स्पृशेत्। नमस्कृत्य ततो देवान्ऋषीश्चैव ततो गुरूनिति। कारिकायामपि। पश्चादग्ने
स्तु दर्भेषु प्रागग्रेषूपविश्य च। आसिन्याप: शरा वा दो दर्भोस्तत्रनिधाय च। प्रागग्रान्दर्भगर्भांस्ते
कुर्युर्ब्रह्मांजलिं स्त्वथा। समाहितिजपत्सु च्चैः सावित्रीं ब्रह्मयज्ञवत्। अग्निमीलइदं सूक्तमनुवाक
मथापि वा। प्रायश्चित्तादि सकलं होमशेषं समापयेत्प्रति। इदमत्र गृह्यं। अपरेणाग्निं प्राक्कूलेषु दर्भेषूपवि
श्योदपात्रे दर्भान्कृत्वा ब्रह्मांजलिं कृत्वां जपेदोंपूर्वा व्याहृतयः सावित्रीं च त्रिरभ्यस्य वेदादिमारभेत।
सर्गे इति। ॐपूर्वा इति पूर्वं मोंकारं। ततस्तिस्रो व्याहृतयः समस्ताः। ततः सावित्रीमेतत्त्रिरभ्य वेदादिं अग्निमी
ळइत्यारभ्य सूक्तमनुवाकं वा आरभेत। यथाहुः। प्रणवव्याहृतीनामभ्यासार्थः। तेनैयत्तत्सूत्रे चकारभावाददोष
व्याहृतीनां सकृत्साठः। ततः सर्वप्रायश्चित्तानीति वृत्तिः। तेनात्र पृथ्वीतिमंत्रेणासनं कृत्वा। अपसर्पेति
त्रेन भूतान्युत्साद्य प्रणवव्याहृतिपूर्वं गायत्रीं पच्छोर्धर्चशः समीचोक्त्वा। अग्निमीळइति वर्गद्वयमृगुकामे
ति वेदानामिति ब्रह्माणं पठित्वा उपनिषदादि पठेदिति कृष्णभट्टः। उपक्रमेत ततो वेदानादौ च ब्राह्मणं

प्र०चि०
११२

उपाकर्म०

ततः। ततोपनिषदं कल्पं रहस्यान्यपिशाक्तिन इति वचनाद्वेदोसर्ववेदानामारंभः। ततो ब्राह्मणस्य। ततोपनिष
[redacted] दादीनामिति
पाद्धिजाताहयः। तेनाग्निमीळ इत्यनेन तद्रं इषेत्वोर्जे त्वाग्न आयाहि वीतये शन्नोदेवीरित्यथर्वादि। अग्निर्वै
देवानामिति ब्राह्मणं। अथ महाव्रतं। एषपंथा एतत्कर्म। अथातः संहिताया उपनिषदित्युपनिषदं। विदामघ
वन्विदा। महाव्रतस्य पंचविंशतिं सामिधेन्य इत्यारण्यकं। अथैतस्य समाम्नायस्येति सूत्रं। मयरसतजभन
लगमितिछंदः। गौः ग्मेतिनिघंटुः। पंचसंवत्सरमिति ज्योतिषं। समाम्नायः समाम्नातः इति निरुक्तं। अथ शि न६
क्षां प्रवक्ष्यामि। वृद्धिरादैच् इति व्याकरणं। ततोपच्छ्रुलणानीतिहासान्पुराणान् कल्पानीति वा व्यासो
गीश्वरं याज्ञवल्क्यमिति धर्मशास्त्राणि। नारायणं नमस्कृत्येति पुराणं च। ततः अथातो धर्मजिज्ञासेति पू
र्वमीमांसासूत्रं। अथातो ब्रह्मजिज्ञासेत्युत्तरमीमांसासूत्रं च वाचयित्वा। नमो ब्रह्मण इति परिधानीयां च
त्रिर्वाचयित्वा। यथाचारं शिष्यैः सहोत्थाय। संतानमुशनावदत्। ॐ इत्युक्त्वा उपाकृता वै वेदा इत्युच्चार्य पु
नः शिष्यैः सहोपविश्य भूमिं स्पृष्ट्वा जलं संस्पृश्य। अग्निं गोतमादि त्रयं च आचार्यदीन्नमस्कृत्य। प्रायश्चित्ता
दिहोमशेषं समाप्य। वेदानुद्दिश्य ब्राह्मणा भोजयेदिति पारिजाते। शिष्यैस्तत्र स्यपएव भक्ष्यतत्प्रकारः प्राप्त
यज्ञे हिकृतिस्य ब्रह्मौ आहृतः। तत्तु सूत्रविरुद्धमित्याचारकांडे वक्ष्यते। तेनायं स्विष्टकृद्धप्रक्षेपानंतरं संग
हे। दधिसक्तुप्राशने च मार्जनेतदनंतरं। यज्ञोपवीतहोमश्च वेदारंभस्ततः परं। अथाश्वेसादिसर्वेतु होमशे ११२

जीर्णयज्ञो
पवीतस्याग:

षं समापयेदिति। अत्र ब्रह्मचारिविषये विशेष उक्तो व्यासेन। उपवीतं नवं वस्त्रं कटिसूत्रं च मेखलां। धारये
दजिनं दंडं पुराणान्यप्सु निक्षिपेदिति। तेन गृहस्थस्यापि जीर्णानां यज्ञोपवीतानां निक्षेपो नवीनानां च
धारणमिति संप्रदायिकाः। वस्त्रं चात्र कौपीनं। न त्वहतं। तस्य वाससी ते स्वगुरवे मेधाजननकर्मेणि
इति मेधाजनने विनियोगात्तदुत्तरं कौपीनमात्रावर्तेत इति वचनात्। एतद्दंडादिधारणमुपवीतपरि
ग्रहकाल एवेति कृष्णभट्टः। कात्यायनः। उत्सर्जनं च वेदानामुपाकरणकर्म च। अकृत्वा वेदजप्येन
फलं नाप्नोति मानव इति॥ इत्युपाकर्मप्रकरणं। अथोत्सर्जनं। तत्र गृह्यं। मध्यमाष्टकायामेताभ्यो
देवताभ्यो हुत्वापोऽभ्यवयंत्येताएव देवतास्तर्पयंत्याचार्यानृषीन्पितृंश्चेत्युत्सर्जनमिति। मध्यमाष्टकाग्र
हणं षण्मासांतलक्षणार्थं। तेन तस्याः समीपे माघ्यां पौर्णमास्यामिति वृत्तिः। कारिकापि। अध्यायोत्सर्जनं
माघ्यां पौर्णमास्यां विधीयत इति। एताभ्यो देवताभ्योऽन्नेनेति प्रधानहोमः। तेन सावित्र्यादिभ्य आज्यं। अत्र स्था
लीपाकग्रहणमकृत्वा। अत्रान्नेति वदन्गृहसिद्धमन्नं ग्राह्यमिति दर्शयति। तस्य चान्वाग्नेयोपकृत्यापि व
चनादेपासनेहोमः। प्रधानहोमानंतरं स्विष्टकृत्ततो वेदारंभः। ततो होमशेषं समाप्यापोऽवगाहंत इत्य
र्थः। तेनात्र प्राशनमार्जने न भवतः। एता देवताः सावित्र्याद्यानव। अग्निमीळादिविंशतिः। ऋग्देवताश्चेत
पर्यंता इत्यर्थः। जपं तस्त्वग्निमीळादिमंत्रैस्तर्पणमाह। तत्सूत्रवृत्तिविरुद्धं। आचार्यानृषीन्पितृंश्चेति वदन्ब्रह्म
यज्ञांगतर्पणमप्यत्र कार्यमिति वृत्तिकारः। उपाकर्मदिने वा इदं कार्यं। पुष्ये तूत्सर्जनं कुर्यादुपाकर्मदिनेऽथवेति



Indira Gandhi National
Centre for the Arts

प्र०वि० हेमाद्र्यनुक्तेः। अत्र च देशकालौ स्मृत्वा मम शिष्याणां चाधीतवेदाध्ययनद्वारा श्रीपरमेश्वरप्रीत्यर्थमुत्सर्जनारम्भं क उत्सर्जनं
११३ र्म करिष्ये। इत्येवं संकल्प इति पारिजातादयः। यातयामतानिरासेनाप्यायनद्वारा श्री॰ र्थं अंतरितमुत्सर्जनाख्यं क
र्मोपाकर्मदिने करिष्ये। इत्येवसंकल्प इति पितृचरणाः। उत्सर्जनदिने उपाकर्मपक्षे उत्सर्जनोपाकर्मोद्देश्यकर्मणी क
रिष्ये इत्येवं संकल्प इति पारिजातः। संकल्पोत्तरं च गणपतिपूजनपूर्वकं स्वस्तिवाचनं कुर्यात्। न तु वृद्धि
श्राद्धं। तस्य वृत्तिकृता उपाकर्मण्येवोक्तेरिति पारिजाताशयः। गणपतिपूजनोत्तरं च द्वादशांगुलप्रमाणक
सप्तदर्भग्रंथो ऋषिपूजनं कुर्यादिति पारिजातादयः। अन्ये तु। यद्वेदहोमानंतरं देवऋष्यादीनां तर्पणमुक्तं
तदेवोपाकर्मणि चोत्सर्गे यथाकालं समेत्य च। ऋषीन्दर्भमयान्कृत्वा पूजयेत्तर्पयेत्ततः इति वाक्योक्तस्य
पूजनपूर्वकस्य तर्पणस्य तदानीं संभवात्। स्नानोत्तरमेव ऋषिपूजनमित्याहुः। अत्र च। स्थंडिलाद्यग्नि
प्रतिष्ठांते कृते समिद्द्वयमादाय चक्षुषी आज्येनेत्यंते। सावित्रीं ब्रह्माणमित्यादि नव आज्येन। अग्निं अप्त्वन
स्रूर्वौत्रित्यादि विंशति देवताः। गृहसिद्धान्तेन। शेषेण स्विष्टकृतमित्यादि आज्यस्य बर्हिषी स्थापनांते कृ
ते गृहसिद्धं चरुं पृथक्पात्रे कृत्वा तत्पात्रमग्नावधिश्रित्याभिघार्योद्वास्य बर्हिष्यासाद्य चक्षुष्यंतं कुर्यात्।
तदाह शौनकः। पौर्णमासी तु या माघी तस्यामुत्सर्जनं भवेत्। तत्र ग्रामाद्बहिर्गत्वा तेषु चोद्देशे मनोरमे। विवि
क्ते स्थंडिलं कृत्वा तत्रोल्लेखनपूर्वकं। पुनस्तत्र निधायाज्यं संस्कारं तं यथाविधि। पश्चादन्नं गृहपक्वं पृथ ११४
क्कृत्वाभ्यसाजने। तत्र त्वग्नावधिश्रित्य तत्रस्थमभिघार्य च। उत्तरत्राचतीर्णांते: पुनरप्यभिघार्य च।

ॠस्यगग्नेर्निधायाज्यं प्राजनस्य समीपतः। ततः परिध्यानादि कर्मशेषं समापयेत्। उपाकर्मवदेवात्राप्याज्यभागावि पंचाव० गृहसिद्धान्त विचारः
ख तिस्मरन्निति। कारिकायामपि। अध्यायोत्सर्जनं माघ्यां पौर्णमास्यां विधीयते। ग्रामाद्बहिर्विविक्ते स्यादुपलेपादि पूर्ववत्
गृह्यचरुं समीपेऽग्नेर्निधायाज्यमधिश्रयेत्। संस्कार्यं सक्तुवच्चान्नं शांतिकर्मणि चात्र च। तेन शांतिहोमादौ गृ
हसिद्धान्तेन होमे चरोः संस्कारः। न वाज्याहुतिपर्यंतमुपाकरणवदेवेति। तेन गृहपक्वमग्निसमीपे निधा
य आज्यस्य बर्हिषि स्थापने स्रुवसंमार्जनादौ च कृते पश्चाच्चरोरधिश्रयणादि संस्कारः कर्तव्यः। तेनाज्यभागा
नंतरं सावित्र्यादिनवभ्यः आज्येन जुहुयात्। यदा तु पंचावत्तिना शिष्येण सह करोति। तदा अप्यजामदग्न्योजामद
ग्न्यमामंत्र्य पंचावत्तं कुर्यादित्यापस्तंबसत्याषाढोक्तेः। पंचावत्तिनां स्वस्य मेकमधिकमवदानं गृहीतानि त्रित्रिप्रा
र्थितलिङ्गे र्थं पंचावत्तं च होतृषु कुर्यात्। प्रार्थना च। प्रसूतो सप्तमित्यनेनेत्याश्वलायनादिति वृद्धाः। तत उपाकर्म
वदेव स्रुच्यवदानधर्मेणावदाय। अग्निमीळ इत्यादि मंडलदेवताभ्यो हुत्वा स्विष्टकृतं हुत्वा सक्तुप्रक्षेपं च
कृत्वा अपरेणाग्निं प्राक्कूलेषु दर्भेषूपविश्योदपात्रे दर्भान्कृत्वा। पृथिवि त्वया धृतेत्यादिना आसनं कृ
त्वा वेदारंभं कृत्वा। नमो ब्रह्मण इति परिधानीयां त्रिर्वाचयित्वा यथाचारं शिष्यैः सहोपविश्य भूमिं स्पृ
ष्ट्वा जलं संस्पृश्य अग्निं गोतमादीन् नमस्कृत्य। प्रायश्चित्तादि होमशेषं समाप्य। नदीतीरं गत्वा उत्सर्जे
नांगत्वेन गणस्नानं सस्मस्नानं गोमयस्नानं च कृत्वा मृत्तिकास्नानं च कुर्यात्। यदा तूत्सर्जनदिने भानुसो
मादिकं तदापि मृत्तिकास्नानं स्यादेव। एतस्य नैमित्तिकत्वात्। निषेधस्य च नित्यस्नाने सावकाशत्वा

Indira Gandhi National Centre for the Arts

त्। संप्राप्ते श्रावणस्यांते पौर्णमास्यां दिनोदये। स्नानं कुर्वीत मतिमान् श्रुतिस्मृतिविधानतः इति हेमाद्र्युक्तेश्च।
त्। संप्राप्ते श्रावणस्यांते पौर्णमास्यां दिनोदये। स्नानं कुर्वीत मतिमान् श्रुतिस्मृतिविधानतः इति हेमाद्र्युक्तेश्च। ... अघमर्षणं च कृत्वा स्नात्वा
मृत्तिकास्नानानंतरं च अपो हि ष्ठा समुद्रज्येष्ठा त्रिः शिष्टुं देवे सादिभिर्मंत्रैः पित्वा अघमर्षणं च कृत्वा स्नात्वा
ब्रह्मादयो ये देवा इति देवर्षिपितृतर्पणं कृत्वा। सहस्तोमा इति मंत्रेण सप्तऋषिपूजनं कुर्यात्। तच्च
द्वादशांगुलप्रमाणकदर्भग्रंथौ कुर्यादित्युक्तं प्राक्। ऋषिपूजनं च निवीतिना कार्यं ऋषीणामर्चनं स
...सावित्रीं तर्पयामीत्यादिना
वै कर्तव्यं च निवीतिनेति। प्रागुक्त्वात्। ततः सप्तऋषीणां तर्पणं कृत्वा। सावित्रीं तर्पयामीत्यादिना
...मंडलदेवतानां तर्पणं कृत्वा। अग्निस्त
नां तर्पणं कृत्वा। अग्निं तर्पयामि। अप्सुरस्तणासूर्यास्तर्पयामीत्यादिमंडलदेवतानां तर्पणं कृत्वा। अग्निस्त
प्यतु। विष्णुस्तृप्यत्वित्यादि ब्रह्मयज्ञांगतर्पणं स्वपितृतर्पणं च कुर्यात्। ततः। यमाय धर्मराजाय मृत्यवे चां
तकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च। औदुंबराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्रा
य चित्रगुप्ताय वै नम इत्यादि तिलक्रमेण। यमं तर्पयामीत्यादि चतुर्दशनामभिर्यमतर्पणं सव्येन कृत्वा। यमो निहंता
पितृधर्मराजो वैवस्वतो दंडधरश्च कालः। भूताधिपो दत्तकृतानुसारी कृतांत एतद्दशभिर्जपंतीति दश
वारं सर्वे पठेयुः। यमतर्पणं श्लोकजपादिकं तु प्रयोगपारिजाते नोक्तं शिष्टास्तु कुर्वंति। उत्सर्जनोत्त
रं षण्मासान् षडंगान्यधीयीत। तदाहाश्वलायनः। समाप्य पौर्णमास्यां तु छंदांस्यु...ज्य यथाश्रवत्। अं
गानि धर्मशास्त्रांश्च पुराणानि समभ्यसेदिति। मनुस्तु। अतः परं तु छंदांसि शुक्लेषु नियतः पठेत्। वेदां ११५
गानि कृष्णपक्षेषु नियतः पठेदित्याह। तेन चोत्सर्जनं माघपूर्णिमायामेव। यत्तु। पौषमासस्य

रोहिण्यामष्टकायामथापि वा। जलांते छंदसां कुर्युरुत्सर्गं विधिवद्द्विजा इति। याज्ञवल्क्यवचनं तच्छाखांत
रविषयं। अस्मत्सूत्रे षण्मासांतस्य विहितत्वादिति पारिजातः। इदं चोत्सर्जनं प्रातरेवकुर्युः। प्रातरे
वत्विति वचनात्। पारिजाते गोभिलः। उत्सर्जनं च वेदानामुपाकरणकर्म च। अकृत्वा वेदजप्येन फ
लं न प्राप्नोति मानवः। स्नानं धात्रीलोपेतु कृच्छ्रः उपवासश्च। वेदोदितानामिति मनुनापि योजनोक्तेः। उपा
कर्मणि उत्सर्गे च त्रिरात्रं पक्षिणी वा अनध्याय इत्युक्तं निर्णयसिंधौ। इति श्रीमीमांसकानंतभट्टकृ
ते प्रयोगचिंतामणौ उत्सर्जनं। अथाश्वलायनकृतः उत्सर्जनप्रयोगः। देशकालौ स्मृत्वा मम एतेषां ब्राह्म
णानां च अधीतानां छंदआदीनां यातयामता निरासेनाप्यायनद्वारा श्रीपरमेश्वरप्रीत्यर्थं उत्सर्जना
ख्यं कर्म पाकर्मदिने करिष्ये। तदंगतया स्थंडिलोल्लेखनलेपनाग्निं प्रतिष्ठां करिष्ये। समिद्द्वयमादा
य चक्षुषी अज्येनेत्यंते सावित्रीं ब्रह्माणं। श्रद्धां। मेधां। प्रज्ञां। धारणां। सदसस्पतिं। अनुमतिं। छंदां
स्यृषीन्। एताः प्रधानदेवताः। आज्यद्रव्येण। अग्निं अप्सुरस्तणासूर्यान्। अग्निं। शकुंतं। अग्निं मित्रावरुणौ।
...पवमानसो
मौ। अग्निं। अपः। अग्निं मरुतः। अग्निं विश्वान्देवान्। अग्निं। इंद्रासोमौ। इंद्रं। आ नामरुतः। पवमानसो
मं। सोमं। अग्निं। संज्ञानं। एताः प्रधानदेवताः। ... इत्यादि शेषेण स्विष्टकृतमित्याद्याज्यादि श्रप
णांतेनकृत्वा आधिश्रित्याभिघार्यो द्वास्य बर्हिष्यासाद्य चक्षुषी अंते। सावित्र्यै स्वाहा। सावित्र्या इदं न मम।

Indira Gandhi National
Centre for the Arts

प्र॰वि॰ ११६ एवं सर्वत्र। ब्रह्मणे॰ श्रद्धायै। मेधायै॰ प्रज्ञायै॰ धारणायै॰ सदसस्पतये॰ अनुमतये॰ छंदोभ्य ऋषिभ्यः स्वा उत्सर्जन
हेतिहुत्वा। प्रस्त्रतोभक्ष्यमितिपंचावत्तिना अक्षमभ्यमे कर्म वदानमधिकं स्यतामिति प्रार्थितो। अग्निमीले
मधुछंदाग्निर्गायत्री। उत्सर्जनप्रधानाः हासिद्धहोमेवि॰। आनयइदं॰ कुशुंभ कल्स दं[illegible]प्रतप्ता गस्योक्त
सूर्यो अनुष्टुप्। अप तप्ताः सूर्येभ्य इदं न॰ समग्निः समदाग्निर्जगती। आनय इदं॰ आवरू सम
दः शाकुंतो जगती। शाकुंतायेदं॰ सोमस्य मा गाथिनो विश्वामित्रोग्निस्त्रिष्टुप्। आनय इदं॰ गणानाज
मजग्निर्मित्रावरुणौ गायत्री। मित्रावरुणाभ्यामिदं॰ त्वां ह्यग्ने वामदेवोग्निरुष्णि। आनय इ॰ याम्ंते वामदे
वआपो जगती। अद्भ्य इदं॰ त्वंह्यग्ने भरद्वाजोग्निस्त्रिष्टुप्। आनय इदं॰ यो नस्व: पायु सरद्वाजो विश्वे
अबोधिबुधगविष्ठिरा वग्निस्त्रिष्टुप्। आग्न य इदं॰ गंतानयः यामरुन्मरुतो जगती। मरुद्भ्य इदं॰ देवा अनुष्टुप्। विश्वेभ्यो
देवेभ्य॰ अग्निं नरो वसिष्ठोग्निर्विराट्। आनय इदं॰ प्रति चक्ष्व वसिष्ठ इंद्रासोमावनुष्टुप्। इंद्रासोमाभ्यामिदं॰ माचित्स
गाथ इंद्रो बृहती। इंद्रायेदं। आग्ने याहि सोभरिरग्नामरुतोनुष्टुप्। अग्नामरुद्भ्य इदं॰ स्वादिष्ठया मधुछंदः पवमान
सोमो गायत्री। पवमानसोमायेदं॰ यत्ते राजा कश्यपः सोमः पंक्तिः। सोमायेदं। अग्ने बृहन्नास्पत्यो तोग्निस्त्रिष्टुप्।
आनय॰ समानी वः संवननः संज्ञानमनुष्टुप्। संज्ञानायेदं॰ अत्रायं संग्रहः। अग्निमीले कुषुंभकस्त्वमग्ने
वदं स्तथा। सोमस्य मा गणानां च त्वां ह्यग्ने सदमित्तथा। याम्ंते बोधिगं तानस्त्वं ह्यग्ने प्रथमस्तथा। योनः
स्वोग्निं नरश्चैव प्रतिचक्ष्व तथैव च। माचिदाम्ते याहि तथा स्वादिष्ठया तथैव च यत्ते। यत्ते ग्ने ह समानी वो मंत्र ११६
हे

क्रम उदाहृत इति। ततः स्विष्टकृदादि रज्जुप्रक्षेपांते। पृथ्वीति मंत्रस्य। मेरुपृष्ठ ऋषिः। कूर्मो देवता। सुतलं छंदः।
आसने वि॰। पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनं। अपसर्पंतु ते ता॰
निविशाचाः सर्वतो दिशं। सर्वेषामविरोधेन ब्रह्मकर्म समारभे इति भूतान्युत्सार्य। प्रणवस्य परब्रह्म ऋषिः
परमात्मा देवता। दैवी गायत्री छंदः। व्याहृतीनां परमेष्ठी प्रजापति ऋषिः। अग्निर्वायुः सूर्य प्रजापतयो देव
ताः। दैवी गायत्री दैवी उष्णिक् दैवी बृहत्यश्छंदांसि। गायत्र्या विश्वामित्र ऋषिः सविता देवता। गायत्री छंदः।
अग्निमील इत्याद्यानां छंदसां मधुछंदा[illegible]द्य ऋषयः। अग्न्याद्यो देवताः। गायत्र्यादीनि छंदांसि। सर्वेषामु
त्सर्जने वि॰। पछोद्धर्चशः सर्वां च गायत्रीमुक्त्वा। अग्निमील इति वर्गद्वयमुक्त्वा। अग्निर्वै देवानामवमो वि
ष्णुः परमः। अथ महाव्रतं। एष पंथा एतत्कर्म। अथातः संहिताया उपनिषत्। विदा मघवन्विदा महाव्रतस्य
पंचविंशति सामिधेन्यः। इषे त्वोर्जे त्वा। अग्न आयाहि वीतये। शन्नो देवी रभिष्टये। अथैतस्य समाम्ना
यस्य। मयरसतजभनलगसंमितं। गौः। ग्मा। पंच संवत्सरमयं। समाम्नायः समाम्नातः। अथ शिक्षां प्रव
क्ष्यामि। वृद्धिरादैच्। योगीश्वरं याज्ञवल्क्यं। नारायणं नमस्कृत्य। अथातो धर्मं व्याख्यास्यामः। अथातो ध
र्मजिज्ञासा। अथातो ब्रह्मजिज्ञासा। तच्छंयो॰। नमो ब्रह्मण इत्युक्त्वा। उत्सृष्टा वै वेदाः। ततः प्रायश्चित्तादि होमं
शेषं समाप्य। नद्यां गत्वा उत्सर्जनांगत्वेन गणस्नानमहं करिष्ये। उत्सर्जनांगत्वेन सस्नानमहं करिष्ये। ईशानाय नमः शिरसि।
तत्पुरुषाय नमः मुखे। अघोराय नमः हृदये। वामदेवाय नमः गुह्ये। सद्योजाताय नमः पादयोः। अग्निरिति भस्माज

रुम २

Indira Gandhi National
Centre for the Arts

प्र॰ चि॰ ११८

लमितिभस्म।स्थलमितिभस्म।व्योमेतिभस्म।सर्वंहवाइदंभस्म।उत्सर्जनंगत्वेनगोमयस्नानमहं उत्सर्जन
करिष्ये।गंधद्वारां।अग्रमग्रंचरंतीनामोषधीनांवनेवने।तासामृषभपत्नीनांपवित्रंकायशोधनं।
तन्मेरोगांश्चशोकांश्चनुदगोमयसर्वदा।स्नात्वा।उत्सर्जनंगत्वेनमृत्तिकास्नानमहंकरिष्ये।ब
क्रिस्यापर्वतानामितिमृत्तिकांप्रार्थ्ये।मानोरिषदितिखनित्वा।स्योनापृथिवीत्यादाय।आयनेतेपरायणे।इतिदू
र्वांनिधाय।गायत्र्याभ्युक्ष्य।त्रातारमितिपूर्वतः।यमायमंत्रमितिदक्षिणे।तत्त्वायामीतिपश्चिमतः।
वयंसोमेत्युत्तरतः।तत्सूर्यरोदसीत्युपरिष्टात्।अधःपश्यःस्वमोपरीसघः।सहस्रशीर्षा॰शिरसि।अक्षीत्यें
तेमुखे।ग्रीवाभ्यस्त॰ग्रीवायां।आंत्रेभ्यस्ते॰[illegible]हृदये।नाभ्यानाभिंत्व॰नाभौ।त्वमिंद्रसजोषसं॰बाह्वोः।
सोमानंस्वरणं॰कुक्ष्योः।यःकुक्षिःसोमपातमःकुक्ष्योः।वह्निनांपिता॰पृष्ठे।ऊरुभ्यांते॰ऊर्वोः।मेहनात्॰
जान्वोः।एतावानस्य॰पादयोः।यस्यविश्वानिहस्तयोः।अंगादंगात्॰सहस्रशीर्षेतिचसर्वांगे।अश्वक्रांते।
।शिरसिसदूर्वांमृदंनिधाय।हिरण्यशृंगं।यन्मेमनसा।नमोब्रह्मणे।अस्याशनात्।सोहमपापो।गंगागंगे
तिप्रार्थ्ये।सागरस्वननिर्घोष॰तीक्ष्णदंष्ट्रमहाकाय॰त्रिःस्नात्वा।आपोहिष्ठा।समुद्रज्येष्ठा॰तरत्सं
मंदी॰त्रिपिष्टदेव॰मार्जयित्वा।इमंमेगंगे॰इतिजलमालोड्य।ऋतंचेतिकृत्वास्नात्वा।ब्रह्मादयोयेदे
वाइतितर्पणंकृत्वा।सहस्तोमाइति।कश्यपोत्रिर्भरद्वाजोविश्वामित्रोथगोतमः।जमदग्निर्वसिष्ठश्च ११८
सप्तैतेऋषयःस्मृताः।इत्यरुंधतीसहितान्सप्तऋषीन्पीठेसंपूज्य।कश्यपंतर्पयामीत्येवंसर्वे

---

त्र।अत्रिं॰भरद्वाजं॰विश्वामित्रं॰गोतमं॰जमदग्निं॰वसिष्ठं।अरुंधतीइत्येवंतर्पयित्वा।सावित्रींतर्पयामीत्यादि
अग्निंतर्पयामीतिचोक्तदेवानांतर्पणंकृत्वा।अग्निस्तृप्यतु।इत्यादिब्रह्मयज्ञतर्पणंस्वपितृतर्पणंचकृत्वा।यमंत
र्पयामि।धर्मराजं॰मृत्युं॰अंतकं॰वैवस्वतं॰कालं॰सर्वभूतक्षयं॰औदुंबरं॰दध्नं॰नीलं॰परमेष्ठिनं॰वृकोदरं॰चित्रं॰
चित्रगुप्तं॰।इतितर्पयित्वा।यमोनिहंता॰इतिदशवारंपठंति।ततःशांतिसूक्तपर्जन्यसूक्तानि।ऋषयोवैसरस्वत्यामि
तिचपठंति।ततोविप्रभोजनं।अथोपाकर्म।।देशकालौस्मृत्वाममएतेषांब्राह्मणानांचाधीतानामध्येष्यमाणा
नांचछंदसांक्षीणवीर्यतानिरासेनाप्यायनद्वारापरमेश्वरप्रीत्यर्थंउपाकर्माख्यंकर्मकरिष्ये।इत्युक्त्वा।स्थंडिल
चारिणंगणेशपूजापुण्याहवाचनमातृकापूजनांदीश्राद्धानिकृत्वाग्निंप्रतिष्ठाप्य।समिद्धमादायचक्षुषीते
सावित्रींब्रह्माणमित्यादिछंदांस्यृषीनाज्येनेत्यंते।अग्निंअप्सुत्वणसूर्यामित्यादीन्।दधिसक्तुद्रव्येण।शे
षेणास्विष्टकृतं।इध्मसंनहनेनरुद्रंयज्ञोपवीतेनपरमात्मानमयासमग्निमित्यादिचक्षुषीते।सावित्र्यादि
नवभ्योहुत्वाग्निमीळइत्यादिमंडलदेवताभ्योहुत्वास्विष्टकृदंते।रज्जुप्रक्षेपंकृत्वादधिक्राव्णोनामदेवो
दधिक्रावानुष्टुप्।दधिसक्तुप्राशनेवि॰।ततोमार्जयित्वा।यज्ञोपवीतमादाय।यज्ञोपवीतमितिमंत्रस्यपरब्रह्मप
रमात्मात्रिष्टुप्।यज्ञोपवीतहोमेविनियोगः।परमात्मनइदं।ततोविप्रेभ्योयज्ञोपवीतानिदत्वास्वयंधारयि
त्वापूर्ववदुदारंभादिकृत्वा।उपाकृतावैदेवाः।इत्युक्त्वाजलंस्पृशेत्।ततअपाश्नेत्यादिनवाहुतीर्हुत्वाशेषंसा
मापयेत्।वेदारंभणतःपूर्वंसक्तुप्राशनंततःपरं।नैययोपवीतानिदद्यात्त्वचधारयेत्दधिसक्तुप्राशनंचमार्जनंत

Indira Gandhi National Centre for the Arts

तदनंतरं। यज्ञोपवीतहोमश्च तस्य धारणमेव च। वेदारंभस्ततः पश्चात्प्रायश्चित्तादिकं क्रमात्। इत्युपाकर्म। महा॰ना॰
प्र॰वि॰ अथ महानाम्न्यादिव्रतानि॥ आश्वलायनः। प्रथमे स्यान्महानाम्नी द्वितीये स्यान्महाव्रतं। तृतीये स्यादुपनिषद्
११८ गोदानाख्यं ततः परं। श्रीधरः। तिथिनक्षत्रवारांश्च वर्गो द्युनिरीक्षणं। चौलवत्सर्वमाप्नोति संगोदा
नव्रतेषु च। व्रतानाचरणं त्वेवं स्नात्वा कृत्वा स्नानं समाचरेत्। तेनेदं व्रतत्रयं कृत्वा गोदानं कुर्यात्। तत्रम
नव्रतेषु च। व्रतानामाचरणं त्वेव संवत्सरं कृत्वा स्नानं समाचरेत्। तेनेदं व्रतत्रयं कृत्वा गोदानं कुर्यात्। तत्र म
हानाम्नीव्रतं। इदमत्र गृह्यं। एतेन वापनादिपरिदानांतं व्रतादेशनं व्याख्यातमिति। व्रतादेशनं यद्दस्मा
च्छिष्याय व्याख्यातं संवत्सरमेवं व्रतं चरयित्वा व्रतमादिशेति। तत्राप्येतेन प्रकारेण वापनादिपरिदानांतं कार्यं। प
रिदानोत्तरवचनमुपरितेन तंत्रनिरस्यर्थमिति वृत्तिः। तेनेदं व्रतादेशनं जन्मतस्त्रयोदशे द्वादशे दिने कार्यं।
ततः संवत्सरपर्यंतं व्रतं कृत्वा संवत्सरांते महानाम्नीव्रतं कुर्यादित्युक्तं भवति। तत्र च। एतद्धि इदं ब्रह्मचारिण मनि
राकृतिनमित्यादिश्रौतसूत्रं मूलं ज्ञेयं। कारिकायां। महानाम्न्यादिकर्त्रे यंतत्काले तु व्रतत्रये। उक्तकाले दशम्यंतं
वापनाद्युपनीतिवत्। नवां मौंजीं नवं दंडं दत्त्वा स्विष्टकृदाद्यथ। संवत्सरं चरेदेवं पूर्णे हूतं तदयणे। शुक्लपक्षे बहिर्ग्रा
माद्विविक्ते देशमेत्य च। पूर्णपात्रनिधानांतमुपलेपादिपूर्ववत्। स्वस्थाले भूकृत्ये तु स्थौनि रूप्यप्रोक्ष्य तत्र च। ति
लानोप्य पचेत्स्थं मा चार्यापतिवेदयेत्। पृच्छति व्रतलोपांस्तु दत्ते प्रतिवचस्तथा। बहवो व्रतलोपाश्चेत्पुनराव
र्तयेद्व्रतं। लोपश्चापत्सु युक्तेषु पुनर्नो वर्जयिष्यते। तेनान्वारब्ध आचार्य इध्माधानादिपूर्ववत्। हुत्वाग्नावा ११८
ग्निरित्यादिमंत्रैश्च वा हुतीं तथा। ततः स्विष्टकृतो नद्येष्वष्टमौनिधायपच। एतमित्याद्यधानांतमाहुप्रेषमतः

परं। भुक्तवंतं तमाचार्यजलपूर्णांजलिं ततः। त्वं व्रतानां व्रतेत्यादि भुक्तवंतं दिवाकरं। उपस्थाप्याथ कुर्वीत मीलिता
क्षं च वाग्यतो। त्रिः प्रदक्षिणमावेष्ट्य वाससा से मुखे शिरः। उक्तैकरात्रमित्यादि प्रेषं स्विष्टकृदाद्यथ। आवश्यके
ष्य इतरच्छ्यनासनभोजनं। अकुर्वन्नेकरात्रं तु ब्रह्मचारी नयेदथ। ईशान्यां तु निधायाग्निमवागने स्थले
षु तु। ईशान्यग्नेरुपविशेदीक्षमाणस्तु तां दिशं। शिष्योपि स्वमुखं प्रक्षाल्याग्न्याचार्यौ प्रदक्षिणं। कृत्वाचा
र्यापसं मह्य पादौ तेषु तृणेषु तु। ईक्षमाणो दिशं प्रसगदक्षिणामुपवेश्य च। स्वेन पश्चेनत पश्चं संदधीत ततः परं।
मनसाहं महानाम्नीर्हे अनुब्रूहि तं गुरुं। पृच्छेत्तदहरुत्सन्नान्व्रतकोपांस्ततो गुरुः। स्वयं स्वमीलनं कुर्वन्
महानाम्नीश्चोग्गुरुः। त्रिः पुरीषपदे रुक्त्वा तस्याक्षीषं विमोचयेत्। ईक्षस्वेदर्कमीक्षेत मित्रस्येति द्वयेन तु।
संभादादिदिशो वीक्ष्याभित्रस्य च इति त्वथ। मित्रस्येति तृतीयेन पुनरादित्समीक्षयेत्। ईक्षणे के दिशा मंत्रा ब्र
ह्मचारिणा एव तु। मंत्रांते कर्मकर्तेयं सर्वत्र करणत्वतः। उक्त्वा चाग्नईले स्यादीन्मंत्रानस्मिमुपस्थपोत् अ
नुप्रवचनीयस्तु कार्यो यं स्वेद उच्यते। महानाम्नीभ्यः स्वाहेति सावित्र्याः स्थान इष्यते। अथात्रास्मत्पितृकृतोम
हानाम्नीव्रतप्रयोगः। पूर्वेद्युराचार्यो ब्रह्मचारिणा सह सुस्नातः देशकालौ संकीर्त्य मम ब्रह्मचारिणो महाना
म्नीरध्यापयिष्यन् तदंगत्वेन महानाम्नीव्रतसिद्धिद्वारा परमेश्वरप्रीत्यर्थं होमं करिष्य इति संकल्प्य। तदंगत्वेन
गणपतिपूजनादि नांदीश्राद्धांते कृते ब्रह्मचारिवपनस्नाने कृत्वाग्निं प्रतिष्ठाप्यास्मिन् महानाम्नीव्रतांगहोमे देवतापरि
ग्रहार्थमित्यादि चक्षुषी वर्जमाघारांते त्रिरग्निं पवमानं प्रजापतिं वायेन। शेषेण स्विष्टकृतमित्याद्याज्यसंस्कारो

Indira Gandhi National Centre for the Arts

ते। बटोः सूत्रं कटौ बध्वा। कौपीनं परिधाप्य। शुक्लवस्त्राणीति वाससः प्रादक्षिणं परिधाप्य। यज्ञोपवीतं मे — व्रत च०
प्र०वि० ते। बटोः सूत्रं कटौ बध्वा। कौपीनं परिधाप्य। शुक्लवस्त्राणीति वासः प्रादक्षिण्यं प्रादक्षिणं। यज्ञोपवीतमिति वा
११८ मंत्रेण दत्वा। उत्तरतः बटुमाचमय्य दक्षिणतउपविश्याघारांते। आज्यभागांते आयुर्दा इति सप्तभिः प्रजापते न त्वदिति वा
व्याहृत्या उपनयन चरुं सवितुर्दैवी मह इत्यादि वक्ष्यारणे कृत्वा देवस्य त्वेति संबुध्यं ते हस्तं गृहीत्वा। एवं सवि
तारं हस्तमग्रभीत। अग्निराचार्यस्तवेति गृहीत्वा। देव सवितरेष ते इत्यादि संदृष्ट्वा कस्य ब्रह्मचार्यसीति
काय० बटुं समर्प्य। युवा सुवासा इति हृदयमालभ्य। अग्निकार्यं कृत्वा मेखलादंडं च दत्वा जीर्णानि सद्यः
स्विष्टकृदादि शेषं समाप्य। ततो महानाम्नी व्रतं चरेति। गुरुणा प्रेषितश्चरिष्यामीत्युक्त्वा। अद्य पिक्षाकेश
धारणादेव व्रतं चरित्वा। तदंते मासमाहुर्गुरुः। अस्य ब्रह्मचारिणः महानाम्नी व्रतपूर्त्यर्थं होमं करिष्ये इ
त्याद्याग्निं प्रतिष्ठाप्य चक्षुष्यंते। अत्र प्रधानं। अग्निं। संराधनीं। अग्निं। असूयंतीं। अनुमतिं। प्रदातारं। इन्द्रं
अग्निं। वायुं। सूर्यं। कुसरान्नेन। शेषेण स्विष्टकृतमित्यादि नवदेवताभ्यः। बटोर्जनाय च तंडुलान्नि
रूप्य तिलान्क्षिप्त्वा। अतः स्थालीपाकइति बटुनोक्ते। ततः आचार्यः ब्रह्मचारिणं व्रतलोपानपुष्ट्या। तेन
व्रतलोपे उक्ते तदनुरूपं तद्द्वारा प्रायश्चित्तं कारयित्वा चक्षुष्यंते। चरुमवदाय। अग्ना वग्निश्चरति प्रवि
ष्ट ऋषीणां पुत्रो अधिराज एषः। तस्मै जुहोमि हविषा घृतेन मा देवानां मोमुहद्भागधेयं मो अस्माकं मो
मुहद्भागधेयं स्वाहा। अग्नय इदं। याति रश्चिनिपद्यते अहं विधरणी इति। तां त्वा घृतस्य धारया यजे संराधिनीम
हे स्वाहा। संराधन्या इदं। यस्मै त्वा काम कामाय वयं सम्राड्यजामहे। तमस्मभ्यं कामं दत्वाथेदं त्वं घृतं पिबा स्वा — ११८
हा। अग्नय इदं। अयं नो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिंदन्। अयं शत्रूञ्जयतु जर्हृषाणो यं वाजं जयतु
वाजसातौ स्वाहा। अग्नय इदं। असूयंत्यै वा अनुमत्यै स्वाहा। असूयंत्यै अनुमत्या इदं। प्रदात्रे स्वाहा। प्रदात्र इदं। इन्द्राय
इदं। भूर्भुवः स्वः प्रत्येकं मन्त्राद्यस्मिन्हुत्वा। सुचि स्विष्टकृते वदाय बर्हिषि निधाय। एतं स्थालीपाकं सर्वे मश्नाने
ति प्रेषितो बटुः। सर्वं प्राश्य आचम्य। आदित्य व्रतपूर्तये उपतिष्ठस्वेति प्रेषितो बटुः। त्वं व्रतानां व्रतपतिरसि व्र
तं चरिष्यामि तच्छकेयं तेन राध्यासमित्यादित्यायजलपूर्णाञ्जलिं दत्वोपतिष्ठेत। आचार्योपि तेन मंत्रेण
दित्यमुपस्थाय। बटुनाक्षिणि निमीलनं वा गन्नियमं च कारयित्वा। त्रयस्त्रिंशद्देवताः वेदत्रयं च स्मरन् बटो
मुखं सशिरः कर्णमहतेन वाससा वामकर्णमारभ्य त्रिरावेष्ट्य। त्रिरात्रं चैकरात्रं। एवं भूतो स्वपन् एव
ति प्रेर्ष्यो। स्विष्टकृदादि शेषं समाप्य। उक्तकालांते गते रुतर तेोसि दमुदकमंडलुं अश्मानं च निधाय। र
क्तां श्वेतां वा वत्सतरीं बध्वाग्निं प्रतिष्ठाप्य। पश्चिमे तृणेष्वेशानीमुखो गुरुर्नैऋतिमुखो बटुः। पञ्चसं
धाय महानाम्नीर्स्त्रो अनुब्रूहीति बटुनाप्रेषितो गुरुरक्षिणी संमील्य। विद्मा मघवन्विद इत्यादि ऋचः
त्वाध्येवं वा ध्यग्नारसादि नवं ब्रूयात्। बटुस्त्रिर्वदेत्। ततस्तास्यमुखवेष्टनमुक्त्वा दित्यमीक्षस्वेत्यु
क्ते। बटुर्मित्रस्य त्वा चक्षुषा प्रतीक्षे। मित्रस्य त्वा चक्षुषा समीक्षे। इत्येताभ्यामीक्षेत। मित्रस्य
त्वा चक्षुषानुवीक्षे। इति दिशानुवीक्ष्य। पुनरादित्यमीक्षस्वेत्युक्तो मित्रस्य त्वा चक्षुषा। [redacted] प्रतिपश्या

Indira Gandhi National Centre for the Arts

व्रा॰चतु॰

प्र॰चि॰ ११८

[illegible]मिथस्मान्द्रुक्षियंच रयंद्विभस्तं चक्षुषो हेति ऋछत्विति सर्यमीक्षेत। अग्न इत्यानम इत्यानमन्त्रऋषि
भ्यो मंत्रकृद्भ्यो मंत्रपतिभ्यो नमो वो अस्तु देवेभ्यः शिवा नः शंतमा भव सुमृडीका सरस्वति मा ते व्योम संदृशि। भद्रं कर्णेभिः। शन्न इन्द्राग्नी। सुत्रामाणं सुव्रतं। कया नश्चित्र। स्योना पृथिवि भवेति चाष्टर्मिस्पृष्ट्वा
वत्सतरीं गुरवे दत्त्वा। तं हुत्वा न स्विष्टकृतं चायित्वा महानाम्न्यध्ययनांगभूतं अनुप्रवचनीय होमं
करिष्ये। इत्युक्त्वा। उपनयनवदग्नि स्थापनादि आघारांते चक्षुषी वर्जे। सदसस्पतिं प्रथमां। महानाम्नी
भ्यः स्वाहेति द्वितीयां। ऋषिभ्यः स्वाहेति तृतीयां। हुत्वा शेषं समाप्या। त्रीन्विप्रान्संभोज्याचार्ये दक्षिणां दत्त्वा
स्तिं वाचयीत। इति प्रयोगचिंतामणौ महानाम्नीव्रतप्रयोगः। अथ महाव्रतं। आचार्यः स्वस्तिवाच
नादि होमशेष समाप्ति पर्यंतं महानाम्नीव्रतवत्कृत्वा संवत्सरपर्यंतं महाव्रतं चरेति ब्रह्मचारिणं प्रे
ष्य। तेन संवत्सरं व्रतं आचरिते ग्रामाद्बहिर्गत्वा। दर्भेषु प्राङ्मुख उपविश्य। महाव्रतं भो अनुब्रूहि
ति प्रेषांते। अथ महाव्रतमिसारण्यकं त्रिर्ब्रूयात्। ब्रह्मचारी तथैव वारत्रयमुक्त्वा। पूर्ववन्मंत्रत्रये
नादित्यावेक्षणं कुर्यात्। ततः अगद्धकादिभिर्मंत्रैर्द्वयो रपि भूमिस्पर्शः। ततो दिवा ब्रह्मौदनं पक्त्वा॥ अ
नुप्रवचनीयहोमे महाव्रताय स्वाहेति द्वितीयाहुतिः। शेषं प्राग्वत्। इति महाव्रतं। उपनिषद्व्रतेनु पूर्व
चरस्वस्तिवाचनादि होमशेषं समाप्य। संवत्सरपर्यंतं उपनिषद्व्रतं मा चरेति प्रेषांते। उपनिषदं भो अ ११८
नुब्रूहीति प्रेषांते। अथातः संहिताया उपनिषदिसारण्यकं त्रिर्वाचयेत्। उपनिषदे स्वाहेति शेषं पूर्ववत्।।

इति प्रयोगचिंतामणौ महानाम्न्यादिव्रतत्रयं॥ अथ गोदानं। तत्राग्न्यं। एतेन गोदानं षोडशे वर्षे केशांतकर्म
शद्धान् कारयेत् श्मश्रूणीहो इति श्रुंधिशिरो मुखं मा स्यायुः प्रमोषीरिति केशश्मश्रुलोमनखान्युदकसं
स्थानिकुर्वीति संप्रेष्य सापुत्र वाग्यतः स्थित्वा तुः शेषं माचार्यसमीपे वाचं विसृजेत् वरं ददामीति
गोमिथुनं दक्षिणा संवत्सरमादिश्यो इति। एतेनेति कृत्स्नोपदेशः। षोडश इति तृतीयस्यापवादः। अत्र मानु
रूपस्थे उपवेशनं न भवति। अबालत्वात्। केशशब्द इति जात्यैकवचनं। केशशब्दो विसर्पः। श्मश्रुशब्द
त्रितिबहुलं तु ब्यक्तिपरं। अदितिः केशान्। वप्तावपसि केशान्। दक्षिणे केशपक्षे इति त्रयः केशशब्दाः॥
तत्रां स्योविधिगतः। आद्यो मंत्रगतो। तेषु श्मश्रुशब्दः। तेन दक्षिणे श्मश्रुपक्षे साधितं भवति। श्मश्रु
णि हों इति। इति शिरउंदनस्यापवादः। शीतोष्णाभिरद्भिरबर्थं कुर्वीणोक्षणवन्कुशाली केशश्मश्रुलोम
६८ नखान्युदकसंस्थानि कुर्वीति। नापितप्रेषः। ततः स्नानं कृत्वा वाग्यतः स्थित्वा उपवेशनप्रतिषेधः। एव
मरुः शेषं स्थित्वा अस्तमिते आचार्यसमीपे वरं ददामीति याचं विसृजेत्। गोमिथुनं वरं दत्त्वा संवत्सरं व्रतमादिशेत्। ग
त्रौ व्रतादेशानुपपत्ते रपरेष्युर्व्रतादेश इति वृत्तिः। कारिकापि। गोदानं चौलवत्कार्यं षोडशाब्दे तदुच्यते। अंकोपवेश
नं नास्ति श्मश्रूणां वपनं भवेत्। पिंजूलादिनिधानं च श्मश्रुपक्षेषु वेदितः। निमार्जने विशेषे यं श्मश्रूणीति शि
रो मुखं। शासने नापितस्यायं विशेषप्रेष उच्यते। केशश्मश्रू लोमनखान्युदकसंस्थानि कुर्वीति। स्नात्वाथ वाग्यतः
स्थित्वाथहः शेषं नयेद्यः। आदित्ये स्तमिते वाचं विसृजेतां तिके गुरुः। उक्त्वा वरं ददामीति दद्याद्गोमिथुनं ततः।

११२

Indira Gandhi National Centre for the Arts

त्र०चि० १२० श्वः पूर्ववच्चूडावदेशो व्रतं संवत्सरं चरेत्। व्रतेष्वेतेषु सर्वेषु प्रसिद्धः केशधारणमिति। तेन द्वादशवर्षपर्यंतं ब्रह्म
चर्यं। तदुत्तरं वर्षत्रयं महानाम्न्यादिव्रतत्रयं। षोडशे च वर्षे गोदानमिति केचित्। तत्र संवत्सरपर्यंतं उपनिष
द्व्रताचरणे सप्तदशे गोदानं स्यात्। तेन महानाम्न्यादीनां नैव देशत्वा द्वादशवर्षेष्वेवानमिति धिगांत
भावः। गोदानं तु षोडशहस्यमेव पक्षो वृत्तिकारस्य संमतः। शौनकः। गोदानं नाम यत्प्रोक्तं चतुर्थं व्रतमस्य
तु। महानाम्न्यादिभिः सार्द्धं पौर्वापर्यं न विद्यत इति। तथा च गोदानं नाम चतुर्थं व्रतं। समावर्तनं त्वेतस्मादि
नं। अथ प्रयोगः। षोडशे द्वे गुरुर्देशकालौ संकीर्त्यास्य कुमारस्य बीजगर्भसमुत्पन्नैनोनाशार्थं गोदानं करिष्ये।
तदंगत्वेन गणेशपूजनं पुण्याहवाचनं मातृकापूजानांदीश्राद्धानि कृत्वाग्निस्थापनाद्याघारांते त्रिरग्नये पवमान
य प्रजापतये च हुत्वा उष्णेन वाय उदकेनेहीति शीतोष्णजले कद्देशं नवनीतेन दध्ना वा संयोज्यादितिः श्मश्रूणि व
पत्वाप उंदंतु वर्चस इति त्रिभिर्मंत्रैर्दक्षिणतः श्मश्रूणि क्लेदयित्वा। दक्षिणश्मश्रुपक्षे। ओषधे त्रायस्वैनमिति त्रीणि कु
शपत्राणि अग्राण्यग्राणि निधाय। स्वधिते मैनं हिंसीरिति क्षुरं निधाय। येनावपदिति छित्वा शमीपर्णैः सह मात्रे द
त्त्वा तान्यानडुहे गोमये निदध्यात्। अत्रर्त्वं उपवेशनाभावे पिपिंजूलनिधानार्थं कर्तुर्दक्षिणतो माता तिष्ठेत्। एवं
येन धाता इति द्वितीयं। येन भूयश्च रात्र्यामिति तृतीयं। त्रिभिर्मंत्रैश्चतुर्थं। एवं वामे त्रीणि छित्वा। पश्चात् क्षुरेण वप्ता
वपति श्मश्रूणि। गुंधि शिरो मुखं मामा आयुः प्रमोषीरिति क्षुरधारां निमृज्य। शीतोष्णाशिरः दिन वर्जं कुर्या गोदानव
त् कुशलीकेशश्मश्रुलोमनखान्युदकसंस्थानि कुर्वीत। नापिताय प्रेषं दत्वा वपनांते स्नात्वा स्विष्टकृदादिशेषं समा १२०

त्रो० ३ प्य। धान्यपात्राणि नापिताय दद्यात्। मौनी वटुः। सायं संध्योत्तरं गुरवे वरं ददामीति वाचं विसृज्य तस्मै गोवरं दत्वा
परेद्युः संवत्सरं गोदानव्रतं चरेत् आचार्येण प्रेषितः केशश्मश्रु वापयित्वा तच्चरेत्। इत्यनंतभट्टकृते प्रयोगचिंतामणौ
गोदानं। अथ समावर्तनं। याज्ञवल्क्यः। गुरवे तु वरं दत्वा स्नायीत तदनुज्ञया। वेदं व्रतानि वा पारं नीत्वा ह्युभयमे
व वा। यद्यपि एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत्। पृथिव्यां नास्ति तद्द्रव्यं यद्दत्वा त्वनृणी भवेदिति हारीतोक्ते
र्वेदाक्षरस्य मूल्याभावस्तथापि अपूर्वं गुरवे किंचिदुपकुर्वीत धर्मवित्। क्षेत्रं हिरण्यं गामश्वं छत्रोपानहमंततः इ
ति। मनुवचनाद्यत्पूर्वं किंचिद्वस्तु गुरवे वररूपं कल्पयेत्। छंदोगपरिशिष्टे तु। गौर्वा शिष्टतमा विप्रैर्वेदेष्वपि
निगद्यते। न ततोन्यद्वरं तस्मात्तस्माद्गौर्वर उच्यत इत्युक्तं। इयं च गुरवे वररूपा दक्षिणा कलौ निषिद्धा। नवो
ढदशाहं च दक्षिणा गुरुचोदितेति। कलिवर्ज्येषूक्तेः। सुरेश्वरः। सौमभानुजयोर्वारे नक्षत्रे च ध्रुवोदिते।
ताराचंद्रविशुद्धौ स्यात्स्यात्समावर्तनक्रिया। बौधायनसूत्रे। रोहिण्यां तिष्ये उत्तरयोः फल्गुन्योर्हस्ते चित्रा
यामैंद्रे विशाखयोर्वा स्नायात्। वसिष्ठः। स्नानं मध्याह्नकाले तु होरायां कारयेच्छुभं। पूर्वाह्ने तदभावे तु
कुर्यात्स्नानं यथाविधि। सर्वे ऋतवो विवाहस्येति धर्मात् दक्षिणायनेविवाहस्तदा समावर्तनमपि तत्रैव कार्यं अ स्नात्वा
न्यथा अनाश्रमी न तिष्ठेदिति निरोधापत्तेरिति निर्णयसिंधौ पितृचरणाः। इदमत्र तत्त्वं। विद्यांते गुरुमर्थेन
निमंत्र्य कृतानुज्ञातस्य वा स्नानमिति अस्यार्थस्तु वृत्तिकृता उपनयनप्रकरण एव प्रसंगात्प्रतिपादितः। तथाहि।
स्नानं त्रिविधं। विद्यास्नानं। व्रतस्नानं। विद्याव्रतस्नानमिति। यः प्राक् द्वादशवर्षेभ्यो वेदमधीत्य स्नाति स विद्या
रक्

Indira Gandhi National
Centre for the Arts

प्र॰चि॰
१२१ स्नातकः। यस्तु द्वादशवर्षाणि ब्रह्मचर्यं कृत्वा अनधीतएवस्नाती स व्रतस्नातकः। यस्तु द्वादशवर्षाणि ब्र समावर्तन
ह्मचर्यं कृत्वा अधीत विद्यस्सन् स्नाति। स विद्याव्रतस्नातकः। व्रतस्नातकोपि नमा त्रांते स्नानं कुर्यात्। किं
तु मध्ये वेदमुत्सृज्यारण्यकमधीयस्नायात्। आरण्यके। वेदमनधीयन् स्नातकोऽसमवतीति स्नाने प्रा
धान्येनारण्यकाध्ययनस्यैव स्नाननिमित्तत्वाभिधानात्। तेनारण्यकाध्ययनेन विना समावर्तनं न
भवत्येवेति तत्त्वाशयः। विद्यास्नातकोपि न वेदमधीत्य स्नायादिति वेदमात्राध्ययनांते समावर्तनं कुर्या
त्। किं तु मीमांसाध्ययनोत्तरं। स्वाध्यायोध्येतव्य इत्यध्ययनविधेर्दृष्टार्थत्वेनार्थज्ञानार्थं मीमांसापर्यं
तमध्ययनविधानेन तत्पर्यंतं ब्रह्मचर्यस्य नियतत्वादिति वार्त्तिकेषु वर्णितं। अत्र संपादयस्त्याप्य्या हरदत्तकारः। अ
थैतान्युपकल्पयीत समावर्तमानो मणिं कुंडले वस्त्रयुग्मं छत्रमुपानद्युगं दंडं स्रजमुन्मर्दनमनुलेपनमांजन
मुष्णीषमित्यात्मने चाचार्याय च यद्युभयोर्न विंदेताचार्यायैवेति। शौनकोपि। आत्मने गुरवे चैव स्याद्दलाभे गुर
वे पिवा। मण्याद्युष्णीषपर्यं तं द्रव्याणामुपकल्पनमिति। इदं च स्वयमेव कुर्यात्। समावर्तमानस्य पि
ताद्वृद्धावचनाच्चेति वृत्तिकारः। शौनकः। कुर्वीत स्वयमेवेदं कर्माचार्ये निपेक्षकः। विधायान्यु यथाद्ध
र्वे द्युरपरेहनि। प्रातः समिधमाधाय कृतस्वस्त्ययनो द्विजैः। यस्य यज्ञियवृक्षस्य स्वया सापेक्षया स्थितिः। प्रा
गुदीच्यां दिशि भवेत्तस्य च प्रागुदक् भवेत्। पाशात्वात् द्वा मे कांक्षित्वा समिधमाहरेत्। आर्द्रां छिंद्यात्स समिधं
यस्त्विच्छेद्ब्रह्मवर्चसं। शुष्कां छिंद्यात्स समिधं यस्यान्नाद्यकामता। स त्वदृश्यशुष्कां समिधमाहरेदुभयेच्छया। १२ १२१


स्पर्शवर्जिते देशे निधायोपरि कुत्रचित्। दत्त्वान्नं गां विप्रेभ्यः कर्म गोदानिकं चरेत्। तेनात्र स्वयमेव नांदीश्राद्धं कुर्यात्।
यत्तु स्वपितृभ्यः पितादद्यात्सुतसंस्कारकर्मसु। पिंडानोद्वहनात्तेषां तस्याभावे तु तत्क्रमादिति छंदोगपरिशिष्टवचा
ने नाविवाहप्राचीनसुतसंस्कारेषु पितुः कर्तृत्वमुक्तं तद्वृद्धचातिरिक्तानामितिस न वद्यं। अपरार्केपि समावर्तने ब्र
ह्मचारी स्वयमेव नांदीश्राद्धं कुर्यादित्युक्तं जयंतः। समिधमाहृत्य भूमे हृपरि निदधाति। अथ गां दत्त्वा ब्राह्म
णभोजनं करोतीति। कारिकायां। प्रागुदीच्यां दिशं गच्छेत्तस्यां वै यज्ञियस्य तु। शाखेन शाखीं गतां तस्याः छित्वा
प्रादेशसंमितां। अहृतस समिधं भूमेरत्यत्र निदधाति तां। दत्त्वा गां भोजयेद्विप्रान् गोदानोक्तं करोति यथात
मिन्निधानोत्तरं च अग्निस्थापनपूर्वकं चौलोक्ता॥ आज्याहुती हुत्वा चौलवत् श्मश्रुवापनं कुर्यात्। न दुक्तमा
श्वलायनस्मृतौ। कृत्वाभ्युदयिकं श्राद्धं उपलेपादिपूर्ववत्। निधायोपरि समिधमन्वाधानादिकं तथा। चौ
लोक्ताज्याहुतीर्हुत्वा श्मश्रुवापनकं तथेति। कारिकायां। स्नात्वा गर्येदित्यादि न कार्यमिह कर्मणि। पदान्य न
न्यानि वक्ष्यत्र वा स्वं त्रायस्वमातिति। मामाहिंसीरिति ब्रूयाद्यथा समितिचापरं। यथोसदिति वाक्यं य
था समितिनिर्दिशेदित्यर्थः। तेनमआयुषे सेवमुद्धं मंत्र द्वयेपि च। ममआयुरिति त्वन्यत्सर्वं गोदानव
द्भवेत्। करंजबीजमंत्रे कं पिष्टेनोन्मज्यते न तु। शीतोष्णैः स्नानआचार्यो वन्हेर्गत्वांतिके पुनरिति। शौन
कोपि। करंजेनैकबीजेन सपिष्टेन जलेन तु। उन्मज्यांगं ततः स्नायान्मंत्रैः शीतोष्णवारिभिः। जयंते
न तु कारंजकोशेयं वा। एकं बीजमाद्यमित्युक्तं स्नानानंतरं च पुनं। वस्त्राणीति वासोद्वयं मंत्राद्ध साष्टलाद्धिर। न

Indira Gandhi National
Centre for the Arts

प्र०वि० १२२ वम्य। अश्मनस्तेजोसि चक्षुर्मे पाहीति आवृत्या अंजनेन सव्यदक्षिणे नेत्रे अंजयेत्। तथा च कारिकायां। पुनरित्यन्त समावर्तन०
यावस्त्रेआच्छाद्यावर्तये त्विमं। मंत्रावृत्तिरियं दृष्टा इतो नारायणस्य तु। आचम्य चाश्मनस्तेज इत्युक्तेस्य मनी
क्षणं। एतेनैव तु मंत्रेण ततो दक्षिणमीक्षणं। अंजीत प्रथमं सव्यं मसीति प्राह वृत्तिकृत्। शौन केन तु। स्ना
त्वा चैव तत्र पार्श्वस्थो युवं वस्त्राणि पीवसा। इत्याद्यं सकृदुच्चार्य ततो वस्त्रयुगं नवं। वसित्वोदकमाचम्य गृ
हीत्वा पाणिनांजनमित्यादिना सकृदेव युवं वस्त्राणीति मंत्र उक्तः। जयंतेनापि मंत्रः सकृदेवोक्तः। इतो तु प्रति वस्त्रे
मंत्रावृत्तिरित्युक्तं। अंजनं चैव पूर्वं समस्य। सर्वं हि मनुष्याः। पूर्वमंत्र इति श्रुतेः। ततः अश्मनस्तेजोसि श्रो
त्रं मे पाहीति मंत्रावृत्या दक्षिणसव्ययोः श्रोत्रयोः कुंडले दत्वा। कुंकुमेन पाणिभ्यां मुखमंगानि चानुलिंपेत्। न
तथा च कारिकायां। कुंडले चाश्मनस्तेज इति श्रोत्रं च दक्षिणं। प्रागलंकृत्य सव्यं तु पश्चात् मंत्रः सएव तु। कुंकु
माद्यनुलिप्ताभ्यां पूर्वमाननं। अनुलिप्येतरांगानि पश्चात्प्रक्षालयेत्करौ। कुंडलं च मणियुक्तं ग्राह्यं। श्रोत्रं
मे पाहि पर्यंतमश्मनस्तेजसादिकं। मंत्रमुक्त्वा क्रमाद्धृत्वा मणिबद्धं तु कुंडलं च मणियुक्तं ग्राह्यं। [redacted] पाहिरत्नाग्रे शौनकवचनात्। स्वर्णमयमेव कुंड
लमिति वृत्तिकारः। कुंकुमाद्यनुलेपनेन पाणी प्रलिप्य मुखमग्रे ब्राह्मणोनुलिंपेत्। पश्चादपरं गात्रं। तत्र वचनं।
मुखमग्रे ब्राह्मणोनुलिंपेत्। बाहू राजन्यः। उदरं वैश्यः। उपस्थमस्य स्त्री सरणजीविनः। अनुलिंपेयुरिति शेषः
सरणेन शीघ्रगमनेन जीवंतीति सरणजीविनः। तेन समावर्तनं क्षत्रियवैश्ययोः स्त्रीणां शूद्राणां च सर्वति १२२

अनुलिप्य हस्तौ प्रक्षाल्य स्रजं गृहीत्वा। अनार्त्तेति मंत्रेण शिरसि। देवानां प्रतिष्ठेस्थ इति सकृदुक्तेन मंत्रेणोपानहौ
होदिवः छन्ना सीति छत्रं। वेणुरसीति वैणवं दंडं च बिभृयात्। तथा च कारिकायां। अनार्त्तासीति मंत्रेण बध्नाति
शिरसि स्रजं। सकृदुक्तेन मंत्रेण देवानामित्युपानहौ। आस्थाय छत्रमादत्ते दिवः छन्नासि मंत्रतः। गृहीत्वा वै
णवं दंडं वेणुरस्यादि मंत्रत इति। शौनकोपि। अस्या नुलेपनालिप्तपाणिभ्यां प्रथमं मुखं। अनुलिप्येतरांगानि ततः
संक्षालयेत्करौ। ततो नान्तीस्यनार्त्तोहं भूयासमिति मंत्रतः। स्रजं तु मूर्ध्नि बध्नीयान्न तु मालेति तां वदेत्।
तां स्रजं चेत् प्रमादेन ब्रूयुर्मालेति केचन। तदेवतां स्रगित्येव मभिधायद्विजोत्तमैः। ततो मूर्ध्नि तु बध्नी
यात्स्रजं तामवधानतः। यो देवानां प्रतिष्ठेस्थ इत्यादिखिलसंभवः। मंत्रं तं सकृदुच्चार्य अथारोहेदुपान
हौ। दक्षिणं च तथा सव्यं समारोहेदुपानहं। ततः छत्रं दिवः छन्नासीति मंत्रेण धारयेत्। वेणुरस्यादि मंत्रेण वैणवं
दंडमुद्गृहेदिति। सूत्रेति। अनार्त्तोस्यानार्त्तोहं भूयासमिति स्रजमपि बध्नीत। न मालेति। तां मालेति चे ब्रूयुः स्रगि
त्यभिधापयीत। देवानां प्रतिष्ठेस्थः सर्वतो मा पातमित्युपानहावास्थाय दिवः छन्नासीति छत्रमादत्ते वेणुरसि वान
स्पत्योसि सर्वतो मा पाहीति वैणवं दंडमिति। ततो दृढधारणानंतरमायुष्यमिति सूक्तेन सौवर्णमणिं कंठे बध्वा।
उष्णीषं च बध्वा उपानहौ संस्थानातिष्ठन्समिधमादध्यात्। तदुक्तं गृह्ये। आयुष्यमिति सूक्तेन मणिं कंठे प्रतिमुच्योष्णी
षं कृत्वोपानहौ सत्वातिष्ठन्समिधमादध्यात्। सूक्तेनेति गृहणमेकैकमंत्रनिवृत्यर्थं तेन तेजो मेषस्य दिवलत्वे
पि सूक्तग्रहणं। कुत्रांशकः। वा कस्यापरिपूर्णत्वात्। मणिः सुवर्णमयः। उष्णीषं कृत्वेति अहतेन वाससा शिरो वे

Indira Gandhi National
Centre for the Arts

प्र०वि० १२२ भूयिस्त्वेसर्थः। अत्रांति छन्निति ग्रहणात्स्य त्रासीत स्य कर्मणोणि भवंतीतिवृत्तिः। कारिकायां। आयुष्यमितिसूक्तेन मणिं कं समावर्तन०
ठेनिबध्नीच। सुवर्णमयश्चात्र मणिरित्याहवृत्तिकृत्। नवांबरेण संवेष्ट्य शिरोथोपानहौ सज्जेत्। आहृतां समि
धंतिष्ठन्नग्ना वाधाय मंत्रत इति। आश्वलायनस्तू तौ तु। अंजनं कुंडलादीनि दंडांतानि च धारयेत्। आयुष्यमि
ति वै सूक्तं पठन्नाच्छेछिवालयं। पुनरागत्य संतिष्ठेदाधाय समिधं तामिति उक्तं। समिन्निधान मंत्रश्च सूत्रे।
स्यतं निंदाचभिधाच्छ्रद्धा प्रज्ञा च पंचमी। इदं रक्तमधीतं च कृतं स संश्रुतं व्रतं। यदग्ने संद्रस्य स प्रजापतिक
स्य स ऋषिकस्य स ऋषिराजन्यस्य सपितृकस्य सपितृराजन्यस्य समनुष्यस्य समनुष्यराजन्यस्य साकाशस्य सातीकाश
स्य सानूकाशस्य सप्रतीकाशस्य सदेवमनुष्यस्य सदेवगंधर्वाप्सरस्कस्य सहारण्यैश्च पशुभिर्ग्राम्यैश्च यन्म आत्मन आ
सनिव्रतं तन्मे सर्वव्रतमिदमहमग्ने सर्वव्रतो भवामि स्वाहेति। अग्नय इदमिति त्यागः। ततउपविश्य ममाग्न इति प्रत्य
चं दश समिधोभ्यादध्यात्। स्पृतं च मे अस्तृतं च मे तन्म उभयव्रतमिति द्वादशोह्लाय दग्न इत्यादि पठेत्। उपानहौ विमुच्य
समिधाधानं कार्यं। तथा च गौतमः। सोपानत्कः आसनाभिवादननमस्कारान्वर्जयेदिति। देवतानमस्कारस्यापि नि
षेधः किं पुनर्होमादीनां ममाग्ने वर्च इति खिलस्यापि ग्रहणं तेन अर्वाचम्निं दृमिति खिलकीं ऋचमपि पठेत्। अथै
तस्य समाम्नायस्ये सत्र समाम्नाय ग्रहणस्य वितानशेषत्वात्। सूत्रे च खिलानां पाठात्। तेन ऋगंते स्वाहाकारं कुर्व
न्नुपविश्याऽऽदध्यात्। आदध्यादिति वचनं पूर्वस्याधिकारनिवृत्त्यर्थं। तेनोपविश्यादध्यान्नतिष्ठन्निति। ततः स्विष्टकृदा
दिशेषसमाप्तिरितिवृत्तिः। कारिकायामपि। उपविश्य दशादध्याद्न्याः प्रादेशसंमिताः। अत्रोपवेशनं प्राह वृत्तिकारः स १२२
हेतुकं। ममाग्नेदशाभिः कुर्यात् स्वाहाकारमृगंततः इति। प्रयोगपारिजाते तु। उच्चार्य प्रत्यूचं तिष्ठन्नादध्यात्समिधो

=नैव बहूच्चः। उदुत्तमं मुमुग्धीति मंत्रेण तेन मोचयेत्। कौपीनाजिनदंडाद्यपि विसृजेत्। इति होमांतोऽ=
दश। अत्र प्रत्यृचमिस्सुक्ते: स्वाहाकारान्तुरेव तु। ऋगंते समिधं क्षिप्त्वा पश्चात्स्वाहे सुदीरयेदिति शौनकवचनात्तिष्ठताद
श समिधोभ्याऽऽदध्याः। ऋगंते च समित्प्रक्षेपं कृत्वा पश्चात्स्वाहाकार इत्युक्तं। जयंतोपि। ममाग्ने वर्च इति दश समि
धोभ्याऽऽदधातीति। ततउपविश्य स्विष्टकृदादि कुर्यादित्याह। अत्र वृत्त्युक्तपक्ष एव बहुसंमतः। आश्वलायनः।
समावृत्तस्य वै मौंजीहोमांतो विधिः। कारिकायां। ततः संकल्पयेन्नक्तं नस्नामी सुत्तराण्यपि। दास्यंति मध्युप
कैश्चैत्तत्रैतां रजनीं वसेत्। इदमत्रगृह्यं। तस्यैतानि व्रतानि भवंति॥ न नग्नां स्त्रियमीक्षेतान्यत्र मैथुनाद्वर्षति न
धावेन्न वृक्षमारोहेन्न कूपमवरोहेन्न संशयमभ्यापद्येतेति। अत्र तस्य व्रतमिति भावरूपव्रतोपक्रमान्यथा
नुपपत्त्यानक्तं स्नानातिरिक्तेकरिष्ये। इत्येवंलक्षणपापर्युदासेन संकल्प एव विधीयते। न त्वयं निषेधः। तथा त्वे व्रतोपक्र
मबाधापत्तेः। संकल्पस्य च फलमेतावता हे नसा अप्रुक्तोऽस्मवृत्ती सर्वं वादिकः। प्रतिष्ठान्यायेनाघक्षय इति चतुर्थे
स्पष्टं। पारिजाते संग्रहेपि। एतानि वक्ष्यमाणानि शास्त्रतो विहितानि तु। आधरीरं व्रतानीह स्नातकस्य भवंति च।
स्वजायामपि नग्नां तु नेक्षेतान्यत्र मैथुनात्। न चान्यत्र प्रसंगोस्ति मातृतुल्याः परस्त्रियः। अन्यांश्च प्राणसंदेहाना
भ्यापद्येत कर्हिचिदिति। एतच्च समावर्तनं महानाम्न्यादिव्रतचतुष्टयलोपपक्षे तन्निमित्तं प्रायश्चित्तं कृत्वा
कार्यं। तदाह शौनकः। व्रतानि विधिवत्कृत्वा स्वशाखाध्ययनं चरेत्। अकृत्वाप्य सते तेन स पापी विधिघात
कः। प्रत्येकं कृच्छ्रमेकैकं चरित्वाप्याहुतीः शतं। हुत्वा चैव तु गायत्र्या स्नायादित्याह शौनक इति। तथा शौचा
१ निमित्त दि ब्रह्मचारिव्रतलोपे प्रायश्चित्तं च कुर्वीत। समावर्तनं कार्यं। तदाह बोधायनः। शौचाचमनसंध्यावंदन

Indira Gandhi National Centre for the Arts

प्र॰चि॰ सिक्षाग्निकार्यराहित्यश्रूद्रादिस्पर्शकौपीनकटिसूत्रयज्ञोपवीतमेखलादंडाजिनयज्ञोपवीतादिवा समावर्त॰
१२८ स्वाघछत्रधारणपादुकाध्यारोहणमालाधारणोवर्तनानुलेपनांजनजलक्रीडाद्यूतनृत्यवाद्याघ्राणलिति
पारवंजादिसंभाषणादिदोषपरिहारार्थं ब्रह्मचारी कृच्छ्रत्रयं चरेत्। महाव्याहृतिहोमं पाहिहोमं च कुर्यादिति
पाहिहोममंत्रमस्तु। ओदोव्यस्तसमस्ताभ्या इतिभिश्च तस्य आज्याहुतयः। ततः। भूरग्नयेच पृथिव्यैच मह
च५ तेचस्वाहा। पृथिव्यैमहत इदं। भुवोवायवेचांतरिक्षायमहतेचस्वाहा॥ वायवेंऽतरिक्षायमहत इदं। सुवरादि
त्यायचदिवेचमहतेचस्वाहा। विश्ववेदसेग्नय इदं। यत्तेपाहिविश्वावसोस्वाहा। विश्वावसव इदं। सहस्रेणानिवर्त
स्वाग्नेपिन्वस्वधारया। विश्वन्निया विश्वतस्परि स्वाहा। अग्नय इदं। अत्र समस्तमाहुतिभिरेकाहुतिः।
एवं त्रयोदशाहुतयः। एतद्ब्रह्मचर्यलोपे प्रायश्चित्तं। धर्मलोपवाहुल्येतु। तं बोधियाजपेन्मंत्रं लक्षं चेवशि
वालये। ब्रह्मचारीस्वधर्मेषु न्यूनं चेत्पूर्णमेवतत्। इतिऋग्विधानोक्तं प्रायश्चित्तं तेयंमिति प्रयोगपारिजा
तो। समावर्तनोत्तरं च पूर्वमकृतानां त्रिरात्रमाशौचं कार्यं। तेहमनुः। आदिष्टीनोदकंकुर्यादाव्रतस्यसमाप १
नात्। समाप्ते तूदकं दत्वा त्रिरात्रमशुचिर्भवेदिति। आदिष्टी ब्रह्मचारी। तेन ब्रह्मचर्यमध्ये यदि कश्चि
न्मृतस्तदा विवाहस्तस्य कार्यो न प्रथाना। अनंतनु त्रिरात्राशौचं। तत्राति त्रांतासौचाभावादिपितृ च
रणाः। यस्तुतस्तु पूर्वमृतानां पि कृत्स्नेनैवाशौचं। तथाच छंदोगपरिशिष्टे। पितुर्यदिमृतेनैषां दोषो
भवति कर्हिचित्। आशौचं कर्मणोंतेस्यात्र्यहंवा ब्रह्मचारिणामिति। तथा स्नातकस्यापि दोषमा १२८

ह्व्यासः। यज्ञोपवीतद्वितयं सोदकं च कमंडलुं। छत्रं चोष्णीषममलं पादुके चाप्युपानहो। रौक्मे च कुंडले वेदः कृत्तकेश मंड
नखः शुचिः। वेदोदर्भबटुः। इदं च कमंडलुधारणं कलौ निषिद्धं। सत्रदीक्षा च सर्वेषां कमंडलुविधारणं। महाप्रस्थान
गमनं गोसंज्ञप्तिश्च गोसव इति हेमाद्रौ निबंधात्। अत्र कमंडलुः कांस्यो मृन्मयो वा। ताम्रादिमयस्य तु निषेध
इति। सांप्रदायिकाः। मनुः। उपानहौ च वासश्च धृतमन्यैर्न धारयेत्। उपवीतमलंकारं स्रजं करकमेव च। अ
थ धर्माः मन्वादिस्मृतितो ज्ञेयाः। इतिश्रीमज्जगद्गुरुकमलाकरभट्टात्मजानंतभट्टसूनुरामकृष्णसू
नि समावर्तनं। अथ समावर्तनप्रयोगः। बटुव्रतचतुष्टये लोपे निमित्तमेकैकं कृच्छ्रं तथाशौचाचमन सं
ध्याभिक्षाग्निकार्यराहित्यश्रूद्रादिस्पर्शदिवास्वापछत्रपादुकादिधारणमालोद्वर्तनजलक्रीडाद्यूतनृत्य
पारवंजादिसंभाषणादिदोषपरिहारार्थं च कृच्छ्रत्रयं कृत्वा महाव्याहृत्यादिहोमं कुर्यात्। यथा। अग्निं प्रतिष्ठाप्य
अन्वाधानं कृत्वा। ॐ भूः स्वाहेति व्याहृतिचतुष्टयहोमः। ततः। ॐ भूरग्नयेच पृथिव्यैचमहतेचस्वाहा। अग्न
ये पृथिव्यैमहत इदं। भुवो वायवेचांतरिक्षायचमहतेचस्वाहा। वायवेंऽतरिक्षायमहत इदं। सुवरादि
त्यायचदिवेचमहतेचस्वाहा। आदित्यायदिवेमहत इदं। भूर्भुवः स्वश्चंद्रमसेच नक्षत्रेभ्यश्चदिग्भ्य
श्चमहतेचस्वाहा। चंद्रमसे नक्षत्रेभ्यो दिग्भ्यो महत इदं। ततः पाहिहोमः। ॐ पाहिनोअग्नएनसे स्वा
हा। अग्नयइदं। पाहिनो अग्नेविश्ववेदसेस्वाहा। विश्ववेदसेग्नय इदं। यत्तेपाहिविश्वावसोस्वाहा। वि
श्वावसवइदं नमम। सर्वंपाहिशतक्रतोस्वाहा। शतक्रतव इदं। पुनरूर्जा निवर्तस्वपुनरग्नइषायुषा।

Indira Gandhi National
Centre for the Arts

प्र॰वि॰ १२५ पुनर्नेः पाः प्रहूसः स्वाहा। अग्नय इदं। सहस्त्या निवर्त्तस्वाग्ने पिन्वस्व धारया। विश्वप्स्निया विश्वतस्परि स्वा समावर्त्तन
हा। अग्नय इदं। भूर्भुवः स्वः स्वाहा। प्रजापतय इदं। ततो होमं समाप्य। गवानुरूपं ततो ब्रह्मणपादीन्येकादश
सेपाद्य। देशकालौ स्मृत्वा मम गृहस्थाश्रमांतरप्राप्त्यर्थं समावर्त्तनं करिष्ये। इत्युक्त्वा। स्वस्तिवाचन
नांदीश्राद्धं स्वयमेव कृत्वा सपत्रां यशिम समिधमनु परिनिधाय। अग्निं प्रतिष्ठाप्याघारौ तेत्रि रग्निं पवम
नं प्रजापतिं वाज्येन। अग्निं सपत्रांध्वे समिधं विश्वान्देवा नूधा समिद्धिः। शेषेणास्विष्टकृतमित्यादि अ
पातंते। अग्न आयूंषि॰। अग्नि ऋषिः। अग्नेपवस्व॰। प्रजापतये चरुं त्वा। उष्णेन वाय उदकेनेहीति शीतो
ष्णा अप एकीकृत्य। तदेकदेशेन। अदितिः श्मश्रूणि वपत्वित्यादि दक्षिणे। ॐ ओषधे त्रायस्व मां। स्व
धिते मा मा हिंसीः। येनावपत्। वपतेदं मम आयुष्म। जर॰ मात्रे प्रयच्छतीत्यादि। ओषधे॰ येनभ
ता॰ ओषधे त्रा॰ येन भूयश्च रात्र्यां॰ सर्वैर्मंत्रैश्चतुर्थं। एवमुत्तरतस्त्रिः कृत्वा। पश्चात्क्षुरेण वपति श्मश्रू
णि। शुंधि शिरो मुखं मा न आयुः प्रमोषीः। शीतोष्णाभिरित्यादि कुशलीकुर्वते श्मश्रूणीत्युक्त्वा। केशश्मश्रू
लिधापयित्वा ॐकारं जे कृत्वा जपित्वेनोद्धर्संस्नात्वा। पुवं वस्त्राणीति मंत्रावृत्त्या वासो दूर्यष्ट्वा छिन्ना चम्ये।
अश्मनस्तेजोसि चक्षुर्मे पाहि। त्वावृत्त्या अंजनेन सममदक्षिणनेत्रे। अं६॰ त्वा। अश्मनस्तेजोसि श्रोत्रं मे
कुंडले पाहीति मंत्रावृत्त्या श्रोत्रयोः। कुंकुमाक्तपाणिभ्यां मुखमेगात्रि वलिप्वा हस्तौ प्रक्षाल्य। अन्नातेस्य नातौ
।हत्वा हृस्वमासमिति शिरसि स्रजं बध्वा। देवानो प्रतिष्ठस्वः सर्वतो मा पातमिति सकृदुक्तेनोपानहौ। द्विवः १२५

नाभितायपात्रिलिहत्वा

छत्रासीति छत्रं। वेणुरसि वानस्पत्योसि सर्वतो मा पाहीति वेणवं दंडं धृत्वा। आयुष्यं वर्चस्यमिति सेकादशार्धेन स्त्र
केन कुंडे मलिप्त्वा। तूष्णीमुष्णीषेण शिरः संवेष्ट्य। आयुष्यं वर्चस्यमिति सक्तं पठन् बहिर्गत्वोपानहौ सत्कृ
स्थापित समिधं गृहीत्वा अग्नावादध्यात्। स्मृतं च मऽसादीनां प्रजापतिर्ऋषिः। अग्निर्देवता। अष्टी छंदः। स
मिदाधाने वि॰। स्मृतं च मे अस्मृतं च मे। तन्म उभयव्रतं। निंदा च मे। अनिंदा च मे॰। विद्या च मे॰ अविद्या॰ श्र
द्धा॰ अश्रद्धा॰ प्रज्ञा॰ अप्रज्ञा॰ इष्टं॰ अनिष्टं॰ दत्तं॰ अदत्तं॰ अधीतं॰ अनधीतं॰ कृतं॰ अकृतं॰ सत्यं॰ असत्यं॰
श्रुतं॰ अश्रुतं॰ व्रतं॰ अव्रतं॰। यदग्ने सेंद्रस्य सप्रजापतिकस्य सऋषिकस्य सऋषिराजन्यस्य सपितृकस्य
सपितृराजन्यस्य समनुष्यस्य समनुष्यराजन्यस्य साकाशस्य सप्रतीकाशस्य सानुकाशस्य सप्र
तीकाशस्य सदेवमनुष्यस्य [illegible] आसन आस
न्निव्रतं तन्मे सर्वं व्रतभिदं मम मग्ने सर्वं व्रतो भवामि स्वाहा। अग्नय इदं। तत उपविश्य दशसमिधो गृहीत्वा।
ममाग्न इति दशानां विहव्यो विश्वेदेवास्त्रिष्टुप्। ॐ ममाग्ने॰ मम देवा॰ मयि देवा॰ मह्यं यजंतु॰ दैवीः षडुर्वी॰
अतेमन्यु॰ धाताधातरणां॰ उरुमन्वानो॰ येन सपत्ना॰ अर्वाचमिंद्र॰ मेरिनं त्वा। अत्र च क्रमेणाग्नौ प्रक्षेपः।
पश्चात् स्वाहाकारः। सर्वत्र विश्वेभ्यो देवेभ्य इदं न ममेति त्यागः। ततः स्विष्टकृदादिशेषं समाप्य। उद्दुत्तमं मु
मुगृभ्णीति मंत्रेण मेखलां विसृज्य। कौपिनाजिनदंडाद्यपि विसृजेत्। ततः एवं वदेत्। नैमित्तिकं विना
स्नानं नग्नश्च न स्नामि। नग्नां स्त्रियं नेक्षे। वर्षति न धावामि। वृक्षं नारोहामि। कूपं नावरोहामि। प्राणसंशयं ना

Indira Gandhi National
Centre for the Arts

समावर्त० अथविवाहः

प्र.चि. १२६

न्यापयेदिति। इति समावर्तनप्रयोगः॥ अथ विवाहः। तत्र पित्रादिकर्तृकं दानमेव विवाहशब्दवाच्यं। अलंकृत्य क-
न्यामुदकपूर्वं दद्यादेष ब्राह्मो विवाह इति स्मृत्यात्। ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृता। तज्जः पुनात्युभय-
तः पुरुषानेकविंशतिमिति वचनांतराच्चेति केचित्। त्रिः परिणयं जपसमोहमस्मीति सूत्रात्परिणयनविवाह-
शब्दयोः पर्यायत्वाद्विवाहो वै हि इति मे चलिंगात्त्रिः परिक्रमणमेव विवाहशब्दवाच्यमित्यन्ये। प्रतिग्रहादिना स्व-
त्वपूर्वकं होमादिसप्तपद्यंतसंस्कारसमुदाय एव विवाहशब्दवाच्य इत्यस्मद्गुरवः। स चाष्टसु विवाहेष्वनुगतः। अत एव न च वाचा च कन्याया
पाणिग्रहणिका मंत्रा नियतं दारलक्षणं। तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे। अत्र उदकमात्रे निषेधादुभयसत्तोक्ता।
पतिर्हन्यते। पाणिग्रहणसंस्कारात्। पतित्वं सप्तमे पदे इति मनूक्तेः। [illegible] भार्यात्वमदृष्टं जन्यते।
दाने स्वत्वमात्रं हि दास्यादावपि स्त्रीनतु भार्यात्वं। तेन दाने न स्वत्वे कन्यायां जाते होमादिना भार्यात्वमदृष्टं संयो-
गेन दानेऽकृते होमादि। होमादौ वाऽकृते दानानुमत्यादि स्वत्वजनकं ज्ञेयं। तदेव पत्नीशब्दवाच्यं। परस्त्रीत्वं न तु संयो-
गादुक्तेः। कन्यादाने दानशब्दो गौणः। स्वत्वनिवृत्त्यभावात्। परस्वत्वोपादनमात्रं। तदपि धर्मप्रजोत्पादने न तु
विक्रयणादौ। तत्र ब्राह्मदैवार्षप्राजापत्येषु चतुर्षु पित्रादेर्दानात्स्वात्तदेव स्वत्वहेतुः। एवमासुरे द्रव्यग्रहणेऽपि
क्रयादेव स्वत्वं। गांधर्वो दावप्यहं ते भार्या भवामीति कन्यायाद्दानात् पुत्रवत्। अनुमत्यादेव स्वत्वं। राक्षसपैशा-
चयोरपि विजितं निर्विष्टं वेश्यभर्तृद्वयोरिति। गौतमेन स्वत्वहेतुपाठात्स्वत्वं। निर्वेशो भोगः। संभोग इत्यर्थः। १२६

निर्वेशोऽस्त्रतिरोधात्योरिति त्रिकांडीस्मरणात्। एवं स्वयंवरेऽपि कन्यायाः आत्मदानादेव स्वत्वं। न हि स्वयंवरो
नाम नवमो विवाहः। किंतु गांधर्वादिष्वेवांतर्भूतः। एतेन येषां भार्यापुत्रादौ स्वामी रिक्थं क्रयसंविभाग परि-
ग्रहाधिगमेष्विति गौतमोक्तानां स्वत्वहेतूनां मध्ये वा अन्यपुंस्त्वरूपपुत्रत्वादेर्दानेनानयाच्च न तेषां स्वत्वसाग
पूर्वकं परस्वत्वापादनरूपं दाने संभवति। तेन तत्र परविधेयीकरणमात्रेण गौणोऽदादातिरिति गमनेति कन्याद-
नादौ नाग्निसाहित्यं। कन्यादानस्य दृष्टमदादानां तस्यैव न तत्र दानम [illegible] गौणत्वेमानामाव
तः। स वाक्ये दासी दासक्रयविक्रयादिव्यवहारायोगाच्च। गौतमोक्तिस्तु त्वोक्तानां सम्यक् संपत्तोक्तानां च स्वत्वहे-
तूनामुपलक्षणार्था। कथमन्यथा गौतमेन एव ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विजितं निर्विष्टं वैश्यशूद्रयोरि-
स्यादिनान्येषामपि स्वत्वहेतुत्वं नदेत्। यल्लब्धं दानरूपेण तद्ब्राह्मणस्याधिकं स्वाम्यमूलमिति हरदत्तः। तेन
भार्यायां प्रतिग्रहेण स्वत्वात्पुत्रकन्यादौ च स्वत्वाभ्युपगमे [illegible] वस्तावपि परं परासंबंधे
नस्वत्वान्मुख्य मेयत्रदानं। न च भार्यायां स्वत्वाभावे स्वकुटुंबाविरोधेन देयं दत्तं न सुतादृते। विक्रयं चैव
दानं च न नेयाः स्युरनिच्छवः। दाराः पुत्राश्च सर्वस्वमात्मनैव तु योजयेदिति निषेधोपपत्ति दासो वा चेत इ-
ति यत्किंचिद्देतत्। यत्तु षष्ठे विश्वजिति सर्वस्वं ददातीति तत्र पुत्रकन्यादेर्दानमिष्टं तत्स्वाप्रमस्मिप्रा-
यः। सर्वस्वदानाद्धि सर्वे वेदसं ददातीति तत्र दानोक्तत्वात् तदागत न्यायेन धनस्य याची। सोपि न सर्वेष-
न याची किंतु दक्षिणार्थे निर्दिष्ट प्राकृत धनयाची स्यात्। तत्रैव वस्तुलोपे एवं च स्वपदाद्दृष्याला लीय तातिधनवाचि

Indira Gandhi National
Centre for the Arts

प्र॰ चि॰ १२८

नः सर्वानुगतैकरूपकल्पतावच्छेदकाभावेन पनरूपे कार्थबोधकत्वाप्युपपत्तौ न स्विन्नशुल्काद्यासादिपदत्वं संभव विवाह॰
तीति न पुत्रादेर्दानमिति स्वत्वने सर्वमविशेषात्। न भूमिः स्यादिस्यादौ व्यधिकरणानिरूढत्वाच्चिंतया स्यादेव या
नीति तस्याशयः। अस्माभिस्तु चरणास्तु। पुत्रकन्ययोर्नैतत्वेन दानं। जन्यपुंस्त्वस्य जन्यस्त्रीत्वस्य च दानेना
निवृत्तेः। दासत्वेन दत्तपुत्रत्वेन भार्यात्वेन दानेऽभ्यसेन। तथा च वसिष्ठः। शुक्रशोणितसंभवः पुरुषः तस्य दा
नविक्रयप्रतिग्रहेषु मातापितरौ प्रभवतीति। अन्यथा दासदासीकन्यादानविक्रयश्रुतः शेपादिभ्यो न लिंगावि
रोधापत्तेः। न च तेषां व्यवहाराणां गौणत्वं मानाभावात् इत्याहुः। वस्तुतस्तु। दानेजनन्यस्त्रीत्वाद्यनिवृत्तावपि
पितृक्षतिः। स्वागपूर्वकपरस्वत्वापादनमात्रस्यैव दानपदार्थत्वात्। अन्यथा स्वभूम्युत्सर्गश्रीघ्रादावपि
स्वभूम्युत्सर्गस्य दाने नातिवृत्तेर्दानं न स्यादिस्यास्तां तावत्। कथं तर्हि प्रयोगरत्नेऽभिहितः कन्यादानेन
ममेति या व्यमिसुह्या न ममेति न वान्यमिति केचिदाहुरित्युक्तं। तस्यायमभाशयः। दानं द्विविधं। अस्यां
यो जायते पुत्रः स मे पुत्रो भवेदिति परिभाषया पुत्रिकात्वेनाभार्यात्वेन च। आद्ये हि मुख्यविवाहत्वात्तस्यां भाव
जातो द्वादशावरान् द्वादशपरान् पुनातीत्युभयत्र स्यादिफलं न ममेति स्यागभ्रश्च नैवास्ति पुत्रिकायां स्वत
स्वागाभावात्। द्वितीयः पुत्रिकापुत्रो मातामहस्तु तौ मत इति वचनात्। अभ्रातृकां प्रदास्यामि तुभ्यं कन्या
मलंकृतां। अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति। वचनांतराच्च। द्वितीये तु मुख्यविवाहत्वात्तस्यां जातद् १२८
स्यादिफलं न ममेति स्यागश्च भवत्येवेति सर्वं सुस्थं। अथ विवाहभेदाः। मनुः। ब्राह्मो दैवस्तथार्षेयः प्राजापत्य

स्तथासुरः। गांधर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः इति। एषां स्वरूपमाह याज्ञवल्क्यः। ब्राह्मो विवाह आहूय दी
यते शक्त्यलंकृता। यज्ञस्थऋत्विजे दैवः आदायार्षस्तु गोद्वयं। इत्युक्त्वा चरतां धर्मं सह या दीयतेऽर्थिने। स कायः।
यद्यपि ब्राह्मादिष्वपि सहधर्मचर्याश्रवणं न भवति तथापि प्रजा सह त्वं कर्मभ्यः कन्यां प्रतिपादयेदिति धर्मस
त्राद्ब्राह्मादिष्वपि सहचर्यासिद्धिस्तस्मान्नाश्रमांतरं प्रवेष्टव्यं। न त्वन्यं तरं प्रतिगंतव्यमिति समयविशेषोऽत्र
विवक्षितः। अत्र कात्यायनः। न चाश्रमांतरं गच्छेत् यावज्जीवाग्निहोत्रिणः। प्राजापत्यविवाहे पिता स्पत्रानि
यमोऽभवेदिति। यदहरेव विरजेत्तदहरेव प्रव्रजेदिति श्रुत्यांतरात्। तदहरेव प्रव्रजेदित्यनेन कालांतरस्य
नीसानभवति। आसुरो द्रविणादानाद्गांधर्वः समयान्मिथः। राक्षसो युद्धहरणात्पैशाचः कन्यकाछलात्। सूत्रेष्वेतेषां स्व
रूपमुक्तं। एषां व्यवस्थामाह मनुः। चतुरो ब्राह्मणस्याद्यान् प्रशस्तान्कवयो विदुः। राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः।
इति। ब्राह्मो विवाहः कर्तव्यो यावद्भिन्न चतुष्टयं। न तन्यूनेन कर्तव्यः क्षत्रियाणां च कामतः। चकाराद्वैश्यशूद्रयोरपि यथा
कामं। पञ्चमषडनुपूर्व्या विप्रस्येति तदनुकल्पः। षडिति कश्यपगौतमोक्तेः। पैठीनसिः। राक्षसो वैश्यस्य पैशाचश्शूद्र
स्य। सर्वेषामार्षप्रमाणं। प्रचेताः। पैशाचोऽसंस्कृतप्रसूतानां प्रतिलोमजातानां चेति। इति कृतानुपूर्वेषु चतुर्षु विवाहे
षु पूर्वः पूर्वः प्रशस्तः। उत्तरोत्तरः पापीयान्। तत्र पूर्वौ ब्राह्मणस्य। इतरयोः प्रतिग्रहाभावाद्दाक्षिण्याभावाच्च। गांधर्वः
क्षत्रियस्य युद्धसंयोगात्। आसुरस्तु वैश्यस्य धनसंयोगात्। इतरयोस्त्वनियतादित्युक्तं। अन्यत्रापि। चत्वारो ब्रा
ह्मणस्याद्यास्तद्वद्गांधर्वराक्षसौ। राक्षसश्चासुरो वैश्ये शूद्रे चांत्यस्तु गर्हित इति। राक्षो ब्राह्मोऽपि विवाहोऽभवतीति

Indira Gandhi National
Centre for the Arts

६ = ...दिषु प्राप्तो वा यद्धोमादि सप्तपद्यंतं कार्यमिति युक्तं । न दानं । अपरार्के वसिष्ठोपि । गांधर्वा-६

प्र॰चि॰ १२८ प्रयोगरत्ने । यच्चात्र माधवेनासुरपैशाचयोरसाध्यास्यात् सुकन्या पुरुषस्य च । चौर्येणापि विवाहेन सा विवाह्या रहः स्थिता राक्षस
त्वेति वसिष्ठवचनाद्ब्राह्मणादीनामन्यविवाहालाभे पैशाचोपि विवाहो अपदि भवतीत्युक्तं । तदपि कन्यानुमति सत्व
एव । अन्यथा स्वर्णीयोगादिति वहुना वो चाम । तत्र गांधर्वराक्षसपैशाचेषु उदकपूर्वदत्तं नविनास्व स्वेजात प्यग्नि साक्षि
कं भार्यात्वाय पुनर्वैवाहिको विधिः कार्य इत्युक्तं पारिजाते । गांधर्वादिविवाहेषु पुनर्वैवाहिको विधिः । कर्तव्यश्च त्रिभिर्वर्णैः
समर्थेनाग्निसाक्षिकमिति । वैवाहिको दानमतिरिक्तः । अन्यथा गांधर्वादिष्वप्युदकपूर्वदानसत्वेन साक्षेदापत्तेर्वि
वाहसंकरापत्तेश्च । अत एव कन्या स्वयं वरे आत्मदानात्तयैव नांदीश्राद्धं कार्यमिति पितृचरणाः । स्वदेरपि गांधर्वा
सुरपैशाचाविवाहो राक्षसश्च यः । पूर्वं परिश्रयस्तेषु पश्चाद्धोमो विधीयते इति । परिश्रयः परिग्रहः पाणिग्रहण
इत्यर्थः । अत एव होमाद्यभावे अन्यस्मै दानमाह वासिष्ठः । बलादपहृता कन्या मंत्रैर्यदि न संस्कृता । अन्यस्मै वि
धिवद्देया यथा कन्या तथैव सेति । इदं च राक्षसपैशाचपरमेव । तयोरेव बलापहारात् । पाणिग्रहणं तु सर्व
वर्णसमं । पाणिर्ग्राह्यः सवर्णास्विति सविशेषेण याज्ञवल्क्योक्तेः । उदकपूर्वं दानस्य क्षत्रियशूद्रादौ विकल्पः ।
तदुक्तं स्मृतिकौमुद्यां ब्राह्मे । युक्तं तु पाणिग्रहणं सर्ववर्णेषु सर्वशः । जलपूर्वं तु विप्राणामन्येषामपि काम्यये इति ॥
तेन ब्राह्मविवाह एव पितृगोत्रनिवृत्तेर्गांधर्वे च गांधर्वादिविवाहेषु पितृगोत्रेण धर्मविदितिपितृगोत्राद्युद्
कामना तेरत्वनिवृत्तिः क्षत्रियादीनां ब्राह्मोविवाहः । अन्यथा गांधर्वादिरिति ज्ञेयं । अनेन च ब्राह्मोपि विवाहः क्षत्रि नु२
वादीनामुक्तो भवति । अलंकृत्य कन्यामुदकपूर्वां दद्यादेष ब्राह्मो विवाह इत्याश्वलायनेन ब्राह्मविवाह
स्न॰ एवोदकपूर्वतोक्तेरित्यलमधुरवः । याज्ञवल्क्यः । अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् । अनन्यपूर्विकां कां १२८

---

सापिंडनि॰ नाम सपिंडां यवीयसीं । अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजां । लक्षणानि तनुलोमकेशदशनत्वादीनि । वाह्यान्याभ्यं
तराणि च । यथाह मनुः । अव्यंगांगीं सौम्यनाम्नीं हंसवारणगामिनीं । तनुलोमकेशदशनां मृद्वंगीमुद्वहेत्स्त्रि
यं । नोद्वहेत्कपिलां कन्यां नाधिकांगीं न रोगिणीं । नालोमिकां नातिलोमां न वाचालां न पिंगलां । नर्क्षवृक्ष
नदीनाम्नीं नांत्यपर्वतनामिकां । न पक्ष्यहिप्रेष्यनामिकां न च भीषणनामिकां । इत्यादीन्यन्यानि च काशीखंडादौ प्रसिद्धानि । आभ्यंतराणि त्वशेषपिंडानल
स्नं न्नी न विभीषणनामिकामित्यादीन्यन्यानि च काशीखंडादौ प्रसिद्धानि । आभ्यंतराणि त्वशेषपिंडानल
त्वे सा आश्वलायनेनोक्तानि । स्त्रियमिति नपुंसकत्वभावृत्तये स्त्रीत्वेन परीक्षितां । अनन्यपूर्विकां अपु
पुनर्भू नर्भूं । आह कश्यपः । वाग्दत्ता च मनोदत्ता अग्निं परिगता तथा । सप्तमं पदमुक्ता ताभुक्ता गर्भं वती तथा ॥
प्रसूता चेति विज्ञेया नार्यः सप्त पुनर्भुवः । तद्भिन्ना । कांतां कमनीयां । तदाह आपस्तंबः । यस्यां मनश्चक्षुषो अं
र्निबंधस्तस्यामृद्धिरिति । असपिंडां सापिंड्यरहितां ॥ सापिंड्यं चैकशरीरावयवान्वयलक्षणं । तच्च यद्यपि
स शविंशतिपुरुषपर्यंतमतिप्रसक्तं तथापि पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथेति याज्ञवल्क्येन नियं
तमात् मातृद्वारकसंबंधे पंचमादूर्ध्वं पितृद्वारकसंबंधे सप्तमादूर्ध्वं वधूवरयोः सापिंड्यं निवर्तते
इति ज्ञेयं । तयोरुपक्रमात् । अत्र च कूटस्थमारभ्य गणना कार्या । तदुक्तं । वध्वा वरस्य वा तातः कूटस्थाद्यदि
सप्तमः । पंचमी चेत्तयोर्माता तत्सापिंड्यं निवर्तत इति । कूटस्थो मूलपुरुषः । तेन उभयतः सापिंड्यनिवृत्तौ
वोढा हः । न त्वन्यतो निवृत्तावित्येक इति केचित् । दत्तकस्य । अन्यतो निवृत्तौ निवृत्तिरेवेति केचित् । दत्तकस्य

सापिंडनि

प्र.चि. पत्नीसंबंधाद्यनुप्रवेशोऽप्यतो निवृत्तिरिति तु युक्तं। तथा। आसप्तमात्पंचमाच्च बंधुभ्यः पितृमातृतः। अविवाह्या
१२९ सगोत्रा च समानप्रवरा तथा। अत्र बंधुपदमेवमुक्तप्रकारेण पितृबंधुसेषु प्तमात्। ऊर्ध्वमेव विवाह्यास्तंपं
चमान्मातृबंधुत इत्यादिवत्पंचमसप्तमातः पातिसपिंडपरमेव। तेन बंधुभ्य इति पंचमीनिर्देशात्सिनुः
पितृष्वसृपुत्रा सप्तमीं। मातुः पितृष्वसृपुत्रा च पंचमीं स्पृशेदिति व्याख्यानं चिंत्यमेव। यत्तु पंचमीं सप्त
मीं चैव मातृतः पितृतस्तथेति वसिष्ठवचनं पञ्च त्रीनतीत्य मातृतः पंचातीत्य पितृत इति पैठीनसिवच
नं तदप्यर्वाङ्निषेधार्थं न पुनस्तत्प्राप्त्यर्थमित्युक्तं मिताक्षरायां। पंचमीं सप्तमीमतीत्यैवं तु युक्तं। यद्य
पि शूलपाणिना संनिकर्षेऽपि कर्तव्यं त्रिगोत्रासरतो मदीति देवलवचनात्त्रिगोत्रासपत्नीकापरिग्रहं कु
र्यादित्युक्तं। न तद्दाक्षिणात्यसंमतं। यानि तु। चतुर्थीमुद्वहेत्कन्यां चतुर्थः पंचमोऽपि वा। पराशरमते
षष्ठीं पंचमो न तु पंचमीमित्यादीनि तानि निर्मूलानि। समूलत्वे सति दत्तकसापत्नसंबंधाद्यनुप्रवेशे।
क्षत्रियादिपरतो सत्र सपिंडविषये वा नेयानि। न त्वनुकल्पः। तथा च पंचमात्सप्तमाद्धीनां यः कन्यामुद्वहेद्द्वि
जः। गुरुतल्पी स विज्ञेयः सगोत्रां चैवमुद्वहन्। तथा। पंचमे सप्तमे चैव येषां वैवाहिकी क्रिया। क्रियापरा अ
पिहि ते पतिताः शूद्रतां गता इत्यादि विष्ण्वादिवचनविरोधादिति निर्णयसिंधौ पितृचरणाः। यच्च प्रयोगपारि
जाते भट्टसोमेश्वरे चोक्तं। गांधर्वादिविवाहेषु पितृगोत्रेण धर्मविदिति मार्कंडेयपुराणाद्धारीतस्मृतेश्च १२९
नाभावे न पितुः स्वत्वानिवृत्तेर्गांधर्वादिविवाहोढमातृगोत्रनिषेधः। ब्राह्मादिविवाहोढायास्तु मातु

भ्रातृकन्याविवाहोऽप्येव। गर्भेऽनु नौ जनिता दंपती कः। स्वसां जहुर्मातुलस्येव योषेति लिंगात्। तृतीये संगच्छा
वहा इति शतपथश्रुतेश्च। अत्र चाप्राप्तत्वात् [illegible]दुपरि देवेभ्यो धारयतीति न्यायेन मूलभूतविधिः कल्प्यते॥
अतः श्रौतलिंगेन मातुलस्य सुतामूढ्वेत्यादिस्मृतेर्बाधान्मातुलकन्योद्वाहः कार्य इत्युक्तं। तत्तुच्छं। असा
हिरागतः प्राप्तस्यैव मातुलकन्योद्वाहस्य निषेधो न वेधस्य। विधितो नित्यवत्प्राप्तावकरणे दोषापत्तेः। श्रुतौ
तुल्यमासक्ते प्राप्तस्यैवानुवादः स्तुत्यर्थं संकीर्तितः। न त्वेतावता विधिकल्पनं। अन्यथा प्रजापतिः स्वां दु
हितरमभ्यगच्छत्। अहल्यायै जारः माषान्नेप चलेत्सा दावपि श्रौतलिंगेन विधिकल्पनया स्मृतिबाधाप
त्तेः। अथ तदेव चरितं चरेदिति गतिः सेहापि तुल्या। उपायमात्रत्वस्य स्मृतिविरोधस्य च तुल्यत्वात्। गो
त्रान्मातुः सपिंडाच्च विवाहो गोवधस्तथेत्यादिना कलौ मातुलकन्योद्वाहस्य निषिद्धत्वाच्च। मातुः सपिंडे मा
तुलः। किंच। गांधर्वासुरादावपि पश्चाद्धोमसप्तपदीविधानात्स्वगोत्रात्[illegible]तेनातिविवाहात्सप्तमेप
दे इति स्वत्वनिवृत्तेरस्त्येव। मातामहगोत्रं तु कौशिकमते इव वाचनिकं। ब्राह्मादिविवाहे सापिंड्यनिवर्त
ति कस्य वचनस्याभावाच्चेति यत्किंचिदेतत्। कलौ सापिंड्यसंकोचो नैव कार्यः कदाचन। अतो नात्य
नामोहात्कृत्वा चांडालतां व्रजेदिति बोधायनवचनविरोधाच्चेति। तेन सापिंड्यसंकोचविधायका
त्रिपुरुषां तत्पत्नीस्यविरोधः। मातुरसगोत्रा पितुरसपिंडा कन्यामुद्वहेदिति भारद्वाजीये। सापत्नमातामा
हकुले सातिदेशिक्या सापिंड्याद्विवाहः। यथाहमिताक्षरायां रवः। मध्ये कजाता बहवः पथः सेत्रा

Indira Gandhi National
Centre for the Arts

प्र०चि० सपिंडनि०
१२०

पृथक्जनाः। एकपिंडाः पृथक्शौचाः पिंडस्त्वावर्त्तते त्रिषु। एकपिंडाः सपिंडाः पृथक्क्षेत्राः भिन्नजाती
यस्त्रिषु जाताः। पृथक्जनाः सजातीयभिन्नमातृषु जाता इत्यर्थः। अत्र त्रिपुरुषं सापिंड्यमिति विज्ञाने
श्वरः। प्रयोगपारिजाते भर्तृस्तु पितृपत्न्यः सर्वा मातरस्तत्। भ्रातरो मातुलास्तद्भगिन्यो मातृष्वसार
स्तद्दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयानि। अन्यथा संकरकारिणः स्युरिति सुमंतुवचनाद्या
वद्वचनं वाचनिकमिति न्यायेन परिगणितेष्वेव सापिंड्यमित्युक्तं। अत्र यद्यपि तद्भगिन्यो मातृष्वसा
र इति मदनपारिजाते ग्रंथकारेन पठितं। तथापि मातुलपदस्य दुहितृपदस्य भागिनेयपदस्य चोप
लक्षणत्वादूर्ध्वमेतद्वेदितव्यं बुद्ध्या च लक्षणामंगीकृत्य सापत्नमातामहकुले चतुःपुरुषं सापिंड्यं न
तु पंचमसप्तमपर्यंतं। तथा च सपत्नमातृभगिन्यादीनामपि लाभ इति ध्येयं। दत्तकस्य तु कुर्ध्वं
सप्तमात् पितृबंधुभ्यो बीजिनश्चेति गौतमवचनात् कृत्रिमादिपुत्राणां बीजवप्तुः सपिंडता।
सप्तमी पंचमी चैव गोत्रित्वं पालकस्य चेति वृद्धमनुवचनाच्च जनककुले पालककुले च संपूर्णसा
सप्तपौरुषत्वादि सापिंड्यमिति पितृचरणाः। वयं तु नियोगाद्यः उत्पादयति तस्माद्बीजिनोप्यूर्ध्वं सप्त
ति मादिहरदत्ते नंदहस्यक्षेत्रादिद्व्यामुष्यायणपरत्वेन गौतमसूत्रस्य व्याख्यानान्नेदं सामान्यतो दत्तकपरं। तेन
त्रीन्मातृतः पंच पितृतः पुरुषानतीत्योद्वहेदिति पैठीनसीवचनस्यौपार्ज्यौर्णदत्तकादीन्पुत्रान्पितृपक्ष १२०
तानिवृत्तपिंडगोत्रार्षेयानप्रसेतदुम्मते। नान्यान्प्रतीतिव्याख्यानाद्दत्तकानुप्रवेशो अलम् सपिंड्यस्योचि
हसा२

६०२

= मांधात्रांबरीषयौवनाश्वेति = ५

तत्वाच्च न दत्तकविषये बीजिनश्चेतीदं प्रवर्त्तते। किंतु नियोगोत्पन्न एव। वृद्धमनुवचनं त्वनाकरस्थमा
वयोरयमिति परिभाष्य दत्तकृत्रिमादिपरं वेति प्रतीम इतिदिक्। यवीयसीं॥ स्वापेक्षया वयसा। वपुषा च
न्यूनां। आरोगिणीं अचिकित्स्यमहारोगग्रस्तां। भ्रातृमतीमिति पुत्रिकाकरणाशंकानिवृत्यर्थं। य
त्र तु पुत्रिकाकरणाभावनिश्चयस्तामभ्रातृकामप्युद्वहेदिति भट्टाः। असमानार्षगोत्रजां। आर्षं प्रवर्तक
स्य मुनेर्व्यावर्तकस्य प्रवरः। गोत्रं वंशपरंपरा प्रसिद्धं। स्वसमाने आर्षगोत्रे यस्य तज्जायां न भवति। अत्र
च सगोत्राय दुहितरं न प्रयच्छेदिति आपस्तंबोक्तेः। असमानप्रवरैर्विवाह इति गौतमोक्तेश्च। गोत्रनिषेधः
प्रवरनिषेधश्च भिन्न एव। तत्र यास्कवाधूलमौनकानां भिन्नगोत्राणामपि भार्गववैतहव्यसावेतसे
व ति प्रवरैक्यमस्ति तन्निवृत्त्यर्थं असमानार्षेति प्रवरनिषेधः। एवं यौवनाश्वगोत्रे आंगिरसांबरीषयौवनाश्वेति प्रवरश्चेदपि
विवाहव्यावृत्त्यर्थं। असमानगोत्रजामिति गोत्रनिषेध इति भट्टाः। तत्र यद्यपि गोत्राण्यनंतानि तथापि प्रवराः एको
नपंचाशदेव। तदाह बौधायनः। गोत्राणां तु सहस्राणि प्रयुतान्यर्बुदानि च ऊनपंचाशदेवैषां प्रवरा ऋषिदर्श
नास्तीति। अत्र विशेषमाह बौधायनः। एक एव ऋषिर्यावत्प्रवरेष्वनुवर्तते। तावत्समानगोत्रत्वमन्यत्र भृग्वंगिरसां
गणादिति। भृग्वंगिरोगणेषु तु विशेषः स्मृत्यंतरे। पंचानां त्रिषु सामान्यादविवाहस्त्रिषु द्वयोः। भृग्वंगिरोगणेष्वेवं हर
शेषेष्वेकोपि वारयेदिति। एवं मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव चेति वचनात् मातृगोत्रा वर्ज्या। तच्च मातृगो
त्रवर्जनं माध्यंदिनीयानामेव। मातृगोत्रं माध्यंदिनीयानामिति सत्याषाढवचनात्। गोत्रमातुर्ह्येके नेच्छंतु
ह्यहकर्मणीति निषेधाच्चेति केचित्। सर्वेषामयं निषेध इत्यस्मे। वस्तुतस्तु। गांधर्वादिविवाहोढमातृपरो मातृगोत्र

Indira Gandhi National
Centre for the Arts

मातुर्मौ ताामहेन सापिंड्यात्तद्दो
निषेधः। पुत्रिकोसन्नकन्यापरो वा। कोकिलमतानुसारिगुर्जरमाध्यंदिनपरो वा। मातुर्गोत्रनिषेधो न तु सर्वेषां। अ

त्रानिवृत्तेः। तद्विषय एव गोत्रान्मातुः सपिंडाश्च विवाहो गोवधस्तथेति कलौ मातृगोत्रनिषेधो न तु सर्वेषां। पर्युदासो
तएव मनुना। असपिंडा च या मातुरसगोत्रा च या पितुरिति वचनेन मातृकुले सापिंड्यस्यैव निषेधः पर्युदासो
ग्राह्यतो न तु सगोत्रत्वस्येति वयं प्रतीमः॥ अंगवंगकलिंगाश्च कान्यकुब्जाश्च माथुराः। उत्कला गुर्जराश्चैते सर्वे द्वाज
सनेयिनः। नर्मदादक्षिणे भागे आपस्तंबाश्वलायनी। राणायनीपिप्पला च यज्ञकन्याविभागिनः। परस्परं त्वेते एवे
सर्थः। माध्यंदिनी शांखायनी कौथुमी शौनकी तथा। नर्मदोत्तरभागे तु यज्ञकन्याविभागिनः। शाकलो तैत्तिरे
शाखा कौथुम्याथर्वणी तथा। विवाहो यत्र संबंधो सर्वेदूरदानिवासिनां। एते शाखिनो गोदानिवासिनो परस्परं
विवाहसर्थः। अमात्सपिंडादिविवाहे तु बौधायनः। सपिंडां वा सगोत्रां वा असमानोपयच्छेन्मातृवदेनां बिभृयादिति
दिक्। तत्र विवाहे प्राधान्येन कुलपरीक्षामाह हस्ककारः। कुलमग्रे परीक्षेत ये मातृतः पितृतश्चेति। आपस्तंब
नेव पूर्वरगुणान्वितः कुलस्यैव प्राधान्यं मेपयितुमितिवृत्तिः। मनुः। उत्तमैरुत्तमैर्नित्यं संबंधानाचरेत्सदा। नि
नीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत्। स एव उत्तमानुत्तमान्नेव गच्छन्हीनांश्च वर्जयेत्। ब्राह्मणः श्रेष्ठता
मति मसये न तु शूद्रतां। वरगुणानाह। बुद्धिमते कन्यां प्रयच्छेत्। शास्त्राविरुद्धार्थग्राहिणी बुद्धिरिति वृत्ति
कारः। मनुः। महांत्यपि समृद्धानि गोजाविधनधान्यतः। स्त्रीसंबंधे दशैतानि कुलानि परिवर्जयेत्। हीनक्रियं नि
ष्पुरुषं निश्छंदो रोमशार्शसं। क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि चेति। याज्ञवल्क्यः। एतैरेव
गुणैर्युक्तः सवर्णः श्रोत्रियो वरः। यत्नात्परीक्षितः पुंस्त्वे युवा धीमान्जनप्रियः। यस्याप्सु लव ते बीजं ह्रा 

बुद्धिरूपशीलल
दिमूत्रं च फेनिलं। पुमांस्यात्तस्य णैरेतैर्विपरीतस्तु षंढकः इति। कन्यागुणान्याह हस्ककारः। बुद्धिरूपशीलल
क्षणसंपन्नामरोगामुपयच्छेतेति उक्तार्थमेतत्। यमः। कुलं च शीलं च वयश्च रूपं विद्या च वित्तं च सनाथतां
च। एतान्गुणान्सप्तपरीक्ष्य देया कन्या बुधैः शेषमचिंतनीयं। मनुः। न कन्यायाः पिता विद्वान्गृह्णीया
च्छुल्कमण्वपि। गृह्णन्हि शुल्कं लोभेन स्यान्नरोपत्यविक्रयी। ज्योतिषे। षडब्दमध्ये नोद्वाह्या कन्या वर्षद्व
यं यतः। सोमो भुंक्ते ततस्तद्वद्गंधर्वश्च तथानलः। अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी। दशवर्षा भ
वेत्कन्या अत ऊर्ध्वं रजस्वला। मरीचिः। गौरीं ददन्नाकपृष्ठं वैकुंठं रोहिणीं ददत्। कन्यां ददद्ब्रह्मलोकं रौर
वं तु रजस्वलां। तेनाष्टवर्षा गौरी कन्या नववर्षा रोहिणी कन्या दशवर्षा भुक्ता कन्येति ज्ञेयं। राजमार्तंडः॥
एवं चकादिति बालाः प्राणः
राहुग्रस्ते तथा युद्धे पित्रोर्वा प्राणसंशये। अतिप्रौढा च या कन्या चंद्रलग्नबले न तु। चकोदिति बालाः प्राण
संशयरसुक्तेः। अथ गुर्वर्कबलं। स्त्रीणां गुरुबलं श्रेष्ठं पुरुषाणां रवेर्बलं। तयोश्चंद्रबलं श्रेष्ठमिति गर्गेणभा
षितं। जन्मत्रिदशमारिस्थः पूजया शुभदो गुरुः। विवाहे ऽथ चतुर्थाष्टद्वादशस्थो मृतिप्रदः। पूजयापि अरि
[illegible]
प्रदहतिता तयं। अत्र बृहस्पतिशांत्यादिनिर्णयसिंधौ ज्ञेयं। अथ कन्यादातारः। याज्ञवल्क्यः। पिता पितामह
भ्राता सकुल्यो जननी तथा। कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः। अप्रयच्छन्समाप्नोति भ्रूणहत्या
मृतावृतौ। गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयं वरं। अत्र नाशशब्देन अभावः। असंनिधिरुच्यते। पितामहः शकुसां
[illegible] कन्यासुक्तेः [illegible] पितामहः। अत्र पौरः [illegible] भ्रूणहत्यां प्राप्नोतीत्युक्तेः॥ [illegible]

= उन्मादादिदोषरहितः =२

= गंतुं योग्यं सावर्ण्यादिगुणयुक्तं =२

Indira Gandhi National Centre for the Arts

=कन्यांदानं तु स्वकृतकमेव । अन्यप्रयोगस्त्वन्यकर्तृकः=६

=तत्र एको दिशनभवति=६

पितृशब्दो न जनकपरः ॥ किंतु स्वामिप्राप्तपरः ॥ अन्यथा [illegible]

[illegible] । भ्रातॄणां संस्कृतानामेवाधिकारः । असंस्कृतास्तु संस्का [illegible] मात्रादेरेवाधिकारस्तेन तु भ्राता तु । मातुरपि

योग्यत्वसिः पूर्वसंस्कृते रिति वचनात् । तेनानुपनीतभ्रातृमात्रादिसत्वे मात्रादेरेवाधिकारस्तेन [illegible] । मातुर्मातामहरूपावेणा

ते तथैव स्वयं संकल्पं कृत्वा अन्यद्वारा नांदीश्राद्धं कार्यं । तत्र जीवत्पतिकायाः स्वीयाः नायं मातृपितृमातामहरूपावेणा

नि । मत्र प्रतिनिधित्वेन करणे तु सत्तुः पार्वणत्रयदेवताः । विधवायास्तु पार्वणद्वयं कुर्यात् । तथा च स्मृतिचंद्रिकायां । यस्तु तस्याः पार्वणचतुष्टयं

स्वामात्र प्रभृति त्रिभ्यः स्वपितृभ्यस्तथैव च । विधवा कारयेच्छ्राद्धं यथाकालमतंद्रितेति । यस्तु संस्कृतभ्रात्रभावे स्वयमेव नांदीश्राद्धं

समहालयपरं । तत्र च स्वयं संकल्पं कृत्वान्यद्वारा कारयेत् । मातामह

कुर्यात् । न माता । पुत्रसत्वे तस्याः श्राद्धनिषेधात् । नारदः । पिता दद्यात्स्वयं कन्यां भ्राता वानुमते पितुः । मातामहो

हो मातुलश्च सकुल्यो बांधवास्तथा । माता त्वभावे सर्वेषां प्रकृतौ यदि वर्तते । तस्यामप्रकृतिस्थायां कन्यां दद्युः

स्वजातयः । अत्र प्रकृतिस्थग्रहणात् प्रकृतिस्थयाकृतमकृतमेव । अत्राप्यधिकारो विद्यमानेपि तु [illegible] । वः प्रधानः सोमात्रमि

ध्यः । तेन पूर्वं याज्ञवल्क्योक्तः क्रमाधिकारो नतेपि तरि बोध्यः । पूर्वनाशे द्रष्टुकत्वात् । वः प्रधानः [illegible] पित्रोरविद्यमाने

तिन्यायेन अंगप्रधानयोः समानकर्तृत्वप्राप्तमपि पित्रोरविद्यमाने बोध्यं । तदुक्तं कात्यायनेन । पित्रोरविद्यमाने । मनुः ।

तु अस्यापवादस्तत्रैव दीर्घप्रवासयुक्तेषु पौगंडेषु च बंधुषु । मातातु समये दद्यात्तोरसीमपि कन्यकां । आलीकसमुद्र्वेन

यदा तु नैव कश्चित्स्यात् कन्या राजानमाव्रजेदिं । परिक्रीयक मातदानेविशेषः । स्कांदे । आलीकसमुद्र्वेन

पितृ संनिधानेन प्रवासादिना पूर्वोक्तक्रमः । पित्रोः संनिधानेत्वे कार्यांतरव्यापृतत्वेदत्तक्रमांतरमुक्तं=६

=पित्रोः संनिधानेन प्रवासादिना पूर्वोक्तक्रमः । पित्रोः संनिधाने कार्यांतरव्यापृते तु कन्यादानेमात्रे पित्रोरेवाधि

=भ्रातरि: पूर्वसंस्कृते ; । वरापक्षात्मीं दद्यात् संनिधानेन तद्भवे । अत्रेन पुत्रेंतरोद्धारे व्याप्तेपि कन्यादानेमात्रे पित्रोरेवाधि

१३२

परिक्रीयी तु कन्यकां । धर्मेण विधिना दानं मसगोत्रे विधीयते । अन्याश्चां कन्यकां दद्यात्सदृशे वाधिके वरे । द्विगुणं फलमाप्नोति

कन्यादाने यदीरितमिति । द्व्यामुष्यायणे वाधिकारः । संकल्पवाक्ये प्रमातुः पित्रादिनामुल्लेखः । न तु जनकस्य । तथैव

दत्तकेष्वपि बोध्यं द्व्यामुष्यायणस्य तूभयोरपि । अथ विवाहकालः । तत्राश्वलायनः । उदगयन आपूर्यमाणपक्षे क

ल्याणे नक्षत्रे चौलकर्मोपनयनगोदानविवाहाः सार्वकालमेके विवाहमिति । उदगयनग्रहणं माघादिषण्मासानां

मुपलक्षणं तेन मकरार्कविशिष्टपौषनिषेधः । कर्केरहिताषाढग्रहणं ॥ अथ विवाहे मासनिर्णयः । मासः । माघ

फाल्गुन वैशाख यद्यूढ मार्गशीर्षके । ज्येष्ठे वाषाढके वापि सुभगा वित्तसंयुता । श्रावणे वापि पौषे वा कन्या

भाद्रपदे तथा । चैत्राश्वयुक्कार्तिकेषु याति वैधव्यतां लघु । अत्र यस्मिन् काले [illegible] तस्मिन् काले

विवाहे सार्यत्वमुसयते । यत्र अतिरिक्ते श्रवणाभावः न काले कृतमकृतमेव । यथा मतीपाताद्याशौचादि

षु । यत्तु सार्वकालमेके विवाहमिति तदासुरादिविवाहविषयं । धर्म्येषु विवाहेषु कालपरीक्षणं नाधर्म्येषि

ति गृह्यपरिशिष्टादिति सांप्रदायिकाः । सार्वकालवचनाद्दक्षिणायने मार्गशीर्षे विवाहो भवतीत्यन्ये । मार्ग

शीर्षे ज्येष्ठस्य ज्येष्ठकन्यायाश्च विवाहो निषिद्ध इति ग्रंथांतरे । गृह्यसूत्रं । सर्वर्तुषु विवाहः शैशिरो मासो

परिहाप्येति । शिशिरसमीपमासो पौषचैत्रौ साश्याविति तद्भाष्यं । अत्र बौधायनः । हरिसुप्तौ न कर्तव्यो विवाहस्तु क

दाचन । काम्यकर्मन कर्तव्यमभिषिक्तादिकं च नेति ॥ नित्यनैमित्तिके न दोषः । वराहमिहिरः । ज्येष्ठस्य ज्येष्ठकन्या

ज्येष्ठे याविवाहो न प्रशस्यते । तयोरन्यतरे ज्येष्ठो मासः प्रशस्यते । द्वौ ज्येष्ठौ मध्यमौ प्रोक्तौ एकज्येष्ठं सुखावहं ॥

प्र०चिं०
१२२

ज्येष्ठत्रयं न कुर्वीत विवाहे सर्वसंमतं। सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृत इति वचनाद्विवाहे सौर प्रतिकूलआ०
मानं प्रशस्तं। तथा। विबुधिर्व्राह्मविवाहस्य पूर्वोक्तविचरेद्बुधिः। नापरा केन सायान्हे नानध्याये न चेन्निशि॥
वह्निरिति गणेशग्रणेरित्यर्थः। नतु गण्हा बहूहिरिति। अथ प्रतिकूलनिर्णयः। चंद्रिकायां। कृते वाङ्निश्चये पश्चात् मृत्युर्भवे
स्यगोत्रिणः। तदा न मंगलं कार्यं नारी वैधव्यमाप्नुयात्। शौनकः। वरवध्वोः पिता माता पितृव्यश्च सहोदरः। एतेषां प्र
तिकूलं च महाविघ्नप्रदं भवेत्। पिता पितामहश्चैव माता चैव पितामही। पितृमातृसुतो भ्राता तासु गिनी चावि पनीस्य
वाहिता। एभिरत्र विपन्नैश्च प्रतिकूलं बुधैः स्मृतं। अन्यैरपि विपन्नेषु केचिदूचुर्न तद्भवेत्। भगिनी चाविवा
हितेति वृचिसारः। प्रतिकूलेपि संवत्सरोर्ध्वं विवाहमाह मेधातिथिः। वाग्दानानंतरं यत्र कुलयोः [illegible]
कस्यचिन्मृतिः। तदा संवत्सरादूर्ध्वं विवाहः शुभदो भवेत्। बौधायनः। प्रतिकूले तु कर्त्तव्यो विवाहो मासमं
तरा। पक्षेण वांतरा कुर्यात् शांतिं कृत्वा शुभं भवेत् इति। शांतिर्विनायकी। मेधातिथिः। पुरुषत्रयपर्यंतं प्रतिकू
लं स्वगोत्रिणां। प्रवेशान्निर्गमे सत्तद्वत्तथा मुंडनमंडने। स्मृतिरत्नावल्यां। पितुरब्दमशौचं स्यात् तदर्द्धं मातुरेव च।
मासत्रयं तु भार्यायास्तदर्द्धं भ्रातृपुत्रयोः। अन्येषां तु सपिंडानामाशौचं माससंमितं। तदंते शांतिकं कृत्वा ततो लग्नं
विधीयते। तदंते आशौचांते इत्यर्थः। धर्मप्रदीपे। अब्दमेकं तु कर्त्तव्यो विवाह इति केचन। पित्रोराशौचमध्ये तु १२२
नैव कार्यः कदाचनेति। आशौचमध्ये इत्यर्थः। एवं मातुरजो दोषेपि विवाहो न कार्यः। तथा च माधवीये।

---

प्र० [illegible]

कन्यादातुरेवाधिकारः। संकल्पवाक्ये कन्यादातुः पित्रादीनामुल्लेखः। न तु जनकस्य। तथैव दत्तकेष्वपि बोध्यं। याज्ञवल्क्यापलस्यत्वैन्योरपि।
उत्पादन आह [illegible] कल्याणे नक्षत्रे [illegible] गोत्र [illegible] सर्व [illegible]
अथ विवाह काले। तत्राहाश्वला [illegible] धर्मेणविधिना दानमसमगोत्रीं विधीयते। अत्राथर्वकर्मकाद्दत्त्वा सप्तपदीं वाधिकवरेः द्विगुणांफ
परकीया तु कन्यकां। धर्मेणविधिना [illegible] तमिति। अथ विवाहे मास निर्णयः। मासः। माघफाल्गुन वैशाखेषु घुष्ठ मार्गशी
लमाप्नोति कन्यादाने यदीप्सितमिति। अथ विवाहे मासनिर्णयः। मासः। माघफाल्गुन वैशाखे च ज्येष्ठमार्गशी
र्षके। ज्येष्ठे वाषाढके नापि सुभगा वित्तसंयुता। श्रावणे वापि पौषे वा कन्या भाद्रपदे तथा चैत्राश्वयुक्कार्त्ति
केषु याति वैधव्यतां लघु। यत्तु सार्वकालमेके विवाहमिति तदासुरादिविवाहविषयं। धर्म्येषु विवाहेषु
कालपरीक्षणं नाधर्म्येष्विति गृह्यपरिशिष्टादिति सांप्रदायिकाः। वराहमिहिरः। ज्येष्ठस्य ज्येष्ठकन्या
या विवाहो न प्रशस्यते। तयोरन्यतरे ज्येष्ठे ज्येष्ठो मासः प्रशस्यते। द्वौ ज्येष्ठौ मध्यमौ प्रोक्तावेकं ज्येष्ठं
सुखावहं। ज्येष्ठत्रयं न कुर्वीत विवाहे सर्वसंमतं। अथ प्रतिकूलनिर्णयः। चंद्रिकायां। कृते वाङ्निश्चये पश्चा
न्मृत्युर्भवेत्स्वगोत्रिणः। तदा न मंगलं कार्यं नारी वैधव्यमाप्नुयात्। शौनकः। वरवध्वोः पिता माता पितृव्यश्च
सहोदरः। एतेषां प्रतिकूलं च महाविघ्नप्रदं भवेत्। पिता पिताम[illegible]माता चैव पितामही। पितृमातृ
सुतो भ्राता तासु गिनी चाविवाहिता। एभिरत्र विपन्नैश्च प्रति[illegible]स्मृतं। अन्यैरपि विपन्नेषु
केचिदूचुर्न तद्भवेत्। प्रतिकूलेपि संवत्सरोर्ध्वं विवाहमाह मेधाति[illegible]। वाग्दानानंतरं यत्र कुलयोः क
स्यचिन्मृतिः। तदा संवत्सरादूर्ध्वं विवाहः शुभदो भवेत्। मेधातिथिः। पुरुषत्रयपर्यंतं प्रतिकूलं
स्वगोत्रिणां। प्रवेशान्निर्गमे सत्तद्वत्तथा मुंडनमंडने। स्मृतिरत्नावल्यां। पितुरब्दमशौचं स्यात् तदर्द्धं
मातुरेव च। मासत्रयं तु भार्याया तदर्द्धं भ्रातृपुत्रयोः। अन्येषां तु सपिंडानामाशौचं माससंमितं।
[illegible] रणाभावः तत्काले कृतदकृतमेव। यथा मतीपात्रा घ्राशौचादिषु १-४ [illegible] मासोपवचनं त्रैराज्याविति तद्ग्राह्य। अत्र वो
[illegible] पर्यायांतरे। [illegible] सर्वे [illegible] मासोपरि [illegible] समीप मासो [illegible] ध्यापनः ९०

= नकश्चिद्दोषः । सूतके तु आरंभात्प्रागेपि विघ्नः । अनारब्धविशुध्यर्थं कूष्मांडैर्जुहुयाद्घृतं । गर्भाधानं चाप्याप्रीतितः शुध्यति । प्रतिकुलवि०

= सूतके । तथा गार्ग्योपि विघ्नुरपि । नदेवप्रतिष्ठाविवाहयोः पूर्वं संस्कृतयोरपीति । एतत्सकरणं सूतकपरमेव । नतु रजोदोषाः ए

नरते शांतिकं कृत्वा [illegible] । प्रारं

प्र·वि० भात्प्राग्विवाहस्य माता यदि रजस्वला । निवृत्तिस्तस्य कर्त्तव्या सहस्वश्रुतिचोदनात् । विवाहे नांदीश्रा

१३४ द्धमेवाप्रारंभः । नांदीश्राद्धोत्तरं रजोदोषे तु तत्रैव । अलाभे सुमुहूर्तस्य रजोदोषे ह्युपस्थिते । श्रियं संपू

ज्य तत्कुर्यात् । पाणिग्रहणमंगलं । हैमीं माषमितां पद्मां श्रीसूक्तविधिनार्चयेत् । प्रस्थं च पायसं हु

त्वा अभिषेकं समाचरेदिति । कारिकायां । स्मृतिकौदकयोः शुध्योर्गादधाद्धोमपूर्वकं । प्राप्ते कर्मणि शुद्धि

स्यादितरस्मिन्न शुध्यतीति । अन्ये तु भिन्नभिन्नवाक्योपक्रमोपारंभमुहूर्तालग्नयोर्न परस्परसापेक्षत्वं

तेनारंभात्प्रागपि रजोदोषे लग्नांतराभावे शांतिं कृत्वा विवाहः । प्रारब्धे तु नांदीश्राद्धे कर्मणि विवाहादावधि हादि कुर्या

कारः । इतरस्मिन्नांदीश्राद्धाभावे तु न शुध्यतीति स्पष्टं स्मृतिकौदकयोः शुध्योरित्यादिकारिकावचनार्थे दित्याहुः स्तेग

मजानंतोभ्यां ता एव । एवं च अलाभे सुमुहूर्तस्येत्यपि कारिकावचनैकवाक्यतया तत्प्रारब्धं कुर्यादि

५वर्ष त्येव तथैवेन प्राहुः परमेवेति [illegible] तथा कुले ऋतुत्रयादर्वाक् मंडनान्न तु मुंडनं । प्रवेशान्निर्गमो नेष्टो न कुर्या

न्मंगलत्रयं । पुत्रोद्वाहात्परं पुत्रीविवाहो न ऋतुत्रये । अद्वैतरा मुंडनं च नैकदा मुंडनद्वयं । अद्वैतु न दोषः । भेदेश

फाल्गुने चैत्रमासे तु पुत्रोद्वाहोपनायने । भेदादब्दस्य कुर्वीत नर्तुत्रयविलंघनं । कश्यपः । मौंजीबंधस्तथो

द्वाहः षण्मासाभ्यंतरे पिता । पुत्र्युद्वाहं न कुर्वीत विभक्तानां न दोषकृदित्यादि ज्ञेयं । तथा । सपिंडीकरणावधि प्रे

तकर्म समाप्ते प्रागाभ्युदयिकं चतुःपुरुषपर्यंतं न कार्यं । प्रेतकर्मण्यनिवृत्ते च चरेन्नाभ्युदयक्रियां । आचतुर्था १३४



द्वेतुं सिपंचमे शुभदं भवेत् । अत्रोक्तं समानकर्तृकत्वम विवक्षितं तं । विवक्षितमित्यन्ये । [illegible] मासिकं तान्यपक

र्षः प्राप्तमाभ्युदयिकश्राद्धं द्रव्यदेवतानुरोधेन बोध्यः । अनियम इत्यन्ये । ज्योतिर्निबंधे । विवाहमारभ्य चतुर्थम

ध्ये दर्शदिनं श्राद्धदिनं यदि स्यात् । वैधव्यमाप्नोति तदा शुकन्या जीवेत्सा तिश्चेदनपत्यता स्यात् । तथा तत्रैव । वि

वाहमध्ये यदि च क्षयाहस्तत्रैव मुख्याः पितरो न यांति । दत्ते विवाहे परतस्तु कुर्यात् । श्राद्धं स्वधाभिर्न तु दूष

येतां । दर्शदिनं स्वरूपतो वर्ज्यं । श्राद्धदिनं तदनुष्ठानेनेत्यर्थः । वस्तुतस्तु श्राद्धदिनमपि स्वरूपतो वर्ज्यमिति तु यु

क्तं । श्राद्धदिनग्रहणात् । अन्यथा श्राद्धं यदि स्यादित्येवोच्यते । गार्ग्यः । भ्रातृयुगे स्वसृयुगे भ्रातृस्वसृयु

गे तथा न कुर्यान्मंगलं किंचिदेकस्मिन्मंडपेऽहनीति । एकस्मिन्वत्सरे प्राप्ते कुर्याद्यमलजातयोः । सोदर्ये

ब विवाहं च मौंजीबंधनमेव च । ज्योतिर्विवरणे । एकोदरयोर्द्वयोरेकदिने नोद्वाहे नेभवेन्नाशः । नचांतरस्य दिने

कृत्याहुः । संकटे च शुभं । मदनरत्ने वसिष्ठः । द्विशोभनं त्वेकगृहेपि नेष्टं शुभं तु पश्चान्नवभिर्दिनैस्तु । आवश्यकं

शोभनमुत्सवो वा ह्यरेथवा चार्यविभिस्तेदतो वा । एकोदरप्रसूतानां नाग्निकार्यत्रयं भवेत् । भिन्नोदरप्रसूतानां नेति

शातातपोऽब्रवीत् । ज्योतिर्निबंधे कात्यायनः । कुले ऋतुत्रयादर्वाक् मंडनान्न तु मुंडनं । प्रवेशान्निर्गमो नेष्टो न कुर्या

न्मंगलत्रयं । कुर्वंति मुनयः केचिदन्यस्मिन्वत्सरे लघु । गुरुणा कार्यसंप्राप्तं कुर्यान्नैमित्तकं तु यत् । पुत्रोद्वाहः प्र

वेशाख्यः कन्योद्वाहस्तु निर्गमः । मुंडनं चौलमित्युक्तं व्रतोद्वाहौ तु मंडनं । चौलं मुंडनमेवोक्तं वर्जयेन्मंडनात्परं ॥

= तेनैकस्मिन्मंडपे एकस्मिन्नह्नि विवाहो नेत्युक्तेः । मंडपांतरे वासरांतरे वत्सरे ऋत्वंतरे एकस्मिन्वर्षे विवाहो भवत्येव । तच्च वासरांतरं ॥ =

Indira Gandhi National Centre for the Arts

प्र॰चि॰ १३५

मौंजीबंधश्च तत् कार्यो ततो मौंजीन मुंडनं । अस्मिन्ने वत्सरेपि स्यात्तदूहस्तत्प्रभेदयेत् । अभेदे तु विनाशस्यान्न मंडपवेदि
कुर्यादेकमंडपो संकटे तु कपर्दि कादिकानराह बचोमिहरस्य । उद्वाहपुत्रीन्नपि ताविदध्यात्पुत्र्यंतरस्योद्वहनं
कदापि । यावच्चतुर्थदिनमत्र पूर्वसमाप्य चान्योद्वहनं विदध्यात् । स्मृतिरत्नावल्यां । भ्रात्पुंसोस्वसपु
गेभ्रातृस्वसृपुगे तथा । एकस्मिन्मंडपे चैव न कुर्यान्मंडनद्वयं । सोदरविषयमेतत् । एकोदरप्रसूतानामेकस्मि
न्वासरे पुनः । विवाहं नैव कुर्वीत मंडनोपरि मुंडनं । कासापनः । सद्योविवाहः कर्तव्यः संकटे देशविप्लु
वे । द्वितीये वा तृतीये वा चतुर्थे कन्ययोर्द्वयोरिति । यमलोस्तु विशेषः कारिकायां । एकस्मिन्वत्सरे चै
व वासरे मंडपे तथा । कर्तव्यं मंगलं स्वस्त्रोभ्रात्रोर्यमलजातयोः । तंत्रेणैकमेव । नाप्यत्र कर्तव्यमेदइतिदिक् । नार
दः । प्रसुप्ताहोनैव कार्यो नैकस्मिन्दुहितृद्वयं । नैवैकजन्मयोः पुंसोरेकजन्ये तु कन्यके । नैकजन्ये तु कन्ये द्वे पुत्र
योरेकजन्मयोः । न पुत्रीद्वयमेकस्मै प्रदद्यात्तु कदाचनेत्यादि पितृकृतेनिर्णयसिंधौ ज्ञेयं । [illegible]
बेधकं शास्त्रं कन्यास्तत्वे बोध्यं । [illegible] इति कौस्तुभे । नैकस्मै दुहितृद्वयं [illegible] ॥
अत्र प्रसुप्ताहादौ रोगिण्यादि वद्दृष्टार्थविरोध एव । न त्वेतावतात्रस्वार्थीत्वविघातः । सपिंडत्वसगोत्रत्वयोरेव तद्वि
घातकत्वात् । तेन निषेधमुल्लंघ्य कामाल्लोभाद्वा प्रसुप्ताहादौ कृते भार्यात्वोत्पत्तिरस्त्येवेति न्यायविदः । अपरार्के
दक्षः । मातापितृविहीनं तु संस्कारोद्वहनादिभिः । यः स्थापयति तस्येह पुण्यसंख्या न विद्यते । न तद्व्रतयोगिहोत्रेण ना
[illegible] न लभ्यते । [illegible] कारणं । [illegible] १३५
[illegible]

---

ततः पुंसि [illegible] । विवाहमारभ्य [illegible] प्रात्तद्य॰
[illegible]मध्ये श्राद्धदिनं दर्शादिनं यदि स्यात् । वैधव्यमाप्नोति तदा तु कन्या जीवेत्पतिश्चेद्दनपसतास्यात् । तथा ।
विवाहमध्ये यदि चेत्क्षयाहस्तत्र स्वमुख्याः पितरो न यांति । वृत्ते विवाहे परतस्तु कुर्यात् श्राद्धं स्वधापि न तु दृश्य
चेत्तौ मार्यः । भ्रातृयुगे स्वसृयुगे भ्रातृस्वसृयुगे तथा । न कुर्यान्मंगलं किंचिदेकस्मिन्मंडपे हनि । ए
कस्मिन्वासरे प्राप्ते कुर्याद्यमलजातयोः । क्षौरं चैव विवाहं च मौंजीबंधनमेव च । ज्योतिर्निबंधे ॥
एकोदरयोर्द्वयोरेकदिने नोद्वहनेष्वेव नाशः । न द्यंतर एकदिने केप्याहुः संकटे चाश्रुसौ यमलयोस्तु विशेषः का
रिकायां एकस्मिन्वत्सरे चैव वासरे मंडपे तथा । कर्तव्यं मंगलं स्वस्त्रोभ्रात्रोर्यमलजातयोः । तंत्रेणैकमे
व नाप्यत्र कर्तव्यमेद इतिदिक् । नारदः । प्रसुप्ताहोनैव कार्यो नैकस्मै दुहितृद्वयं । नैवैकजन्ययोः पुंसोरेक
जन्ये तु कन्यके । नैकजन्ये तु कन्ये द्वे पुत्रयोरेकजन्मयोः । न पुत्रीद्वयमेकस्मै प्रदद्यात्तु कदाचनेत्या
दि पितृकृते निर्णयसिंधौ ज्ञेयं अत्र प्रसुप्ताहादौ रोगिण्यादिवद्दृष्टार्थविरोध एव न त्वेतावता तत्र भार्यत्वविघातः ।
सपिंडत्वसगोत्रत्वयोरेव तद्विघातकत्वात् । तेन निषेधमुल्लंघ्य कामाल्लोभाद्वा प्रसुप्ताहादौ कृते भार्यत्वोत्पत्तिर
स्त्येवेति न्यायविदः अपरार्के दक्षः । [illegible]
[illegible] ति होमेन लभ्यते । यच्छ्रेय प्राप्यते पुंसा विप्रेणास्थापितेन वै स्याद्
यो । विवाहादिक्रियाकाले तदक्रियासिद्धिकारणं । यः प्रयच्छति धर्मज्ञः सोश्वमेधफलं लभेत् । अप्य कन्यादा

Indira Gandhi National Centre for the Arts

१ अन्येतु विवाहेश्री धरीवेदीरत्नी हस्तसंमिता। वरहस्तप्रमाणेन कुर्यात्सोपानसंयतेति। सोपाना: पंचसप्तवाभवंति। हस्तोच्चाद्दसर्धः॥ अस्याहस्ते:=
=पंचभि: सप्तभिर्वा कार्यावेदी कूर्मपृष्ठोन्नतावेसपरे। वराह:। विवाहवेदि हस्तोच्चा चतुरस्रा समंततः। कुर्यादाचार्यहस्तेन आयाम [illegible]

प्र०चिं० न प्रशंसा। पारिजाते बृहस्पति:। सहस्रमेवधेनूनां शतं वानडुहां समं। दशानडुत्समं यानं दशयाना
१३६ न समो हय:। दशवाजिसमा कन्या भूमिदानं च तत्समं। तस्मात्सर्वप्रयत्नेन कन्यादानं विशि
ष्यते। स्कांदे। अलंकृत्य तु य: कन्यां भूषणाच्छादनादिभि:। दत्वा सर्वमवाप्नोति पूज्यते वासवादिभि:।
तथा कूपदश्चाश्वमेधी च प्राणदाताभयेषु च। समं यांति रथा एषां त्रयाणां नात्र संशय:। कन्यादाता
कूपद:। सत्कृतालंकृतां कन्यां यो ददाति स कूपद: सभिधानात्। वह्निपुराणे। कन्यां ये तु प्रयच्छंति य
थाशक्ति स्वलंकृतां। ब्रह्मदेयां द्विजश्रेष्ठ ब्रह्मलोकं व्रजंति ते। कृत्वा कन्याप्रदानं च पिता: प्रपितामहा:।
विमुक्ता: सर्वपापेभ्यो ब्रह्मलोकं व्रजंति ते। यावंति संति रोमाणि कन्यायाश्च तनौ पुन:। तावद्वर्षसहस्रा
णि ब्रह्मलोके महीयते। नारद:। कृतेषु मंगलेष्वादौ मंगलायां कुमारिणां। नवमे सप्तमे वापि पंचमे दिव
से पि वा। तृतीये बीजनक्षत्रे शुभवारे शुभोदये। शौनक:। आधानं गर्भसंस्कारं जातकर्म च नाम च॥
हित्वा यत्र विधातव्यं मंगले कुर्यात्पनमिति। अथ विवाहमंडप:। वासिष्ठ:। अष्टहस्तं तु रच्यं मंडपं वा द्विषट्
करं। षोडशारत्निकं वापि तत्र वेदिं प्रकल्पयेत्। [illegible]:। हस्तोच्छ्रितां चतुर्हस्तां चतुरस्रां समंततः। स्तंभै:
श्चतुर्भिः सुश्लक्ष्णां वामभागे तु सद्मनि। समां तथा चतुर्दिक्षु सोपानैरतिशोभितां। [illegible] वध्यामारक्तो नि
धुनं सा निवेदिकामिति। अत्र हस्तो वध्वा: सोपानं पश्चिममष्टा। [illegible] रंभाद्विनमिति पित्रचरणा:। १३६
हेमाद्रौ व्यास:। कंडन दलन पवारक मंडपमध्ये वेदिकादिकं। तत: संबंधिगतागतमध्ये वैवाहिके कुर्यात्॥
चतुर्थो मंडप: श्रेष्ठ: पंचम: सप्तमं तथा। नवमे कारदेशोस्रे नेष्टेषष्ठस्तृतीयके। तस्मिन्मंडपे विवाहवेदिमाह नारद:-४

=गृह्यपरिशिष्टे। महत्सु पूर्वेष्वपि दूरगेषु। व्रतात्पूर्वदिने कार्यं
=पक्षांतरमुक्तं ज्योतिर्निबंधे। यस्मिन्पक्षे विवाहस्यात्तत्र सर्वसमारभेदिति। -१-विवाहेपि तथैव च। नांदीश्राद्धिकं सर्वं सीमंते वरपूजनं।
स तत्रादौ कन्यानिरीक्षणं। तत्तु प्रयोगे वक्ष्यते। एवमेव गृह्यपरिशिष्टे। अमुकप्रवरान्वितामुकगोत्रामुकप्रपौत्री
२ममुक ममुकपौत्रीं पुत्रीं अमुकनाम्नीं कन्यां भार्यत्वाय वृणीमह इति चतुरोविप्रा: भूयुरित्यादिना कन्यावरणमि
तिथ्यवहृतं। श्रीधर:। विवाहमासोदये वा चंद्रताराबलान्विते। पंचांगशुद्धिदिवसे कन्यावरणमाचरेत्। ततो
रिद्वर्वंदनादि यथाचारं ज्ञेयं। अथ वाग्दानं। तत्तु प्रयोगे वक्ष्यते। वाग्दानोत्तरवरमरणे वसिष्ठ:। अद्भिर्वाचा च दत्तायां
म्रियेतादौ वरो यदि। न च मंत्रोपनीता स्यात्कुमारी पितुरेव सा। एवं च कलौ निषिद्धं देवरेण सुतोत्पत्तिर्दत्ता कन्या
दत्ता यत इत्यादि पुराणे कलौ निषेधादिति केचित्। वस्तुतस्तूढाया: पुनरूढाहं ज्येष्ठांशो गोवधस्तथेति हेमाद्रिधृत
हृतवचनांतरेकवाक्यतया एतादृश: उक्तपर:। तेन वाग्दानमात्रे जाते वरस्य मरणे तस्य दोषसत्वे वा अन्यस्मै
दानं भवत्येवेति युक्तं वयं। वाग्दानोत्तरं वरस्य देशांतरगमने तु नारद:। प्रतिगृह्य तु य: कन्यां वरो देशांतरं व्र
जेत्। त्रीन्ऋतून्समतिक्रम्य कन्यान्यं वरयेद्वरं। शुक्रदानेतु वसिष्ठ:। कन्यायां दत्तशुल्कायां म्रियेत यदि शुल्कद:।
देवराय प्रदातव्या यदि कन्यानुमन्यते। अनेकेभ्योपि दत्तायामनूढायां तु तत्र वै। पूर्वागतश्च सर्वेषां लभेताद्यं
रस्तु ताभिसादि पारिजातादि ज्ञेयं। इति वाग्दानं। तत: विवाहात्पूर्वदिने स्वस्ति वाचननांदीश्राद्धादि कुर्यात्। अत्र प्रयोग
पारिजाते नांदीश्राद्धमात्रं पितृकर्तृकं स्वस्तिवाचनादि तु वरकर्तृकमित्युक्तं तच्चिंत्यमिति भट्टा:। पन्वाग्नेय मे
क्रस्यवायमेष्यान्नस्तंभेषु नालिस्यादीन। उपरि तु पशुवर्द्धिनीं भगवतीं च पूजयेदिति विशेष: कंतन्मंडपसत्वे देशा
चारतो वा नेयं शारकरण [illegible] कुर्यान्नेवकुर्यात्। [illegible] विधुरेनैव कुर्यादित्यपि तथैव चैति॥
[illegible] उक्ते काले विवाहांगं कुर्यान्नादीमुखं पिता। देशे तरे विवाहश्चेत्तत्रगत्वा भवेद्दिदासुमंतुः। विवाहादौ सुतानां च पिता कुर्यात्तु नांदि
त्रिकां पीत्र:कं। रजस्वला या भार्या यानैव कुर्यात्कथंचन। पितरि प्रोषिते तेमाताद्यदि रजस्वला। तदा स्वेनैव यत्कृतं मंडपस्थापनादिकमिति।
=कर्तृतरान्तुपदेशात्-३

तदुक्तं। वरस्यया भवेज्जायाया सा स्वाश्रुतिचोदिता। मधुपर्कप्रदानमो यस्याख्येपितरीति। इति वचनं शाकलानि तत्परमियस्य॥ तदु कं शाकल कारिकायां।
वरस्यया भवेज्जाया या सा स्वाश्रुतिचोदिता। मधुपर्कः सुतात सोयजमाने नसर्वदा। ततोए... कन्तु धारये व्रतकर्मणि। तथा ...
वरेति ... चक्षुष्यवोक्त विधानतः ... मधुपर्कं पूजितं

प्र॰चि॰ १३८

भवेदिदं। चतुर्थो मध्यमः श्रेष्ठः पंचमः सप्तमस्तथा। नवमैकादशोऽश्रेष्ठो नेष्टः षष्ठस्तृतीयको। इति देवक प्रतिष्ठा। ततो वरपूजार्थमागतः कन्यादाता वरस्य सीमांतपूजनं कुर्यात्। तत्र विशेषमाह चंडेश्वरः। अलंकारं फलं पुष्पं वासांसि विविधानि च देयं वरायवरणे कन्याभ्राता द्विजेन वा। कारिकायां। अपरेद्युः कृतस्नानो हतवस्त्रधरोमरः। अलंकृतः सितच्छत्रोपदाति तोति बांधवैः। वृतो वधूगृहे गत्वा मधुपर्केण पूजितः इति। शौनकोपि। पुण्ये मुहूर्ते कुर्वीत विवाहं विधिवद्द्विजः। तत्राभ्युदयिकश्राद्धं कुर्यात् स्वस्ति च वाचयेत्। अपरेद्युः कृतस्नातो धृतधौतांबरद्वयः। भूषितो गंधमाल्याद्यैर्वेष्टितो भीष्टदेवताः। ब्राह्मणान्भोजयित्वा तैः कृतपुण्याहवाचनः। कृतकौतुकबंधश्च मित्रबांधवसंयुतः। यानं यथार्हमारुह्य गच्छेत्स तु वधूगृहं। तस्य द्वारत्रबाहिः स्थित्वा प्राङ्मुखोभिमुखागतैः। प्रदीपपूर्णकुंभादिपाणिभिर्वनिताजनैः। कृताभ्युद्गमनो गेहं प्रविशेत्सह बंधुभिरिति। इति वरस्य सीमंतपूजनं कन्यागृहागमनविधिः। ततो वरपिता कन्यायाः फलैः पूजनं कुर्यात्। केचित्तु फलपूजनं वाग्दानं च समानतंत्रं कुर्वंति। गृहागतस्य वरस्य मधुपर्कमाह याज्ञवल्क्यः प्रतिसंवत्सरं त्वर्घ्याः स्नातकाचार्यपार्थिवाः। प्रियो विवाह्यश्च तथा यज्ञं प्रत्यृत्विजः पुनरिति। अत्र च गृहागतस्नातकं वरं मधुपर्केणार्हयिष्य इति संकल्पः। यद्वा गृहागतायास्मै वराय कन्यादानांगत्वेन मधुपर्केणार्हयिष्य इति संकल्प इति प्रद्योतः। अत्र वरशाखयैव मधुपर्कः। मधुपर्के विशेषः। पूर्वमेवोक्तं १३८



... हागते। मिथु ... वचते। =१३
... कुर्यान ... विसर्जनात्परित्यक्तं गोपितायाणं तो व्रतसमाप्तिः स्नानसमाप्तिः ... कन्यां
= समावर्तो ... पारित्यज्येति। अत्र धारणाविधिर्नेव जीवपरिसंगापितायां ... तीर्वाद्विजा ... स्तु।
स्नातिश्रीमा ... चनं ...

---

= उपोषित तथा ... वाविवाहे कन्यादानपर्यंतं दिनावच्छिन्न भोजनाभावः। रात्रौ विवाहे तु तत्कालपर्यंताहोरात्रावच्छिन्न भोजनाभावः।
= दिनावि वाहे दिने। रात्रौ विवाहे तात्रात्रीदिनस्य ॥ २

इति मात्रो च्यते। व्यासः। भुक्त्वा समुद्वहेत् कन्यां सावित्री वचनं तथा। उपोषितः सुतां दद्याद्दर्चितायद्विजायतु। भुक्त्वेति मधुपर्कैवैधभोजनपरं। इति मधुपर्कः। प्रयोगस्त्वग्रे वक्ष्यते। गृह्यपरिशिष्टे। अथान्तराले भुक्ते तंदुलराशीकृत्वा मध्ये स्वस्तिकं कृत्वा तिरस्करिणी धारयेत्। शीक्षणं स्वलंकृते वेश्मनि ... प्राङ्मुखं तथा पूर्वस्मिन् राशौ प्रत्यङ्मुखीं गुडजीरकपाणिकां कन्यां स्थापयेयुरपरस्मिन् प्राङ्मुखं तथा वरं मनसेष्टदेवतां ध्यायंतौ तिष्ठेतां। ब्राह्मणाः सूर्यासूक्तं पठेयुः पुरंध्रियो मंगलानि कुर्युः। ततो वरं मनसेष्टदेवतां ध्यायंतौ तिष्ठेतां। ब्राह्मणाः सूर्यासूक्तं पठेयुः ... गुडजीरकानव[redacted]कौर
रथज्योतिर्विदादिष्टे काले सघस्तिरस्करणी मुद्गगत्य सार्थ कन्यावरौ परस्परं गुडजीरकानवकीरेयुः ... तपेक्षमाणाथास्यो
तः परस्परं निरीक्षेयातामभ्रातृघ्नीमिति ईक्षमाणो जपत्यघोरचक्षुरपतिघ्न्येधीति तपेक्षमाणाथास्योभु
वोर्मध्ये दर्भाग्रेण परिमृज्य दर्भं निरस्याप उपस्पृशेदथ ब्राह्मणा वाशीर्भिः स्त्वा व सिनं देयुरिति। ति
रस्करणी अंतः पटवस्त्रं सस्नेनो त्वभितेति सूर्यासूक्तं तंदुलराशिमानं तूकं पारिजातेयमेन। आ
रूह्य तंदुलप्रस्थमीक्षे प्रत्यङ्मुखो। वधूमिति। इदं कन्यायामिष्टि॥ कारिकायां। स्नातालंकृतकन्यायाः प्राङ्
मुख्याः प्रत्यगाननः। ईक्षेत तंदुलस्थाया वरस्तस्य मुखं च सा। मुहूर्ते शोभने सम्यक्क्षिपेतां मुखयोर्मिथः।
सगुडान् जीरकान् कन्यावरयेथतां वर इति गृह्यपरिशिष्टे। कन्यां वरयमाणानामेष धर्मो विधीयते। प्रत्यङ्मुखो वरं यंति प्रतिगृह्णंति प्राङ्मुखा इति। आश्वलायनः। प्राङ्मुखी कन्यका तिष्ठेद्वरः प्रत्य

तिष्ठेतामुपविश्येतिपाठांतरं = ५

Indira Gandhi National Centre for the Arts

= वध्वोरंतः परं वस्त्रं वरायविनिवेदयेदिति = ३



प्र॰चि॰ १२६ [illegible] प्रांङ्मुखेस्तु ततः। वस्त्रांतरं तयोः कृत्वा मध्येतु वरकन्ययोः। परस्परं मुखं पश्येन्मुहूर्तेचाक्षतान्क्षिपेत्। कन्यादा
वरमूर्ध्नि तु कन्यादौ कन्यामूर्ध्नि वरस्तथा। गाथाभिमांपठेयुस्ते ब्राह्मणा ऋचवा इदं। मंत्रेणौ न्यक्षतराश्वेवमवे
तस्थानविपर्ययः [illegible]। निर्णयसिंधौ कश्यपः। ततोत्र स मुख्य आर्य प्रपितामहपूर्वकं। नामसंकीर्तयेद्विद्वा
न् कन्यापार्श्वे वमेवहि। एतेन यः कारिकाकारेण पुत्रायास्य च पौत्राय नप्त्रेस्यामुकगोत्रिणे। अस्या अमुकगो
त्राय पुत्री पौत्र्यस्य नप्त्रिका श्रीरूपाच मया दत्ता तुभ्यं श्रीधररूपिणे इति। उभयत्र पित्रादिक्रम उक्तः स चिं
त्यः। गृह्यपरिशिष्टेपि अमुष्य प्रपौत्राये त्यादिना प्रपितामहादि त्वमेवाश्रितं कन्यादानेन भ्रमेतिवा अमिलु न
क्तं प्राक्तथा तिष्ठेत् पूर्वमुखो दाता वरः प्रत्यङ्मुखस्तथा। मधुपर्कार्चिताये नां तस्मे दद्यात् सदक्षिणां।
उदपात्रं ततो गृह्य मंत्रेणानेन दापयेत्। कन्यां गौरीमिमां विप्र यथाशक्ति विभूषितां। गोत्राय शर्मणे तुभ्यं दत्तां
विप्रसमाश्रयेत्यादि ज्ञेयं। अत्र च कन्यां कनकसंपन्नां कनकाभरणैर्युतामिति मंत्रलिंगात्। कन्यायाः हस्ते
पि किंचिद्धिरण्यं देयं अन्यथा कनकाभरणैर्युतामित्यनेनैव सिद्धेः कनकसंपन्नामित्यस्यानर्थक्यापत्तेरिति
केचित्। वस्तुतस्तु कन्यां कनकसंपन्नामित्यादि पिलंणां। तारणायचेयं तस्य मंत्रस्य कारिकाकारेण।
तेदाक्षायणी पूर्न्योत्तरं पाठात् दाचहिरण्यगोचवासांसीत्यादिपूर्वे दत्त दक्षिणाभिप्रायत्वेन कनकसंपन्नेत्यु
पपत्तेर्न काचित्क्षतिः। ततः कांस्यपात्रे कन्यांजल्युपरि वरांजलेरुपरि दातृहस्ते सायां जलधारां दद्यादि
ति भट्टः। वरांजलेरुपरि कन्यांजल्युपरि स्वहस्त इति पितृचरणाः। इदमेव युक्तं। कन्यायाः वरहस्ते १२६
= त्वनिरूपयावात्। अतः कन्यादाने दानशब्दो गौणः। परस्वमपि धर्मप्रजोत्पादनार्थमेव। न तु विक्रयण तौदो। धर्मप्रजोत्पादनार्थं = पुना
= कन्यां प्रतिपादयिष्ये इति नियमदर्शनात्। ८

---



दीनात्मप्रदत्तेति दानकांडेपि कन्याकोल वरकन्यां वरहस्ते दद्यादित्युक्तं = १
[illegible] हानदेव। प्रयोगपारिजाते गृह्यपरिशिष्टेपि कन्यांहस्ते प्रतिगृह्य वरहस्ते दद्यादित्युक्तं शौनकः। चतुर्थ्यंतं वरस्यो
क्ता नाम तद्गोत्र पूर्वकं। ततः स हस्तकर्मस्य इत्युच्चार्य ततः परं। वरस्य हस्ते तोयं दद्याद्देवतीर्थेन शांतधीरि
ति। इदं च कन्यादानं त्रिः कार्यं। त्रिवारमेवं कृत्वानु कन्यां दद्यात्ततः पिता। दातापठेदिमं मंत्रं कन्यातार
यतु स्वयमिति आश्वलायनवचनात्। गृह्यपरिशिष्टेपि। धर्मप्रजासिद्ध्यर्थं कन्यां प्रतिगृह्णामीति ब्रूया
देवं त्रिः प्रयुज्य क इदं कस्मा अदादित्येतस्य पूर्ववत् इति तिस्रो जपेदित्युक्तं। शौनकेनापि वारत्रयं कन्यादानं कार्यमित्यु
क्तं कारिकायां। वरोथ प्रतिगृह्णीयात् स्वस्ति कृ इति मंत्रतः। अध्यावहनिकं किंचित् कन्यादाता ततः
परं। गोभूहिरण्यदास्यादि तस्मै दद्यात् स्वशक्तित इति। कन्यायाश्च प्रतिग्रहः दक्षिणांसे कार्यः दक्षिणांसे
कन्यामभिमृश्य क इदं कस्मा अदादिति गृह्यपरिशिष्टोक्तेः। आश्वलायनः। अनुमंत्रयेत प्राण्यभिमृशो इत्यन्ये॰
मंत्राद्भिमा र्ष्य ६ दप्राणिकं यां चेति। अभिमर्शनं च दक्षिणांसे हस्ते शिरसि वा दानहेमाद्रौ विष्णुधर्मेतु। करे गृहीत्वा कन्या
तु दासदास्योद्विजोत्तमाः। करं तु हृदि विन्यस्य धर्मो ज्ञेयः प्रतिग्रह इत्युक्तं अन्यत्रतु। दासस्त्वथ समा
दाय कन्यां शीर्षे थवा करे। पुत्रमुक्तं गमाद्यष्टव प्रतिगृह्णीत दत्त कमित्युक्तं हेमाद्रौ विष्णुधर्मे। कन्या
दानेतु नपठेद्ग्रामाणां तु पथ कृपथकं। प्रतिग्रहे द्विजश्रेष्ठास्तत्रैवां तर्पवीतिते। कन्यादानांगो हेमदास्यादिदा
नेष्वेक दानमंत्रान्नपठेदित्यर्थः। तेन प्रयोगरत्नेन तद्भ्रमदानं तत्र मंत्रपाठश्चिंत्यः। तथा तत्रैव। कन्या
दासस्तथा दासी प्राजापत्याः प्रकीर्तिताः। तेन प्राजापत्यामिमां कन्यां तुभ्यमहं संप्रददे इत्याद्युल्लेखः॥

Indira Gandhi National Centre for the Arts

ब्राह्मणान् शतसंख्याकान् कन्यादाता तु भोजयेत्। पक्वान्नैः पूरिकाभिश्च तेभ्यो दद्यात्तु दक्षिणामिति। अत्र बहुलं भूयसीप्रायेण बोध्यं।
तेन भुक्तस्यैव पुनर्भोजनं। अनेन न संख्यापूरणं। ततो भूयसीसंकल्पः कन्यादात्रा कर्तव्यः। तथा। ततो भूयसीं दद्यात् ब्राह्मणेभ्यो विशेषतः।

प्र·वि· ततः वरदक्षिणां कांस्यपात्रादि च दत्वा ब्राह्मणभोजनसंकल्पं भूयसीसंकल्पं च कुर्यात् इति केचित्। अ

१२८ येतु ज्योतिष्टोमातिरात्राणां शतं शतगुणात्कृतं। प्राप्नोति कन्यकां दत्वा होममंत्रैश्च संस्कृतामिति पारिजा
ते संवर्तेनाभिधानात्वोसारकहोममंत्रादिसहितस्यैव कन्यादानस्य फलसंबंधात् होमोत्तरं सर्वोते ब्राह्मणभो
जनादिसंकल्पं कुर्यादित्याहुः। वरदक्षिणादानानंतरं च यत् कक्षीवंतमिति मंत्रेण वध्वाः कुंभ
स्पर्शनं भट्टैरुक्तं तत्र मूलं मृग्यं। ततः वरवध्वोरभिषेक उक्तो गृह्यपरिशिष्टे दातावरायणो हिरण्यादि दद्या
त् पुरोधाः कांस्यपात्रे आसिच्योदुंबर्या शाखया पलाशया सहिरण्यपवित्रया सदूर्वापवित्रया वाभिषिं
चेत् पूर्वलिंगाभिर्ऋग्भिरिति। ततः सूत्रवेष्टनं। आश्वलायनः। ईशानकोणतः सूत्रं वेष्टयेच्च धातयोः।
परिवेसादिभिर्मंत्रैः कुर्यात्तच्च चतुर्गुणं। रक्षार्थं दक्षिणे हस्ते बध्नीयात् कंकणं तयोः। विश्वेत्ताते
ऋचा पुंसः कन्यायाश्च चरुस्तथा। भट्टैस्तु नीललोहितेमिति कन्यायां मंत्र उक्तः। पित्र्यचरणास्तु वि
श्वेत्तात इति मंत्रः कन्यायां नीललोहितमिति मंत्रस्तु पतिर्बंधेषु बध्यत इति मंत्रलिंगाद्वरे इत्याहुः॥
इदं सूत्रवेष्टनं गृह्यपरिशिष्टेनोक्तं। अत एव भट्टैर्ये द्वा सूत्रवेष्टनाद्युक्तं पूर्वं संपादिते कौतुक
सूत्रद्वयमस्मिन्नवसरे वरवध्वोर्दक्षिणवामकरक्रमेण बध्नीयादित्युक्तं। अस्मिन्नेवावसरे आनेवि
श्वेभिरिति मंत्रान् वृत्या वध्वा दक्षिणोत्तरयोः केशपक्षयोः कूर्णाद्दर्भान् बध्नीयादिति भट्टाः। इदं तु कृताकृतं॥
यदि कृतं भवत इति सूत्रात्। ततः अक्षतारोपणं। गृह्यपरिशिष्टे। अथानयोरक्षतारोपणं तैजस

पात्रे क्षीरमानीय घृतमासिच्य वरः प्रक्षालितपाणिर्वध्वाः प्रक्षालितेंजलौ क्षीरघृतं पाणिनाद्भिरुपस्तीर्य
द्विस्तंडुलानंजलिनावघाति। यथानुपूर्वेण ततोद्भिरुपरिष्टादभिघारयत्येवं वरांजलावस्तंडुलपूरणं कु न्य
या तदा दाता तयोरंजल्योर्हिरण्यमवदध्यात् अथ वरः कन्यांजलौ स्वांजलिं धारयेद्दाता कन्यां श्रावयेत्तु दक्षिणां

तुष्टि पांतु। बहुदेयं चास्तु। पुण्यं वर्द्धतां। शांतिः पुष्टिश्चास्तु। तिथिकरणमुहूर्तनक्षत्रसंपदस्त्विस्त्युक्त्वा कन्यामु
त्क्षिप्य तदंजल्यक्षतान् वरमूर्ध्न्यारोपयेद्वरोपि तन्मूर्ध्नि स्वांजल्यक्षतानारोपयेदेवं त्रिर्वधूपूर्वं वरां
जलौ वधूस्तंडुलपूर्णां कुर्यात्तदंजलावन्योन्यसमारोपणं कारयेदिति। तेनादौ वध्वाः पाणौ तंडुलनिक्षेपः
पश्चाद्वरस्यैवं वारत्रयं। श्रमोपहः श्रियो धर्मः प्रजामेयशास्त्वपीस्येवं वधूक्रमेणाक्षतारोपणं। पश्चाच्च वरस्य
पाणावाक्षेतंडुलनिक्षेपपूर्वं यतोश्रमोधर्मः श्रियः पशुः प्रजाः इत्येवं वरक्रमेण त्रिवारमक्षतारोपणं तूष्णीं सप्तममिति सत्तवा
रमक्षतारोपणमिति भट्टाः। केचिदक्षतारोपणे श्रातोयज्ञरस्यादिमंत्रान्नेच्छंति। गृह्यपरिशिष्टे अनुक्तत्वादित्याहुः। भट्टा
अप्येवं। शिष्टास्तु श्रमोपहः श्रियो धर्मः प्रजामे यशास्त्वपीत्येवं वारत्रयमक्षतारोपणं कृत्वा तूष्णीं चतुर्थं कुर्वंति
तत्र मूलं मृग्यं। गृह्यपरिशिष्टे। अथ वधूवरौ स्वशिरः पुष्पं क्षीरघृतेनाक्ता मपास्यरेतिलकं कुरुतः। कंठसूत्रजमामुंच
तः। यद्यपीदं तिलककरणं गृह्यपरिशिष्टे दंपत्योरभिषेकोत्तरमुक्तं तथापि कारिकारेणाक्षतारोपणोत्तरमेवो
क्तत्वाद्भट्टैस्तथोक्तमिति ज्ञेयं। ततो वध्वाः नीराजनपूर्वकं वस्त्रद्वयपरिधापनं कृत्वा वरो मांगल्यतंतुनेसनेन मंगलसू
त्रं बध्नीयात्। तथा चाश्वलायनः। कन्यायै वाससी दद्यात् युवमिसनयापुनः बध्नीयात् स्यकाकंठे सूत्रं मणिसमन्वितं।

प्र॰चि॰ १४० मांगल्यतंतुनानेनमंत्रेणस्याद्धंतुतत्। गृह्यपरिशिष्टे। अथपुरोधावलयोरुत्तरीयांतयोः पंचपंचपूगीफलानिविबाहस्व शास्त्रा॰
तरक्षिणंगणाधिपमनुस्मरन्गणानांत्वाआहृतनंदृक्षुमंतमितिपूजयेदितिशेषः। वधूवरयोरुत्तरीयांतौचनील
लोहितंपवतीतिबध्नीयादितितेनउभयत्रबंधनेनीललोहितमितिमंत्रइतिभट्टाः। आश्वलायनः। नमस्कुर्या
ततोगौरीं सदामंगलदायिनीं। तेनसानिर्मलालोकेभवेत्सौभाग्यभागिनी। पात्रेषुपात्रस्थितासिततंडुलपुंजत्रे
येमहालक्ष्मीपार्वतीशचीं चपूजयेदितिसुक्तं। ततः जीरकलवणाद्येवीक्षणमिदद्यादिसाचारः। ततोविप्राःआज्ञ
प्रजामित्याद्याशीर्वादान्पठेयुः। यद्यपिप्रयोगपारिजातेगृह्यपरिशिष्टानुसारेणकन्यादानानंतरंप्रतिग्रहांते
पटनिरसनपूर्वकंनिरीक्षणक्षताक्षतारोपणधेन्वादिदक्षिणादानाभिषेकापरस्परतिलककरणमालारोपणकौतु
कबंधगणपतिपूजनमित्येवंक्रमउक्तः। तथापिदाक्षिणात्यशिष्टाचारात्सावादेवंक्रमोस्माभिराहृतः। अथएव
अथरवलूजावचाइतिसूत्रपदार्थस्वरूपेष्वतत्क्रमेपिदेशाचारानुसारेणप्रमाणमितिभट्टाः। शौनकोपिनाना
विधाजानपदाग्राम्याश्चोद्वाहकर्मणि। क्रियंतेलौकिकाधर्मास्तेषुस्वकुलपुरुषैः पूर्वैरनुष्ठितान्कृत्वाकुर्यादि
रेपरिग्रहं। अतएवकेचित्कृष्णाः म्रम्लशुद्धार्थनिरसनंसप्तवारमक्षतारोपणंकुष्माशिमर्शनंगुष्ठेणतिल
कंनकुर्वंति। तेनायंसंग्रहः। कन्यादानंदक्षिणाचाभिषेकः सूत्रवेष्टनंअक्षतारोपणंकंठसूत्रबंधस्तथैवच। १४०
१गणेशपूजनंशान्याः पूजनंचेतिवैक्रमः। अथविवाहहोमः। अत्रजयंतेनाज्मसंस्कारांतेकृतेवरः

उत्थायकन्यांप्रतिगृह्यपश्चात्तयान्वारब्धः प्रधानहोमंकुर्यात्। यद्वापूर्वमेवोदकपूर्वंकन्यांप्रतिगृह्यपश्चादग्निस्था
पनादिकुर्यादितिपक्षद्वयमुक्तं। तत्रांत्यपक्षएवबहुसंमतः। इदमत्रगृह्यं। पश्चादग्नेर्दृषदमश्मानंप्रतिष्ठाप्योत्तर
पुरस्तादुदकुंभंसमन्वारब्धायांहुत्वातिष्ठन्प्रत्यङ्मुखःप्राङ्मुख्याआसीनायागृभ्णामितेसौभगत्वायहस्तमि
तिगृह्णीयादिष्टशुभंकामयमानःसपुमांसंवमेपुत्राजायेरन्नितिसंगुलीरेवस्त्रीकामोरोमांतेहस्तंसांगुष्ठमुभ
यकामःप्रदक्षिणमग्निमुदकुंभंचत्रिःपरिणयन्जपत्यमोहमस्मिसात्वं॰जीवेमशरदःशतमितिपरिणीयपरि
णीयाश्मानमारोहयतीममश्मानं॰स्थिरइतिवध्वांजलावुपस्तीर्यभ्राताभ्रातृस्थानोवाद्विर्लाजानावपतित्रिर्जाम
दग्न्यानांप्रत्यभिघार्यहविरवत्तंचैषोवदानधर्मोर्यमणंनुदेवं॰अर्यमाप्रेतोमुचातुनामुतःस्वाहा। वरुणंनुदेवं॰
पूषणंनु॰पूषाप्रेतोमुंचातुनामुतःस्वाहेत्यविच्छिदन्त्संजलिस्रुचेवजुहुयात्परिणीयश्शूर्पपुटेनत्ष्णींच
तुर्थमोप्यहेकेलाजान्परिणयंतितथोत्तमेआहुतीनसन्निपतेतोथास्यैशिखेविमुंचतियदिकृतेस्तवतलुर्णास्तु
केकेशपक्षयोर्बद्धभवतःप्रत्वामुंचामिवरुणस्यपाशादितिउत्तरामुत्तरयेति। वेदिकायामग्निस्थापनोत्तरंपश्चादग्नेर्दृषद
मश्मानंउत्तरपूर्वदेशेचउत्तरकुंभंप्रतिष्ठापयेत्। अत्रदृषदमश्मानमितिसामानाधिकरण्येनसंबंधः। नतुदृषदश्मा
नंतपुत्रकोपिनः। तथात्वेअश्मानमारोहयतीत्यत्रपुत्रकारोहणापत्तेः। नचैवमश्मग्रहणानर्थक्यमितिवाच्यंत
स्यमन्वईदृषद्वावस्यर्थत्वात्। पुत्रकप्रतिष्ठापनंतुमांगलार्थमितिरहस्यः। अत्रचाज्यासादनोत्तेकृत्वासमन्वा

Indira Gandhi National
Centre for the Arts

प्र·चि· १४१ | एवंषां वध्वां इध्माधानाघारांतं कृत्वापूर्वोक्ता आहुतीर्जुहुयात्। तत्र चत्वारः पक्षाः। अग्न आयूंषि पवस इति तिसृभिः प्रजा
पतये चैकेत्येकः पक्षः। व्याहृतिभिरेके। उभाभ्यां समुच्चिताभ्यामेके इति तृतीयः। नैके का चनेति चतुर्थः। अस्मिंश्च
तुर्थपक्षे अनादिष्टाहुतयोप्यवर्तंत एवा। एतेषु पक्षेषु यः कश्चन पक्षः। आश्रयणीय इति जयंतः। सर्वेषु पक्षेषु त्वम
न- र्यमेत्साहुतिश्चतुर्थी भवत्येव। आज्यभागांतत्वस्तः। यद्यपि साधारणसूत्रे अग्न आयूंषीति तिसृभिः प्रजाप
तेन त्वदेता अन्य इति चेदिति च तुर्थी प्राजापत्या उक्ता। तथापि त्वमर्यमा भवसि यत्कनीनामिति विवाहे च
तुर्थीमिति वचनाद्विवाहे पंचमी प्राजापत्या होया। तेन विवाहे प्राजापत्या हुतेः पंचमस्थाने उत्कर्षो न तु त्व
मर्यमेत्यनया प्राजापत्याहुतेर्बाध इति वृत्त्याशयः। अत्र च होमारंभे पश्चिममार्गेण नियमितवाचं वधूमा
नीय स्वदक्षिणत उपवेशयेदिति सदृाः। शौनकोपि। पश्चिमेन तथानीत्वा तस्मिन्नेव वरासने। वरस्य दक्षि
णे पार्श्वे प्राङ्मुखीमुपवेशयेदिति कारिकायां। आत्मनो दक्षिणपार्श्वे वधूं तामुपवेश्य च। उपलेपादि कुर्वीत ह
विर्भुक्स्थापनांतकं। अग्नेः पश्चात्प्रतिष्ठाप्य दृषदं सोपलामथ। उदकुंभं निधायाग्नेः प्रागुदीच्यामतः परं। आ
ज्याधिश्रयणांतं स्यादन्वाधानादि पूर्ववत्। आज्येन सह लाजानां पर्यग्निकरणं भवेत्। त्रिः प्रोक्षणं च तेषां वे
वलोऽसवने सति। इध्माभिघारणांतं स्यादाज्यभागौ तथा हि च इदं। वधूर्दक्षिणहस्तेन समन्वारब्ध एव सन्। कुमारो १४१
घारपर्यंतं चोक्तो का व्या हुतित्रयं। अत्राज्यभागौ नैव स्तु विसुतं पूर्वमेव तु। हुत्वा त्वमर्यमेत्यां प्रजापतय इ
त्विवाहे च तुर्थीमितिस्थाने नियमो न त्वाहुते नियमस्तेन पुनः संधाने पि चतुर्थ इयमाहुतिर्भवतीति। अन्ये तु विवाहे=
=च तुर्थीमिति विवाहे एवेयमाहुतिश्चतुर्थी भवति पुनः संधाने तु पंचमीमिमाहुः। अपरे तु विवाहे एव भवति नान्यत्रेत्याहुः।=
=अत्र च मूलं नविद्मः। १

= अत्रान्वारब्धः वरस्य दक्षिणहस्तप्रकोष्ठे कर्तव्यः। तदुक्तं भरद्वाजेन। कुशेनान्वारब्धो दक्षिणेन हस्तेन प्रकोष्ठे भवतीति। १
स्विष्टेतीं पारिजाते शौनकेन तु पंचमीं प्राजापतये हुत्वाज्यस्यापि च समस्ताभिः कृत्वाहुतिचतुष्टयमिसु त्वा पश्चा
त्स्विष्टकृतं कुर्यादित्युक्तं। तथा पात्रासाद
नप्रणीत हणमुक्तं। उदकुंभं च धान्यराशौ उपरि उदकपूर्णं सपल्लवं गंधपुष्पाद्यर्चितं निदध्यात्। तथा पात्रासादनसमये पात्रपश्चिमतो लाजार्थं शूर्पमासादयेदिति सदृाः। शौनकेन तु उदकपूर्वे स्थिता न लाजानित्यादिना
ऐशान्यां स्थापनमुक्तं। यत्तु आज्याधिश्रयणांतं कृत्वा आज्येन लाजैः सह पर्यग्निकृत्वाज्योत्पवने कृते लाजांस्त्रिः
प्रोक्ष्य स्रुवं संमृज्येति भट्टैरुक्तं। तच्चिंत्यं। कारिकाकारेण केवलोऽसवनपक्ष एव लाजानां त्रिः प्रोक्षणोक्तेः। अ
प्रोक्ष्य स्रुवं संमृज्येति भट्टैरुक्तं। तच्चिंत्यं। कारिकाकारेण केवलोत्सवनपक्ष एव लाजानां त्रिः प्रोक्षणोक्तेः। तत्र पाणिग्रहणे
त्र चतिष्ठन्नसमिधमादध्यादिति समावर्तनेतिष्ठद्ग्रहणमन्यत्रासीनस्य कर्माणि स्युरित्येवमर्थं। प्राङ्मुख्या इति प्राङ्मुखा
प्यासीनप्राप्तौ तन्निवृत्त्यर्थं सूत्रेतिष्ठद्ग्रहणं। प्रसङ्गमुखग्रहणं प्राङ्मुखत्वनिवृत्त्यर्थं। प्राङ्मुख्या इति प्रसङ्गमुखा
धिकारनिवृत्त्यर्थं। आसीनायाः इत्युत्तरं विहितं तिष्ठंत्याः स्यादित्येवमर्थमिति वृत्तिकारः।
म५ | रः। वरविषये तु तिष्ठद्ग्रहणमनुवर्तमाने स्पष्टमेव तिष्ठतोपि तिष्ठेत्। अत एव उपस्तरणादिकं लाजावपनादिकं चानिष्ठं सार
वांजलौ निष्ठताभ्रात्रादिना कार्यमिति पद्धतिपादाः। पाणिग्रहणेनोत्तानेनोत्तानपाणिं नीचेन वोत्तानं पाणिं गृह्णीयात्।
पुत्रकामोपसमाहारः। तथा च ये पुत्रा जायेरन् ते पुंमांसः स्युरिति यदि कामयीत तदंगुष्ठमेव गृह्णीयात्। स्त्रीकामो दु
हितृकामश्चेत्तदंगुलीरेव गृह्णीयात्। उभयकामश्चेत्तदा रोमांतेसांगुष्ठं हस्तं गृह्णीयात्। उदकुंभग्रहणं समन्तात्पात्राणां बहिः करणार्थमित्येके। अन्ये तु विवाहे यद्विशेषतः। पात्रं अग्नेः तस्यैव बहिः करणार्थमिति
सायत पात्राणां बहिः करणार्थमित्येके। अन्ये तु विवाहेमद्विशेषतः। पात्रं अग्नेः तस्यैव बहिः करणार्थं। तत्र लाजाहो=
=वस्तु तत्सुतिष्ठद्ग्रहणस्य अनानुवृत्तिः। तत्र पाणिग्रहणमेव तत्। तथा च समावर्तनेतिष्ठद्ग्रहणस्यान्यत्रोपवेशनार्थत्वात्। लाजाहो=
=मःआसीनस्यैवेति युक्तं। ४
हण

१८ पुनः संभाने पि उपस्तरणाभिघारणे ... [redacted] पतिः ॥
=घाला जहोमांतं तिष्ठं साएव भवति। स्वयमुपविष्ट एवेति। अनुवृत्त सभा नात पुनः संभाने स्वयमेव लाजा नावपति परिणयने न भवति।
= सभा होतॄणं च
प्र०वि० तिष्ठंति। कारिकायां। अथोन्नतमुखीं कुर्यात् ऊर्ध्व यावन्तानं। प्राङ्मुखस्य उपविश्य यास्तिष्ठन् प्रत्यङ्मुखः स्वयं। विवाह० वधूवरौ तिष्ठे
१४२ अंगुष्ठादि तु गृहीत्वा गृभ्णामि सौभगत्वाय इत्यादि मंत्र तद्वृत्ति। शौनकोपि। अथोत्थाय वरो वध्वाः प्राङ्मुख्याः पुरतः स्वयं।
प्रतीच्यभिमुखस्तिष्ठन्नासीनायाः करांबुकं। दक्षिणं दक्षिणेनैव पाणिनां गुष्ठसंयुतं। गृभ्णामीति ऋचा स
प गृहीत्वोत्थापयेत्तां वधूं। प्राङ्मुखीं सम वस्थाप्य कालमित्याथ तत्करौ। कारयित्वांजलिं ताभ्यां तस्मिन्नाज्यसु
वेण तु। उपस्तीर्य वरस्तिष्ठेत्सविताभिघारितमंजलिं। तस्यास्तदंजलौ भ्राता तत्स्थानीय एव वा। लाजान्शूर्पा
द्गृहीतांस्तु अंजलौ तान्निरावपेत्। अंजलिस्थानवतांश्च पश्चात्ससभिघारयेत्। वधूः स्वांजलिविच्छेदम
कुर्वाणास्तु चैव तान्। लाजानावर्जयित्वाग्निमुदकुंभादि संयुतं। वधूं परिणयंश्चापि स्वयमग्रेव्रजेत्तथेति। ते
नपरिणीयेति सूत्राद्धूवाएव परिणयनं यद्यपि प्रतीयते तथापि स्वयमग्रे व्रजेत्तथेति पारिजातेशौनक
वचनात् प्रदक्षिणप्रक्रमणात् कुशानोदर्चिषस्त्रिषु नं च का स्वरति रघुवंशाभिज्ञम्‌ वरस्यापि परिण
यनमितिशिष्टाः। स्वयंरपिति ... तं जलिरंगुल्य विच्छेदेनांगुल्यग्रैरंगुलिपर्वभिर्वाहावयेत्।
परिणयनसमयेच स्वयमग्रे गच्छन् जपेदिसुक्तं। अश्मारोहणं च वध्वाः उपाभ्यांपादाभ्यामिति जपं
तः। अत्र च यद्यपि त्रिःपरिणयनं जपसमोहमस्मीतिसूत्रे त्रिरिति नपरिणयनेन संबध्यते। तथाले
मंत्रस्य सकृज्जपापत्तेः। नापि जपेन। तथा सति सकृत्परिणयनापत्तेः तथापि परिणीय परिणीयाभ्या १४२
=अत्र लाजाहोमस्यापूर्वोपांचि तिरोनियमो नास्तीति जयंतभाष्ये ।=५

१८४
७ श्चलाजाहोमे उपस्तीर्य द्विर्लाजानावपतीतिक्त्वाप्रत्यये न समानकर्तृकत्व निर्देशान्नाभ्रातुरुपस्तरणे तथाले भ्राता उपस्तीर्य तिस्यात्। तेन वरस्ये
नमातेहयतीति तदग्रिम सूत्रे परिणयनानुवादेनाश्मारोहणं विधेयं। तत्र च परिणयने वीप्सया बहुत्वं ग
प म्यते। तत्सत्पाएं च नैयदि त्रित्वं परिणयनगतं भवेत्। तेन तत्र तमेव त्रित्वं। न तश्च त्रित्वस्य परिणयनां
नंगत्वेपि मंत्रस्य परिणयनांगत्वाद्यावत्परिणयन मावृत्तिः। एवं लाजाहोमे मंत्रपाठो वरस्यैवासइभांदेव
इतिपरोक्षनिर्देशात्। न च कन्या अग्निमयक्षतेतिलिंगात्तस्या मंत्र इति वाच्यं। बहुवचनांतेन कन्या
म शब्देन देवकन्याना मभिधानादिति वृत्साशयः। शूर्पकोणेन लाजाहोमं तु वधूर्वरो वा प्रजापतये स्वाहेति
कुर्यादितिपद्धा। कारिकायामपि। शूर्पकोणेन शिष्टांस्तान् पश्चालं जुहुयाद्वधूः। अयंतस्वाहहवनं चतुर्थ वरकर्तृकमि
ति। शौनकस्तु हुतावशिष्टान् लाजांस्तु वधूः स्वापि मुखं ततः। शूर्पाग्रेणैव जुहुयात्तूष्णीनिरवशेषतस्त्वाहा। आ
श्वलायनसूत्रे तु अवशिष्टान् वरो लाजान् शूर्पकोणेन चैव हि। आग्न्यालं जुहुयात्तूष्णीमितियत्तद्विदां मतमिसु
कं। स्तोतु तूष्णीग्रहणं प्रजापतिध्यानार्थं। चतुर्थग्रहणं कथमेतस्य द्रव्यस्यास्विष्टं न स्यात् स एव च कर्तार्थ कृ
थास्यादित्येव मर्थोतेन शूर्पकोणेन होमो वध्वाएवेसुक्तं। ओप्यो ध्रहैकं इति सूत्रे ग्रहणद्वयमन्त्रस्थापनार्थः।
तेन पूर्वे होमं कृत्वा पश्चात्सरिणमनं कार्यं न तान्तर्पेणा होमः। तेन उत्तरयोस्तु सोमं प्रयपरिणयनं कर्तव्यमित्यसू
न्निपातश्चार्थ इतिवृत्साशयः। कारिकायां। यदि वर्ष्कशिखेबध्वादेध्यधर्मादिना ततः। प्रत्वामुंचामि मंत्रेण दक्षि
णां तु विमुंचति। प्रतेमुंचामि मंत्रेण तूत्तरामपि मुंचति॥ शिखे वरस्य बढे चेत्तूष्णीमेव विमुंचति। अत्राथोशिखे स्पे
=तेनपूर्वे होमं कृत्वा पश्चात्सरिणयनं कार्यं न ता न तर्पेण होमः।=४

Indira Gandhi National Centre for the Arts

= स्यणाक्षिकलायस्मिन्पक्षेतन्नास्ति तदपि होमांते। १२

प्र·चि· विमुंचतीतिसूत्रे अथ शब्दः इदानींस्विष्टकृन्निवृत्त्यर्थः। अस्यै अस्याः षष्ठ्यर्थे चतुर्थी। यदि दशधर्मादिना विवाह०
१४२ उर्णासूत्रेण शिखे बद्धे स्यातः। तदा प्रत्वामुंचामि प्रेतोमुंचामीति मंत्राभ्यां दक्षिणोत्तरे शिखे विमुंचती
ति वृत्तिः। अनयोश्च मंत्रयोः सूर्या सावित्री ऋषिः सूर्या सावित्री देवता आद्यात्रिष्टुप् उत्तरानुष्टुप् ते
या। ततः सप्तपदी। कारिकायां। अभ्युत्क्रामयतीशान्यां वधूं सप्त पदानि च। सा चाभ्युत्क्रामयेत्पूर्वं दक्षि
णं पादमात्मनः। इषइत्यादिभिर्मंत्रैरनुषक्तैर्भवादिना। सप्तमे क्रामिते तत्रस्थः शिरसी सन्निधाय च। अं ८
सः कुंभात्सा तेन शिरसी अवसिंचति। आज्येनस्विष्टकृद्धोमं कृत्वा शेषं समापयेत्। होमादारभ्य षष्ठेर
हा वा चांदृष्ट्वा ध्रुवादिकान्। जीवपत्नीति सा वाचं विसृजेच्च ततः परं। शांतिरस्त्वित्यादिपंचदशमंत्रैरवसिं
चतीतिभट्टाः सूत्रेपि। अथैनामपराजितायां दिशि सप्तपदान्यभ्युत्क्रामयतीषएकपदीभव सामामनु
व्रता भव पुत्रान्विंदावहै बहूंस्ते संतु जरदष्टयः। ऊर्जेद्विपदी रायस्पोषायत्रिपदी भव मायोभव्याय चतुष्प
दी। प्रजाभ्यः पंचपदी ऋतुभ्यः षट्पदी सखा सप्तपदी भव। ०जरदष्टय इत्युभयोः संनिधाय शिरसी उदकुं
अ३ भेनावसिच्य ब्राह्मण्याश्च वृद्धाया जीवपत्न्या जीवप्रजाया अगार एतां रात्रीं वसेद्ध्रुवमरुंधतीं सप्तऋषीनिति
दृष्ट्वा वाचं विसृजेत जीवपत्नी प्रजां विंदेयेति। अथ शब्दः शिखाविमोचनानंतरमपि स्विष्टकृन्नस्यवतीसेत १४२
र्थ इति वृत्त्याशयः। अपराजितादेशानीसवादीनांसर्वत्रानुषंगः सप्तमेपदे अभ्युत्क्रामिते तत्रस्थएवो

र्भयोः शिरसी संनिधाय। केनचिदुदकुंभमानीय तत्रस्थेन जलेन स्वयमेव शिरसी आसिंचति। उदकुंभग्र
हणं तत्स्थोदकलक्षणार्थं। ईशानीदिशमारभ्य सप्तपदीक्रमणे सार्धहस्तत्रयेण मवधाना पूर्वदेशे च कुंभ
स्थापितत्वात्तस्यान्यत्र नयनायोगात्केनचिदुदकुंभमानाय्येत्युक्तं। ततः स्विष्टकृत्। ग्रामांतरगमनं चेदेवं ८
गुणयुक्तायाः ब्राह्मण्याः गृहे एतां रात्रिं वसेत्। स्वग्रामे विवाहे नायं विधिः। समाप्ते होमे ध्रुवादीन्दृष्ट्वा जीवप
गुणयुक्ता
त्नीति मंत्रेण वाचं विसृजेत्। तेन होमानंतरमेतावंतं कालं वाङ्नियमो मंत्रेण वा विसर्गश्च तथा एवेदि
त्तिः। होमादारभ्य वध्वाः ध्रुवादिदर्शनपर्यंतं वाग्यम इति जयंतः। आश्वलायनस्तु अहःशेषं चतिष्ठेता
स्तिः। होमादारभ्य वध्वाः ध्रुवादिदर्शनपर्यंतं वाग्यम इत्युक्तं। ध्रुवारुंधती सप्तर्षि
मोने मे व तु दंपती। ध्रुवं चारुंधतीं दृष्ट्वा विसृजेतां तूष्णीं वचश्च इत्युभयोर्वाग्यम इत्युक्तं। ध्रुवारुंधती सप्तर्षि
प्रभृतीन्दृष्ट्वा जीवपत्नी प्रजां विंदेयेति वाचं विसृजेत। ध्रुवादि लक्षणं प्रदोषकालस्योपलक्षणं। तेन मेघादिना
सत्र दर्शनेपि तस्मिन्काले वाग्विसर्ग इति भट्टाः। दिवा विवाहे तान्मनसा ध्यायेदिति सूत्रांतरं। आश्वलायनः। रा
त्रौ विवाहे नि वा चैव कन्यादानं यदा भवेत्। तदानीमेव होमस्यादिवा हस्य च सिद्धये। यावत्सप्तपदी नस्याद्विवा
होते वसिष्यति। सद्यो तो होममिच्छंति ततः सायमुपासनं। सूत्रेपि। पाणिग्रहादि गृह्यं परिचरेदिति। औपासन
होमे तु विशेषमाह लिंगोपशौनकः। यदि रात्रौ विवाहान्तस्य तथासति उपक्रमोत्तरस्मान्तः सायं परिच
रेदमुं। यदि रात्रौ नव नाडीमध्ये अग्न्युत्पत्तिस्तदा तदैव होमारंभः। तदुत्तरं चेत्परदिने सायमारंभ इति सुदर्शनभा
ष्यस्पष्टं। यदि सोग्निर्नश्येत्तदा अयाश्चेत्येका आहुतिं हुत्वाग्निं संपाद्य द्वितीय दिने होमारंभं कुर्यादित्युक्तं। आ

Indira Gandhi National
Centre for the Arts

प्र॰चि॰ १९२ आश्वलायनः। विवाहश्चेद्द्वे प्रात्रौ साद्धुयामद्युयादध्वः। तदेवोपासनं कुर्यादिति यज्ञविदो विदुः। तथा। नित्यहोमे नित्यहोम॰ गृहप्रवेशनीयं
तु कालस्यादग्नौ नाहुतिन वा लभः। द्विगुणस्याद्विवाहे तु इति वेदविदो विदुरिति। एवं तु सुदर्शनभाष्यादि विरो
धाच्चिंतमिदमर्थे। आश्वलायनः। भोजनं शयनं स्नानं तथैव स्त्रोपवेशनं। गृहप्रवेशपर्यंतं तपसोर्मुनयो
विदुः। त्रिरात्रमूर्ध्वं गृहे रम्यां सुंदरां च व नार्थिकीं। नासुखीं नातिनीचां वारागिणीं सर्वथा सजेत। अथाप
गृहप्रवेशनीय होमः। अयं चागृहस्य कृता प्रयाणविध्ये तं तदमुकत्वात् समा ख्यावशाच्च विवाहदिने दिनां
तरे वा स्वगृहे एव कर्तव्यः। शिष्टास्तु श्वशुरगृहे एव कुर्वतीति महुाः। तत्र वक्ष्यमाण समानतंत्रता बोध
काश्वलायनस्मृतिरेव मूलं। यदा तु श्वशुरगृहे एव होमद्वयकरणं तदा समानतंत्रे व। यदा स्वगृहे कर
णं तदा पृथक् स्थंडिले स्वतंत्रो होमः। आश्वलायनस्य तौ तु यदि कालवशात् तुं पृथक् होमद्वयं नचेत्। द्वय
६ कु मप्येक काले वा कर्तव्यमिति केचनेति। अथ कोद्वयोः समानतंत्रतो काश्वशुरगृहे होमकरणे विषया। अन्यथा
त्वयं पक्षो व्यर्थ एव स्यात्। यदा तंत्रेण होमद्वयं करणं तदा आज्यभाग तदस्त्वावादि विरुद्धधर्मयोगाद्विवाह
तिगृहत्वसिध्यगृहप्रवेशनीयहोमाच्च होमद्वयमपि भिन्नतंत्रमेवेति। समानतंत्रत्वपक्षेपि म विरुद्धधर्मयोगः।
तथा ज्यभागोपाकयज्ञेषिसा ज्यभागयोरकरणपक्षाभिप्रायेण वचन वशाच्च भूयसां स्यात् स्वधर्मेभितिन्या च
येन च विवाहहोमगृहप्रवेशनीयहोमाभ्यां दायकाल वद्युगपदुत्पत्ति संभवेन सर्वसामंजस्यात्। अन्यथाश्व १४४
शुरगृहे एककाले त्वेकतंत्रता। अन्यथा तु भिन्नतंत्रतेति। अन्ये तु पुनः संधाने विवाहगृहप्रवेशनीयहोम
= श्वशुरगृहे एककालेपि भिन्नतंत्रत्वेएक बर्हिरिध्माज्यस्विष्टकृत इति तंत्रताविधाय सूत्रे वैयर्थ्यापत्तेस्तेन =

[illegible] प्रधान्याद्बुयसामस्य गृहस्थाज्यभागा गृहप्रवेशहोम
[illegible] करणे विवाहे सप्त होमानां प्राधान्याद्गृहप्रवेशनीये च च तुर्णां होमानां प्राधान्याद्द्वयसाम तदत्या ज्यभागा
करणे सि। [illegible] एवं निरवकाशस्मृति वशाद्द्वयोः समुच्चये प्याज्यभागाभाव एव पूर्वे फलमिति तेयं। वस्तुतस्तु श्व
शुरगृहे एककाले होमद्वयकरणे द्वयोः समानतंत्रता। अतएवैकं द्वयमप्येककाले वेति। अन्यथा होरकालत्वेपि
तंत्रत्वाभावे एक बर्हिरिध्माज्यस्विष्टकृत इति सूत्रं निर्विषयमेव स्यात्। तेनैककालत्वे समानतंत्रता। भि
न्नकालत्वे तु भिन्नतंत्रतेति। अतएव श्वशुरगृहे भिन्नतंत्रत्वे कालभेदार्थं मध्येश्वशुर प्रार्थनां कुर्वतीतिशि जा६
ष्टाः। एकतंत्रपक्षे प्रयोगविशेषः शाकलकारिकायां। समानतंत्रपक्षे तु लाँहोमांत माचरेत। आज्यभागोत्तरतो
हुत्वा द्वितीयोपि समाचरेत। द्वितीयो होमो गृहप्रवेशनीयः। प्रधानं नीयमानं हि तत्रांगाम्यपकर्षतीति न्यायेना
पि सांगो गृहप्रवेशनीय होमः कार्यः। अन्यथा अंगालोपेन प्राधान्ये गुण्यापत्तेः। श्वशुरगृहे भिन्नतंत्रपक्षे
स्थंडिलांतरे गृहप्रवेशनीय होमः। विवाहाग्निमुपसमाधायेति वचनात्। शाकलः। आधिवुत्थोविवाहाग्नि
मनुगच्छेत्प्रमादतः। स्थंडिलेश्वोत्रियागारादाहृत्याग्निं निधाय च। आज्येन जुहुयात्तत्र स्वेनैव तदुविवाह
वस्य। अयाश्चेत्येका हुतिरिति केचित्। बौधायनसूत्रे तु यद्यग्निरनुगच्छेत्र श्येत्त दोद्वाया तस्योपह
ताहुतिभस्मा च्युक्षायंते योनिरिति त्रिप्रं भस्म समारोपणमाजुह्वान उद्बुध्य स्वेति द्वाभ्यां समिधमाधा
य संपरिश्रित्य जुहुयात् अयाश्चाग्ने पंच होता ब्राह्मणत्त्क होते लिदरास्तु वा हुती: महाव्याहृती: सर्वे

प्र॰चि॰ प्रायश्चित्तानि जुहोतीति सायुक्तं। ग्रंथांतरे तु। आचतुर्थाद्विवाहाग्निं न त्यजेद्भोदनाग्रतो। कार्यांते दशाभिर्मंत्रैर्जुहुयात्प्रसुचेपतमिति। इदमत्र गृह्यं। प्रयाणउपपद्यमाने पूषा त्वेतो नयतु हस्तगृह्येति यानमारो- गृह्य॰

१२५ हयेदश्मन्वती रीयते संरभध्वमिति सार्धर्चेन नावमारोहयेत् उत्तरेणोत्तरमयेजीवं रुदंतीति रुदत्यां विवाहाग्निमग्रतो जस्रं नयेति कल्याणेषु देशवृक्षचतुष्पथेषु मा विदन्परिपंथिन इति जपेद्वासे वासे सुमंगलीरियं वधूरितीक्षकान्वीक्षेत इह प्रियं प्रजया ते समृध्यतामिति गृहं प्रवेशयेद्विवाहाग्निमुपसमाधाय पश्चादस्यानडुहं चर्मास्तीर्य प्राग्ग्रीवमुत्तरलोम तस्मिन्नुपविष्टायां समन्वारब्धायां मानः प्रजां जनयतु प्रजाप तिरिति चतसृभिः प्रत्यृचं हुत्वा समंजंतु विश्वेदेवा इति दध्नः प्राश्य प्रतिप्रयच्छेदाज्यशेषेण वा नक्तिहृदये त ऊर्ध्वमक्षारालवणाशिनौ ब्रह्मचारिणावलंकुर्वाणाव धःशायिनौ स्यातां त्रिरात्रं द्वादशरात्रं संवत्सरं वैक ऋषिर्जायत इति चरितव्रतः सूर्याविदे वधूवस्त्रं दद्यादन्नं ब्राह्मणेभ्योथ स्वस्त्ययनं वाचयीतेति।

१२५

स्त्रं दद्यादन्नं ब्राह्मणेभ्योथस्वस्त्ययनं वाचयीत। प्रयाणे यदि यानमुपपद्येत तदायं मंत्रः। तेन प्रयाणे यानं नियतं। शिबिकादिना प्रयाणे नायं मंत्रः। यदि मार्गे नदी स्यात् तदाश्मन्वतीसार्धर्चेन वधूं नावमारोह येत्। उत्तरेणार्धर्चेन वधूमुदकादुत्तारयेत्। जीवमिति मंत्रं रुदत्यां जपेत्। इदं तु स्वग्रामेपि भवतीति विवाहाग्निमग्रतो हरणमन्यन्निवृत्तसर्पं। अजस्रग्रहणं प्रसक्तस्याग्नेरग्रे नयननियमार्थं। तेनात्र समारोपणं। नक्षत्रशोभनेषु देशवृक्षचतुष्पथेषु मा विदन्परिपंथिन इति मंत्रो जपेत्। वासे वासे च सतो वसतो इक्षकाः सतीचेत्तदा सुमंगलीति मंत्रेण ईक्षकानीक्षेत। वासादन्यत्रेक्षणे न मंत्रः। इह प्रियमिति मंत्रेण वधूं गृहं प्रवेशयेत्। विवाहाग्निमुपसमाधाय पश्चादस्यानडुहं चर्मास्तीर्य प्राग्ग्रीवमुत्तरलोम तस्मिन्नुपविष्टायां समन्वारब्धायां मानः प्रजां जनयतु प्रजापतिरिति चतसृभिः प्रत्यृचं हुत्वा समंजंतु विश्वेदेवा इति दध्नः प्राश्य प्रतिप्रयच्छेदाज्यशेषेण वा नक्तिहृदये तदूर्ध्वमक्षारालवणाशिनौ ब्रह्मचारिणावलंकुर्वाणावधःशायिनौ स्यातां त्रिरात्रं द्वादशरात्रं संवत्सरं वैक ऋषिर्जायत इति चरितव्रतः सूर्याविदे वधूवस्त्रं दद्यादन्नं ब्राह्मणेभ्योथस्वस्त्ययनं वाचयीत। प्रयाणे यदि यानमुपपद्येत तदायं मंत्रः। तेन प्रयाणे यानं नियतं। शिबिकादिना प्रयाणे नायं मंत्रः। यदि मार्गे नदी स्यात्। तदाश्मन्वती सार्धर्चेन वधूं नावमारोहयेत्। उत्तरेणार्धर्चेन वधूमुदकादुत्तारयेत्। जीवमिति मंत्रं रुदत्यां जपेत्। इदं तु स्वग्रामेपि भवतीति विवाहाग्निग्रहणमन्यन्निवृ[illegible]

न तेनाविवाहाग्निस्थापनं तेन चर्मास्तरणमात्रं न तु तस्या उपवेशनं ततः १० गृह्वेश

प्र.वि० सर्पं। अजस्त्रग्रहणं प्रसक्तस्याग्नेरग्नेनयननियमार्थं। तेनाप्यत्र समारोपणं। नक्षत्रप्रोक्तेषु देशादृष्ट
१२६ चतुष्पथेषु माविदन् परिपंथिन इति वरो जपेत्। वासिवासे वसतौ वसतौ ईक्षकाः। संतिचेत्तदा सुमंगलीरि
ति मंत्रेण ईक्षकानीक्षेत। कासादन्यत्रेक्षणे न मंत्रः। इह प्रियमिति मंत्रेण वधूं गृहं प्रवेशयेत्। विवा
हाग्निं उपसमाधाय समिस्प्रक्षेपेण प्रज्वाल्येत्यर्थः। विवाहाग्निग्रहणान्न विवाहहोममात्रेणाग्नेर्गे
ह्यत्वं। किंतु गृहप्रवेशनीयहोमे कृते। तेन गृह्याणि वक्ष्याम इति तदुत्तरं प्रवर्तते। तेन गृहप्रवेशनी ७१
यहोमादर्वाक् पौर्णमासप्राप्तेन स्थालीपाकारंभः। औपासनहोमास्तु कार्या एव। पाणिग्रहणादि
गृह्यं परिचरेदिति नियमात्। वैश्वदेवस्तु सर्वस्यैव। तेनाग्निनाशे होमद्वयं कार्यं। तदपि द्वादशरात्रांतरमे
व सायं वक्ष्यते उपसमाधायेति कृच्छ्रा। जिनास्तरणकालोपदेशार्थं पश्चा। मध्ये वउपधानकर्तोस्तत्वास्त
रणाकर्तेति द्वयोः समानकर्तृकत्वसिध्यर्थं क्त्वाप्रत्ययः। तस्मिन्नुपविशयामिति चर्मास्तरणानंतरमन्यदं १८२
गं कृतमिति ज्ञापनार्थं। प्रस्त्वचग्रहणं ग्रंगत्वे होमः। पश्चात्स्वाहाकार इति ज्ञापनार्थं। बर्हिष्याज्या
साद्नांते वध्वाः चर्मण्युपवेशनं। समन्वारब्धायां तस्यां इध्माधानाद्याज्यभागांते प्रधानहोमः। तेन यत्र
प्रस्त्वचग्रहणं नास्ति। अष्टाविंशुवेसाहेतत्र स्वाहां तएवहोमः। ततः समंजंत्विति मंत्रेण वरस्यद १८६
धिप्राशनं। वध्वाश्च तत्र स्त्रीसकृत्प्रयुक्तो मंत्रः। नाविति द्विवनादुभयप्राशनार्थः। आज्यशेषेणवा
च

उभयोर्हृदये अनक्तिसमाधो हृदयानिनाविति मंत्रस्य हृदयांजनप्रकाशकत्वादंजनपक्षएव सूत्रकारस्या
भिमत इति सूचनार्थं सूत्रे वाशब्दः। आज्यशेषेणेति सिद्धवदुपदेशादनादेशे आज्यमिति ज्ञापयति॥
गृहप्रवेशनीयहोमात्प्रागपि सर्वस्यैव। गृहप्रवेशनीयानंतरं तु त्रिरात्रं
अक्षारलवणाशित्यादयो धर्माः। गृहप्रवेशनीयहोमात्प्रागपि सर्वस्यैव। गृहप्रवेशनीयानंतरं तु त्रिरात्रं
द्वादशरात्रं वा नियमेनस्यातां। संवत्सरं वेति फलार्थः। एकः ऋषिकल्प्यः पुत्रो जायत इति कृत्वा। पक्षापक्ष
त्रयमपि तुल्यमेव। एकऋषिरीयस्य तु नियमांते वधूः एक ऋषिः संपद्यते पितृगोत्रं विहायमात्
गोत्रं भजत इत्यर्थः। व्रतानंतरं सूर्याविदे सत्येनोत्तभितेति सूक्तविदे ब्राह्मणाय वध्वा विवाहकाले
परिहितं वस्त्रं दद्यात्। तथाच श्रुतौ स्वस्मै तत्कटुकमेतदिति निंदितत्वात्सूर्याये। ब्रह्मा विद्वान्सइच्छा
धूयमर्हतीत्युक्तं। ब्राह्मणेभ्यः अन्नं दत्वा स्वस्तिपवंतो बुवंतु। ॐस्वस्तीति ते ब्रूयुरिति दर्साशयः। कारिकायां।
विवाहानंतरं गच्छेत् सभार्यः स्वस्यमंदिरं। कृषावेसनयायानं वधूमारोपयेद्वरः। दंपत्योः सोजसंविवाग्र
तोग्निं नयंतिच। इह प्रियं मंत्रमाचार्यः स्वस्य गेहं प्रवेशयेत्। उपलेपादिकं कृत्वा विवाहाग्निं समिध्यच। प्राग्रीवम
र्वलोमाग्नेः प्रस्मगान दुहो जिनं। आज्यासादनपर्यंतमन्वाधानादि पूर्ववत्। कपिसिराशिश्च तुर्थि सत्वानः प्र
जा मित्याद्दिशिस्तथा। पृथक्त्वाज्याहुतीर्हुत्वा स्वाहाकारमंत्रांततः। हुत्वाभागे स्वाहा कारंवदेदिसर्पीः समंजंत्वत
या प्राश्य दधि तस्यै प्रयच्छति। सापि प्राश्नाति तन्नष्टं श्रीमद्यस्वि सकृदादिकं। अथवानक्ति हृदये एतमाचोज्यशेषतः।

Indira Gandhi National
Centre for the Arts

प्र॰चि॰ १७६ हरितिणिपू॰

बध्वा विवाहवेलायां यासोपरिहितांबरः। ससेनोत्तमितास्सूक्तं वेत्ति यः पाटतोर्थतः। तस्मै विप्राय तद्दद्याद्भूतांते
जोतमंबरं। ब्राह्मणान्भोजयित्वा तान् स्वस्ती यथ वाचयेदिति। प्रयोगरत्ने तु। विवाहाद्द्वितीयाहे दंपती अप्सरो गंधर्वैरि
ष्ट्वा महादेवीं तृतीयाहे स्वाहां तीक्ष्णा कालिकां च तुर्याहे मानवेष्ट्वा शांकरीं पूजयेतां। गृहप्रवेशनीयं
ते वध्वा परिहितं वासः प्रक्षाल्य पादतीर्थतस्सूर्यासूक्तविदे ब्राह्मणाय न दद्यादिसुक्तं। अत्र विशेषमाह शौ
नकः। अर्धरात्रे व्यतीते तु प्रेद्युः प्रातरेव हि। गृहः प्रवेशनीयः स्यादिति यत्तद्विदो विदुरिति। अथ विवाहाच्चतुर्थ
दिने तद्दोतत्र भद्रादिसंभवे वा दिन एव शिष्टाचारप्राप्तं वरमात्रे तत्समये वा रोहिणीदानं। वरस्य तत्पक्षीयाणां
वस्त्रादिभिः पूजनं कार्यं तत्प्रकारस्तु प्रयोगे वक्ष्यते। प्रयोगरत्ने। सवस्त्रफलतांबूलं दंपत्योर्वंशवर्द्धनं। रोहिण्या
ख्यं वंशपात्रं पक्वान्नैः परिपूरितं। करकै रुद्रसंख्याकैः सुवर्णपरिपूरितैः। एतावद्रोहिणीरूपं कृतं यं किल
सूरिभिरिति। इदं च वधूपितृस्थाने मधुपर्कवद्योकवा भोजनं कार्यमिति सद्वाचः। ततो देवकोत्थापनं। प्रयोगरत्ने
समे चादिवसे कुर्याद्देवकोत्थापनं बुधः। षष्ठं च विषमं नेष्टं मुक्त्वा पंचमसप्तमौ। तत्प्रकारोपि प्रयोगे वक्ष्यते।
निर्णयसिंधौ गार्ग्यः। नांदीश्राद्धे कृते पश्चाद्यावन्मातृविसर्जनं। दर्शश्राद्धं क्षयश्राद्धं स्नानं शीतोदकेन च। अपस
व्यं स्वधाकारं नित्यश्राद्धं तथैव च। ब्रह्मयज्ञं चाध्ययनं नदीसीमातिलंघनं। उपवासं व्रतं चैव श्राद्धभोजनमेव च।
नैवं कुर्युः सपिंडाश्च मंडपोद्वासनावधि। अत्र स्वधाकारग्रहणं तत्सहचरितवैश्वदेवस्यापि निषेधार्थं। तथा तत्रैव॥ १७६

वाग्दान.

अभ्यंगे स्नातके चैव विवाहे पुत्रजन्मनि मांगल्येषु च सर्वेषु न धार्यं गोपिचंदनमिति। तत्रैव ज्योतिषे। स्नानं स
चैलं तिलमिश्रकर्म प्रेतानुयानं कलशप्रदानं। अपूर्वतीर्थामरदर्शनं च विवर्जयेन्मंगलतोब्दमेकं। कुल न्य
दाप्रदानं मृद्कुंभादिश्राद्धीयं। न स्नानेन धर्मघटादीनां निषेध इत्यत्र विस्तरः। तथा। मासषट्कं विवाहा
दौ व्रतप्रारंभणे न वर्जीर्णभांडानि। न त्याज्यं गृहसंमार्जनं तथा ज्योतिर्निबंधे। विवाहात्प्रथमे पौषे आषा
ढे चाधिमासके। न सा भर्तृगृहे तिष्ठेच्चैत्रे पितृगृहे तथा। अत्र मूलप्रमाणपरिशोधः। अथास्मत्सित्कृतो
विवाहप्रयोगः। तत्रादौ कन्यानिरीक्षणं। वरपिता ब्राह्मणैः सह कन्यागृहं गत्वा पीठादौ प्राङ्मुखीं कन्यामुप
वेश्य कन्यापितुः प्रार्थनां कृत्वा तदनुज्ञातः। गणपत्यास्मरणपूर्वकं कन्याकरौ चंदनेनानुलिप्य सर्वैस्सहक
न्यां निरीक्षयेत्। ततो विप्राः हिं रूपवती साध्वी आशिषं दद्युः। अथ वाग्दानं। कन्यादाता कन्याया वामतः प्राङ्मुख उ
पविश्य देशकालौ स्मृत्वा विवाहांगतया वाग्दानं करिष्य इति संकल्प्य तदंगतया गणेशं कलशं वरुणं च सं
पूज्य गौरीर्मिमायेति कन्यां गंधवस्त्रैः पुष्पैः संपूज्य। हिरण्यरूप इति मुद्रिकां गुडखाद्यादि च निवेद्य
कन्यापिता प्राङ्मुखः प्रत्यङ्मुखः उपविश्य हरिद्रापंचपूगीफलान्यादाय अमुकप्रवरायामुकगोत्रायामुकप्रपौ
त्रायामुकपौत्रायामुकपुत्रायामुकशर्मणे वराय। अमुकगोत्रामुकप्रपौत्रीममुकपौत्रीममुकपुत्रीममुकना
म्नीं कन्यां ज्योतिर्विदादिष्टे मुहूर्ते दास्य इति वरपितुर्हस्ते दद्यात्। अव्यंगे पतिते क्लीबे दशदोषविवर्जिते। इमां

Indira Gandhi National
Centre for the Arts

ग्यां०



कौं प्रदास्यामि देवाग्निगुरुसंनिधौ ॥ इति पठेत् । वरपिता तु अमुकगोत्रोत्पन्न वर विषये सर्वं तो निश्चिता इति
प्र·चिं० कन्यापितुर्वै स्त्रे ब्रूयात् । ततः वाचा दत्ता मया कन्या वरार्थे स्वीकृता त्वया । कन्यावलोकन विधौ निश्चि
१४६ तास्तु सुखी भवेति कन्यापिता । वाचा दत्ता त्वया कन्या पुत्रार्थे स्वीकृता मया । वरावलोकन विधौ निश्चि
तस्त्वं सुखी भवेति वरपिता च पठेत् ॥ अथ ब्राह्मणाः शिवा आपः संतु सौमनस्यमस्तु । अक्षतं चारिष्टं
चास्तु । दीर्घमायुरस्तु । एतद्वः सत्यमस्त्विति त्रिरुक्त्वा समानीव आकूतिः प्रसुग्मंतेति पठेयुरिति । गृह्यपरिशि
ष्टे । ततः वरायः सुसंयुक्तां कन्यां दद्यात् धीयसी । संपूज्य प्रार्थयित्वा च शचीदेवीं गुणाश्रयामिति पारिजाते वच
रु नात् कन्यापिता । पात्रस्थितासितंतंडुलेषु शचीं पूजयेत् । तां च कन्या । देवेंद्राणि नमस्तुभ्यमिति मंत्रेण प्रार्थ
ण येदिति मदनः । ततः । हिं कृती० समिद्धस्य० वनस्पते शतवल्शः० इदं वा मा० अस्यापि व० एता दुर्लुसं०
गृह्यावेदस्याशिषं विप्रा दद्युः । इति वाग्दानं । अथ विवाहात्पूर्वदिनकृत्यं । कर्तो पूर्वदिने तद्दिने वा स्वांगं कृत्वा देश
कालौ संकीर्त्य अमुकस्यामुकनाम्न्या वा करिष्यमाणे विवाहे निर्विघ्नतासिध्यर्थं गणेशपूजनं पुण्याहवाचनं मातृकाश्राद्धं
गौर्यादिषोडशमातृ सप्तमातृकापूजनं नांदीश्राद्धं मंडपदेवता स्थापनं च करिष्ये इत्युक्त्वा नांदीश्राद्धं १४६
२ श० तेकृते क्षतकलौदियुते पात्रद्वये अविघ्नाय गणपतिं आम्रपत्रेषु षट्सु समिधः एकस्मिन्नर्धुरि कांच
नबध्वा वंशपात्रे नंदिनी नलिनी मैत्रा उमा पशुवर्द्धिनी भगवती आवाह्य नीराजनं स्वांगं दत्त्वा संपूज्य

1·



मातृकापात्रमेतत्पात्रं च सूत्रेणावेष्ट्य कनिक्रददिति सूक्तेन मधुपदे शेलं डुलोपरि सपत्नीकः । गृह्यावेदिति
प्रतिष्ठाप्य पूजयेत् । इति देवकप्रतिष्ठा । ततो वरपूजार्थमागतः कन्यादाता वरस्य सीमंतपूजनं करिष्ये इ
त्युक्त्वा गणेशं वरुणं च संपूज्यास्मिन्राष्ट्र इति पादौ प्रक्षाल्य वरपक्षियाणां पूजनं कृत्वा वरं वस्त्रादिभिः
पूजयेत् । ततो विप्राः । भद्रं कर्णेभिः द्रविणोदा द्रविणसः । सविता पश्चात्तात् । नवो नवः । उच्चा दिवि । गृह्या
वे प्रतिष्ठा इत्याशिषं दद्युः । इति सीमंतपूजनं । ततो वरपिता कन्यायाः फले पूजनं करिष्ये इत्युक्त्वा गणेशं
वरुणं कन्यां च प्राग्वत् संपूज्य वस्त्रालंकारादि दत्वा याः फलिनीरिति वरगृहीतं नारिकेलं दत्वा अर्वाचीसु
भगे इति पंच पूर्णी फले स्तांबूलपर्णैश्च संपूज्याशिषो दद्यात् प्राग्वत् । केचित्तु फलपूजनं वाग्दानं च स
मानतंत्रं कुर्वंति । तदा वरुणपूजानंतरं कन्यापूजां पूजा समये एव तस्याः फलैरपि पूजां कृत्वा पश्चा
द्वाग्दानं कृत्वा हिं कृण्वती साध्या आशिषं दद्यात् । अथ मधुपर्कः । गृह्यागतं स्नातकं वरं मधुपर्केणाहि
तविधे । यद्वा गृह्यागताय स्मै वराय कन्यादानांगभूतं मधुपर्कं करिष्ये इत्युक्त्वा । विष्टरो विष्टर इति त्रिरु
क्त्वा । अहं वर्ष्म सजातानामिति मंत्रं पठित्वा तस्मिन्नुपविष्टे पाद्यं पाद्यमिति पुष्पगंधादियुतं पाद्यं दत्वा
वामपादं । पादस्थितपात्रस्थापितजलधारिणा अस्मिन्राष्ट्र इति वरस्य पादौ प्रक्षाल्य अर्घ्यमर्घ्यमिति फला
दियुतमर्घ्यं दत्वा आचमनीयमाचमनीयमित्याचमनीयं दत्वा अमृतापिधानमसीत्याचम्य शे

Indira Gandhi National
Centre for the Arts

प्र॰वि॰ १२८ दीपं संस्थाप्यान्येन जलेनाचामेत्। ततः दधिमधुयुतं कांस्येनापिहितं मधुपर्कं मित्रस्य त्वा चक्षुषा प्र
तीक्ष इति वरः। ईक्षितं दाता मधुपर्को मधुपर्को मधुपर्कः। देवस्य त्वेति वरोऽञ्जलिना गृहीत्वा प्रति
गृह्य मधुवाता इति त्र्यृचस्य राहूगणो गोतमो विश्वेदेवा गायत्री। मधुपर्कावेक्षणे वि०। ततः सव्ये पाणौ कृत्वा
पूर्वसं अंगुष्ठानामिकाभ्यां त्रिरालोड्य नमः श्यावास्याय [illegible] छंदसा सत्यं तु भूः प्राश्य त्रेष्टुभेन० दक्षिणस्यां० आदि
त्यास्त्वा जागतेन छंदसा भक्षयंतु० पश्चिमतः। विश्वे त्वा देवा आनुष्टुभेन छंदसा भक्षयंतित्युत्तरतः। इदं
भूतेभ्यस्त्वेति त्रिरूर्ध्वमुत्क्षिप्य। विराजो दोहोऽसीति प्राश्य। विराजो दोहमशीय
मयि दोहः पद्यायै विराज इति प्राश्य। प्रतिप्राशनमाचम्य। अमृतोपस्तरणमसीत्याचम्य।
तिद्वितीयं। पद्यायै विराज इति प्राश्य। प्रतिप्राशनमाचम्य। अमृतापिधानमसीत्याचम्य प्रतिगृह्य
सत्यं यशः श्रीर्मयि श्रीः श्रयतामिति सर्वं प्राश्य द्विराचांतो दाता गौर्गौर्गौरिति त्रिर्निवेदितां गां तन्मूल्यं वा प्रतिगृह्य
माता रुद्राणामित्यस्य भार्गवो जमदग्निर्गौस्त्रिष्टुप्। ॐ मुञ्च गां वरुणपाशादिति अनेन गंधपुष्पालंकरणसो
मा तासु प्राणमित्यस्य भार्गवो जमदग्निर्गौस्त्रिष्टुप्। ॐ मुञ्चतेत्युक्ते निराज्य वस्त्रयज्ञोपवीतगंधपुष्पालंकरणसो
जनादि दद्यात्। भद्रं कर्णेभिरित्याशिषः। सप्रलयेतिना। ततः देवतं संपूज्य लग्नाक्षतानुपयोः हस्ते दत्वा अंत:
पटे उदगपरस्ते अरकूचवा इत्संक्षतारोपणांते। अन्तःक्षरा कुर्जव इति प्राङ्मुखं वरं प्रत्यङ्मुखीं कन्यां कृत्वा
ब्राह्मविवाहविधिना यथाशास्त्रोक्तफलप्राप्त्यर्थं मम समस्तपितॄणां निरतिशयानंदब्रह्मलोका
वाप्त्यादि कन्यादानकल्पोक्तफलप्राप्तये अनेन वरेणास्यां कन्यायामुत्पादयिष्यमाणसंतत्या द्वादशावरान् दश
ब्राह्मणान्॰

सीमंतपूजा कन्यादानं॰

६२ पत्रे

पुरुषान् पवित्रीकर्तुं मासनक्षत्रश्रीलक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना यथाशास्त्रोक्तकन्याद
पुरुषान् पवित्रीकर्तुं मासनक्षत्रश्रीलक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना यथाशक्त्यलंकृतकन्याद
नमहं करिष्ये। कन्यां कनकसंपन्नां कनकाभरणैर्युतां। दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया। विश्वंभरः
सर्वभूताः साक्षिण्यः सर्वदेवताः। इमां कन्यां प्रदास्यामि पितॄणां तारणाय चेति पठेत्। ततः कन्या तारय
तु पुण्यं वर्द्धतां शांतिः पुष्टिस्तुष्टिश्चास्तु। तिथिकरणमुहूर्तनक्षत्रसंपदस्तु पुण्याहं भवंतो ब्रुवंतु। ॐ पुण्याह
स्वस्ति भवंतो ब्रुवंतु आयुष्मते स्वस्ति। ऋद्धिं भवंतो ब्रुवंतु। ओं ऋध्यतां। श्रीरस्त्विति भवंतो ब्रुवंतु अ
स्तु श्रीः। अमुकगोत्रः अमुकशर्माहं मम समस्तपितॄणामित्यादि। आमनक्षत्रश्रीलक्ष्मीनारायणप्री
तये इसंते अमुकप्रवरायामुकगोत्रोत्पन्नाया मुकशर्मणः प्रपौत्राय अमुकपुत्राय अमुकशर्मणे वराय श्री मुकशर्मणः पौत्राय।
धरूपिणे कन्यार्थिने अमुकप्रवरान्वितामुकगोत्रोत्पन्नां अमुकप्रपौत्रीं अमुकपौत्रीं अमुकपुत्रीम
मुकनाम्नीं कन्यां श्रीरूपिणीं वरार्थिनीं प्रजापतिदैवत्यां यथाशक्त्यलंकृतां प्रजासहत्व कर्मभ्यः तुभ्यमहं
संप्रददे। न मम। कन्यादानेन मम तेन वा प्रीयतामिति केचित्। कन्यां प्रतिगृह्णातु भवान् प्रतिगृह्णामि। गौ
रीं कन्यामिमां विप्र यथाशक्ति विभूषितां। गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय। कन्ये मम
याः कन्ये मे देवि पार्श्वयोः। कन्ये मे पृष्ठतोऽभूया त्वद्दानान्मोक्षमाप्नुयात्। मम वंशकुले जाता पालि
तावत्सराष्टकं। तुभ्यं विप्र मया दत्ता पुत्रपौत्रप्रवर्धिनी। धर्मे चार्थे च कामे च नातिचरितव्या त्वये

Indira Gandhi National
Centre for the Arts

१८०

प्र.वि. यो नातिचरामीति वरः। एवं त्रिः। तृतीये वरः। देवस्य त्वा प्रतिगृह्णामि। क इदं कस्मा अदात् कामः अ कन्यादा०
१६९ कामायादात् कामो दाता कामः प्रतिगृहीता कामं समुद्रमाविश कामेन त्वा प्रतिगृह्णामि कामैतत्ते द्यौ
स्त्वा ददातु पृथिवी प्रतिगृह्णातु इति दक्षिणस्कंधे कन्यामभिमृशेत्। धर्मप्रजासिध्य
र्थं कन्यां प्रतिगृह्णामीति वदेत्। गोत्रकन्यामित्यादि। कृतस्य कन्यादानस्य सांगतासिध्यर्थमिदं
हिरण्यं दक्षिणां तुभ्यमहं संप्रददे नमम कृतस्य कन्यादानस्य सांगतासिध्यर्थमिदं भोजनपात्रमुप
च पात्रद्वयमुतं जलपात्रं तुभ्यमहं संप्रददे। शक्तो सत्यां गो महिषी दास्यादि दद्यात्। ते वा दान मंत्रास्तु नप
ठेदित्युक्तं प्राक्। ततः यत्कक्षीवां संवननो विश्वेदेवा अनुष्टुप् कुक्ष्यभिमर्शने विनियोगः। यत्कक्षीवां संवन वीचरन्
नं पुत्रो आंगिरसा भवेत्। तेन नो द्य विश्वेदेवाः सं प्रियां समवीवृचना इति दक्षिणकुक्षिमभिमृशेत्। इदं
कृताकृतं। ततः अनाधृष्टमस्यनाधृष्यं देवानामोजो अभिशस्तिपाः। अनभिशस्त्यंजसा सत्यमुपगेषं
सिते माधा इति पुरोधा अभिषेकजलमभिमंत्रयेदिति केचित्। ततः समुद्रज्येष्ठाः ४। आपो हि ष्ठा ३। आ
शा नः प्रजां ० इत्यभिषेकः। ततः ईनिरोणादि। परि त्वा गिर्वणो गिरः। ता त्वा मतीन्द्र शाव नि भ्यः। ते अद्य पः। ते
सोमादः ढषा वो अंश्वः इति चतुः पंच कृत्वो वा द्विस्त्या वेष्टयित्वा ऊर्ध्वमधो निष्कास्य विश्वेत्तात इति वरो १६९
वधूवामहस्ते। वध्वश्चाधस्तनमुपरि निष्कास्य वरदक्षिणहस्ते नीललोहितमिति बध्नीयात्। इदं तु क
=दानेमा वेशतः श्रालया भोजनसंकल्पं प्रपत्नीसंकल्पं च कृत्वा करेश्वरार्पणं कुर्वीयात्। अन्ये तु सर्वमेतदिच्छाकुः =6

ताकृतमित्युक्तं प्राक्। ततो वरः स्वशिरः पुष्पमेकं क्षीरघृतेनाक्तामनेन कन्याललाटे तिलकं कुर्यात्। सा
पितृभ्ये वकृत्वा पुष्पमालां वरकंठे निदध्यात्। वरोपि कन्याकंठे कुर्यादिसपि केचित्। ततो वरो वधूहस्ते क्षीरा
ज्येनाद्रि रूपस्त्रीयद्धि रसिचार्ये वरहस्ते कन्यापित्राप्येवं कारयित्वा सोमाय इतः श्रियो धर्मे प्रजामेय शाइस्य पीतिक
मात्रमेवाक्षतारोपणं कृत्वानीराजवस्त्रद्वय परिधानं कृत्वा वरो मांगल्यतंतुनानेन मम जीवनहेतुना। कं
ठे बध्नामि सुभगे सा जीव शरदः शतमिति वधूकंठे मांगल्यसूत्रं बध्वा चारि स्यमाणे विवाहकर्ते निर्वि
घ्नतासिध्यर्थं लडुकफलहरिद्रादि गणपतिं संपूज्य विश्वेत्तात इति वधूवस्त्रे नीललोहितमिति वरवस्त्रे बध्वा
तंडुलपुंजेत्रये महालक्ष्मीं पार्वतीं शचीं च संपूज्य देवे प्राणिनमस्तुभ्यं देवेंद्रप्रियभामिनि। विवाहं भा
ग्यमारोग्यं पुत्रलाभं च देहि मे इति संप्रार्थ्य जीरकलवणादीनि दद्यात्। ततो वेद्यां पश्चिममार्गेण व
धूमानीय दक्षिणत उपविश्य देशकालौ स्मृत्वा अस्यां परिगृहीतायां वध्वां भार्यात्वसिध्यर्थं विवाहाग्नेर्गृह
त्वसिद्ध्ये च विवाहहोमं करिष्ये। तदंगत्वा स्थंडिलादियोजकाग्निस्थापनांते तस्मिन्नन्वाहितेग्नावित्या
घारांते त्र प्रधानं त्रिरग्निं पवमानमग्निं प्रजापतिं चाज्येनार्यमाग्निं वरुणाग्निं पूषाग्निं प्रजापतिं च
लाजद्रव्येणाशेषेण स्विष्टकृतमित्याघारांते अग्न आयूंषीत्यादि चोक्तवदाहुतित्रयं हुत्वा तमर्यमा
वसुश्रुतो ग्निस्त्रिष्टुप्। आनय इदं। प्रजापते हिरण्यगर्भः प्रजापतिस्त्रिष्टुप्। प्रजापतये इदं। ततः पश्चि

Indira Gandhi National
Centre for the Arts

 माम्सि मुख्वस्ति ष्ठन् गृभ्णामीति मंत्रस्य सूर्यासावित्री ऋषिः सूर्यासावित्री देवता त्रिष्टुप् छंदः पत्न्याः सा 
यौवसिद्धये पाणिग्रहणे विनियोगः। गृभ्णामिते इति उत्ताने न हस्तेन पत्न्याः सांगुष्ठं करं गृही त्वा वध्वाः प्र
क्षालितं जलानुपास्तिर्यः ...तात्स्थानो वाह्निलोजानावपतित्रिः पंचावत्तिनः हविरवत्तं चाभिघार्यो।
र्यमणं वरुणं पूषणमिति त्रयाणां गोतमो वामदेव ऋषिः। अर्यमाग्निर्वरुणाग्निः पूषाग्निर्देवतानुष्टु
पू छंदः। लाजाहोमे विनियोगः। अर्यमणं नु देवं तिष्ठन्ती तिष्ठं साध्वलौ जलि होमयेत्। अर्यमणो नयतु
दं। अमोहमस्मि सा त्वमिति। इष्व... जेस्वयम... गछ... वधूं परिणीय इममश्मानमिति पादाभ्यां इषइमारोप्य
नृ वं पुनर्लाजानवदाय वरुणं नु देवं हुत्वा वरुणायाग्नयइदं। अमोहमस्मि इममश्मानं पुनर्लाजानवदाय पूष
णं नु देवं। पूष्णोग्नयइदं। अमोहमस्मि इममश्मानं। शूर्पपुटे प्रजापतये स्वाहेति वधूं हुत्वा। यदि शिखेव
द्धे स्वततस्तदा प्रत्वा मुंचामि वरुणस्य पाशाद्येन त्वाबध्नात् सविता सुशेवः। ऋतस्य योनौ सुकृतस्य लो
के रिष्टां त्वा सह पत्या दधामीति। दक्षिणां। प्रेतो मुंचामि नामुतः सुबद्धाममुतस्करं। यथेयमिंद्र मीढ्वः सु
पुत्रा सुभगासति सुत्तरां शिखां विमुच्य स्वस्य तू... विमुच्येशान्यां सप्त तंदुल पुंजेषु। इष एकपदी भव।
सा मामनुव्रता भव। पुत्रान्विन्दावहै बहूंस्ते संतु जरदष्टयः। ऊर्जे द्विपदी॰ सा मा॰ रायस्पोषाय त्रिपदी॰ सा मा॰
मायोभव्याय चतुष्पदी॰ सा मा॰ प्रजाभ्यः पंचपदी॰ सा मा॰ ऋतुभ्यः षट्पदी॰ सा मा॰ सखा सप्तपदी भव॥ सा १५१

मा॰ ततउभयोः शिरसी सन्निधाय स्वयमेवोदकुंभेनावसिच्य शांतिरस्त्वित्यादि अरिष्टनिरसनमस्त्वि
त्यंतं पंचवाक्यान्युक्त्वा। स्विष्टकृदादिशेषं समाप्य ध्रुवं पश्य अरुंधतीं पश्य। जीवपत्नी प्रजां विंदेयेति। व
धूं वाचयेत्। ततः कन्यापितुः प्रार्थनां कृत्वा गृहं गत्वा। तत्रैव वा। देशकालौ संकीर्त्य विवाहाग्नेर्गृह्या
ग्निसिद्ध्यै गृहप्रवेशनीय होमं करिष्ये इत्युक्त्वाग्निमन्वाहितेत्यादि चक्षुषी आज्येनेत्यंते अ
त्रप्रधानं सूर्यासावित्रीं चतुर्वारमाज्येन शेषेण स्विष्टकृदित्यादि चक्षुष्यंते आनः प्रजामिति चतसृणां सूर्या दे
सावित्री ऋषिः सूर्यासावित्री देवता। आद्या जगती द्वितीया त्रिष्टुबंत्ये अनुष्टुभौ होमे वि॰ आनः प्रजां अ
घोरचक्षुः। इमां त्वमिंद्र मीढ्वः। सम्राज्ञी श्वशुरे भव। सर्वत्र सूर्यासावित्र्या इदं। इति हुत्वा समंजंत्विति
मंत्रस्य सूर्यासावित्री ऋषिः सूर्यासावित्री देवता अनुष्टुप् छंदः हृदयांजने विनियोगः इति दधिप्रा
शनपत्न्ये प्रयच्छाज्यं शेषेण ... हृदये ततः स्विष्टकृदादिशेषं समाप्य विप्रान्भोजयेत्। ततः चतु
र्थीदिने देशकालौ स्मृत्वा कन्यादानसांगतायै वरस्य तत्साक्षीयाणां च पूजनं वरमात्रे एरिणि दानं च क
रिष्ये इति संकल्प्य तदंगतया गणेशं संपूज्य वरस्य तत्साक्षीयाणां च पूजनं कृत्वा वधूसीमंते सु
मंगलीरिति सिंदूरं दत्वा। मांगल्य तंतुनेति मंगलसूत्रं बध्वा वंशपात्रे एरिणि त्वमुमादेवी महेशगा
त्रापतिः। अतस्त्वां पूजयिष्यामि एरिणी सर्वकामदां। सवस्त्रां च सदीपां च भूपैः षोडशभिर्युतां॥

Indira Gandhi National Centre for the Arts

अथ मन्वतीरीयते संरंभ प्रमुतिभ्य प्रतरतासरायाः सर्वं वैदेनाव मारोप्य ।१०

प्र॰चि॰ १५२

वरमात्रे प्रदास्यामि कन्यादानस्य सिद्धये इति पठित्वा उमामहेश्वरौ तत्र संपूज्य इदं षोडशे वंशपात्रे शक्ति
पुत्रं वरमात्रे संप्रददे नमम सुखाय च । वंशो वंश करः श्रेष्ठो वंशो वंशविवर्धनः अनेन वंशदानेन तु
ष्टो ऋद्धिं करोतु मे । वंशपात्रमिदं पुण्यं वंशजातिसमुद्भवं । दानानामुत्तमं दानमतः शांतिं प्रयच्छ मे । त
तः स्वस्तिनो मिमीतामिति वास्यत सप्तक्षीयाणां च शिरसि निधाय वंशाभिवृद्धिरस्त्विति सा शिषं गृहीत्वा ।
अष्टवर्षा त्वियं कन्या पुत्रवत्पालिता मया । इदानीं तु मया तुभ्यं दत्ता स्नेहेन पाल्यतामिति वरांके तं पु
त्रायेस्नेहेन मातुरंके चोपवेशयेत् । ततो मंडपदेवता आनीयाभ्यंगपूर्वकं संपूज्य । उत्तिष्ठ अस्या र
भितिविसृज्याशिषं गृहीत्वा प्रतिचेतिचेति अनेन वंशपात्रेण मात्रा जलं सर्वेषां शिरसि दद्यात् ॥
वंशाभिवृद्धि वाचयीत । ततो वरश्चतुर्थे पंचमे सप्तमे वा दिने वधूं प्रक्षाल्य तो नयन्तु हस्तं गृह्या
श्विना त्वा प्रवहतां रथेन । गृहान् गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासीति यानमारो
प्य । अत्रा जहाम ये असन्नशेवाः शिवान्वयमुत्तरेमाभि वाजानि सुत्तरेणार्थेन पारमुत्तार्य रुदं त्वा
जीवं रुदंति वि मयंते अध्वरे दीर्घामनु प्रसितिं दीधियुर्नरः । वामं पितृभ्यो य इदं समेरिरे मयः प
तिभ्यो जनयः परिष्वजे इति जपेत् । विवाहाग्निमग्रे प्रसह्य नयंति न समारोपे सुखं । मा विदन्परि
पंथिन इति सुदेशेषु वसतौ । सुमंगलीरियं वधूरिति वीक्षका न पश्येत् । इह प्रियं प्रजया ते समृध्यतामि

<=तो अस्य विवाहस्य सांगतासिद्ध्यर्थं मंडपोद्वासनमहं करिष्ये इति दंपत्या । प्रजापतिपूजनं स्वस्तिपुण्याहवाचनं च करिष्य इति

१५२

ति गृहप्रवेश्य गणेशं संपूज्य पुण्याहवाचनं कृत्वा लक्ष्मीस्तु भवेति संपूज्य गृहप्रवेशनीय होमं कुर्यात् । स च प्र
युक्तः । ततः मंडपोद्वासनं वरपिता कुर्यात् । इत्यनंतभट्टकृते श्रीरामकल्पद्रुमांतर्गते प्रयोगचिंतामणौ विवाहप्रयो
गः । निर्णयसिंधौ । विवाहव्रतचूडासु वर्षमर्धं तदर्धकं पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्पणमिति । अथ वधूप्र
वेशः । आरभ्योद्वाहदिवसात् षष्ठे वाप्यष्टमे दिने वधूप्रवेशः संपत्त्यै दशमेथ समे दिने । वृद्धवसिष्ठोपि । षष्ठाष्ट
मे वा दशमे दिने वा विवाहमारभ्य वधूप्रवेशः । पंचांगसंशुद्धिदिने विनापि विषमे वत्सरे चतुर्थेपि कार्यः । तेन
ग्रहप्रयोगरत्ने वधूप्रवेशः । प्रथमे तृतीये शुभप्रदः पंचमके थ वाप्नि । तृतीयके याथ चतुर्थके वाष्टेवियोगा
मयदुःखदः स्यादित्युक्तं । तत्र मूलं चिंत्यमिति पितृचरणाः । अन्यश्चात्र विशेषः निर्णयसिंधौ ज्ञेयः । द्वितीयादिवि
वाहे अग्निमाहरकालापनः । सदा धर्मस्यानत्पुनर्दारानुद्वोढुः कारणांतरात् । यदीच्छेदग्निमान्कर्तुं क्व होमो
स्य विधीयते स्वाग्नावेव भवेद्धोमो लौकिके न कदाचन । त्रिकांडमंडनोपि । आद्यायां विद्यमानायां द्वितीयामु
द्वहेद्यदि । तदा वैवाहिकं कर्म कुर्यादावसथोग्निमान् । सुदर्शनभाष्ये तु लौकिकेपि विवाहहोम उक्तः । त
दाग्निद्वयसंसर्गः कार्यः । तमाह शौनकः । अथाग्न्योर्गृह्ययोः सपत्नीभेदजातयोः संसर्गविधिं कारसिध्यर्थं म
हं वक्ष्यामि शौनकः । कृते तत्र विवाहे तु व्रतांते तु परेहनि । पृथक् स्थंडिलयोरग्नी समाधाय यथाविधि तं
त्रं कृत्वाज्यभागांतमन्वाधानादिकं ततः । हुं जुपास्रुवं परस्य ग्नौ तमान्वारभ्य आहुतीः । अग्निमीळे पुरोहि
तं पिंडपितृयज्ञे आह्निके माहालयादौ तु पिंडदानं स्वार्थमेवेत्यन्यत्र विस्तरः ॥ =११

Indira Gandhi National
Centre for the Arts

प्र०वि० तं सूक्तेन नवर्चेन तु । समिध्येनं समारोप्य अयं ते योनिरित्यृचा । प्रत्यवरोहेत्यनया कनिष्ठाग्नौ निधाय तत्र आज्य अग्नि०दूष०
भागौ हुत्वादि कृत्वा पूर्ववत्तदादितः । समन्वारब्धः पत्नीभ्यां जुहुयात् घृतं । चतुर्गृहीतमेतासि त्र
१५३ भिः षड्भिर्यथाक्रमं । अग्नावग्निश्चरतीति साग्निनाग्निः समिध्यते । अस्तीदमिति तिसृभिः पाहि नो अ
ग्न एकया ततः स्विष्टकृदादि होमशेषं समापयेत् । गोयुगं दक्षिणां दद्याच्छ्रोत्रियायाहिताग्नय इति ॥
तथा । पत्न्योरेका यदि म्रियते तदा दाहयित्वा तेनैवाग्निना पुनः । आदधीत यथा सार्धमाधानमिति । गृह्यपरिशि विधिना
ष्टे । अथाग्नेः संसर्गस्य यदि पूर्वा नाये नानं तराविवाहस्या तेनैव सह प्रथमया धर्म[illegible]ना । यदि
तु लौकिके पीठे येन तं पृथक् कृत्वेन परिगृह्य पूर्वेणैकीकुर्यात् । पृथक् उपसमाधाय पूर्वस्मिन् पत्न्य
न्वारब्धोऽग्निमीळे पुरोहितमिति सूक्तेन प्रत्यृचं हुत्वोपस्थाय अयं ते योनिरृत्विय इति समिधमारोप्य नि०
प्रत्यवरोहेति द्वितीये वरोह्य अथाग्नौ कृत्वाज्यभागान्ते अन्वारब्धो जुहुयात् अग्निनाग्निः समिध्यते त्वं ह्यग्ने अग्नि
ना । पाहि नो अग्न एकयेति तिसृभिः अस्तीदमधिमन्थनमिति तिसृभिरथैनं परिचरेद् गोमिथुनं दक्षिणेति । अथ
प्रयोगः । द्वितीयविवाहानन्तरं देशकालौ संकीर्त्य मम विवाहद्वयेन जातयोर्द्वयोर्गृह्याग्न्योः संसर्गमहं करि
ष्य इति संकल्प्य कृत्वा यथाक्रमेण द्वयोः स्थण्डिलयोः गृह्याग्निद्वयं प्रतिष्ठाप्य प्रथमेऽग्नावन्वाधानं कुर्या १५३
त् । यथा चक्षुषी आज्येनेत्यन्ते अग्निं नवभिराज्याहुतिभिः शेषेण स्विष्टकृतमित्याज्यभागान्ते पूर्वपत्न्य

संसर्गे हुत्वा पश्चात्स्वात्सुक्ताः ॥

न्वारब्धः । अग्निमीळ इति नवानां मधुच्छन्दा अग्निर्गायत्री अग्निद्वयसंसर्गप्रधानाज्यहोमे वि० प्रत्यृचं मन्त्रयस्ह
मिति समाप्य हुत्वा स्विष्टकृदाद्यो चमस्सूपस्थानान्ते अयं ते योनिरृत्विय इति समिध्येनं समारोप्य प्रत्यवरोहेति
कनिष्ठाग्नौ तं प्रत्यवरोह्यान्वाधाने चक्षुषी ते अत्र प्रधानं । अग्निं षड्वारं चतुर्गृहीताज्येन शेषेण स्विष्टकृ होने.
तमित्याद्याज्यभागान्ते पत्नीभ्यामन्वारब्धः । ॐ अग्नावग्निश्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एषः ।
तस्मै जुहोमि हविषा घृतेन मा देवानां मोमुहद्भागधेयं मो अस्माकं मोमुहद्भागधेयं स्वाहा । अग्नय इदमिति
सर्वत्र । अग्निनाग्निर्मधुच्छन्दा अग्निर्गायत्री । अग्निनाग्निर्जुह्वास्यः स्वाहा । अस्तीदमिति तिसृणां विश्वामित्रोऽग्नि हि०६
रनुष्टुबन्त्ये त्रिष्टुभौ अस्तीदमधिमन्थनमस्ति प्रजननं कृतं । एतां विश्पत्नीमाभराग्निं मन्थाम पूर्वथा स्वाहा ॥
अरण्योर्निहितो जातवेदा गर्भ इव सुधितो गर्भिणीषु । दिवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः । डोह
स्वाहा । उत्तानायामवभरा चिकित्वान् सद्यः प्रवीता वृषणं जजान । अरुषस्तूपो रुशदस्य पाज इळायास्पुत्रो वयुने जनि प०५
प्रग० ष्ट स्वाहा । पाहि नो अग्न इति भर्गोऽग्निर्बृहती । पाहि नो अग्न एकया पाह्युत द्वितीयया । पाहि गीर्भिस्तिसृभिरूर्जां पते
पाहि चतसृभिर्वसो स्वाहा । अग्नय इदं न० । गृह्यपरिशिष्टे तु । अग्निनाग्निः समिध्यते त्वं ह्यग्ने अग्निनेति द्वे । पा
हि नो अग्न इति तिसृभिः अस्तीदमिति तिसृभिरित्यष्टावाहुतय उक्ताः । पाहि न इति चतस्रः प्रगाथोऽग्निर्बृहती । पाहि
न इत्युक्ता । अग्नय इदं । ॐ पाहि विश्वस्माद्रक्षसो अराव्णः प्रस्म वाजेषु नोऽव । त्वामिद्धि नेदिष्ठं देवतातय आपिं नक्षा

Indira Gandhi National Centre for the Arts

: तोभिमुखं दक्षिणां दत्वा - २

प्र.चि. मते हूं स्वाहा। ॐ आनो अग्ने वयो वृधं रयिं पावक शंस्यं। रास्वा च न उपमाते पुरुस्पृहं सुनीती स्वयशस्तरं अर्कविवा०

१५८ स्वाहा। ततः स्विष्टकृदादिशेषं समाप्याथ तं निपातयित्वा यथापूर्वं पीठं रचेत्। इत्यनन्तसद्भक्तप्रयोगः। विना वह्निहवनं

सर्गे प्रयोगः॥ द्वितीयादिविवाहे कालसंग्रहे। प्रमादात्कृतिवासरादितः पुनरुद्वाहविधिर्वरस्य तु विषमेषु

युग्मवत्सरेषु युग्मके वा प्रमति प्रदोषवेत्। संग्रहे। तृतीयां यदि वोद्वाहे तर्हि सा विधवा भवेत्। चतु

र्थादिविवाहार्थं तृतीये र्कं समुद्वहेत्। आदित्यदिवसे वापि हस्तर्क्षे वा शनैश्चरे। शुक्लपक्षे न वा पूर्वाह्णे कु

र्याद् विवाहकं। तथा। मामास्त्रा मामुदीच्यां वा लपुष्पफलसंयुतं। परीक्ष्य पत्तनाधस्तात् सुस्थिति

र्यादर्कविवाहकं। तथा। ग्रामाखाद्यामुदीच्यां वा लपुष्पफलसंयुतं। अर्कसंनिधिमागत्य तत्रस्थस्त्वादिवा

लादिव्यथा विधि। अर्ककन्याप्रदानार्थमाचार्यं कल्पयेत् पुरा। अर्कसंनिधिमागत्य तत्र स्वस्त्यादिवा उष्णीषगं

चयेत्। नांदीश्राद्धं हिरण्येन अष्टवर्गान् प्रपूजयेत्। पूजयेन्मधुपर्केण वरं विप्रस्य हस्ततः। आदिसःसविताचार्यः पु

ष्पमाल्यादि वरायाह्वे प्रदापयेत्। ततश्च कन्यावरलं त्रिपुरुषं कुलमुच्चरेत्। आदित्यस्त्वस्तिसूक्तमुदीर

ीपो अस्य नप्त्रिका। गोत्रं काश्यप इत्युक्तं लोके लौकिकमाचरेत्। मुहूर्ते कन्निरीक्षेत स्वस्ति सूक्तमुदीर

येत्। प्रतिगृह्य ततो होमं गृह्योक्तविधिनाचरेत्। अर्कस्य = अग्निंश्च पारिभाषिके गोत्रे न प्रवरप्रणतोमा

मानमस्ति। कश्यपस एव वस्तत्वात्। तेनामुकप्रवरान्वितायः काश्यपगोत्रामर्कन्यां दास्ये इत्येवं प्रयोगो १५८

पयसेवेति न काश्यपकोत्रे सप्रवरत्वादिदोष इति न्यायविदः। तथा = च्यवने सोपां चगंधमाल्याक्षता मूलं पोतिर्निर्वपे -

= यहासपत्नी कृत्ततीयाकुरुते नशाबदरी मातुलिंगी दाडिमी धात्रीलतासु सह कर्तव्यमिति निश्चयः।

दिषिः। सोर्यो आकृष्णेनेति। दानमंत्रमाह व्यासः। अर्ककन्यामिमां विप्र यथाशक्ति विभूषितां। गोत्राय

शर्मणे तुभ्यं दत्तां विप्र समाश्रयेति। तथा। अंजल्यक्षतकर्माणि कृत्वार्ककणपर्वकं॥ पावकं चार्द्रतं सूत्रं ता

वदर्कं प्रवेष्टयेत्। स्वशाखोक्तेन मंत्रेण गायत्र्या वाथ वा जपेत्। पंचीकृत्य पुनः सूत्रं स्कंधे बध्नाति मंत्रतः। ब

हत्सामेति मंत्रेण सूत्ररक्षां प्रकल्पयेत्। अर्कस्य पुरतः पश्चाद्दक्षिणोत्तरयोस्तथा। कुंभांश्च निक्षिपेत् सम्यक्

दाग्ने यादि चतुष्टये। प्रतिकुंभं महाविष्णुं पूजयेत् परमेश्वरं। अर्कस्योत्तरदेशे तु समन्वारब्ध एतया॥

एतया अर्ककन्यया। उल्लेखनादिकं कुर्यादाघारांतमतः परं। तेनात्रन चक्षुषी। आज्याहुतिं च जुहुया

त् संगोभिरनयैकया। यस्मै त्वा काम कामाय सेतया चौत तः परं। मस्ताभिश्च समस्ताभिस्तत्रश्चस्विष्ट

कृद्भवेत्। पुनः प्रदक्षिणं कृत्वा मंत्रमेनमुदीरयेत्। मया कृतमिदं कर्म स्थावरेषु जरायुजा। अर्कापत्यानि

नो देहि तत्सर्वं क्षंतुमर्हसि इत्युक्त्वा शांतिसूक्तानि जप्त्वा तं विसर्जेत् पुनरिति। अथात्रास्मत्सिद्धकृतःप्र

योगः। उक्तकाले उक्तदेशे वरः मम तृतीयमानुषीविवाहजनितदोषापनोदार्थं कर्मविवाहं करिष्ये इति सं

कल्प्य स्वस्तिवाचनं नांदीश्राद्धं कृत्वाचार्यं वृत्वा आ कृष्णेनेति छायायुतं सूर्यमर्कं संपूज्य गुडौदनं नि

वेद्य वस्त्रेणावेष्ट्य आपोहिष्ठेत्यभिषिच्य त्रिलोकवासीन् समाश्रय छायया सहितो रवे॥ तृतीयोद्वाह

जं दोषं निवार्य सुखं कुर्विति संप्रार्थयेत्। ततः अर्कं त्रिः प्रदक्षिणं कुर्वन् मंत्रं पठेत्। ममप्रीतिकराचे

मं१

Indira Gandhi National Centre for the Arts

प्र०वि० १५८ यं मयास्पृष्टा पुरातनी । अर्के जा ब्रह्मणा सृष्टा अस्माकं प्रतिरक्षतु । नमस्ते मंगले देवि नमः सवितुरात्मजे । त्राहि अर्कविवाह
मां कृपया देवि पत्नी त्वं मे इहागता । अर्क त्वं ब्रह्मणा सृष्टः सर्वप्राणिहिताय च । वृक्षाणामादिभूतस्त्वं देवानां प्री
तिवर्धनः । तृतीयोद्वाहजं पापं मृत्युं चाशु विनाशयेति । तत आचार्यः । वरस्य मधुपर्कं कृत्वा उष्णीषादिदत्वा
वाग्दानं कृत्वांतः पटं धृत्वा स्वस्ति न इति सूक्तं जप्त्वा आचार्यः देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थम
मुकगोत्रोहममुकगोत्रायेत्यादि त्रिपुरुषमुच्चार्यामुकनाम्ने वराय काश्यपगोत्रां यादित्यस्य प्रपौत्रीं स
वितुः पौत्रीं मम पुत्रीमर्ककन्यामिसूर्हेन कन्यां दत्वा अर्ककन्यामिमामिसूर्हेन कन्यादानमंत्रमु
क्त्वा वराय दक्षिणां दद्यात् । ततो गायत्र्या पंचवारं वेष्टितसूत्रेण बृहत्सामेति मंत्रेण कंकणं बध्वाश्वगोय
तद्वस्त्राद्यक्षतारोपणं कृत्वार्कस्य चतुर्दिक्षु अष्टदिक्षु वा कुंभेषु विष्णुं संपूज्यार्कस्योत्तरेग्निं प्रतिष्ठाप्य
अन्वाधाने आघारांतमुक्त्वात्र प्रधानं बृहस्पतिं अग्निं तथा अग्निं वायुं प्रजापतिं चाज्येन शेषेण स्विष्टकृत स्वि
मित्याद्याघारांतं कृत्वा अर्ककन्यां स्वारब्धसंगोभिरित्यस्यांगिरा बृहस्पतिस्त्रिष्टुप् बृहस्पतय इदं यस्मै त्वा
कामदेवोग्निस्त्रिष्टुप् । यस्मै त्वा कामकामाय वयं सम्राड्यजामहे । तमस्मभ्यं काममंदत्तायेदं त्वं घृतं पिबस्वा
हा अग्नय इदं । ततः मस्तसमस्त माहूतिभिराज्यं हुत्वा स्विष्टकृदादि शेषं समाप्याचार्याय गोयुगं दक्षिणां द
त्वा मया कृतमिदं कर्म स्थावरेषु जरायुणा । अर्कापत्यानि नो देहि तत्सर्वं क्षन्तुमर्हसीति नत्वा शांतिसू १५८

सर्वथा वर्तते यज्ञ इतीयं वैदिकी श्रुतिः । रात्रेस्तु षोडशो भागो ग्रहनक्षत्रभूषितो । कालं त्वनुदि-
प्रादुष्करणमग्नेः प्रज्वलनं ।
-छंदोगपरिशिष्टे । उदिते नुदिते चैव समयाध्युषिते तथा ।
-तं ज्ञात्वा होमं कुर्यात् विचक्षणः । प्रभातसमये नष्टे नक्षत्रमंडले रविर्यावन्न दृश्येत समयाध्युषितं तु तत् ॥
कौनि पठित्वा अर्कविसर्जनं कर्मेश्वरार्पणं कुर्यादिति संक्षेपः । इदं तत्सद्वृत्ते प्रयोगचिंतामणौ वर्कवि
वाहः । अथाग्निसौपासनहोमः । तत्र तावत् प्रादुष्करणाद्युक्तं गृह्ये । तस्याग्निहोत्रेण प्रादुष्करणहोमकालौ व्या
ख्यातावितिं । तस्येति निर्दिष्टं सूत्रं । तस्येति अग्निहोत्रस्येव प्राप्नोतिदृश्यः नत्वपाकयज्ञत्वं तस्यैव प्राप्तात्र दृश्य
स्तु नष्टवेति । प्रादुष्करणहोमकालावितिद्वयोरेव नियमात् । प्रातस्तु रात्राविति वृत्तिः । परिजाते कृसाय
नः । सूर्ये तु शीलमप्राप्ते षट्त्रिंशद्भिरहांगुलैः । प्रादुष्करणमग्नीनां प्रातर्भासां च दर्शने । तेन प्रातरग्नी
६ अह्वा तो संध्यां कृत्वा वा प्रादुष्करणं कुर्यात् । तदुत्तरं जलाद्यर्थो दिते सूर्ये संध्यां समापयेत् । ततो होम इतिपित
चरणाः । सायं तु षट्त्रिंशदंगुल अवधात्रे समये ग्निं प्रादुष्कृत्य सायंसंध्यां कृत्वा ततो होमः । एतत् प्रादुष्करण
कालात्यये समस्त व्याहृतिभिरेकाज्याहुतिरिति भट्टाः । होमकालस्तूक्तः आश्वलायनेन । सम्यक्कनिम्लोच
ति रवौ सायं च जुहुयुः सदा । अथ प्रातर्हुने त्वि संमुदिते र्के यथाविधि मनुः । रेखामात्रं तु दृश्येत रश्म
भिश्च समन्वितं । उदितं तद्विजानीयात्तत्र होमं प्रकल्पयेत् । कूर्मप्रदीपे । हस्तादूर्ध्वं रविर्यावद्गिरिं
हित्वा न गच्छति । तावद्धोमविधिः पुण्यो नात्येत्युदितहोमिनां । तत्रैव यावत् साम्यकनक्षत्रमंते नक्षत्राणि
सर्वतः । न चलोहितिमापैति तावत् सायं तु हूयते । छंदोगपरिशिष्टे । रजो नीहार धूमाभ्र वृक्षाग्रांतरिते र
वौ । संध्यामुद्दिश्य जुहुयात् हुतमस्य न लुप्यते । सूत्रेपि । सायमस्तमिते प्रातरुपोदयं व्युषितः उदिते वे
पाकयज्ञा प्रशस्तयज्ञाः पक्वा पाकयज्ञाः अल्पयज्ञाः आज्यद्रव्यकाः । विवाहगृहप्रवेशनीयहोमाः । पाकयज्ञानामेतत्तंत्रमिसुक्तेः । -११

Indira Gandhi National
Centre for the Arts

प्र०चि०
१५६

ति २

ति गौणकालोपि। सूत्रकृते वोक्तः प्रदोषांतो होमकालः संगवांतः प्रातरिति। प्रदोषस्तु त्रिमुहूर्तः प्रदोष
स्यास्तात्तावसंगते सतीव स्तोकोः। अत्र संगवादिरेवांतः। अतः प्रातरपि त्रिमुहूर्तत्वेवेति सिद्धाः। अत्र मु
ख्यकालातिक्रमे समस्तव्याहृतिभिरेकाहुतिः। गौणकालातिक्रमे तु मनो ज्योतिर्मंत्रेण एका चतुर्गृहीताज्या
हुतिरिति सिद्धाः। बौधायनेन तु। आसायं कर्मणां प्रातरा प्रातः सायकर्मणां। आहुतिर्नातिपद्येत पार्व
णं पार्वणांतरादित्युक्तं। अनेन स्थालीपाकस्यापि गौणः काल उक्तः। अथ होमद्रव्याणि। सूत्रे होम्यं च मांस
वर्ज्यं कामं तु व्रीहियवतिलैरिति। अत्र मांसनिषेधाच्छास्त्रांतरदृष्टमन्यदपि होम्यं भवतीति वृत्तिः। तच्च त
त्रैव। पयो दधि यवागूश्च सर्पिरोदनतंडुलाः। सोमो मांसं तथा तैलमापस्तानि दशैव तु। सूत्रे कामग्रहणं
पूर्वोक्तदशद्रव्याणामभावे व्रीहियवतिलानां प्राप्त्यर्थं। अत्र पयआदीनि सप्त होम इति सूत्रात्तस्याभावे
न्येषां पूर्वोक्तानां प्राप्तिः अत एव पर्वणि पयोहोमस्यानित्यत्वं। एतानि च प्रत्येकं साधनानि। न तु मि
श्राणि। इतरेतरयोगेन नैरपेक्ष्याद्वाक्यभेदादिति। वृत्त्याशयः। गृह्यपरिशिष्टे। पयो दधि सर्पिर्यवागूरो
दनं तंडुलाः। सोमस्तैलं माषो व्रीहयो यवास्तिला इति होम्यानि पक्षे स्युर्यावनालगोधूमाः प्रियंगवश्च
लाः कृष्णप्रा ह्या इत्युक्तं कात्यायनेन। हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः। माषकोद्रवगौरा
दि सर्वलाभेऽपि वर्जयेत्। गौरः सर्षपः। सर्वथा तद्द्रव्याभावे [illegible] जलेनापि होमः कृतेमे १५६

निमुत्तोम:०

९२

[इजुक] इत्युक्तमाशाकें। अथाहुतिपरिमाणं। गृह्यपरिशिष्टे। शतं चतुःषष्टिर्वाहुतिर्व्रीहितुल्यानां। तदर्धं तिलानां। तदर्धं
सर्पिस्तैलयोस्तैलं च तिलजर्तिला तसीकुसुंभानां येन प्रथमं दनं तां जुहुयात्तेन वह्निर्दीप्ती यां जुहुयाद्येन च सा
यं जुहुयात्तेनैव यावत्तावदिति प्रतिनिर्मथ्येपि। प्रयोगरत्ने बृहस्पतिः। प्रस्थधान्यं चतुःशराहुतेः परिकीर्तितं। प्र
धिसु स्थस्य चतुःषष्टितमो भाग इत्यर्थः। तिलानां च तदर्धं तु तंडुला व्रीहिभिः समाः। बौधायनः। व्रीहीणां
वा यवानां वा शतमाहुतिरिष्यते। द्रवद्रव्यस्य मानं स्यात् धारा गोकर्णदीर्घिका। अन्नं ग्राससमं ग्राह्यं ला
जा मुष्टिमिता मताः। होमप्रकारस्तत्रैव संग्रहे। द्रवं हविः स्रुवेणैव पाणिना कठिनं हविः। अंगुल्य
ग्रेणैव होतव्यं न कुर्वांगुलिच्छेदनं। अंगुल्युत्तरपार्श्वेन होतव्यमिति तु स्मृतं। अत्र चान्वधिश्रपणं
स्यन्निसामर्थ्याच्छ्याप्यामिति कातीयसूत्राद्दधितंडुलसोमतैलव्रीहितिलादीनां नाधिश्रपणं। तेन त
त्र पर्यग्निकरणं प्रोक्षणं चेति द्वयमेव। पेयः सर्पिर्यवागूदनादीनां स्खलितः श्रयणं स्पर्शं वैश्वदे
सन्यत्र विस्तरः। प्रधानहोमश्च तूष्णीमग्नौ समित्प्रक्षेपोत्तरं कार्य इति सिद्धाः। यदा तु त्रिवि
धंसमारोपणमात्मन्यरण्योः समिधीति बौधायनसूत्रादयं ते योनिर्ऋत्विय इति समिध्यग्निः स
मारोपितस्तदा प्रादुष्करणसमये लौकिकेग्नौ समारोपितां समिधं क्षिपेत्। अस्मिन्नपि पक्षे होमा
त्पूर्वं द्वितीयसमित्प्रक्षेपः। अयं च होमः पाणिग्रहणादि गृह्यं परिचरेदिति सूत्राद्विवाहहोमोत्तरं
= तच्चाग्निहोत्रवद्व्रीहिरेव होम्यं चाग्निहोत्रे लौकिकेतिदेशात्। मंत्रस्तु न भवति सर्वत्रैव गृह्यकर्माणि इति कर्तव्यतामाप्नोति देशात्। =४

Indira Gandhi National
Centre for the Arts

नित्यहोम

प्र०वि० १५७ गृहप्रवेशनीयहोमाभावेपिप्रथमवसेव यद्यन्हि विवाहहोमस्तदा सायंकाले होमारंभः। यदि रात्रौ विवाह
होमस्तदा परेद्युः रिसुक्तं प्राक्। तत्रापि यदि दिवा नाद्यो नाकृतस्तदा रात्रावपि होमारंभोऽप्रथमवसेवे
त्युक्तं। सुदर्शनभाष्ये। जयंते न तु प्रादुष्करणकालात् प्राग्यदि विवाहहोमस्तदैव सायं होमारंभः
अन्यथा तु परेद्युरित्युक्तं। अथात्र कर्तारः। सूत्रे स्वयं पत्न्यपि वा पुत्रः कुमार्यंतेवासी वा पत्नीकु
मार्योस्तु मंत्रानधिकारात् होमकमग्निपरिचरणमिति केचित्। वृत्तिकारस्तु पत्नीसंनहन
वत्समंत्रको होमस्तयोरप्रथमवसेवेत्याह। कुमारी अविवाहिता कन्या पत्नी तु न पत्नी जुहुयान्नानुपनीत
इति निषेधः। स आपस्तंबपरः। आश्वलायनानां तु पत्न्यादिद्वारा होमोऽप्रथमवसेव। शौनकः पत्नीकु
मारीपुत्रो वा शिष्यो वापि यथाक्रमं। पूर्वपूर्वस्य चाभावे विदध्यादुत्तरोत्तरः। प्रयोगरत्ने दक्षः।
ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः। एतैरेव हुतं यत्तु तद्धुतं स्वयमेव तु। एतेभ्यः पत्न्यनुज्ञ
या यजमानानुज्ञया वा होतव्यं। तथा च कूर्मपुराणे। ऋत्विक्पुत्रोऽथ जामाता शिष्यो वापि सहोदरः।
प्राप्यानुज्ञां विशेषेण जुहुयुस्ते यथाविधीति। पर्वणि तु स्वयं जुहुयादिति सूत्रात्। स्वयमेव होमः
कार्यो नान्येन। पर्वण्यपि सर्वथा अशक्तौ तु पुत्रद्वारा होमोऽप्रथमवसेव अन्येनापि दंपत्योरन्यतरसन्नि १५७
धौ होतव्यं। उभयोरसमक्षं तु हुतमप्यहुतं भवेदिति स्मृत्यंतरवचनादिति सिद्धाः। छंदोगपरिशिष्टे

न्होमस्यदूरापास्त ला०५ के०

पि। असमक्षं तु दंपत्योर्होतव्यं नर्त्विगादिना। द्वयोरप्यसमक्षं तु भवेद्धुतमनर्थकं। दंपत्योः सान्निध्यभावेपिप
त्न्यनुज्ञयाध्वर्युर्जुहुयात्। एवमुक्तं स्मृतौ। असन्निधौ तु पत्न्या स्यादध्वर्युस्तदनुज्ञया। उन्मादे प्रस
वे चैतौ कुर्वीतानुज्ञया विनेति। वस्तुतस्त्विदमन्यशाखीयपरं। आश्वलायनानां तु निसानुगर्देहा
तः स्यादिति सूत्रे आसनः पत्न्या वा समीपे यदि स्यः स्याद्भोभयोरन्यतरस्य स्थापयितव्य इति वृत्तौ
पत्नीयजमानाभ्यां विनाग्न्यग्निस्थिते रेवनिषेधात्। छंदोगपरिशिष्टे। विहायाग्निं सभार्यश्चे
त्सीमामुल्लंघ्य गच्छति। होमकालात्यये तस्य पुनराधानमिष्यते। तत्रैव। होमद्वयात्यये दर्शपौर्णमासा
त्ययेतथा। पुनरेवाग्निमादध्यादिति भार्गवशासनं। प्रवसत्पत्नीधानं तत्र विशेषमाह। भरद्वाजः। होमं
वैतानिकं कृत्वा स्मार्तं कुर्याद्विचक्षणः। यद्यश्रौतं स्वयं कुर्यादन्यो वा स्मार्तमाचरेत्। इदमत्र गृह्ये। अ
ग्नये स्वाहेति सायं जुहुयात्। सूर्याय स्वाहेति प्रातः तूष्णीं द्वितीये उभयत्रेति। उभयत्र सायं प्रातश्च दे
ये आहुती जुहोति। तूष्णीं यहणं प्रजापतिध्यानार्थमिति वृत्तिः। अन्ये तु तूष्णीं ग्रहणमुपांशुत्वार्थं।
यत्किंचित् प्राजापत्यं यज्ञे क्रियते उपांश्वेव तत्क्रियत इति वचनादित्याहुः। अंगिराः। योऽग्न्याधान
कांचनं मेरुं पृथिवीं च ससागरां। सायंप्रातर्होमतुल्यं तद्दूषयति वानवा। अथाशौचे होमविधिः। त
त्र जननमरणाशौचयोरन्यद्वारा होमं कुर्यात्। तथा च जातूकर्ण्यः। सूतके तु समुत्पन्ने स्मार्ते कर्मक

Indira Gandhi National
Centre for the Arts

=यजमानस्य परदेशगमने तु सर्वपर्वपर्यंतमेवान्यद्वारा होमः तदुत्तरं तु पुनः संधानमेवेति त्रिकांडमंडनः। अतश्च विदेशगमने पत्नीमुद्देश्य ऋ=
=त्विग्द्वारा कारयेदिति। तेन तदपि सर्वपर्यंतमेव ॥=६

प्र.चि. यमस्य वेत्। पितृयज्ञं चरुहोमं स्वगोत्रेण कारयेदिति। यद्वा चतुर्गृहीतेन मनो ज्योतिरिति मनस्वती होमं कृत्वा समस्यता॰

१५८ अतीतकालादारभ्य क्रमेण द्वे द्वे आहुती हुत्वा तत्कालहोमं उपस्थानादि च कुर्यात्। तदुक्तं कारिकायां। निसृष्टो

मे स्वति क्रांते संस्कृत्याज्यं च पूर्ववत्। चतुः कृत्वो गृहीत्वाज्यं मनस्वत्या जुहोत्यथेति। अत्र प्रति होममेकेति स

त्राद्रिः। प्रतिनिमित्तं मनस्वती होमाः। अतीत होमाश्च पक्षे इति वृत्तिः। तेनातीतहोमानामननुष्ठानमपि

गम्यते। इदं तु बह्वृचानामेव। तेषां द्वादशरात्रपर्यंतमहोमेप्यग्निर्विच्छेदाभावात्। आपस्तंबानां तु त्रिरात्र ति

मकृपमानोग्निर्लौकिकः संपद्यत इति वचनात्। अन्यद्वारेण होमः छंदोगपरिशिष्टे। सायंहोमात्यये प्रात

र्हुत्वा तां सायमाहुतिं। प्रातर्होमं ततः कुर्यादेष एवोत्तरो विधिः। अथ पक्षशेषहोमादयः। मैत्रायणी

यपरिशिष्टे। तस्मादामयास्यात् दर्शमासायाग्निहोत्रं जुहुयात्। पक्षादौ पर्वणोंते वा सायं च प्रातरेवं चतुर्दशाच

तुर्गृहीतानि सकृदुन्नयेत्। एका समित् सकृद्धोम इति। तेन पर्वणि सायंकाले। प्रतिपदि वा सायं। पक्षहोमारंभः।

भट्टैस्तु प्रतिपत्प्रातःसेव सायमादि पक्षहोमारंभ इत्युक्तं। त्रिकांडमंडनः। य आहिताग्निधर्मः स्यात्स औपास

निकस्य तु। पक्षहोमान्शेषान्वाशेषहोमान्यथापि वा। समस्य जुहुयात्तत्र प्रयोगोयं निरूप्यते। प्रतिपत्पुन

ये तु सायमापद्यन्यत्र वादिनो। यावं सोपवसथ्याहात्प्रागदिनानि पर्वतिथिः। तावंति [illegible] चतुरुन्न

यनानि तु। पात्रांतरसहायां स्थाल्यां वा स्यात् स्रुग्गं तरं। एका समित् सकृद्धोमः सकृदेव हि मार्जनं। उपस्था

नं सकृत् कार्यं शेषं प्रकृतिवन्मतं। एवमेवोत्तरत्रापि प्रातर्होमान् समस्य तु। हुते सोपवसथ्याहः प्रातर्होमा १५८

=पक्षहोमादिप्रयोगस्त्वग्रे वक्ष्यते॰ औपास॰

नपीनसकृत्। तृतीयायां चतुर्थ्यां वा पंचम्यामितरत्र वा। तदादीनां तु पर्वांतहोमानां स्यात् समस्यता। सर्वथो

पवसथ्याहे सायंहोमः पृथग्भवेत्। तथैवमजनीयाहे प्रातर्होमोस्य वेत्यथ। तेनैतन्मते प्रतिपद्येव सायं पक्षहोमा

रंभः। तथा। तृतीये नंतरपक्षे पक्षहोमं समाचरेत्। कैश्चित् पक्षद्वयं यस्मात् पक्षहोमे नियम्यते पक्षत्रयं पक्ष

कृच्छ्रेणापि विनिर्दिष्टं तत्र होमान्नदि

होमे संतते पुनराहितिः। तावता नापगच्छन्ति दापतत्पक्षे तृतीयके। यत्तु यावज्जीवेतु वा सर्वोन पक्षहोमान्समाचरे

नेदिने। पक्षांतरे पुनः कामं पक्षहोमादिकं चरेदिति। [illegible] इत्येयं छंदोगपरिशिष्टे। आहुतीः

त। आपदे वा न धिस्तत्र न पक्षमणानाबधिरिति वचनं तत् स्तुतिमात्रमिति ज्ञेयं। अथौपासनहोमप्रयोगः। कर्ता

ण परिसंख्याय पात्रे कृत्वाहुतीः सकृत्। मंत्रैर्विधिवद्धुत्वा एवमेव परा अपि। [illegible] सिद्धो वा सायं षड्वि १६

दलिमात्रे इषुमात्रे वा कुंडे स्थंडिले वा संस्कृतेग्निं प्रतिष्ठाप्य प्रसवरीति मंत्रेण प्रस्वरोध [illegible]

शदंगुलमव्यवधाने प्रातर्हुयात्। प्रागग्निं प्राङ्मुख उपविश्य संध्यांते देशकालौ संकीर्त्याग्निं [illegible] पर्युक्ष्यानंतरतोग्नेः तंडुला

मे यमुपासनहोमं करिष्य इति संकल्प्य च [illegible] त्रिः परिसमुह्य परिस्तीर्य पर्युक्ष्य हविः समिधं च निधाय वि

नदर्भेनावज्वल्य प्रोक्ष्य तैरेव त्रिः पर्यग्निकृत्वोल्मुकं निरस्य पश्चादग्नेर्दर्भेषु हविः [illegible] तंडुला

श्चाग्नि न इति त्वेनाग्निं संपूज्य दक्षिणं जान्वाच्य [illegible] समिधमाधायापः स्पृष्ट्वा [illegible]

स्थाय हृदि सव्यं निधायांगुष्ठमुत्तरपार्श्वेन [illegible] अग्नये स्वाहेति सायं सूर्याय स्वाहेति प्रातः [illegible] पक्षहोमादि कुर्यात्=२

= तेन पक्षद्वयं पक्षहोमान् कृत्वा ततः कंचित्कालं सायंप्रातर्होमान् कृत्वा पुनश्शक्तौ पक्षहोमादि कुर्यात्

Indira Gandhi National Centre for the Arts

प्र॰चि॰ पत्रभृद्यसीमाहुतिं प्रजापतये स्वाहेसेशानदेशे हुत्वा परिसमुह्य पर्युक्ष्योपस्थानं कुर्यात्। सायमग्न आ समस्य होम

१५९ यूषीतिति स्यसिः रानेत्वं न इति च तस्यग्नौ गोपाय नौ लोपायना बां बंधुः सुबंधुः श्रुतबंधुः विप्रबंधुश्च ऋष

यः। अग्निर्देवता द्विपदा विराट् छंदः। प्रातः सूर्यो नो दिवस्पातु विसस्य चक्षुः सूर्यो गायत्री। सूर्योपस्थाने

उदु सं प्रस्कण्वः सूर्यो गायत्री। चित्रं देवानां कुत्सः सूर्यस्त्रिष्टुप्। नमो मित्रस्याभि तपाः सूर्यो जगती स

र्यो। प्रजापते न त्वदेतान्यन्यो देवानि जगती इत्यग्निं हिरण्यगर्भ इत्यस्य प्रजापतिस्त्रिष्टुबिति सायं प्रातश्च प्र

जापते हिरण्यगर्भ इमे ताभ्यां प्रजापतिमुपस्थाय मानस्तोक इति विभूतिं धृत्वा। ॐ च म इत्युपस्थाय

नाम गोत्रे उच्चार्याभिवाद्य कर्मेश्वरार्पणं कुर्यात्। इत्युपासनहोमः। अथ समस्य होमः। आश्वलायनः।

सायं प्रातस्तन्नो होमावुभौ सायं समस्य तु। आपन्नो जुहुयात्तत्र समिदेकाथवा द्वयं। हविषां तद्धि

देवस्यमिति सूर्याग्निदैवतं। समस्ये पंचपिस्त्रिरिति प्राजापत्याश्चनिस्यशः। अथ प्रयोगः। दे

शकालौ संकीर्त्य सायंप्रातरुपासनहोमं समस्य करिष्य इति संकल्प्य समिद्द्वयपक्षे समित्प्रक्षेपपूर्वं सा

यं कालीनाहुतिद्वयं हुत्वा पर्युक्ष्योपेक्षणमात्रं स्थितानिमिल्यथा पुनः पर्युक्षणादि समित्प्रक्षेपांतं कृत्वा १५९

प्रातराहुति

पत्र ५

वधीत्सकृत तृतीयायां चतुर्थ्यां वा पंचम्यामिन रत्नवा तदाहीनं नु पर्वाघहोमानां स्यात्समस्यतु सर्वयोपव सथ्या

हसायं होमः पृथग्भवेत् तथैव पजनीया है प्रातर्होमो भवेत्पृथक् तेनैतन्मते प्रतिपद्यर्वसायं पक्षहोमारंभः तथा

तृतीयेनेतरे पक्षे पक्षहोमं समाचरेत् कर्टेः पक्षद्वयं पस्मात्पक्षहोमे नियम्यते पक्षत्रयं पक्षहोमं सेन ते

पुनराहिति तावतानापतगच्छेत्रापतपदेते तीयूक्त श्रुतेरुणापि विनिर्वर्त्यतत्रहोमान्दिने दिने पक्षात

रेपुनः कामं पक्षहोमादिकं चरेदिति तेन पक्षत्रयं होमान्हुत्वा ततः कश्चित्का लसायं प्रातर्होमान्हुत्वा

पुनरशक्तौ पक्षहोमादि कुर्यात् यत्तु यावज्जीवनु वासिर्वा मत्तहोमान्समाचरेत् आपद्वाव धिस्तत्रनप

त्तगणनावधिरिति वचनं तत् स्तुतिमात्रमिति ध्येयं छंदोगपरिशिष्टे आहतोः परिसंख्यायपात्रे हुत्वा

कृतीः सकृत मंत्रेणाविधिवद्धुत्वा एवमेवापराण्यपि पक्षहोमादि प्रयोगस्त्वग्रे वक्ष्यते अथोपासनहो

मप्रयोगः कर्तारत्निमात्रे वा कुंडे स्थंडिले वा संस्कृताग्निं प्रतिष्ठाप्य प्रत्यवरोहेति मंत्रेण प्रत्यवरोहासिद्धि

वा। सायं पक्षत्रिंशद्गुलयव धाने प्रातरुदयात्पागग्निं प्रादुष्कृत्य सभ्यानेर्देशकालौ संकीर्त्याग्निरूप

Indira Gandhi National
Centre for the Arts

प्र॰वि
१५९

अद्य प्रभृत्यापर्वं सायमुपासनहोमं करिष्य इति संकल्प्य चत्वारिंशतो निष्प्राणाभिः पर्य[illegible]कुश परिस्तीर्य पर्युक्ष्योत्तरतोऽग्नेस्तंडुला
द्दर्भे विन्यस्य प्रोक्ष्य तैरेव त्रिः पर्यग्निकृत्वोल्मुकं निरस्य पश्चादग्नेर्दर्भेषु हविः समिधं च निधाय विश्वानि न इति तच्चेनाग्निं
संपूज्य दक्षिणं जानु आच्य तूष्णीं समिधमाधाय पायः स्पृष्ट्वा ज्वलंतं परिषिच्य तं दुलानां हायपहस्ते सव्यं निधायांगुष्ठेनोत्तरपार्श्वे
नमध्यमांगुलपार्श्वेन मध्यंगुलपर्वदेशेऽग्नये स्वाहेति सायं सूर्याय स्वाहेति प्रातः उभयत्र भूयसीमाहुतिं प्रजापतये स्वाहेति
[illegible]ऽकृत्वा परिसमुह्य पर्युक्ष्योपस्थानं कुर्यात् सायमग्न आयूंषीति तिसृभिरग्ने त्वं न इति च तस्य गोपायनानां
नालोपायनावा बंधुः स्वबंधुश्रुतबंधुर्विप्रबंधुश्चत्रयः अग्निर्देवताच्छंदः गायत्री विराट्छंदः प्रातः सूर्यो नो दिवस्पाति
त्यस्य चक्षुः सूर्यो गायत्री सूर्योप ॰ उदुत्यं प्रस्कण्वः सूर्यो गायत्री ॰ चित्रं देवानां कुत्सः सूर्यस्त्रिष्टुप् नमो मित्रस्याभि
तपाः सूर्यो जगती सूर्यं प्रजापते न त्वदेतान्यग्निर्जगती इत्यग्निर्हिरण्यगर्भ इत्यस्य प्रजापतिस्त्रिष्टुबिति सायं प्रातश्च
प्रजापते हिरण्यगर्भ इत्येताभ्यां प्रजापतिमुपस्थाय मानस्तोक इति विभूतिं धृत्वा ऽ चमस्युपस्थायनामगोत्रे उक्त्वा
भिवादक र्मेश्वरार्पणं कुर्यात् इत्युपासनहोमः अथ समस्य होमः आश्वलायनः सायंप्रातस्तनौ होमावुभौ साधयेत्

राम
१५९

स्थि॰२

स्यात् आपन्नो जुहुयात्तत्र समिद्दैकापवाद्यं हविष्यांतं द्विरेवस्य मितिसर्वाग्निदेवनं समस्येत्पंचभिर्दर्भैः प्राजापत्या च निरूप्य अत्र
प्रयोगः देशकालौ संकीर्त्य सायंप्रातरुपासनहोमसमस्य करिष्य इति संकल्प्य समिद्द्वयपतन समित्प्रक्षेपपूर्वं सायंकालीनाहुतिद्वयं
कृत्वा पर्युक्षणादिनामान्तं कृत्वा निर्माल्यवा पुनः पर्युक्षणादि समित्प्रक्षेपांतं कृत्वा प्रातराहुतिद्वयं मपकृष्य कृत्वा उपस्थानं कुर्यात्
एकैव चेत्समित्तदा सायंहोमान्ते वेनिभद्दाः हविष्यांतमिति पंचर्च स्यवर्गस्य मूर्ध्वं नामाद्देभ्यः सूर्ये वैश्वानरो त्रिष्टुप् ॰ उपस्थाप्रजा
पते ॰ पुनः परिसमूहनादिकं कृत्वा कर्मेश्वरार्पणं कुर्यात् अथ पक्षहोमः माधवीये मरीचिः शारीरापद्भेद्यत्र भयाद्दार्त्तिः प्रजापते
तथान्यास्वपि चापत्सु पक्षहोमो विधीयते अस्यानुपूर्वमुक्तं अथ प्रयोगः प्रतिपदि सायंकाले देशकालौ संकीर्त्य अद्य प्रभृति आगामि
चतुर्दशीसायंहोमपर्यंतं सायमोपासनहोमानाकृष्य तं दुलैर्होष्यामीति संकल्प्य हासवर्धीम्यां च निष्पिगणनया स्थूलपात्रद्वयेन
वेति चतुर्दश पनानि तूष्णीं कुर्यात् यथा समित्प्रक्षेपांतं कृत्वा पात्रद्वये आकृतिमितान्तंदुलान् चतुर्दशवारं पात्रद्वये [illegible] प्रत्येकं गृ
हीत्वा तिथिहासवृद्ध्यनुसारेणा न्यूनाधिकं गृहीत्वा प्रथमपात्रस्थितानग्नये स्वाहेति सर्वान् जुहुयात् द्वितीयपात्रस्थान्सर्वान्प्र
जापतये स्वाहेति जुहुयात् उभयत्रैसकृत्त्यागः उपस्थानागनांते सकृत् । एवं द्वितीयायां प्रातः अथ प्रभृति आगामि पर्व प्रात
र्होमपर्यंतं प्रातर्होमानाकृष्य करिष्य इति संकल्प्य समित्प्रक्षेपं कृत्वा पूर्ववत्पात्रद्वयेन प्रत्येकं सूर्याय स्वाहा प्रजापतये स्वाहेति प्र
जापत्यवत्तंत्रेण त्यागप्रक्षेपौ कृत्वा प्रातर्होमवत्यिमुपस्थानादि कुर्यात् । इति पक्षहोमः । पौर्णमासे त्वयदा कदाचित् चतुर्दशीसा
यंकालीनहोमपर्यंतं शेषहोमान्सायं समस्येत् नहोमांश्च पर्वीय प्रातर्होमांतां समस्येत् पर्वणि तु सायंहोमः प्रतिपदि प्रातर्होमश्चेत्यथ

Indira Gandhi National
Centre for the Arts

प्र० वि०
१६०

गेवास्यमंत्रविस्तारः इति प्रोषहोमः अथ सभार्यस्य प्रवासादावग्निसमारोपविधिः होमानंतरमयं ते योनिरित्यस्य गा
थीपुत्रो विश्वामित्रोग्निरनुष्टुप् अयं तो गिरः इत्यनेनारणिद्वयेग्निसमारोपयेत् यद्वानेनैव मंत्रेणाश्वत्थसमिधि वा स
मारोपयेत् यद्वा पाते अत्रेपाणिपातनूर्ल्पेयारोहान्मात्मातम छावसूनिहरवन्नमसेन यो पृष्ठिणि यज्ञो भूत्वा पृज्ञमा
सीद स्वां योनिं जातवेदो भुव आजायमानः सक्षय एहीति मंत्रेण पुनः स्वात्मसमारोपं कुर्यात् तत्रारणिसमारोपे प्राद्
ष्करणकालेनिर्मथ्य प्रत्यवरोह जातवेद इत्यनेन मथितमग्निं संस्कृते स्थंडिलेनिदध्यात् यद्वा स्थंडिले लौकिकाग्निं प्र
तिष्ठाप्य प्रत्यवरोहेति मंत्रेणात्तो समिधं तत्र क्षिपेत् आत्मसमारोपणपक्षे स्नानस्त्रीगमनादिकमपि न कुर्यात्।
समित्समारोपे मार्गमध्ये यावत्सोग्यामसीमा; न दीर्घसंतरं तो दंपतीसमिधमन्वारभेयाताम् अशक्तावन्यतरस्यान्वा
रंभः अस्य याम्यां नालौकिकत्वं अथ पुरुषस्यैव प्रवासः प्रवासश्च साग्निकेन दृष्टद्रव्यार्जनाद्यर्थमेव कर्तव्यः ननु ती
र्थयात्रार्थं तथा त्रित्रिकांडमंडनः धनार्जनार्थं पितृयुक्तः प्रवासोत्यग्निहोत्रिणः धनेहि संभवेदिज्यातीर्थार्थं न
त्वनुव्रजेत् छंदोगपरिशिष्टे निक्षिप्याग्निं स्वदारेषु परिकल्प्यर्त्विजं तथा प्रवसेत्कार्यवान्विप्रो वृथैव न चिरं क्वचित्
तत्रैवामनसानैत्यकं कर्म प्रवसन्नप्यतंद्रितः उपविश्य शुचिः सर्वं यथाकालं समाचरेत् पत्न्या चाप्यवियोगिन्याः शु
श्रूष्याग्निर्विनीतया सौभाग्यवित्तावैधव्यकामया भर्तृभक्तया इति तत्र प्रवत्स्यन्नित्यहोमांते नित्यमंत्रैरुप
राम
१६०

द्वयमपकृष्य कृत्वा उपस्थानं कुर्यात्। एकैव चेत्र समित् तदा सायं होमादावेवेति भट्टाः। हविष्पांतमिति पंच
वा वस्य वगोस्य मूर्ध्नेत्वां मदेमः सूर्यवैश्वानरो त्रिष्टुप्। उपस्थाने वि० प्रजापते पुनः परिसमूहनादि कृत्वा
कर्मेश्वरार्पणं कुर्यात्। अथ पक्षहोमः। माधवीये मरीचिः। शारीरापद्भवे यत्र सयाद्वास्तिः प्रजायते।
तथान्यास्वपि चापत्सु पक्षहोमो विधीयते। अस्य तु पूर्वमुक्तं। अथ प्रयोगः। प्रतिपदि सायं काले देश
कालौ संकीर्त्य अद्य प्रभृति आगामि चतुर्दशी सायं होमपर्यंतं सायमौपासनहोमानाकृष्य तंडुलैर्होष्या
मीति संकल्प्य ह्रासवृद्धी विचार्य तिथिगणनया स्थूलपात्रद्वये तावंति चतुरुन्नयनानि तूष्णीं कुर्या
त्। यथा समित्प्रक्षेपांतं कृत्वा। पात्रद्वये आहुतिमितान् तंडुलान् चतुर्दशवारं पात्रद्वये प्रत्येकं
गृहीत्वा। तिथिह्रासवृद्ध्यनुसारेणान्यूनाधिकं गृहीत्वा। प्रथमपात्रस्थितानग्नये स्वाहेति सर्वान् जु
हुयात्। द्वितीयपात्रस्थान् सर्वान् प्रजापतये स्वाहेति जुहुयात्। उभयत्र सकृत्सागः। उपस्थानादि
सर्वं कुर्यात्। एवं द्वितीयायां प्रातः अद्य प्रभृति आगामि पर्वप्रातर्होमपर्यंतान् प्रातर्होमानाकृष्य करि
ष्य इति संकल्प्य। समित्प्रक्षेपं कृत्वा। पूर्ववत्पात्रद्वये सूर्याय स्वाहा प्रजापतये स्वाहेति प्राजापत्यवर्ज्जं प्रत्येकं
त्रणस्याम प्रक्षेपो कृत्वा। प्रातर्होमीयमुपस्थानादि कुर्यात्। इति पक्षहोमः। शेषहोमेषु तु पक्षाकरादि
त्। चतुर्दश्यां सायंकालीनहोमपर्यंतं शेषहोमात् सायं समस्येत्। प्रातर्होमांश्च पर्वीय प्रातर्होमांता

Indira Gandhi National
Centre for the Arts

तु १

प्र-चि- समस्येत् । पर्वणि सायं होमः प्रतिपदि प्रातर्होमश्च प्रयोगे वेसम्यत्र विस्तरः इति शेषहोमः । अथ सभार्यस्य प्रवासे पक्षहोमः
१६० दत्यग्निसमारोपविधिः । होमानंतरमयं ते योनिर्ऋत्विय इत्यस्य गाथीपुत्रो विश्वामित्रोग्निरनुष्टुप् । अयं ते यो
निरित्यनेनारणिद्वयेग्निं समारोपयेत् । यद्वा तेनैव मंत्रेणाश्वत्थसमिधि वा समारोपयेत् । यद्वा । या ते अ
ग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानं मच्छा वसूनि कृण्वन्नस्मे नर्या पुरूणि । यज्ञो भूत्वा यज्ञमासीद
स्वां योनिं जातवेदो भुव आजायमानः सक्षय एहीति मंत्रेण पाणिभ्यां तापात्समारोपं कुर्यात् । तत्रारणी समा
रोपे प्रादुष्करणकाले निमथ्य प्रत्यवरोह जातवेद इत्यनेन मथितमग्निं संस्कृते स्थंडिले निदध्यात् । य
द्वा स्थंडिले लौकिकाग्निं प्रतिष्ठाप्य प्रत्यवरोहेति मंत्रेण तां समिधं तत्र क्षिपेत् । आत्मसमारोपणपक्षे स्नान
स्त्रीगमनादिकमपि न कुर्यात् । समित्समारोपे मार्गमध्ये यावत्सो ग्रामसीमाः नदीश्च संतरेत् तो दंपती समिधम
न्वारभेयातां । अशक्तावन्यतरस्यान्वारंभः । अन्यथा मीनां लौकिकत्वं । अथ पुरुषस्यैव प्रवासः । प्रवास
श्च साग्निकेन दृष्टादृष्टार्थमेव कर्तव्यः । न तु तीर्थयात्रार्थं तथा च त्रिकांडमंडनः । धनाद्यर्जयि
तुं युक्तः प्रवासो ह्यग्निहोत्रिणः । धर्मेर्हि संभवे द्विज्यातीर्थाद्यर्थं न तु व्रजेत् । छंदोगपरिशिष्टे । निक्षिप्या
ग्निं स्वदारेषु परिकल्प्यर्त्विजं तथा । प्रवसेत्कार्यवान्विप्रो वृथैव न चिरं क्वचित् । तत्रैव । मनसा नैत्य
कं कर्म प्रवसन्नप्यतंद्रितः । उपविश्य शुचिः सर्वं यथाकालं समाचरेत् । पत्न्या वाप्यवियोगिन्या शुश्रूष्योग्नि १६०
र्विनीतया । सौभाग्यवित्ता वेषघ्या ... कामयाप्रक्षन्नयेति । तत्र प्रवत्स्यन्नित्यहोमांते । नित्यमंत्रेरु

पस्थाय प्रवासार्थमभयं वोभयं मेस्त्विति मंत्रेणोपस्थाय । परदेशं कृत्वा । पुनः स्वगृहसमीपमेत्य । गृहामा
बिभीत वयः स्वस्से वो स्मासु च प्रजायध्वं मा च वो गोपतीरिषदिति मंत्रेण गृहं निरीक्ष्य । ॐ गृहानहं सुमनसः प्र
पद्ये वीरघ्नो वीरवतः सुवीरान् । इरां वहंतो घृतमुक्षमाणास्तेष्वहं सुमनाः संविशानीति मंत्रेण गृहं प्रवि
श्य । ॐ शिवं शग्मं शंयोः शंयोरिति पुनस्त्रिरनुवीक्ष्य । ज्येष्ठपुत्रशिर उभाभ्यां पाणिभ्यां परिगृह्य । अंगा
दंगादिति मूर्धनि त्रिरवजिघ्रेत् । दुहितॄणां च तूष्णीं शिरो जिघ्रेत् । एतत्पुत्रेपि प्रेष्यागतेष्ववतीति भट्टाः ।
ततः होमकाले उपस्थानांतं कृत्वा पुनः अभयं वोभयं मेस्त्विति सन्निमुपतिष्ठेत् । एतच्च सर्वस्मार्ताग्निमतोपि भवति । त
था वस्तुत्वं । गृहानीक्षेताप्यनाहिताग्निरिति । प्रोषिते यजमाने पत्नीव्रतसहनिरजस्वला चेत् । पंचमेन्हि यागः सं
कल्पोत्तरकाले चेत्तामपहृत्य याग इति शिष्टाः । तथा यजमाने प्रोषिते पत्नी वान्यत्र गच्छेत् । नित्यहोमेष्वाद्यन्वा ... तत्रायं क्रमः । अध्वर्युः समस्य पक्षहोमं कृत्वा यज्ञपात्रा
राकारयेत् । राष्ट्रविप्लवे शापसंतोतु पत्नी अग्निनाशसहप्रवसेत् । ... निधाय प
दिसामर्थ्ये रथे आरोप्य दक्षिणमनड्वाहं युक्त्वा । अयं ते योनिरित्यश्वत्थसमिध्यग्निं समारोप्य शकटे निधाय प
ल्पयित्वा रोहग्निनाशहासिलक्षितदेशं गत्वा तत्र स्थंडिलादि प्रकल्प्याग्निं स्थापयित्वा अग्निं प्रत्यवरोहाज्यं सं
स्कृत्य मनो ज्योतिरिति मनस्वत्या चतुर्गृहीतमाज्यं हुत्वा अग्नये तंतुमते स्थालीपाकं कुर्यात् । तत्र पूर्णाहुतिः
शरावो दक्षिणा । यद्वा तत्स्थाने पूर्णाहुतिं वा जुहुयात् । शवाग्निना संसर्गे अग्नये शुचये स्वाहेति जुहुयात् ।
पचनाग्निना संसर्गे अग्नये संवर्गाय जुहुयात् । तत्र स्थाने पूर्णाहुतिर्वा । अथ नष्टाग्नेः पुनः संधानं विच्छिन्ना
ग्नि १

व १

Indira Gandhi National
Centre for the Arts

च २

प्र॰वि॰ ग्निपुनःसंधानं। नास्तिकाद्विस्त्वग्निपुनःसंधानचेतित्रयंक्रमेणोमते। नत्रपुनःसंधानादौऋतुनक्षत्रादिकं -नष्टाग्नि॰
यथासंभवंग्राह्यं। येषांवांसंध्याधानमुक्तंतेषांतत्रोक्रमेणनक्षत्रादिग्राह्यंअसुविकायां। आधानस्यकु
१६१ मेसंशोध्यास्नानंजपहोमकृच्छ्रचांद्रायणादिभिःसर्वजनैमैत्रंकृत्वाश्रुताध्ययनसंपन्नोपूतांगः।वसंतेपर्वेणु
कृनक्षत्रेषुब्राह्मणआदधीतेति। तत्रादौवन्हिविच्छेदनिमित्तंप्रायश्चित्तंप्रयोगरत्ने। त्रिरात्रमग्नित्यागेप्रा
णायामशतं[illegible]। विंशतिरात्रेएकदिनोपवासः। मासद्वयेत्रिरात्रोपवासःअब्दे प्राजापत्यइत्युक्तं। तथाचस्मृ धा
तिः। यावंसद्व्यतीतानिनिरग्नेश्चद्विजन्मनः। तावंतिकृच्छ्राणिचरेद्धोमंदद्यादिजातये। त्रिकांडमंडनोपि।
यावत्कालमहोमीस्यात्तावद्द्रव्यमशेषतः। तद्यानं चैवविप्रेभ्योयथाहोमस्तथैवतत्। स्थालीपाकानांस्ते
तुनतत्संपर्याप्तद्रव्यदानं। द्वादशाहपर्यंतंयथाशक्तिहिरण्यदानंयत्तुशंखेनतुआसुसादीसंवत्सरंप्राजा
पत्यंचरेद्गांचदद्यादितिगोदानप्राजापत्ययोःसमुच्चयउक्तः। सःआद्यपरः। पक्षुमिताक्षरायांकृतदारोग्निहे
-- ज्येष्ठोयोनादध्यादुपासनं। चांद्रायणंचरेद्वर्षप्रतिमासमहोपिवेति। प्रायश्चित्तविधानंतदावसथ्याधानाकरणे ७५
विषयं। नास्तिकादौपासनपरित्यागेतूक्तंकृष्णारदीये। औपासनपरित्यागोदेवस्यान्नभोजनं। गणान्नभो
जनंचैवसुरापानसमंस्मृतमिति। यदातुद्वितीयविवाहोत्तरमग्निद्वयसंसर्गोनकृतस्तदाग्निद्वयविच्छेदानिमि
३ च त्तंप्रायश्चित्तंकार्यं। तत्रप्राजापत्याधिकेप्रायश्चित्तेवपनंकार्यंनान्यथा। वपनसमयेचयदिदैवाच्छिखा १६१
नश्येत्। तदाब्रह्मग्रंथियुतांकौशीशिखांदक्षिणेकर्णेनिदध्यादित्युक्तंस्मृतिसमुच्चये। क्वचित्तुपुनः
संस्कारोप्युक्तः। शिखांछिंदंतियोमोहाद्द्वेषादज्ञानतोपिवा। पुनःसंस्कारमर्हंतित्रयोवर्णाद्विजातयः

६१

कुंडपरिमाण॰
तिएवंप्रायश्चित्तंकृत्वाग्निपुनःसंधानंकार्यं। आयसर्थमायतनमाहशौनकः। अरत्निमात्रंविस्तेयमग्नेराय
तनंश्रुसंश्रौतेचौपासनेचापिखाततो निविवर्जितं। मेखलाद्वितयंकार्यंरेखालग्नंतुबाह्यतः। बाह्या ला
तनंचषडंगुलविस्ताराभ्यंतराचतुरंगुला। बाह्याषडंगुलोत्सेधाभ्यंतराद्वादशांगुला।। तेनमेखलाद्वयमपिषडं
गुलोत्सेधं। भूमिखाततोत्रनास्ति। सूत्रेतुरघुमात्रावरंसर्वतःस्थंडिलमित्युक्तं तस्मिन्पक्षेएकैकस्यां
दिशिकिंचिन्न्यूनानिसप्तदशांगुलानि। यद्वाएकैकस्यांदिश्यष्टादशांगुलानिवसुक्तंप्राक्। प्रयोगरत्ने
तुभुक्तिदेशेचतुर्विंशत्यंगुलं।। साद्वाविंशत्यंगुलंषोडशांगुलंवाचतुरस्रंचतुरंगुलोत्सेधंमेखलात्रय
युक्तमग्न्यायतनंकार्यमित्युक्तं। संग्रहेतु। अरत्निमात्रमग्न्यर्थंकार्यमायतनंबुधैः। पिपीलमात्रमि
तोकेतदर्ध्यंसांतरंस्ववेदित्युक्तं। बाह्योरंतरंभिपीलं। मेखलाद्व्यंगुलं। कुंडमासचतुर्विंशांशः। अ
६ ला: थाग्निसंभाराः। तैसिकंपद्मपत्रंचवराहविहताचमृत्। मृदमारखुकरंचापिवल्मीकवपयाकराः।
५ रू उदुंबराशनिहतपर्णाश्वत्थविकंकताः। शम्यंकुरशश्चविज्ञेयाआधानद्रव्यसंभृताइतिप्रयोगरत्नेउक्ताः।
एतेचसंभाराः। समारूढसमित्पातोपुनराधेयमिष्यते। वक्ष्यामिपुनराधेयंजयंतस्वामिनोमतं। आत्मा
ध्येयिकसंभारान्यथासंभवमाहरेत्। संभारेष्वादधीतानिंश्रोत्रियादिगृहाद्वतोमितिकारिकोक्ते। पु
नराधेयएवप्रवर्तिता। ननुविच्छिन्नाग्निपुनःसंधाने। अतएवप्रवृत्तिविच्छिन्नोधाने संभाराःनोक्ताः। के
चितुआत्माधेयिकसंभारानित्यविशेषादुभयत्राप्यतेरस्माहुस्तच्चिंत्यं। येनतुनास्तिकादग्नीनां

च ६

Indira Gandhi National
Centre for the Arts

अत्र कात्यायनसूत्रं। वैश्यस्य बहुपशोर्गृहादग्निमाहृत्य चातुःप्राश्यवचनवत्सर्वे मरणिप्रदानमेके॥ बहुभिः पशुभिस्समृद्धस्य गृहाद्वैश्यात्मा
मग्निं गृहीत्वा ब्राह्मणैः परिवृतो वेदघोषगीतवादित्रादिभिः श्रेनितो त्वाहृत्य स्वगृहमागत्य पंचभूसंस्कारसंस्कृते प्राङ्मुखमुपवेश्यास्मा पुनस्संधा
प्र·चि· विसर्गः कृतस्तस्मिन्नविच्छिन्नाग्निपुनःसंधाने तु एते वक्ष्यमाणविशेषतः संभाराः। तेन च प्रयोगरत्ने। पलाशो
दुंबराश्वत्थशमीवैकंकतास्तुजं। वल्मीकोत्कर वाराहमूषको खातमृत्तिकाः। शर्कराः सिकताः सूदास्सं
१६२ पाद्यास्तत्तरूत्वचः। यथालाभं समाकीर्य पावनाग्निं समुद्धरेदित्युक्तं। तेन द्वादशरात्रिपर्यंतं समिन्नाशा
भिभिन्नं पुनराधेयं। तद्धोक्तं कारिकायां॥ अन्वारूढसमिन्नाशे पुनराधेयमिष्यत इति। तदूर्ध्वं समिन्नाशे
तु विच्छिन्नाग्निपुनःसंधानं। नास्ति क्वाचिद्विच्छिन्नाग्निपुनःसंधानं तु वक्ष्यते एतेषां प्रयोगविध्यंते। कारिका दु
यां। उपलेपादिकं कुर्यादाधारं तं विवाहवत्। विवाहाज्यपाहुतीर्वी लाजाहोमो भवेदिह। गृहप्रवेशा
नीयश्च हुत्वास्याहृदयांजनं। परिणीसादिनोत्सत्र लाजानावपति स्वयं। समानतंत्रकं चेह होमद्वयमि
दृष्यचेत्। द्वयोः समानतंत्रत्वे गृहप्रवेशनीयहोमे आम्भागसर्वेपि विवाहहोमेन तदभावात द्वयोर्विरो
६५ जे विवाहे सप्तहोमानां प्राधान्यात्। गृहप्रवेशनीये चतुर्णां प्राधान्यात्। भूयसां साधर्म्यन्यायेनमु
ख्यं चेति न्यायेन चाज्यभागाभावएव फलं। विवाहे तु समानतंत्रत्वविधायकवचनाभावाद्धोमद्वयं
भिन्नमेवेति शिष्टाः। आश्वलायनसूत्रे तु तयोरपि समानतंत्रतोक्तेसुक्तं प्राक्। वृत्तैरपि शिष्टाः श्वशुरएव
गृहे कुर्वीतीत्युक्तं। तेन तत्रैककालत्वएकतंत्रता। अतएव श्वशुरगृहे होमपक्षे विवाहहोमोत्तरं कालभेद
पर्यवसानाच्छ्वशुरप्रार्थनां कुर्वेति। अन्यथा। यद्येककालत्वेपि न तंत्रता तर्हि एकबर्हिरित्याद्युपर
त्ति सूत्रवैयर्थ्यापत्तेः। अतएव वैवाह्योग्निर्यदा न गृहीतः दायकाले गृह्यते तस्यां प्राप्तिमिकायामग्न्युत्स १६२
भिमुखमग्निं भिद्ध्यात्। अरणिप्रदानमेके। एके आचार्याः। अरणिप्रदानं। अरण्युपरत्यर्थं। स्थानं यस्याग्नेः सोरणिप्रदानस्तमरणिप्रदानमग्नि
मादधीतेति मन्यते॥ अरणिप्रदानं उपदानं कारणं उत्पत्ति =।

ता।

तो द्वयोर्होमयोः समानतंत्रत्वमुक्तं वृत्तिकारेणेत्यादिक। तेन होमद्वयेनाग्नेर्गृह्यसिद्धिः। एवं च गृह
प्रवेशनीयहोमाद्दर्वीकपर्वणः प्राचीनस्थालीपाकः सायंप्रातर्होमस्तुप्रवसेवे। तथा चाग्निनाशे हो
मद्वयं कार्यमिति वृत्त्याशयः। पत्वत्र आवसथ्ये त्रयस्त्रिंशत्। श्रौताधाने शतास्तरामिति पत्तपार्श्वोक्तेः
ब्राह्मणभोजनमावसथ्ये तुल्ये पुनःसंधाने विहितं तत्सांगतासिद्ध्यर्थं न तु प्रायश्चित्तस्थाने इति
ज्ञेयं। वृत्तावपि। यदि तूपशाम्येत्पत्न्युपवसेदित्येक इत्यस्मिन्सूत्रे यद्यग्निः प्रादुष्करणकालउत्कर्षे
त्वा आ। अन्यस्माद्धोमकालात्पत्न्युपवसेत्। एकग्रहणात् स्वयंवोपवसेत्। अयाश्चेत्येकामाहुतिं
जुहुयात्। तेन द्वादशरात्रादूर्ध्वं पुनःसंधानं ततः प्रागयाश्चेत्येकाहुतिः। तत्र पुनःसंधाने विवाहात्सा
कृतयोर्लाजाहुतयोर्गृहप्रवेशनीयाहुतयोर्हृदयांजनं प्रवर्तितान्येत्। होमद्वयं चात्र समानतंत्रं। ला
अ जाहोमेत्रापि पत्न्यंजलिना लाजावपनं तु स्वयमेव करोति नष्टात्रादिरित्युक्तं। यत्तु बौधायनेन यद्य
ग्निरात्र तुर्थं नश्येत्तदोद्धृत्यापहृता इति भस्मात्पुष्पायतेनेनिधायायं तेयोनिरित्यसि त्रिंभस्म
समारोपणमाजुह्वान उद्बुध्यस्वेति द्वाभ्यां समिधमाधाय संपरिश्रित्य जुहुयादयाश्चाग्ने पंचहोता। ब्राह्म
णमेकहोतेति दशास्त्रवाहुतीर्महाव्याहृतीः सर्वप्रायश्चित्तानि जुहोतीत्याद्युक्तं। प्रायश्चित्तं। तदास्तं बा प
दिपरमाश्वलायनानां तूक्तमेवेतिदिक्। व्यासः। यौगिकावाविवाहाग्निं गृहस्य इति मन्यते। अन्नं तस्य
नष्टोक्तं मं यथापाको हि सस्मृतः। अथ भस्माग्निपुनःसंधानप्रयोगः। तत्र द्वादशापर्यंतं त्रिरात्रमुपवा ह

आवसथ्ये पञ्चपञ्चके नष्टाग्नि० दु

प्र०वि० सप्रायश्चित्तं कृत्वा प्रमादादग्निविछिन्नस्याग्नेः पुनराधेयं करिष्य इति संकल्प्यायतनं संस्कृत्य तत्र सिकताः पञ्च पञ्चं चेत्यादि
पूर्वोक्तान् संस्कारान् यथालौकिकं निधायाग्निं प्रतिष्ठाप्याज्यं संस्कृत्य स्रुवं संमृज्याथ श्वेसे का मौतिं स्रुवेण जुहुयात्
१६३ द्वादशरात्रिपर्यंतं समारूढसमिन्नाशेपि इदमेव प्रायश्चित्तं पुनराधेये संस्काराः पाक्षिकाः स्युः । अथ विछिन्नाग्नि
पुनःसंधानप्रयोगः । स च गर्भाधानप्रकरणे प्रसंगादुक्त इति नात्रोक्तं [redacted] दुक्तं तत्र वि
विसर्गकालगणनया प्रसक्तं कृच्छ्रं त्रीह्याज्यदानं च कृत्वा देशकालौ संकीर्त्य नास्तिक्यादिदृष्टशाग्नेः पुनःसंधानं करिष्य इति
संकल्प्य संस्कृते आयतने पलाशोदुंबराश्वत्थशमीवैकंकतांबुजं । वल्मीकोत्खरं वाराहं । मृज्जको खातमत्तिकाः । शा
र्कराः सिकताः सुद्मित्येवं संस्कारान् तत्र निधाय इदं त एकमिति मंत्रेण भूर्भुवः स्वरिति वा । पावनौग्निं प्रतिष्ठा क=मा
प्य । अन्वाधाने चक्षुषी ते अग्निमग्रवारमग्निं पवमानमग्निं पावकमग्निं शुचिं । अग्निं पथिकृतं अग्निं तंतुमतं चाज्येनशे
षेणास्विष्टकृतमित्यादि चक्षुषी ते स्रुवमाज्यं चतुर्गृहीत्वा त्वमग्ने सप्रथा असी त्यस्या त्रेयः सुसंमरोग्निर्गायत्री । नास्ति
क्यादिदृष्टस्याग्नेः पुनःसंधानहोमे वि० अग्नय इदं । यो अग्निं काण्वो मेधातिथिरग्निर्गायत्री अग्नय इदं । तंतुं त
न्वन् वामदेवोग्निर्जगती । अग्नय इदं । त्वन्नो अग्ने हिरण्यस्तूपोग्निर्जगती । अग्नय इदं० त्वन्नो अग्ने स त्वन्नो
अग्ने वामदेवोग्नी वरुणौ त्रिष्टुप् । उभयत्राग्नय इदं० मनो ज्योतिः अग्नय इदं० पुनस्त्वादित्या कामाः स्वाहा । अग्न
य इदं० एवं प्रत्येकं चतुर्गृहीतेनाज्येनाज्याहुतीर्हुत्वा स्रुवेण जुहुयात् । अग्नये पवमानाय स्वाहा । अग्न
ये पावकाय स्वाहा । अग्नये शुचये० अग्नये पथिकृते स्वाहा । अग्नये तंतुमते स्वाहा । ततः स्विष्टकृदादिशेषं समाप्य १६३

न्वडुहो दक्षिणा । इत्यनंतभट्टकृतश्रीरामकल्पद्रुमांतर्गते प्रयोगचिंतामणौ नास्तिक्यादिदृष्टाग्नि पुनःसंधानप्रयो
गः ।। अथ स्थालीपाकः । स चाविवाहगृहप्रवेशनीयहोमानंतरं भाविन्यां पौर्णमास्यां प्रारंभणीयो न दर्शे इति हरि
कारः । पिंडपितृयज्ञस्तु दर्शेपि भवत्येव । तस्मानंगत्वादितिमिमांसकाः । कारिकायामपि । गृहप्रवेशीयहोमात्
पौर्णमास्यां गमिष्यति । तस्यां ते प्रारभेतेति वृत्तिकारादिसाधितं । यद्यारंभे मलमासगुरुशुक्रास्तबाल्यवृद्धत्वति
तदाप्यारंभः कार्यः । यानि तु उपरागोधिमासश्च यदि प्रथमपर्वणि तथा मलिम्लुचे पौषे नान्वारंभणमिष्यते इत्या
दीनि वचनानि तानि आलस्यादिना अतिक्रांतशुद्धमासप्रारंभविषयाणि । नामकर्म च दर्शोष्टिं यथाकालं समा
चरेत् । अतिपाते सति तयोः प्रशस्ते मासि पुण्यभे इत्यपरार्कवचनादिति केचिद्याज्ञिकास्तु आधानानंतरा
पौर्णमासि चेन्मलमासगा तस्यारंभणीयादीन्न कुर्वीत कदाचनेति त्रिकांडमंडनवचनाच्छुद्धकाल एव वि
भ्रष्टेष्टिं कृत्वारंभं कुर्यादित्याहुः । निर्णयसिंधौ चैवं । स्मृतिसंग्रहे । आरंभं दर्शपूर्णेष्ट्योरग्निहोत्रस्या
दिमाप्रतिष्ठाः पंचकर्माद्यामलमासे विवर्जयेदिति । स चायं स्थालीपाकः अग्न्याधानि नापि गृह्याग्नौ कार्यः
सर्वाण्याधानानि तु कर्मणि पुनरुक्तानि । कर्तव्यस्तु तं स्थालीपाकप्रकरणे वृत्तिकृता । तत्र पौर्णमास
स्थालीपाके द्व्यहकालत्व सद्यस्कालत्व पौर्णिकल्पः । दर्शे तु द्व्यहकालत्वमेव तत्राप्यापदि सद्यस्का
लत्वमित्यन्यत्र ज्ञेयं [illegible] पार्वणे स्थालीपाके तस्य दर्शपूर्णमासाभ्यामुपवासे इध्माब
र्हिषोश्च सन्नहनमिति । उपवासमित्येकभोजनं सर्पिर्मिश्रं दधिमिश्रमक्षारलवणाशित्वमित्यादि

Indira Gandhi National
Centre for the Arts

प्र० वि० नियमालाप्यत इति वृत्तिकारः। तथा। मध्याह्ने तत्पूर्वेद्युः प्रतिपत्संधेः पूर्वदिनेऽन्वाधानं तद्दिने यागः। स्थालीपाकः
मध्याह्नादूर्ध्वं संधौ तु तद्दिनेऽन्वाधानं परेद्युर्यागः। तत्र शेषं पूर्ववद्विशेषः। प्रतिपद्यपरिज्ञाये यदि चे
१६४ त्तिः समाप्यते। पुनः प्रणीय कृत्स्नोऽपि कर्तव्यो यागविभ्रमे इति निष्पन्नानेनायं नियम इति निर्णयसिंधौ मदनपा
रिजाते चाध्वंतोमपारिशिष्टे। पौर्णमासाद्ययेह व्यं होता वायदहर्भवेत्। तदहर्भुक्तपादेवमामावास्यात्प
यपि च। अत्र सर्वोऽपि वक्तव्यो विशेषः। एवंमेवास्मापि स्तुतः। प्रयोगमात्रं तु स्मर्यते। कृतोऽसमिस्समार
६ दर्शा नेकृते प्रतिदिशो अष्टांगुलं स्थंडिलं कृत्वा प्रागायतेनानां तयोस्तिस्रो मध्ये रेखाः कृत्वा स्थंडिलमभ्युक्ष्य
सकलं नैऋत्यां निरस्यापस्पृश्य। अन्येपात्राभ्यां पिहितमग्निं जुहोदमूनाआत्रेयो वसुश्रुतोऽग्निस्त्रिष्टुप्
समारोहणे। गणो गोतमो गिस्त्रिष्टुप्। आना वा हनेवि॰ इत्यस्यैव शौनिमावास्ययाहुतीनां प्रजापतिः प्रजा
पतिर्देवता। ॐ भूर्भुवः स्वरित्यनयोः समुभाभ्यां पाणिभ्यामग्निप्रतिष्ठाप्य। चत्वारि शृंगा वामदेवोऽग्निस्त्रिष्टु
प्। अग्निमूर्तिध्याने विनियोगः॰ अनेन मंत्रेण॰ तथा। सप्तहस्तश्चतुःशृंगः सप्तजिह्वो द्विशीर्षकः। त्रि
पात्प्रसन्नवदनः सुखासीनः शुचिस्मितः। स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा। बिभ्रद्दक्षिणहस्तैस्तु
शक्तिमन्नं स्रुचं स्रुवं। तोमरं व्यजनं वामेघृतपात्रं तु धारयन्। आत्मानमभिमुखमासीन एवं रूपो हुताशन इति ध्या
येत्। ततः। प्रत्यक्षरोहजातवेदः पुनस्त्वं देवेभ्यो हव्यं वहनप्रजानन्। प्रजां पुष्टिं रयिमस्मासु धेह्यथा भव यजमा
मानाय शंयोरिति मंत्रेण समारूढ समिधं तस्मिन्नग्नौ क्षिपेत्। न तत्र त्रैवाग्नौ प्रातरोपासनं कृत्वा प्राणाना १६६

यम्य देशकालौ संकीर्त्य मम सोपात्तदुरितक्षयार्थं श्रीपरमेश्वरप्रीत्यर्थं दर्शपूर्णमासस्थालीपाकाभ्यां यक्ष्ये। तत्रेदा
नीं पौर्णमासेन। दर्शेन वा यक्ष्य इति संकल्प्य चत्वारि शृंगेति ध्यात्वा। अन्वाधाने चक्षुषी आज्येनेत्यंते। अत्र
प्रधानम् अग्निमग्नीषोमौ च द्रव्येण। दर्शे त्वग्निमिंद्राग्नी च हविर्द्रव्येण शेषेण स्विष्टकृतमित्यादि अन्वाधानसमिधो
मेवि ॐ भूर्भुवः स्वः स्वाहा। प्रजापतय इदं। तमग्निं श्वो यागांतं धारयेत्। ततः त्रिसंधानेन बर्हिर्द्विधा वेष्ट्य इध्मं
च सन्नद्ध वेष्ट्योपरि निदध्यात्। अथापरेद्युः प्रातरोपासने कृते अष्टांगुले देशे ईशानकोणमारभ्य त्रिः परिसमू
ह्य परिस्तीर्य कांश्चिदुत्तरतो दर्भान्नास्तीर्य पर्युक्ष्योत्तरतः स्थालीं चरोः प्रोक्षणमार्जनं च दर्वीं स्रुवौ सादय
दर्विहोमे पात्रं प्रणीतार्थं मध्याज्यपात्रमिध्मं क्रमेण क्रमविशंकुशांश्च। तथा शूर्पं कृष्णाजिने उलूखलं मुस
घ लेचा सादं। आज्यहोमे तु प्रोक्षणी स्रुव मासाद्य चमसं वाज्यपात्रं जनइध्मा बर्हिरित्येवं मासाद्य पवित्रे कृत्वा प्रोक्ष
णीपात्रमुत्तानं कृत्वा तत्र पवित्रे निधायाद्भिः पूरयित्वा तूष्णीं त्रिरुत्पूय। पात्राणि उत्तानानि कृत्वा। इध्मं च विस्र
स्य। सर्वाणि त्रिः प्रोक्ष्य। पुरतः प्रणीतापात्रे पवित्रे निधाय। उदकमासिच्य अक्षतान् निधाय गंधपुष्पैः प्रच्छाद्य
स्त ब्रह्मवरणं कुर्यात्। ततः ब्रैणिमुपविष्टे कर्ता ब्रह्मन्नपः प्रणेष्यामीत्युक्ते ब्रह्मा भूर्भुवः स्वर्बृहस्पतिः प्रसूत इत्युपां
शूक्ता ॐ प्रणयेत्युच्चैर्वदेत्। कर्ता तत्पात्रं नासिकासममुद्गृह्य दर्भेषु निधाय दर्भैः प्रच्छाद्य पवित्रे गृहीत्वा पुनस्तत
ऊर्ध्वे निधायाग्नये त्वा जुष्टं निर्वपामीति चतुरो मुष्टीन्निरुप्य अग्नीषोमाभ्यां त्वा जुष्टं तथैव निरुप्य पवित्रे तं
डुलोपरि कृत्वा अग्नये त्वा जुष्टं प्रोक्षामीति मंत्रावृत्या निर्वापसंख्यया प्रोक्ष्य अग्नीषोमाभ्यां त्वा दर्शे त्विंद्राग्नि
भ्यां त्वेति प्रोक्ष्य प्राग्ग्रीवे ऊर्ध्वलोमे कृष्णाजिने उलूखले मुसले न पत्नी त्रिरवहसन्ति: प्रक्षाल्य स्थाल्यां पचेत्।

Indira Gandhi National Centre for the Arts

ततः उत्तरतः आज्यपात्रे सपवित्रे आज्यमासिच्य अपोह्योत्तरतोंगारान् तेष्वधिश्रित्य ततप्तं । आज्यमवज्व
 ल्य दर्भाग्र द्वयं अंगुष्ठपर्वमात्रं प्रक्षाल्य क्षिप्त्वा ज्वलता तेनैव दर्भेण चरुणा सहाज्यं त्रिः पर्यग्निकृत्वोल्मुकं नि
रस्याप: स्पृष्ट्वा दगुद्वास्यांगारान्नग्नौ क्षिप्त्वा सवितुष्ट्वा हिरण्यस्तूप: सविता त्रिष्टुप् । आज्यस्योत्पवने वि० स
वितुष्ट्वा इति सकृन्मंत्रेण द्विस्तूष्णीं अंगुष्ठोपकनिष्ठिकाभ्यां प्रागुत्पूयादि: पवित्रे प्रोक्ष्य तूष्णीं स्कंदायस्वाहेति वा
ग्नौ क्षिप्त्वाग्ने: पश्चिमे रजौ बर्हिरास्तीर्य आज्यं तत्र निधाय दक्षिणे करे स्रुक्स्रुवौ वामे दर्भांश्चादायाग्नौ
प्रताप्य दर्भान्निधाय स्रुवस्य बिलमग्रेस्रुवस्य मध्यमग्रतः आरभ्य पश्चतो यावदुपरि शाद्गुलं सर्वादिते
प्रताप्य दर्भान्निधाय ... सं मार्ग दर्भान्नग्नौ प्रक्षिप्य स्रुवेण चरुमभि
वे स्रुवं संमृज्य दर्वीं च तथैव संमृज्य द्वयं घृतादुद्वास्य संमार्गदर्भानग्नौ प्रक्षिप्य स्रुवेण चरुमभि
घार्य द्गुद्वास्याग्नेरेणाग्नि माज्यं च नीत्वा आज्याद्दक्षिणतो बर्हिष्यासाद्य प्रत्यभिघार्य च वीज्ययोर्मध्ये
सुद्रुघा वेपात्रं निधाय । विश्वामित्र इति त्वचस्यात्रेयो वसुश्रुत ऋषि: अग्निर्देवता त्रिष्टुप् छंद: इसने
नाग्निमलंकृत्य समलमध्यान्निघार्य अयं त इध्म इति वामदेवो जातवेदा अग्निस्त्रिष्टुप् । इध्माधा
त्रिधानेविनियोग: । अग्नये जातवेदस इदं । ततः वायव्यकोणमारभ्याग्नेयीपर्यंतं नैर्ऋतीमारभ्यैशानी
पर्यंतं नैर्ऋतीमारभ्यैशानीपर्यंतं स्रुवेणोक्षयत्र प्रजापतये स्वाहेति हुत्वा उदगग्नये स्वाहा दक्षिणत: सो
माय स्वाहेति हुत्वास्थापितपात्रे च चरुमुद्धृत्योदकसंस्पृश्य मग्ने रिदमग्नीषोमयोरिदमिति प्रत्यभिमृश्य 
स्रुक्सुपस्तीर्य मध्यात्पूर्वार्धाच्चांगुष्ठपर्वमात्रमवदाय पंचावत्तीपश्चिमार्धादप्यवदाय हविरवत्तं च
अयं त इध्मा०

सिघार्य हृदि समकरं निधाय ॐ अग्नये स्वाहेति दर्भो दक्षिणपार्श्वेण जुहुयात् । आग्नय इदं । एवमुत्तरपश्चा
गाद्यवदानधर्मेणादाय अग्नीषोमाभ्यां स्वाहा । अग्नीषोमाभ्यामिदं० दर्शे तिं द्वाभ्यां द्वितीयां हुत्वा पुन
रुपस्तीर्य चरुभाग द्वयस्योत्तरार्धात् सकृत्सकृदवदाय पंचावत्तीच द्वयोरपिभागयो: । पूर्वार्धाद्दिरव
दायद्विरभिघार्य यदस्य हिरण्यगर्भ: स्विष्टकृदग्निर्घृति: स्विष्टकृद्धोमे विनियो० यदस्य स्वाहा । इत्यान्यां जु
 हुयात् । अग्नये स्विष्टकृत इदं । त्रींश्चानंरुद्राय स्वाहा रुद्रायेदं । अपउपस्पृश्य । अयाश्चेत्यस्याधिमदोअयाअग्निः 
पंक्ति: प्रायश्चित्ताज्यहोमे वि० अग्नये अयस इदं न मम । अतो देवा इदं विष्णुरिति द्वयोर्मेधातिथि: आद्या
देवा देवता द्वितीयाया विष्णुर्देवता गायत्री छंद: । देवेभ्य इदं० विष्णव इदं । व्यस्तसमस्तव्याहृतीनां विश्वामित्र
जमदग्नि भरद्वाज प्रजापतय ऋषय: । अग्निर्वायुसूर्यप्रजापतयो देवता: गायत्र्युष्णिगनुष्टुप्बृहत्य:
छंदांसि । प्राय० भू: स्वाहा । अग्नय इदं० भुव: स्वाहा वायव इदं० स्व: स्वाहा सूर्यायेदं० ॐ भूर्भुव: स्वः स्वाहा ।
प्रजापतय इदं० ततो ब्रह्मा लावायव्यदिशि स्थित्वा पूर्वोक्ताहुतीर्जुहुयात् । अमा हातं पुरुष संमितमिति
द्वयो: हिरण्यगर्भोग्निरनुष्टुप् । अग्नय इदं । यद्वो देवा असितपा महतस्त्रिष्टुप् । मरुद्भ्य इदं । ॐ भूर्भुव
 स्व: स्वाहा प्रजापतय इदं० तत: द्यौरग्निहोतेनस्रुवं पूरयित्वा धामंत इसनेन पूर्णाहुतिं जुहुयादिति
कश्चित् । अत्रैव विश्वेभ्यो देवेभ्य: संस्रावेण होमः सर्पिरेचित् । ततः बर्हिषि पूर्णपात्रमानीय पूर्णमसि असि

प्र०चि० तिरसिमामेक्षेशः प्राच्यां दिशि रेवा ऋत्विजो मार्जयंतां। दक्षिणस्यां दिशि मासाः पितरो मा० प्रतीच्यां दिशि गृह्णाः स्थालीपा०
पशवो० उदीच्यां दिश्यापः ओषधयो वनस्पतिर्मार्जयंतां ऊर्ध्वायां दिशि यज्ञः संवत्सरः प्रजापतिर्मार्जयंतां। इति प्रोक्ष्य
१६६ तु। आपो अस्मान्मातरः शुंधयंतु घृतेन नो घृतप्वः पुनंतु। विश्वं हि रिप्रं प्रवहंति देवीरुदिदाभ्यः शुचिरापूत
एमि। इदमापः प्रवहत यत्किंच दुरितं मयि। यद्वाहमभिदुद्रोह यद्वा शेप उतानृतं। सुमित्रा न० वयं द्विष्मः। इति
निर्ऋत्यां। कुशैरपः सिंचेत्। ततः यजमान पत्न्या अग्नेर्वामपार्श्वस्थित पत्न्यंजलौ प्रक्षालय यजमानो वा
पूर्णपात्रस्थं जलं मा हं प्रजामिति निषिंचेत्। पश्चात्तत्रैव स्ववामपाणौ दक्षिणपाणिना माहं प्रजामिति पूर्ण
पात्रं आत्माभिमुखं निनीय तेनोदकेन मानं पत्नीं च प्रोक्षेत्। ततः कर्ता ॐ चमसमुपस्थाय। ब्रह्मा च तेनैवोपस्था
य। परिसमूहनादि कुर्यादिति कारिका वृत्तिकारादयः। पित्र्य चरणास्तु। आश्वलायनवचनात्। पूर्णपात्रं निनीय।।
परिस्तरणानि विसृज्य। परिसमुह्य पर्युक्ष्य। विश्वानि न इति ऋचाग्निं संपूज्य। मानस्तोक इति विभूतिं धृ
त्वा। ॐ चमसमुपस्थाय। नत्वा। ब्रह्माणं चमुपस्थाय। गोत्रनामभ्यां स्वस्ति कृत्वा। नमस्कृत्य। ब्राह्मणेभ्यो
बाहुतर्पितं दक्षिणां दत्वा। इध्मपात्राण्युद्वास्य यस्य स्मृत्येति कर्मेश्वरार्पणं कुर्यात्। इत्याकुः। इत्यनंतसुत
कृतौ श्रीराम कल्पद्रुमांतर्गते प्रयोगचिंतामणौ स्थालीपाकप्रयोगः। अथ प्रायश्चित्तानि सूत्रे। विध्यपराधे प्रायश्चि १६६
त्तिरिति। विधिशब्देन विहितमुच्यते। अपराधो विहितस्याकरणमन्यथाकरणं वा। प्रायो नाम तपः चित्तिः संधा
नं।। विनष्टसंधानं प्रायश्चित्तमित्यर्थः। प्रतिनिधुपादाने तु न प्रायश्चित्तमिति वृत्तिकारः। तत्रापरिमितदेशादेव शम्या०

ग्ना१

गमनेरायतनाद्वहिर्गमने। इदं त एकं परऊत एकं बृहदुक्थो विश्वे देवास्त्रिशृण। अग्नेर्वानिप्रक्षेपणे वि० इदं त एकं पर
ऊत एकं तृतीयेन ज्योतिषा संविशस्व। संवेशनेतन्वा ३ चारुरेधि प्रियो देवानां परमे जनित्रे इति मंत्रेण
हवनीये प्रक्षिप्य समस्त समस्त व्याहृति होमं शम्या षट्त्रिंशदंगुला। कारिकायामपि। अर्वाक् शम्यापरासा
त् बहिरायतनाहुतं। प्रायश्चित्तसमाप्तं तं समर्थो जीविलुंपदि। इदं त इत्यृचा तस्य स्थानेग्निं प्रक्षिपेत्पुनः।
आज्याहुतीश्च जुहुयात्तस्मादृग्सारमेश्च पूर्ववदिति। अत्र चाहवनीयमसृज्यमानमिति गृह्यणादस्मृत
रेनेदं प्रायश्चित्तं। तेन तत्र नृदग्नौ प्रक्षेपो व्याहृति होमश्चेति वृत्तिकृत्। स्मार्तोग्निरपि नाहवनीय एव शम्यापरि
मितदेशाद्बहिर्निर्गमने त्वग्नये पथिकृते चरुः पूर्णाहुतिर्वा। पूर्णाहुतिस्तु स्रुचि द्वादशगृहीताज्येन।
स्रुवपूर्णाहुतिर्वा। तदुक्तं कारिकायां। आज्यं द्वादशकृत्वस्तु गृहीत्वा पूरयेत्स्रुचं। स्रुवपूर्णाहुतिर्वा स्यादि
ति केचन पंडितां विदुरिति। स्फुलिंगमात्रनिर्गमे तु न प्रायश्चित्तं। यत्तु परिधिभ्यो नोत्तरं प्रयाजेभ्यः प्राकुप
दि बहिः परिध्यंगारः पतेत्तदा। ब्रह्मा तमंगारं स्रुवदंडेन निक्षिपेदित्यादि प्रायश्चित्तविधानं तन्न स्मार्ते किंतु
श्रौते एव तत्र प्रयाजादि सत्वाद्यत्र च तद्भावात्। अथ स्वयं प्रज्वलने। उद्दीप्यस्व जातवेदोपघ्नं निर्ऋतिं म
म। पशूंश्च मह्यमावह जीवनं च दिशो दश। मानो हिंसी जातवेदो गामश्वं पुरुषं जगत्। अबिभ्रदग्न आगहि
श्रिया मा परिपालय। इति मंत्रद्वयेन कांस्यसमिधमादध्यात्। अग्नेश्च मलानुपघातेपुनः स्त्रीदिवेति
समित्प्रक्षेपः। एतदेवोक्तं कारिकायां। स्वयं प्रज्वलने चेदुद्दीप्यस्वेति द्वाभ्यां समिद्द्वयं। आज्येपमुपघाते तु पुनस्ते

Indira Gandhi National
Centre for the Arts

प्रा॰चि॰ ये तया हुतिः। यत्तीसमूहनाशाद्बुद्धकादिना आम्नुपपातेषु नस्त्वादि से तिसमिथ्यक्षेपः सर्वप्रायश्चित्तं च।ग प्रायश्चि॰
१६६ स्यान्तेरन्यगृह्याग्निना संसर्गे कृकं कारिकायां। संसृष्टे यस्याग्न्यग्निरन्यगृह्याग्निना यदि। बहुविवि
चये कार्यो यद्वा पूर्णाहुतिर्भवेत्। आग्नेयविविचये स्वाहे साहुतिं तथा। अथयस्य गृह्यौ वा जनपेयमलो
तनः। समरूद्धः श्रहं कुर्यात्पूर्णाहुतिमथापि वा। तथा। शवाग्निना तु संसर्गे कुर्वीत शुचये चरुं। आग्न
येशुचये। पचनाग्नेस्तु संसर्गे संवर्गाय चरुर्भवेत्। आग्नये संवर्गाय॰। वैद्युतेन तु संसर्गे कुर्याद्प्सु
मते चरुं। अग्नये प्सुमते। पर्वण्यासौ श्रुपातेतु कुर्याद्धुतभ्रते चरुं। पर्वणि व्रतलोपेतु कुर्याद्व्रतपते चरुं। जी
वतो मृतशब्द श्रवणे त्वग्नये सुरभिमते स्वाहे साहुतिः। चरुः क्षामाय कृतेमो गृहदाहेषु वेश वेत्सवेत्। अ
ग्नये क्षामवते स्वाहा। प्रायश्चित्तचरुस्थाने वा पूर्णाहुतिरिष्यते। तथा अन्वाधानोत्तरमिष्टिमध्ये आम्नु
गतो अग्याश्चे साहुसा पुनः संधानं कृत्वा भूर्भुवः स्वः स्वाहेति हुत्वा पुनरन्वाधानपूर्वकमिष्टिं कुर्या
दिति षट्त्रः। तथा अहुत्सो रंतराग्न्ना वनुगते सति हिरण्यं निधाय तस्मिन्द्वितीयामाहुतिं जुहुयात्। अ
न्वाधाय प्रतिपदि प्रमादादिष्टयकरणे। तृतीयादितिथिषु प्रातर्होमोत्तरं मस्तसमस्तमाहुतिमिहुत्वा
पुनरन्वाधायेष्टिं कुर्यात्। तथा। अन्वाधानात्पूर्वं पत्नी रजस्वला चेत्तदा पंचमादि दिवसे सद्यस्का
लामिष्टिं कुर्यात्। अन्वाधानोत्तरं रजस्वला चेत्तामपरुध्य प्रतिपद्येव यागः। तथा च श्रुतिः। यस्य व्र १६६
ते हनि पत्न्यनालंभुका स्यात्तामपरुध्य यजेतेति। अन्वाधानात्पूर्वमपि रजस्वला चेत्तदापरुध्य यागइत्यंड

ना॰

विलायामुक्तं। एवं नित्यमनिमित्तेषु श्रवणाकर्माश्वयुजीकर्मादिषु प्रथमारंभं विनापरूध्यैव यागः। इस्यत्रत्यप्यं
अन्वाधानेष्टिमध्ये चेंद्रग्रहणं चेत्तदा। नवोनवः। यमादित्या सत्याहुतिद्वयं। अत्र सूर्या सावित्री चंद्रमात्रिष्टु
ॐ यमादित्या अंशुमाप्याययंति। यमक्षितमक्षितयः पिबंति। तेन नो राजा वरुणो बृहस्पतिराप्यायय
तु भुवनस्य गोपाः स्वाहा। सूर्यग्रहणं चेत् हविरासादनोत्तेचित्रं देवानां॰ उदुत्यं॰ उद्वयमित्याज्याहुति
त्रयमिति प्रयोगपारिजाते। शौनकेन तु। अन्वाधानेष्टिमध्ये चेद्ग्रहणे सति अत्राह गोरमन्वतैनामत्वष्टु नं ५
रपीच्यं। इत्था चंद्रमसो गृहे स्वा। इत्या आहुतिः अस्य राहुणा गोतम ऋषिचंद्रमा गायत्री। नवोनव इति चं
द्रोपस्थानं च। अस्यसूर्या सावित्री चंद्रमात्रिष्टुप्। सूर्य ग्रहे तु। अत्राहेत्यनेनाज्याहुतिचित्रं देवानामि
त्युपस्थानं ज्ञेयं। स्मृत्यादिना इशिरतीताचंदामाभिपर्वपूर्वतिथिषु द्वितीया चतुर्थी नवमी चतुर्द
शीं विहायान्यासु तिथिष्वतिपदामिष्टिं कुर्यात्। तत्रातिक्रमे पर्वणि पाथिकृद्यागपुरस्सरमतिपन्न
धा नं गं कृत्वा तत्पर्वणो [illegible] कुर्यात्। तत्राप्यतिक्रमे पादकृच्छ्रः। पथिकृतीच। तृतीयप्रतिपदि पर्वद्वयलोप
निमित्तं अर्धकृच्छ्रः पथिकृदादि च। तत्राप्यतिक्रमे स्मार्ताग्निनाशनिमित्तकं पुनराधानमिति भट्टः। तथा
प्रमादादन्यानो चेत्स्वयं यजेता स्वाग्नौ चेदन्यो यजेता। तदाग्नये पथिकृते चरुं पूर्णाहुतिं वा हुत्वा पुनरन्वा
धानपूर्वकमिष्टिं कुर्यात्। तथा। हूयमानाहुतिर्यदि हविस्कंदेत्तदा देवान् जनानामन्यत्र सास्पमाशीरव
तु वर्द्धतां। भूतिर्ये तेन मुंचतु। यज्ञो यज्ञपतिमंहसः। भूपतये स्वाहा। भुवनपतये स्वा। भूतानां पतये स्वा।

ना॰

Indira Gandhi National Centre for the Arts

प्रतिमया: २३ ना

प्रा०चि० यत्र स्यत्वा प्रमयो मयाभिमर्याः। इत्यनेनाभिमृश्य स्कन्नं प्रथमामनु यूमिमं च योनिमनु यश्च पूर्वः समानं प्रायश्चित

९८ योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः स्वाहा। इत्याहुतिं हुत्वा तं स्कन्नमग्नौ क्षिपेत्। कारिकायामपि आहुति

१६८न यमानानुमन्त्रितस्कन्दे तत्र वेयदा। देवान् जनमगन्यज्ञ इत्यनेनाभिमृश्य तम्। द्रप्सश्चस्कन्देत्याहुतिं हुत्वा प्रक्षिपेदनले पुन

रिति। एवं होमं विनापि सर्वत्र हविषः स्कन्दने इदमेव प्रायश्चित्तं। तथा च कारिकायां। देवाञ्जनमगन्निति सर्वत्र स्क

न्नं त्वभिमृशेद्धविः। होतव्या स्याहुतिस्तत्र स्यादृत्वाग्ने समुच्चयादिति। वस्तुतस्तु देवाञ्जनमगन्नित्यादिद्रप्सश्च

स्कन्देत्यन्तो मन्त्रस्तेनैवाभिमर्शनं [illegible] तेनैव मन्त्रेण होमः। तूष्णीं प्रक्षेपः। तथा च देवाञ्जनमगन्निति

साद्दिनास्कन्देत्यन्तेन स्कन्नं हविरभिमृशेदिति श्रौतसूत्रे उक्तमिति युक्तं होमोत्तरमग्निमध्याद्धविः हवि

वि ष्पतने तु सर्वप्रायश्चित्तं। यदा हविरल्पं स्यात्तेनैव ...षा यजेत्। चतुःशरावमात्रं तु यवव्रीहिसिरोदनं। भो

जये तेन चान्नेन चतुरो ब्राह्मणान्नयेति। शरावः पुरुषाहारः। यदा हविर्दग्धं अदग्धं च किंचित्तत्तु मध्यपूर्वार्धा

वदानाय पर्याप्तं तदा तावन्मात्रेणेष्टिं समाप्य पुनर्यजेत्। तदुक्तं तन्त्रे। क्षामे शिष्टेनेष्ट्वा पुनर्यजेदिति। अत्रा

वर्जनीयदाहातिरिक्तो दाहो विवक्षितः। यदि तु तद्धविः कृत्स्नं दग्धं तदा तद्धविः तस्मिन्नेव प्रयोगे उत्पाद्य स एव

यागः कार्यः। तथा च सूत्रं। अशेषे पुनराहृत्तिरिति। इदमेवोक्तं कारिकायां। बहु दग्धमदग्धं वा किंचिदेव य

दा हविः। शिष्टेनेष्ट्वा पुनर्यागः स्यादन्यथा दितस्तथा। अभिमर्शपूर्वप्रयोगे सत्यपुसंपन्नाउक्तसाभूर्दक्षिणा १६८

देयाद्दुष्टे। तदुक्तं सूत्रे। दुष्टे त्विह दक्षिणां। कृत्स्नं दग्धं यदा तस्यात्पुनरुत्पादयेद्धविः। स एव यागः क

र्तव्यः पुनर्यागस्तु नेष्यत इति। यदि त्वाचिरगृहीतं मध्यपूर्वार्धावदानं दुष्टं। तदा अवदानदोषे पुनराप्यायनं ना

दवदानमिति सूत्रात् दायतनान्मध्यपूर्वार्धावदानं। कारिकायामपि। मध्यात्पूर्वार्धतो वत्तं यदि दुष्टं ह

वि भवेत्। तस्यैव हविषो वद्येन्मध्यपूर्वार्धतः पुनरिति। मीमांसकतत्त्वे तादृशास्थले मायाद्धविरन्त

रोत्पत्तिर्वचनादाज्यं वा। तथा। इध्माधानोत्तरं प्रधानहविर्नाशे त्वाज्येन तं प्रयोगं समाप्य। पुनर्योगः।

तथा च कारिकायां। इध्माधाने कृते दुष्टं प्रधानं हविरत्र चेत्। तत्स्थाने जुहुयादाज्यं होममाज्यं च जुहोत्यथ।

एवं समाप्य यद्दुष्टं तदप्सु प्रक्षिपेत्पुनः। अन्वाधानादिको यागः पुनः कर्तव्य एव हीति। तथा। प्रागिध्माधा

नतो दुष्टे प्रधानहविषि त्वथ। तद्धविः पुनरुत्पाद्य पूर्ववत्तत्समापयेदिति। तेन इध्माधानोत्तरं दोषेणैव

हविषः पुनरुत्पत्तिः। किं तु पूर्वमेवेति ज्ञेयं। कारिकायां। अंगानां चेद्धविर्दुष्टं तदप्सु प्रक्षिपेत्पुनः। स्वि

ष्टकृद्धविषो दोष आज्येनैव समापयेत्। तथा। प्रच्युतैस्तु नखैः केशैः कीटैर्वा मध्यसेविभिः। वल्मीक

कश्रुकमज्जास्थिमूत्रविट्स्वेददूषकैः। ...माद्यैरपि वी...दुष्टानि स्युर्हवींषि चेत्। भिन्नानि चेव

क्षिप्तानि दुष्टानि स्युः क्षिपेज्जले। स्रुक्स्रुवे किंचिदेतत्तद्ध्याममाहृत्य जुहुयाद्धविः। वानस्पत्यानि भिन्नानि प्रा

...मन्त्रे क्षिपेत्। अत्र सर्वत्र ...दिष्ट प्रायश्चित्तं। हविषां काकादिस्पर्शपक्षवातेन वा। ...

मः सर्वप्रायश्चित्तं च। तथा। आसन्यासंतोपहतौ जले प्रक्षेपो ...णं च। ...उपहतौ जलादिना प्रो

क्षणं सर्वप्रायश्चित्तं च। तंडुले त्वपि श्रपणात् प्रक्षालनेन शुद्धिः। एवमन्योपहतौ जलादिना प्रोक्षणं सर्व



Indira Gandhi National Centre for the Arts

प्रायश्चित्तं च। तंडुले वा श्रपणात् प्रक्षालने न शुद्धिः। एवमल्पोपहतौ प्रक्षालनाच्छुद्धिरिति सामान्यत्र तेयं। तथा। मन्म
प्र०चि० यानां भेदने भूमिर्भूमिमगान्माता मातरमप्यगात्। भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यतामिति मंत्रेण।
१६९ जले क्षिपेत् सर्वप्रायश्चित्तं च। सूत्रे। अपएता मानि मन्मया नीति। कारिकायां अन्यच्चाशुचिसंबद्धं मन्म
यं भिन्नमेव वा। भूमिर्भूमीति मंत्रेण प्रक्षिपेदेव तज्जले इति। तथा श्रवणाकर्मा दोषयूपधानादूर्ध्वं पुरो
५ पा डाशाधिश्रयणात्। प्राक् कपालशोधनं। तत्प्रायश्चित्तं हि कलं कुर्यात्। पूर्णाहुतिर्वा कारिकाकारेण त्वोनय
णाकरणे द्विषदन्नभोजने कपालनाशे च वैश्वानरेष्टिरुच्यते॥ यथा अकृताग्रयणेऽश्नीयान्नवान्नं यदि
चेन्नरः। वैश्वानराय कर्तव्यश्चरुः पूर्णाहुतिस्तु वा। द्विषदन्नं यः भुंक्ते तत्राप्येष चरुर्भवेत्॥ कपालनाशे
प्येष स्यात्। श्रवणाकर्म नाम कपालेति कपालेनान्तरितं अनुद्वासिते चेति वृत्तिकारः। तथा। हविःश्रपणात् प्राक्
यदि कपालं भिद्येत। तदा गायत्र्या त्वा शताक्षरया संदधामीति मंत्रेण संधाय। अभिन्नो घर्मो जीरदानु
येत आत्तस्तदगन् पुनः। इध्मो वेदिः परिधयश्च सर्वे यज्ञस्यायुरनुसंतरंतु। त्रयस्त्रिंशत्तंतवो यो वितत
न्वत इमं यज्ञं स्वधया यजंते। तेषां छिद्रं प्रतिदध्मो यजत्र स्वाहा यज्ञो अप्येतु देवानिति मंत्राभ्यां कपालं
जले प्रक्षिपेत् सर्वप्रायश्चित्तं च कारिकायामपि। कपालं तद्धवेद्भिन्नं प्राग्वत् श्रपणाद्यदि। तदा तं त्रोल्लु
मंत्रेण कपालं संदधाम्यथ। अभिन्नो घर्म इत्याभ्यामप्सु तत् प्रक्षिपेदथ। तच्च दोषशुचिसंबंधमाभ्यामेव क्षि १६९
पेज्जले इति। अथ पुरोडाशस्य भेदने पतने वा। किमुत्पतसि किमुत्प्रोष्ठाः शांतः शांतेरिहागहि। अघोरो यज्ञि ५

ख
यो भूत्वा सीद सदनं स्वमासीद सदनं स्वमिति बर्हिषि निधाय। ततः मा हिंसीर्देव प्रेरित आज्येन तेजसाज्यस्व
मा नः किंचन रीरिषः। योगक्षेमस्य शांत्या अस्मिन्नासीदद्बर्हिषीत्यभिमंत्र्य। सर्वप्रायश्चित्तं। ततोऽस्या
स्यान्नं निधायां। कारिकायामपि। भिद्येद्यदि पुरोडाशश्च्छिद्येद्यथवा यदि। किमुत्पतसीति मंत्रेण बर्हिष्येनं निधा
यतु। अभिमंत्रयजेत तं तु मा हिंसीरिति मंत्रत इति। तथा। यदि पवित्रं नश्येत्। तदा अग्नये पवित्रवते पूर्णाहुतिः
सर्वप्रायश्चित्तं च। कारिकायामपि पवित्रं यदि नश्येच्चेत् स्यात् पवित्रवते चरुरिति। तथा। प्रणीताः यदा निःशेषं पते
युः शेषं वा गच्छेयुः तदा सर्वप्रायश्चित्तं। आपस्तंबानां तु प्रणीतानाशे। आपो हि ष्ठा मयोभुव इति तिसृभिः
पुनर्गृहीत्वा। ततं म आपः स्वाहा। इदमुष्यं इदमिति सा ज्याहुतिः सर्वप्रायश्चित्तं च। तथा। असागिनी देवता
मुच्चार्य निर्वापे कृते। तत्संसृष्टं द्रव्यं संस्कृत्य पुनर्यथागम्यो निर्वपेत् सर्वप्रायश्चित्तं च। एवं निर्वापविपर्यासो
सर्वप्रायश्चित्तं कृत्वा। पुनर्निर्वापं कुर्यात्। तथा। अग्निरूपेन याग कृते प्रोक्षणादि मंत्रेषु देवताविपर्यासे।
तथा मध्यपूर्वार्द्धयोरवदानयोर्विपर्यासे। तथा यत्र समंत्रको निर्वापस्तत्र तूष्णीं। यत्र च तूष्णीं त
त्र मंत्रवन्निर्वापे अन्यदीयद्रव्येणान्ययागकरणे च यद्देवेभ्य आहुतिः। ततो यजमानो यस्मिन् यस्मिन्द्रमं
तद्द्यात्। अंगदेवतासु मसालेपूर्वा आहुतिः। पुष्कलदानं सर्वप्रायश्चित्तं च कृत्वा पुनर्यथाऽऽः। समा
प्ते तंत्रे प्रायश्चित्तमेव नावृत्तिः। कारिकायां प्रायश्चित्तविशेषस्य यत्र नोक्तो सा वेद्विधिः। होतव्या व्याहुतिस्तत्र पूर्ण
वस्त्विरिती ह तु। निमित्तानंतरं सर्वं प्रायश्चित्तं भवेदिह। प्रागेवो सद्यस्ते दोष आज्यसंस्कारतो यदि। प्रायश्चित्तं च वस्त

Indira Gandhi National
Centre for the Arts

प्र.चि. १६० ज्यसंस्कारानंतरं यदा। तेन आज्यसंस्कारात्पूर्वं दोषे पूर्वमेव यत्र प्रायश्चित्तमुक्तं तत्कार्यं। तदुत्तरं चेदुत्तर प्रायश्चि०
मित्यर्थः। तथा। व्युत्क्रमो देवतानां तु संकल्पादौ भवेद्यदि। मंत्राणां व्युत्क्रमस्तद्वद्धोमादौ तु भवेद्यदि। मध्यासूर्वो
र्दैवतश्चेति व्युत्क्रमो यत्र भवेद्यदि। द्रव्याणां व्युत्क्रमः स्याच्चेत्तथा निर्वपणादिषु। यद्वो देवा अतिपातयानि ब्रह्मा जुहुया
त्स्रुवाहुतिं। यन्मुख्यस्व गृहे द्रव्यं होमकर्त्रे ददाति तत्। यजमानस्तु जुहुयाद्ब्रह्माभावे। स्रुवाहुतिं। कृत्स्ने
विच्छलणायास्मिन् यत्ते द्रव्यं ददाति तत। होतव्यैकाहुतिस्तत्र व्याहृत्याद्यैः समन्वयात। तेनयविंत्रे
शेषतः प्रायश्चित्तमुक्तं तत्र व्याहृत्याहुतेरपि समुच्चय अन्ये तु अनाज्ञातमिति त्रिः अतो नो तमिति वचनाद नि ६
नाज्ञातं पुरुषसंमितः यत्पाकत्रा इति त्रयाणां यद्वो देवा इत्यस्य च समुच्चय इत्याहुः। कारिकायां तु अनाज्ञातं पु
रुषसंमितः यत्पाकत्रेति त्रयं नोक्तं। इत्येतन्नित्यप्रायश्चित्तमिति भट्टाः। वस्तुतस्तु तिस्रो अनाज्ञातं इति सप्त
म्यां तथा व्युत्क्रमो देवतानां तु संकल्पादौ भवेद्यदि स्यादौ यदि स्याद्वैनैमित्तिकं वा तेषु समुच्चयो नित्यश्च
निमित्तं विना होमत्रयं स्यं नित्यस्य व करणं तदर्थं चान्वाधाने नित्य व दुष्टेष्वपि सएव अतएव निमित्तनिश्च
यं विना स्यादोषः शदनं तेस्युक्तं दशमे तथा ब्रह्मचर्ये हव्यन्तवदने सीमातिक्रमे निषिद्धभक्षणे स्त्रीसं
गो बुद्धिपूर्वकं रेतस्कंदने। अग्नये व्रतपतये स्वाहेत्याहुतिं सर्वप्रायश्चित्तं च। अबुद्धिपूर्वे स्कंदने सर्वप्राय १६०
श्चित्तमात्रं। तथा। अविज्ञात व्रतलोपे। त्वमग्ने व्रतपा असि स्वाहा। यद्वो यर्यसा० उभयत्राग्नये व्रतपतय इदं० स
र्वप्रायश्चित्तं च। पिंडपितृयज्ञलोपे पितृयज्ञात्यये चैव वैश्वदेवात्यये च। भोजने पतितान्नस्य चैरु

वैश्वानरो यदि तीष्टिः सर्वप्रायश्चित्तं च यत्तु पिंडपितृयज्ञलोपे महाहविर्होता। वाचस्पते हृदि विधे नामन्निति
संग्रहः सप्तहोतृहोमः स आपस्तंबपरः। एवमाग्रयणलोपेपि वैश्वानरश्चरुः पूर्वमुक्तः। तथा माग्रयणातिक्र
मणो निर्विष्टिः तथा पिंडपितृयज्ञार्थं शुद्धतानि प्रणीतमाज्ञेत सर्वे प्रायश्चित्तं कृत्वा पुनरुत्सुकोकरणं। तथा।
अष्टकान्वष्टकादिलोपे प्रायश्चित्तमुक्तमग्निधाने एषि घुपि जपे मंत्रोत्तरं तु तद्दिने अन्वष्टकं संय
त्न्यूनं तदा संपूर्णमिति तत्। इदं वै घुः श्राद्धलोपे अष्टकालोपेपि। परमेष्ठी प्रजापतिः दर्शश्च
पूर्णमासं लुप्तान्युभयमेवव्या। एकस्मिन् कृच्छ्रपादेन द्वयोरर्धेन शोधनं। तेनैतादृशस्थले पूर्वोक्तप्राय
श्चित्तैस्यैव समुच्चय इति पितृचरणाः। सत्यं। अकृत्वान्यतमं यस्तं यत्नो नामधिकारतः। उपवासेन
शुध्येति पाकसंस्थाशुचै वहीति। मनुरपि। वेदोदितानां नित्यानां कर्मणां समतिक्रमे। स्नातकव्रतलो
पे च प्रायश्चित्तमभोजनमिति। यत्तु हविर्यज्ञेष्वशक्त्या लुप्तमप्यकर्मादितः। प्राजापत्येन शुध्येत पाक
संस्थाशुचै वहीति तदभ्यासपरं। अत्र स्वकाले कर्माकरणनिमित्तं प्रायश्चित्तं कृत्वा अतीतं कर्मका
कृते र्यं न वेत्युक्तं कारिकायां। प्रायश्चित्तैश्च दत्तातमपि कर्म वै। कार्यमित्येके आचार्या नित्यस्येव विपश्चित यो
इति। प्रायश्चित्तेषु सर्वत्र ब्रह्मैव कर्त्ता जुहोति न पतीति सूत्रकृदुक्तेः। तदभावे यजमान इति सद्वृ
त्या प्रमादात्० संपूर्णं स्यादिति श्रुतिरिति। इत्यनंतभट्टकृतश्रीरामकल्पद्रुमांतर्गतप्रयोगचिंता
मणौ इत्यादि प्रायश्चित्तानि॥ ५५५६। ग्रंथसंख्या ७००० शाके सत्रारे १७००

Indira Gandhi National
Centre for the Arts

प्र॰ चि॰
१६१

इतिश्रीयोगचिंतामणौप्रायश्चितः समाप्तः।



Indira Gandhi National
Centre for the Arts